# अलं ब्रह्म



रेवाप्रसाद द्विवेदी

# अलं ब्रह्म



रेवाप्रसाद द्विवेदी

# अलं ब्रह्म

( साहित्यशास्त्रे अपूर्वा दृक् )

•

रचयिता

महामहोपाध्याय

**आचार्य-रेवाप्रसाद-द्विवेदी 'सनातनः'**

सम्मानित-(संस्कृत)-आचार्यः

काशीहिन्दूविश्वविद्यालये

•

**कालिदाससंस्थानम्**

वाराणसी

२००५

# अलं ब्रह्म

(साहित्यशास्त्रे अपूर्वा दृक् )

अलङ्कार > अलम् = ब्रह्म < अलम् < अलङ्कार


रचयिता :

महामहोपाध्याय

**आचार्य-रेवाप्रसाद-द्विवेदी**

पूर्वसाहित्यविभागाध्यक्षः संस्कृतसङ्कायाध्यक्षश्च,

काशीहिन्दूविश्वविद्यालयः, वाराणसी



प्रकाशनवर्षम् २००५



© सर्वेऽधिकाराः लेखकाधीनाः



मूल्यम् : रु० ४००.००

प्रकाशकः —

**डॉ० सदाशिवकुमारो द्विवेदी**

मानदसचिवः,

कालिदाससंस्थान,

२८ महामनापुरी, वाराणसी—५

दूरभाष (०५४२) २५७०६८२

मुद्रकः

**श्रीजी प्रिन्टर्स,**

नाटी इमली, वाराणसी-१

# ALAṀ BRAHMA

( Fresh & Striking Theses on Sanskrit Poetics)

Mahāmahopādhyāya
**Ācārya Rewāprasāda Dwivedī**
Sanātana

**Kālidāsa Saṁsthāna**
Varanasi
2005

# ALAṀ BRAHMA

(Fresh & Striking Theses on Sanskrit Poetics)
Alaṁkāra > Alaṁ = Brahma < Alaṁ < Alaṁkāra

Author :

Mahāmahopādhyāya
**REWAPRASAD DWIVEDI**
Retd. Prof. and Head, Dept. of Sahitya &
Dean, Faculty of Sanskrit Learning, B.H.U.
**Emeritus Professor (Sanskrit)**
Banaras Hindu University
Varanasi-5

© Author : Rewāprasāda Dwivedī

Published in 2005

Price : Rs. 400.00

Publisher :

**Dr. Sadashiv Kumar Dwivedi**
Hon. Secretary,
Kālidāsa Saṁsthāna,
28, Mahamanapuri, Varanasi-5
sadashivdwi@yahoo.co.in
Tel. : (0542) 2570682

Printer :

**Shreejee Printers**
Nati Imali, Varanasi-1

# समर्पणम्



पं. महादेव शास्त्री

(१८९४-१९७४)

भट्टोजीदीक्षितानामपरमिव वपुर्व्याकृतौ, भव्यनव्य-
न्याये गङ्गेशवीप्साऽऽगमनिगमसुरोद्यानके पारिजातः।
काश्यां विश्वेश्वरो यो भवति कविपतिः श्रीमहादेवशास्त्रि-
पाण्डेयस्तत्स्मृतौ मे कृतिरियमुपदा, साहितीं पोपुषीतात्।।

रेवाप्रसादस्य द्विवेदिनः

## प्रावेशिकी

महान्तं प्रमोदमनुभवामः पितृचरणानां महामहोपाध्यायानामत्रभवताम् आचार्यश्रीरेवाप्रसादद्विवेदिनामद्य यावत् प्राप्त-प्रकाशानां काव्यशास्त्रीयानां संस्कृतनिबन्धानां संग्रहमिमं प्रकाशयन्तो वयम्। कालिदाससंस्थान-जनकानामेषामिदं सप्ततिपूर्त्तिवर्षम्। अद्य यावदेतैः पितृचरणैः प्रकाशिता इमे निबन्धा एकत्र पुस्तके सुलभायन्त इति विदुषां सेवाया महानेष उपक्रमः। निबन्धेष्वेषु नितान्तं महत्त्वपूर्णमस्ति **''अलं ब्रह्म''**ति। इयमेव अस्ति संस्कृतसाहित्यशास्त्रस्यैतिह्ये काश्याः अस्या चतुर्थधामतासवित्री महत्तमोपलब्धिः। पितृचरणैः निष्कर्षमिममधिकृत्य पृथगपि केचन संदर्भा रचिताः प्रकाशिताश्च। अन्येषामप्यस्त्यत्र विषयाणां निबन्धनम्। तदपि महत उपकाराय कल्पिष्यत एव।

एतस्य संग्रहस्य मुद्रणप्रकाशनव्ययं वहति मुम्बय्याः श्रीमन्महावीर-प्रसादमोरारका-शिक्षान्यासः। सुमहदिदं संस्थानम्। एतस्य सञ्चालका भवन्ति पितृतुल्यगुणाः पूर्वकेन्द्रराज्यमन्त्रिणः मान्यमान्याः श्रीकमलकुमारमोरारका-महाशयाः। अयाचिता अप्येते सूचितमात्रा एव साहाय्यराशिं संस्थानायास्मै प्रेषितवन्तः। तेनैव सप्रहर्षमिमं ग्रन्थं प्रकाशयति तेषामायुष्काममभ्युदयैषि च संस्थानमिदम्।

क्षणेस्मिन्नग्रजा डा०सर्वज्ञकुमारद्विवेदिनोऽपि प्रणम्यन्ते येषामाशी-र्भिर्वर्धतेतरां संस्थानमिदमनुदिनम्।

ॐ नमः स्वस्ति।

**सदाशिवकुमारो द्विवेदी**

३०मार्च, २००५

मानदसचिवः, कालिदाससंस्थानम्

# विषयानुक्रमः


| लेखाः | | पृष्ठसंख्या |
|---|---|---|
| | **काव्यखण्डः** | |
| १. | अलं ब्रह्म | १ |
| २. | किं तावत् काव्यतत्त्वम् | ५ |
| ३. | काव्ये धर्मधर्मिभावविवेकः | १० |
| ४. | काव्यनिष्पत्तिप्रक्रिया | १५ |
| ५. | किमिदं शब्दत्वं नाम | २२ |
| ६. | साहित्यतत्त्वविमर्शः | ३१ |
| ७. | साहित्यदर्शने तात्पर्यरूपम् | ८४ |
| ८. | संस्कृतकाव्यशास्त्रे ध्वनिसंज्ञा | १०९ |
| ९. | रसस्य शाब्दत्वम् | ११५ |
| १०. | रसनिष्पत्तिप्रक्रियायामुत्पत्तिवादः | १२४ |
| ११. | भुक्तिवादे स्थायिभावाश्रयः | १२८ |
| १२. | कवी रसं स्वदते न वा | १४६ |
| १३. | ध्वनिसम्प्रदाये केचन प्रश्नाः | १५५ |
| १४. | व्यञ्जनाविषये राजशेखरः | १७५ |
| १५. | भोजदेवस्य ध्वनिविचारः | १८३ |
| १६. | नैषधस्य २२.१५१ पद्यम् | २२३ |
| १७. | लक्षणायाः षड्विधत्वं हेत्वलङ्कारश्च | २२७ |
| १८. | अलङ्कारसर्वस्वे संशोधनम् | २४६ |

| | | |
|---|---|---|
| १९. | जगन्नाथकाव्यलक्षणे दंशः | २५१ |
| २०. | रसगङ्गाधरे सन्दर्भशुद्धिः | २६० |
| २१. | पण्डितराजकृता उत्प्रेक्षाभेदाः | २६६ |
| २२. | भारतीया व्याख्यापद्धतिः | २७२ |

## नाट्यखण्डः

| | | |
|---|---|---|
| २३. | भरतनाट्यशास्त्रादिसम्पादनविधिः पाठसमीक्षा च | २८१ |
| २४. | कालिदासरूपकेषु वस्तुविभागः | २९० |
| २५. | अवस्थार्थप्रकृतिसन्धिभेदः | २९९ |
| २६. | नाट्यप्रयोगे कुतपविन्यासाः | ३१६ |
| २७. | संस्कृतकाव्यशास्त्रं ब्रह्मविद्या | ३२४ |

# अलं ब्रह्म

अपूर्वमिदं महावाक्यं यदुत 'अलं ब्रह्मे'–ति। वेदान्तानां प्रसिद्धमेव महावाक्यम् 'अहं ब्रह्मे'–ति। यस्तावत् तस्यार्थः स एवाऽस्यापि नूत्नस्य महावाक्यस्य 'अलं ब्रह्मे'–ति स्वरूपस्य। अहमिति वर्णमातृकायाः प्रत्याहारः अकारादारभ्य हकारं यावत् प्रसृतायाः। यथा चेदं तद् अभिनवगुप्तग्रन्थेभ्यः स्पष्टम्। 'अल'–मित्यत्रापि प्रत्याहारत्वमेव पश्यामः। स च माहेश्वरस्य वर्णसमाम्नायस्य 'अइउ–ह' इत्येवंरूपेण प्रकाशितस्य। येयं वाङ्मयी सृष्टिः सा खलु वर्णसमाम्नायेऽस्ति समवेता। अर्थात्मिकाऽपि सृष्टिस्तादृश्येव। साप्यस्ति 'अल्'–प्रत्याहारसमवेता। य एव हकारान्तो वर्णसमाम्नायप्रत्याहारः स एव 'लकारान्तस्त्रिभुवनप्रत्याहारः।' यथा चेदं तदपि 'आगम'–प्रमाणकम्। साहित्यशास्त्रस्यागमः 'अहङ्कारागम' इत्युदीरितस्तत्रभगवता 'अग्नि–पुराण'–कर्त्रा वेदव्यासेन। यथा चेदं तद्धि–

**अक्षरं परमं ब्रह्म सनातनमलं विभुम् ।**
**वेदान्तेषु वदन्त्येकं चैतन्यज्योतिरीश्वरम् ॥**

इत्यनेन ३३९ तमस्याध्यायस्याद्येनैव वचनेन। नन्वत्रालमित्यस्य स्थाने मुद्रितेषु सर्वेष्वपि संस्करणेष्विव काव्यशास्त्रेतिहासाय निर्मितेषु पाण्डुरङ्गवामनकणेप्रभृतीनां ग्रन्थेष्वपि 'अजमि'–ति पाठः, नास्ति तत्र 'अलमि'–त्यस्य गन्धोऽपीति कथमेवमुच्यते इति चेन्नायं स्थाणोरपराधो यदेनमन्धो न पश्यति। पश्यन्तु भवन्तः साहित्यदर्पणस्य परिशिष्टे दत्तमग्निपुराणस्यांशम् 'निर्णयसागरतः १९३६ तमे ख्रीष्टाब्दे प्रकाशिते ग्रन्थे। तत्र हि नास्ति किमपि पाठान्तरम् केवलम् 'अलमि'–ति विहाय।

म.म.काणेमहोदयेन ख्रीष्टसंवत्सरस्य १९५४ वर्षे स्वकीय: काव्यशास्त्रेतिहास: प्रकाशित:। ततोऽष्टादशवर्षाणि प्राचीनं संस्करणं साहित्यदर्पणस्य। मुम्बईत एव च प्रकाशितमिदं या हि कणेमहाशयानां निवासभूमि:।

अथ प्रश्न: अजालयोर्मध्ये को वा पाठो बलवत्तर इति। तत्राज–पाठमेव प्रसिद्धं दृष्ट्वाऽनुमोदेरन्नार्या:, किन्तु पाठान्तरेऽपि न न निध्येयमेभि:। यदिदम् अलमि'–ति पाठान्तरमिदमपि नितान्तं महत्त्वपूर्णम्। अस्य हि निष्पत्तिर्वैदिकाद् 'अरम्' पदादुत्प्रेक्षामहे। अरमिति अव्ययपदं संहिता–स्विवारण्यकेष्वपि सुलभमेव। तस्यैवास्य विकास: 'अलम्' इति भाषाविज्ञानवित्सु विदित एष पन्था:। अस्य स एवार्थो यो हि 'अरम्' इत्यस्य। पर्याप्तिरेष्वन्यतमोऽर्थ:। लौकिके संस्कृतेऽपि अलधातु: प्रसिद्ध एव पर्याप्तये। पर्याप्तौ संपन्नायामनुभावो वारणम् 'अलम्, अलम्'इति। स चायमर्थोऽमरकोषादिष्वपि प्रसिद्ध:।

व्यवहारेऽपि खलु शताब्दीर्यावदासीदसौ सुलभ:। तथाहि शोभा–सौन्दर्य–चमत्कारान् विहाय न प्रभवति काव्यमात्मलाभाय। या ह्येव शोभा, तदेव सौन्दर्यम्, यदेव च सौन्दर्यं स एव चमत्कार:, य एव च चमत्कार: स एवातिशय:, स एव च रस:। अत एवाभियुक्ता 'सादृश्यमुपमे'–त्यनुक्त्वा 'सादृश्यं सुन्दरं वाक्यार्थोपस्कारक–मुपमालङ्कृति'रिति वक्तुमुत्सहन्ते। यश्चासौ चमत्कार: तद्धि नान्यद् ऋते प्रत्यक्चैतन्यस्यानन्दकोशस्योल्लासम्। एवं च पार्यन्तिक एवार्थोऽत्र रसादिपदैरभिप्रेयते। पार्यन्तिकश्चार्थो यद्यानन्दरूपस्तर्हि न संभवति तस्य सच्चिदानन्दात्मरूपाद् ब्रह्मणो भिन्नत्वम्। एवं च सर्वे चमत्कारिणोऽर्था ब्रह्मतत्त्वमनवमृश्य न विरमन्ति स्वेभ्य: स्वेभ्यो व्यापारेभ्य:। एवञ्चोपपन्न एव अलंशब्दस्य ब्रह्मवाचकत्वम्। एवम् 'अल: अला' 'अल् चालेन' संबद्धं सत् शब्दार्थयोस्तादात्म्यगाथामपि सत्यापयति।

अथ 'अलङ्कार' पदे या प्रकृति: सा ब्रह्मार्थप्रतिपादिका

अलधातुनिष्पन्नाकारान्ता 'अल' इति वाक्। अलमिति द्वितीयान्तो वा निर्देशः, अव्ययरूपो वा। अथ 'कार'—पदं किमर्थकमिति प्रश्नः।

करणार्थकात् कृधातोः करणार्थेऽधिकरणार्थे वा प्रयुक्तेन घञा, अलङ्क्रियतेऽनेनेति, अलंक्रियतेऽस्मिन्निति वा कारशब्दार्थः। तदुक्तं सौन्दर्यमलङ्कारः, करणव्युत्पत्त्या पुनरलङ्कारशब्दोऽयमुपमादिषु वर्त्तत इति तत्रभवता वामनेन। कुम्भकार इतिवत् कर्मण्युपपदेऽपि शक्यव्युत्पादा परिभाषैषा। सन्ति च भिन्नभिन्ना अन्या अप्यत्र प्राप्तप्रसरा व्युत्पत्तयः। किन्तु पृच्छाम 'ओङ्कार' इत्युक्ते किमर्थकः कारप्रत्यय इति। ननु स्वरूपार्थक एव स इति चेत् किमपराद्धं तर्ह्यलङ्कारेण यदत्र कारः स्वरूपार्थाधिकारात् प्रच्याव्यते। ननु ब्रूमः 'अलमित्येवालङ्कार' इति। आगतमेवं ब्रह्मार्थकत्वमेवाल—शब्दस्य। इयमेव हि गाथा अहङ्कारपदस्यापि— 'अहमित्येवाहङ्कार' इति। एष विपर्यस्तः सर्वोऽपि विपर्यासः भूषणादीन—र्थानभिव्याप्य विद्यमानः। प्राप्ताः स्मः 'अलं'—पदार्थम्। यश्चासौ चमत्कारो नासावतिरिच्यते ब्रह्मरूपादानन्दकलापरपर्यायादर्थात् सर्वत्रापि उपमादिभ्यो रसं यावत्।

इत्थमलङ्कारपदं भगवताऽपौरुषेयेण वेदेनोपपादितं ब्रह्मैवार्थतया निर्दिशतीति प्रमाणितं तमाम्।

स चायं व्यापकोऽर्थः पाणिनिं यावद् भूषणार्थेऽपि रूढिमशान। अशान च हाराद्यर्थैकपरत्वं ततः परम्। अवहेलितस्ततो भगवान् वेदः, समादृतश्च रूढ्यर्थः सर्वैरपि अलङ्कारशास्त्रप्रजापतिभिः आ दण्डिन आ वामनम् आ वामनाच्चा मम्मटादिकान् वैयाकरणधुरीणान्।

यो हि साम्राज्यसिंहासनात् प्रच्यावितस्तस्य कीदृशो न्वधःपातो—ऽसुलभः। सैवेयं कथा अलङ्कारपरिभाषायाः। कटककुण्डलादितुल्यतां प्रापित एष प्रमुखतमं रसरूपमर्थं सर्वथैव परित्यज्य। आग्रहग्रहिलास्तिष्ठन्त्यत्र ध्वनिमार्गिणः 'अलङ्कारत्वं रसत्वं चान्धकारप्रकाशयोरिव विप्रतिषिद्धमेव सर्वथेति।

काव्यशास्त्रस्य कृते प्राचीनेषु ग्रन्थेषु क्वचन क्रियाकल्पमिति पदं लभ्यते क्वचिच्च तद्भिन्नं किमपि। विद्यागणनायामपि नोल्लिख्यते काव्यशास्त्रमिति किन्तु प्रतिपत्तव्यमस्माभिः? आगमस्तु दृश्येत। साहित्यागमो लभ्यते आग्नेये पुराणे। द्रष्टव्यं तत्रास्य किं नामेति। अन्तिमे यदधोदत्तं पद्यं तत्रास्या आपत्तेरुत्तरम्। इदं च तत् पद्यम्–

**'अहङ्कारो निघण्टुश्च शिक्षाकल्प इहोदित'** इति।

इह = आग्नेये पुराणे निघण्टुः उदितः, शिक्षाकल्प उक्तस्तद्वदेवाहङ्कार उक्तः। कोऽर्थः? अहङ्कारः अहं तत्त्वम्। येषु अध्यायेषु काव्यशास्त्रं नाट्यशास्त्रं चोदिते तेषामागमः अहङ्कार इति गृहाण। भावरसादीनां प्रतिपादनं खलु अहं–तत्त्वस्यैव प्रतिपादनम्। साहित्ये स एव विषयो मुख्य इति साहित्यशास्त्रस्याहङ्कारागम इति संज्ञापि पूर्णतः समर्था।

वाक्यविचारात्मिका या विद्या तस्याः प्रसिद्धं नाम भवति मीमांसेति। जैमिनिमुन्युक्ता सा वेदवाक्यानां मीमांसा। काव्यं पुनर्लोकवाक्यम्। तस्य यस्यां विचारस्तस्या मीमांसायास्तर्हि स्वत एव सिद्धं काव्यमीमांसात्वम्, साहित्यमीमांसात्वं च। प्रायोजि च मीमांसाशब्द एव मीमांसकैरपि काव्यशास्त्राय। तथा ह्यप्पयदीक्षितैरलङ्कारविषये निर्मितो ग्रन्थः चित्रमीमांसापदेनैव व्यपादेशि। पण्डितराजोऽपि रसगङ्गाधरं काव्यमीमासा इत्यादि वक्ति–'करोति कुतुकेन काव्यमीमांसाम्' इति।

इदमत्र निगमनं यद् साहित्यशास्त्रस्य प्राचीनतमा संज्ञा– 'अहङ्कारागमविद्ये'ति, अलङ्कारपदे च यद् अलमिति पूर्वपदं तस्य संज्ञि ब्रह्मेति। वक्तुमुचितमतः साहित्यस्य महावाक्यमस्ति 'अलं ब्रह्मे'–ति।।

# किं तावत् काव्यतत्त्वम्

द्वे खलु अधिष्ठाने काव्यस्य कविः सहृदयश्चेति। तत्र सहृदयगतं यत् काव्यं तस्य निष्पत्तिः अभिहितान्वयपथेन भवति। कविगतस्य पुनः अन्विताविधानदिशा। तत्र सहृदयगतं यत् काव्यं

तस्य हि विश्वजनीनो व्याहारः 'काव्यं काव्य'मिति, 'पोएट्री पोएट्री'ति, 'शायरी शायरी' ति। तस्यास्य किं नु स्वालक्षण्यमिति प्रश्ने भारतीयानामाचार्याणां यान्युत्तराणि तेषामेतावन्मात्रमेव गात्रं 'वाक्यात्मा शब्दविशेष एव काव्यमि'ति। वाक्यं शब्दबन्धविशेषस्य संज्ञेति शब्दस्य गुणपदार्थत्वेन काव्यस्यापि सप्तसु पदार्थेषु गुणपदार्थत्वमापद्यते। यच्चास्य वैशिष्ट्यं तत् स्वगतं स्वप्रतिपादितार्थगतञ्चेति द्विविधं साकल्येन। तत्र

## स्वगतम्

स्वगतं वैशिष्ट्यं वर्णस्वालक्षण्यगतं वर्णविन्यासगतञ्च। तत्राद्यं वृत्तिरिति परिभाष्यते। कोमला परुषा चेत्यादिस्तस्याः संज्ञा। कोमलत्वं परुषत्वं च वर्णगतौ विशेषौ। तौ हि गुणपदव्यपदेश्यौ।

यच्च विन्यासगतं वर्णवैशिष्ट्यं तस्यानुप्रास इति, यमकमिति, श्लेष इति च संज्ञा। तस्यास्य वैशिष्ट्यस्यान्वयव्यतिरेकौ वर्णमात्रविन्यास—सद्भाविति शब्दपरिवृत्तिमसहमानत्वेनानयोः शब्दैकाश्रितत्वं प्रतीमः।

## स्वप्रतिपादितार्थगतम्

शब्दो हि ध्वनिरूपः। तस्य यश्चिद्गत आत्मा स स्फोटः। तत्रार्थेन सह संकेतग्रहः। अर्थस्याप्यर्थान्तरैः सम्बन्धः, तेषामप्यर्थान्तरैरिति तदिदं भगवत्याः प्रतिभास्वयम्प्रभाया गुहाभुवनम्। तदिदं गुहाभुवनं तादृशं यत्र

प्रविष्टस्य न भवति प्रतीतिः कालस्य, न च स्फुरति मतिर्बहिरागमनस्य। समाधिमिव प्रविष्ट एषोऽनुभविता विश्वमपि विश्वोत्तीर्णत्वेन स्वदते, भुङ्क्ते, रसयति, विगलितवेद्यान्तरश्च रमते, जायते चात्मारामोऽद्वयी। संवदत्यस्य चेतोधातुः कविवागुपस्थितेनाऽनुभवेन।

ये चाप्यर्थाः, एषामपि विशेषाः चित्तवृत्तिरूपाः, ततश्चैषां सर्वेषां महासंज्ञा 'भाव' इति। अर्था अपि मधुरत्वेनोजस्वित्वेन च द्वैविध्यमाप्ता अनुभूयन्ते। एषां प्रतीतौ या स्फुटता तां 'प्रसाद' इति संगिरन्ते प्राज्ञा आचार्याः। प्रसादत्वव्याप्यजातित्वमेव मधुरत्वौजस्वित्वयोः। त इमे त्रयो गुणाः (१) माधुर्यम् (२) ओज इति वैशेषिकौ द्वौ, सामान्यश्चैकः (३) प्रसादः। अन्ये च सप्त गुणाः 'श्लेषः, सुकुमारता, अर्थव्यक्तिः, उदारत्वम्, कान्तिः, समाधिश्चेति'। त इम आ भरतमुनेरा च दण्डिनं प्रसिद्धाः। लावण्यमाभिजात्यमौचित्यं चापरे गुणा यान् वक्रोक्तिविद उदाजह्रुः। अत्र मम्मटादयो विप्रतिपद्यमानाः पण्डितराजादिभिरेव प्रतिक्षिप्ताः। काव्यगुणानां पृथगस्तित्वे किं मानमिति विप्रतिपत्तौ न ह्येव किमपीति केचिदातिष्ठन्ते, अनुभव एवेति तान् निराकृत्य प्रतिष्ठन्ते वामनाः, 'सन्ति केचिन्न च भवन्ति केचिदिति सन्दिहानास्तिष्ठन्ति भामहादयः'। समासगता पदसंख्या, वर्णप्रकृतिश्चोपादान–कारणत्वेनामनन्ति संमर्शिनो विज्ञा अत्र। सेयं काव्यार्थगताया गुणव्रज्याया गाथा। शब्दगताः माधुर्यादयः अर्थमाधुर्यादीनपेक्ष्यैव आत्मानं लभन्ते।

अत्रार्थयोजनागता विशेषाः सादृश्यादयः। विविक्ताः संकीर्णाः, संसृष्टाश्च भवन्ति ते। ते चामी अलङ्कारपदस्य रूढ्या समाक्रान्ताः वन्यपशुमात्रवाचको मृगशब्द इव हरिणमात्ररूढ्या। वस्तुतस्तु **काव्यस्य सर्वेषामेव धर्माणां महासंज्ञैषा यदुतालङ्कारः**। तत्र कारपदं स्वार्थकमेव ओङ्कारपद इव। अलमिति च यदवशिष्टं पदं तद्धि परब्रह्मवाचकतया

प्रसिद्धम् आग्नेये महापुराणे **'अक्षरं परमं ब्रह्म सनातनमलं विदुः'** इत्येवम्। तच्च प्रकृते प्रेक्षकस्यात्मतत्त्वमेव। तदिदं तत्त्वं सर्वेषामेव काव्यधर्माणां जीवातुभूतम्। एवं च अलङ्कार इत्येषा महासंज्ञैवैका काव्यक्षेत्रे। पर्याप्तिरस्याः पर्यायः। अत एव च काव्यशास्त्रमिदम् अलङ्कारशास्त्रमिति व्यपदिश्यते। क्रियाकल्पादयः पुनरस्य दूरं विप्रकृष्टाः।

रूढ्या पुनरलङ्कारशब्द एष उपमादिविच्छित्तिपरः।

एतेषामेवास्पष्टो विन्यासो लक्षणनामा धर्मः।

एतेषामेव चयनं मार्गपदेन रीतिपदेन वा व्यपदिश्यते।

इदं चात्रावधेयं यद् अलङ्कारा इमे वाक्यधर्माः। नैते तथैव स्वप्नेऽपि भवन्ति वाच्या यथा रसाः भावा वा। वाक्यार्थानामाकाङ्क्षामात्रभास्यतायाः सिद्धान्तितत्वात्। यथा चैतत् तद् व्युत्पत्तिवादादिभ्यः सुखेनावसातुं शक्यम्। **सेयमुक्तिव्रज्या काव्यस्य**।

अथ ये तावदुच्यमाना अर्थास्तत्समवायजन्यप्रभावरूपाश्च येऽर्थास्ते रत्यादयोऽपि काव्यार्था एव, तेषामपि काव्यमात्रादेवोपलब्धेः। एषा चार्थजातिरन्तरङ्गा। अस्याः प्रतीतौ प्रमाणं भावनानामकः काव्यव्यापारः सहृदयतासतत्त्वः। **रहस्यव्रज्येयं** काव्यमात्रस्य। इमां प्रविष्टा भावकाः क्वचिदश्रूणि पातयन्ति, क्वचिद् दशनानि दर्शयन्ति, क्वचित् स्निग्धचेतस्कन्ति, क्वापि द्रुह्यन्ति, विस्मयन्ते, जुगुप्सन्ते च कुत्रचित्। इयमेव हि भुक्तिः। लोकोत्तरा ह्येव काव्ये सैषा, सामग्र्या अभावेऽपि पाकस्य संपत्तेः। सोऽयं विभावनाख्यो व्यापारः यत्र विश्वविधातापि विस्मयते। उत्पाद्यन्ते कमलानि जलमात्रगात्रे धात्रा। प्रतिपाद्यन्ते किन्तु तानि कविकर्मणा कान्तानां मुखपाणिपादादिरूपेणापि स्वैरम्। न च कुप्यति तत्र विश्वस्यास्य विधाता। विश्वमिदं भगवत्याः सूक्तिदेव्याः। अत्र प्रभवः स्फोटात्मा भगवान् शब्द एव।

अथापरं क्षेत्रं यत्र सर्वेऽप्युपर्युक्ता विशेषा अभिनयद्वारा प्राप्यन्ते, लभ्यते च रसः।

आम्। अस्ति तत्, किन्तु तत्र प्रभवत्वं भजति क्रिया, अनुक्रियात्मा। अनुक्रियया विभाविता ये भावा सामाजिकसंवित्तिमारोहन्ति तेषामग्रिमा यात्रा काव्यवदेव संपद्यते, अयं तु विशेषो यदभिनये मञ्चादीनां द्रव्याणामपि भवति अभ्यर्हितत्वेनोपयोगः, काव्ये पुनः केवला भगवती वाग्देव्येव सर्वंसहचमत्कारायते विश्वविवर्त्तनासु दिव्यातिदिव्यासु। उक्तमिदमस्माभिरेव—

**वन्दामहे पद्मदलाभिरूपां पञ्चप्रशाखीं कविनायकानाम् ।**
**विवर्त्ततेऽर्थात्मतया स्वयं हि यामाश्रिता काचन सूक्तिदेवी ।।**

(स्वातन्त्र्यसंभवस्य २.१)[१]

नाट्ये ह्याङ्गिकादयोऽपि भवन्त्यभिनयाः, काव्ये पुनरेक एव वाग्रूपः सः। एवं हि नाटकं व्यापकम्, काव्यं तस्यैकदेशः। सा च भिन्ना कथा यत् काव्यार्थोऽपि नाट्यायते।

वस्तुतस्तु आभ्यन्तर एव कश्चन व्यापारो यो हि नाट्यमिति च व्यपदिश्यते काव्यमिति च। अत एव महामुनेर्भरतस्यानुशासनं शाकुन्तलादिग्रन्थात्मना परिणतिमाप्तं यत् तस्य संज्ञा काव्यवेद इति यश्चास्य प्रयोगस्तस्य नाट्यमिति। परिणतिरियं चित्रमूर्त्यादिष्वप्यनुभूयते। अस्ति च तत्रापि परिणामो रसात्मक एव, किन्तु न भवति तत्र सृष्टिः शब्दमयी। ततश्च कलामात्रत्वमेव तेषाम्, न तु काव्यत्वम्।

अयमत्र निष्कर्षो यत् शब्दविशेष एव काव्यमिति व्यपदिश्यते। तस्य विशेषश्च बहुविधोऽपि ब्रह्मापरपर्य्यायभूतया केवलया अलङ्कार इति

---

१. स्वातन्त्र्यसंभवम् (१—३३ सर्गात्मकं महाकाव्यम्) रचयिता : रेवाप्रसादद्विवेदी, प्रकाशक : कालिदाससंस्थानम् २८, महामनापुरी वाराणसी—५, प्रकाशनविभागः, काशीहिन्दू—विश्वविद्यालयश्च।

महासंज्ञयाभिधीयते। एवं चोच्यते

**आनन्दकोशस्योल्लासे लोकोत्तरविभावना ।**
**अलङ्कृतार्थसंवित्तिः शाब्दी काव्यमितीष्यते**[१]।। ति।

काव्यालङ्कारकारिका १

**चमत्कारजनकार्थप्रतिपादकशब्दत्वं काव्यत्वमिति च ।**

रसगङ्गाधरे।

**कविगतं च काव्यम्**

आनन्दकोषोल्लासिकी अलंकृतार्थसंवित्तिः। अत्रार्थपदं शब्दपरमपि, शब्दस्यापि गुणपदार्थत्वेन द्रव्यपदार्थत्वेन वा दार्शनिकेषु प्रसिद्धेः। ततश्च अलङ्कृता या शब्दादुद्भिन्नार्थसंवित्तिः सैव काव्यमिति निष्कर्षः। इयं चान्विताभिधा'। संहितानामेवाऽर्थानां कविप्रतिभायामाविर्भावात्। एतस्यां चेदानीं यावन्नास्ति संस्पर्शो वाचः। विवक्षोदये तु स संपद्यते। तस्मिन् क्षणे यापि भाषा कवेरभ्यस्ता सैव समुपतिष्ठते। एवं काव्यार्थस्य भाषया यः संबन्धः तस्य जन्मनः परवर्त्तित्वमिति कञ्चित् कालं कविता 'अस्पृष्टशब्दाऽपि तिष्ठति। ततश्च निष्पन्नस्य काव्यस्य भवति संबन्धो भाषया न पुनर्भाषैव काव्यमिति। सोऽयं कविगतोऽन्विताभिधानवादः।।

◈

१. काव्यालङ्कारकारिकायां तु पाठः 'अलङ्कृतार्थसंवित्तिः कविता सर्वमङ्गले'ति। प्रकाशकः— कालिदाससंस्थानम्, २८ महामनापुरी, वाराणसी—५

# काव्ये धर्मधर्मिभावविवेकः

शब्दार्थशरीरं तावत् काव्य'—मित्युक्तेऽन्विताभिधानवाददिशाऽर्थ—विशिष्टस्य शब्दस्याभिहितान्वयवाददिशा शब्दोपहितरूपस्यार्थविशेषस्य, एतदुभयसमुच्चयदिशा चैतदुभयस्य धर्मित्वमभियोक्तृषु प्रतीतचरमेव। अथ प्रश्नः यदिदमत्र धर्मित्वं तस्य द्रव्यगुणकर्मादिगतद्रव्यत्वादिषु किन्निरूपित—व्याप्यत्वमिति, अपीदं द्रव्यत्वं व्यापकीकृत्य प्रतिभासते, गुणत्वं, क्रियात्वं वा। न द्रव्यत्वम्, शब्दार्थयोर्विकल्परूपबौद्धत्वेनैव वाङ्मयमात्र इव काव्येऽपि व्यवस्थापनात्। अत एवात्र सर्वेऽपि पदार्था विवर्त्तता नातिवर्त्तन्ते। विवर्त्तश्चायं चितः। चिच्चाचिदुपहिता। सोऽयं विषयोपग्रहो विषयिणः, विषयित्वापरपर्याय—बौद्धत्वपरिग्रहो वा विषयस्य। सर्वोऽप्यसौ मानसो ग्रन्थिः, बाह्यार्थसंवादासंवादौ पुनरत्र प्रामाण्याप्रामाण्यमात्रनिर्धारणप्रयोजनकौ। न हि काव्यार्थस्य ताभ्यामात्मलाभः कश्चित्। अत्राभिधापौर्वापर्यप्रसूतावन्विता—भिधानाऽभिहितान्वय—वादौ, तदुभयसंफेटात्मा समुच्चयवादश्च विलीयन्ते—ऽखण्डार्थवादे प्रातिभवाक्यार्थवादे वा ज्ञानमात्रपर्यवसितात्मनि। एवं च यदिदं काव्यरूपं धर्मि प्रातिभात्ममात्रमिदम्। प्रतिभा च बुद्धिगतः स्फारविशेषः। जलवीचिन्यायेन सोऽप्यसौ स्फारो बुद्धेरनतिरेकी। बुद्धिश्चान्तःकरणत्वेन द्रव्यम्, ज्ञानत्वेन पुनर्गुणः। काव्यस्यात्मोपगृहीतान्तः— करणवृत्तिरूपत्वाद् यदिदमस्य द्रव्यत्वं तदपि गुणत्वप्रायमेव। कविकर्म काव्यमिति यः प्रायोवाद एतेन प्राप्तमपि कर्मत्वं काव्यप्रसवित्र्याः प्रतिभाया एव कुक्षिं प्रविशति, न तु निष्पन्नस्य काव्यशरीरस्य। सामान्यं जातिरूपम्, समवायः सम्बन्धविशेषः, विशेषः परमाणुत्वव्याप्यपृथिवीत्वादिविभाजक उपाधिः, अभावश्च स्वप्रतियोगिविशेषणतया प्रतिपद्यमानः प्रकाशविशेषः। न प्रसज्यते

धर्मरूपाणामेतेषां धर्मिरूपं काव्यत्वम्। प्रातिभो गुणपदार्थ एव हि काव्यमिति ततो निश्चितो निगर्वः। एवं च प्राप्तमत्र गुणस्य धर्मित्वम्। प्रतिहतवस्तु–भावश्चैष वादो यद् गुणे गुणानङ्गीकारः, स्वप्नादिषु बुद्धिविकल्पेषु, ततश्च गुणात्मकेषु विश्वमात्रस्यैव स्वीकृतचरत्वात्। एवं च सत्यपि गुणत्वे न धर्मित्वप्रहाणिः काव्यस्य।

अथ यः काव्यत्वनियामको विशेषस्तस्यालम्भावापरपर्यायालङ्कार–पद–वाच्यस्य 'दोषाभावः, गुणः, रसः, अलङ्कारः, रीतिः, वृत्तिश्चे'–ति षोढा विभागः। तत्र रीतयो गुणानतिरिक्ताः, अलङ्कारानतिरिक्ताश्च वृत्तय इति ध्वन्यालोककारः। एवं चतुर्धा क्रियते विशेषस्यास्य परिकल्पनम्। अत्रापि दोषगुणयोरन्योन्यविपर्य्ययात्मत्वं भरतवामनयोः प्रतीतमिति दोषाभावस्य गुणत्वे, गुणस्य वा दोषाभावत्वे त्रिविधत्वमेवावशिष्यते काव्यधर्मस्य 'गुणः, अलङ्कारः, रसश्चे'–ति। त इमे ज्ञानरूपिणि काव्यसंज्ञके धर्मिणि केन वा सम्बन्धेन तिष्ठन्तीति प्रतिपत्तव्यम्। लोके हि धर्मिणा शरीरेण धर्मयोर्गुणालङ्कारयोः समवायः संयोगश्चेति सम्बन्धौ। गुणा धैर्यादयस्तद्वन्तं रामादिकं धर्मिणं गुणिनं विहाय न तिष्ठन्तीति तदपृथग्भावितया समवाय एवैषां धर्मिभिः। कटकादयोऽलङ्काराः पुनः संयोगमेव सम्बन्धीकृत्य प्रवर्त्तन्ते स्वात्मलाभाय। अत्र एव काव्येऽपि केषाञ्चिदियमेव प्रतिपत्तिर्यदत्र गुणानां समवायेन, उपमादीनां च संयोगेनैवावस्थितिरिति। तामिमामुद्भटादयः प्रतिवदन्ति, प्रतिजानते च गुणानामिवोपमादीनामपि समवायेनैव काव्यधर्मत्वम्। तामिमां सम्बन्धनिर्धारणव्यथामसहमाना ध्वनिवादिनः पुनरत्र तूष्णीमेव तिष्ठन्ति–भेदयन्ति च माधुर्यादीन् उपमादिभ्यः विशेष्यतावच्छेदकत्वे भेदमुपकल्प्य। तथाहि तन्मते गुणनिष्ठायाः प्रकारताया या विशेष्यता तस्या अवच्छेदको धर्मो रसत्वम्। अवच्छेदे चास्याव्यभिचरितत्वं विशेषः 'गुणा रसस्योत्कर्षका एव भवन्ती'–ति। या चालङ्कारनिष्ठा प्रकारता

तन्निरूपितां विशेष्यतामवच्छेदयन्त्येते शब्दत्वेनार्थत्वेन वाङ्गत्वव्याप्य–जातिरूप–धर्मविशेषान्यतरेण। निवेशयन्ति चात्र व्यभिचारमपि, न हि सादृश्यमुपकुर्वीतैव काव्यार्थस्य, न वाऽनुप्रासः काव्यशब्दस्येति च तेषामभिप्रायः। यदुच्यते–

**तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः ।**
**अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत् ।।**

ध्वन्या० २.६ इति

**ये रसस्याङ्गिनो धर्मा शौर्य्यादय इवात्मनः ।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ।।**

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ।।'**

का०प्र० ८ इति च।

एतेषां मते रसस्य काव्येन सह व्यङ्ग्यत्वरूपः सम्बन्धः। व्यङ्ग्यत्वमिदं किमिति प्रश्ने पुनरेते कवयन्ति 'कार्यत्व–ज्ञेय–त्वाभ्यां भिन्नमननुमेयत्वव्याप्यं प्रतीयमानत्वापरपर्यायं प्रकाशमानत्वं हि तदि'–ति। पृथगेवेयं व्रज्या तर्कपरिव्राजकाणाम्। सम्बन्धविषये त्वेतेषां दृष्टान्तः शरीरशरीरिसमुदायः। तत्र शब्दार्थयोरङ्गत्वम् रसस्यात्मत्वम्, माधुर्यादीनां शौर्य्यादिवत् गुणत्वमात्मवृत्तित्वं च, उपमादीनां कटकादिवदलङ्कारत्वं बाह्यत्वं चेति। तत्राप्यात्मशरीरयोः करकटकादीनामिव संयोगः सम्बन्धः, शौर्य्यात्मनोश्च समवायः सर्वसंप्रतिपत्तिविषयः। शरीरशरीरिसमुदायदृष्टान्तेन काव्यं निनीषन्तः 'इमावेव संयोगसमवायाख्यौ सम्बन्धौ रसादिभिरुपगन्तव्यौ किमि'–ति पर्य्यनुयोगे वाचम्यमायन्ते ते। यथैतत् तत् काव्यप्रकाशादिभ्यः स्पष्टमेव भूयसा। वस्तुतस्तु स्वप्नो वा चित्रप्रतिबिम्बादि वाऽभिषेक्तव्यमत्र दृष्टान्तभावे। ततश्च पुत्र–पितृरूपाः पदार्था बहिर्बाह्या भिन्नाश्च भवन्तोऽपि यथा स्वप्ने

द्रष्टृमात्ररूपा अभिन्नाश्च भवन्ति, भवन्ति च वस्त्रकान्तिप्रभृतयो बहिर्बाह्या अपि चित्रप्रतिबिम्बादिषु समवायिन एव तथैव काव्यनामनि पदार्थे गुणादयः। यश्चासौ रसः स यदि रसिकमात्रवृत्तिः हीयतेऽस्य काव्यात्मत्वम्, रसिककाव्ययोरभेदस्याप्रसिद्धत्वात्। या चास्य व्यञ्जकता सा खलु काव्यधर्मश्चेन्नातिवर्त्तेत रसोक्तिव्यपदेश्यमलङ्कारविशेषम्। एवं च प्रत्युपस्थितं स्याद् रसस्यापि अलङ्कारत्वं जरत्तरकाव्यालङ्कारिकसम्मतम्। उपपद्येत ततो रसस्यापि काव्ये समवायः।

एवं च दोषाभावानतिरिक्तगुणनिष्ठया, अलङ्कारानतिरिक्त–रस–निष्ठया च प्रकारतया निरूपिता या काव्यनिष्ठा विशेष्यता तयोरुभयोरपि येन सम्बन्धेनावच्छित्तिः स खलु समवाय एव, गुणगुणिनोरिव। सेयं प्रमेयदृष्टिः। प्रमातृदृष्टौ पुना रस इवोपमा–माधुर्य्यादयोऽपि रस एव, तेषामेषां चमत्कारितायां योगक्षेमस्य समानभावेन जागर्त्तेः सर्वाऽनुभव–विषयत्वात्। यदुक्तमस्माभिः 'ये कलायामलङ्काराः कलानाथे तु ते रस' इति। स्वप्न–चित्र–प्रतिबिम्बादिगतेषु धर्मधर्मिष्वयमेव यः समवायस्तस्यैव नव्येषु तार्किकेषु स्वरूपसंबन्ध इति कविता। स्वरूपे हि सम्बन्धा भवन्ति, न तु सम्बन्धस्यैव स्वरूपभावः। अथापि सम्बन्धतत्त्वस्याभावे स्वरूपस्यैव सम्बन्धता कल्प्यते। तथा च गन्धवती पृथिवीत्युक्तेऽनुल्लिखिताया गन्धत्वनिष्ठायाः प्रकारतायाः स्वरूपसंबन्धावच्छिन्नत्वं तार्किकाभिमतमपि वस्तुतो यथा सम्बन्धाऽभावरूपत्वमेव तथैव चित्रप्रतिबिम्बादिषु प्रतिभासमानानां वस्त्रशरीरादीनां परस्परमभेद एव सम्बन्धाभासप्रतिपत्सनाथः। सोऽयम–खण्डार्थतावादः काव्यपदार्थानाम्, नास्त्यत्रान्विताभिधानाभिहितान्वय–तदुभयसमुच्चवादानां प्रसरः, पद–वाक्यत्वकषायित्वसंविदाम्। अथ लोकगतानां सम्बन्धानां चित्रादिष्वपि न नास्ति स्मरणमिति स्वस्मरणाश्रिता तेषां तत्रोपपत्तिरित्युच्यते तर्हि भाक्तेन वर्त्मना लौकिका अपि स्वीक्रियन्तां

चित्रादिषु प्रातिभासिकेषु पदार्थेषु सम्बन्धाः संयोगादयः। स्वीक्रियन्तां च शरीरशरीरिन्यायौपयिकाः पदार्थ—सम्बन्धास्तद्गता विशेषाश्च पारस्परिकाः। नास्त्यसौ पारमार्थिकी कथेति केवलं ब्रूमः। ततश्च निश्चिनुमः—

**यो वै पिता भवति पुत्रतयाऽपि सोऽयं**
**स्वप्ने स्वसंविदुदयात्मनि संप्रतीतः ।**
**भेदश्च पुत्रपितृभावसमुत्थितोऽस्तं**
**नैति स्वतो बत यथाऽस्ति तथा कला नुः ।।**

◈

# काव्यनिष्पत्तिप्रक्रिया

भारतीयायां वसुमत्यां नाट्यशास्त्रस्य विधातारं भरतमुनिमारभ्य साम्प्रतं यावद् यावन्तः कालपर्यया: परिपूर्तिमिता: काव्यलक्षणे तेषां या प्रतिपत्तिस्तामिमां काव्यनिष्पत्तिप्रक्रियात्मना प्रत्यभिजिज्ञासामहे। पुरुषनिष्पत्तिरिव काव्यनिष्पत्तिरपि स्वनिष्ठायां विशेष्यतायामवच्छेदीकुरुते पूर्णत्वमेव। तथाहि सद्योजातं शिशुशरीरं नेत्रद्वयम्, कर्णद्वयम्, हस्तपादद्वयम्, इत्यादिक्रमेण पूर्णत्वावच्छिन्नमेव निष्पत्तिं लभते, न पुनरेकैकमङ्गं परिहाय। सेयं पूर्णता प्राचीनैराचार्यैर्दोषाभाव इति पर्यभाषि। दोषो नामापूर्णता तदभावश्च पूर्णता। दोषाभावोऽयं गुणपदेनापि प्रतिपाद्यते भरतेन[१]। वामनेन पुनर्गुणाभावो दोषतया[२]। अनयोर्भरतो वर्धमानत्वे दत्तदृष्टिः कुहूतः प्रस्थाय पूर्णिमां प्राप्नोति यत्र कलावृद्धिश्चन्द्रबिम्बस्य। वामनः पुनः पूर्णिमामास्थाय प्रतिप्रतिष्ठते कुहूं यावत्, लक्षयते च कलाहानिं चन्द्रबिम्बस्य। सिंहवीक्षणमेतदिति प्रतिपाद्यं भवति[३]।

तदियं काव्यनिष्पत्तेः प्रथमा भूमिः। अत्राचार्या भरतमुनिप्रभृतयः। एतत्संप्रदायेऽनुयायिनो दण्डिप्रमुखा आचार्याः। एतेषां महावाक्यं गुणाः खलु काव्यस्यात्मेति। गुणाश्च दोषविपर्य्यासात्मान इति संख्यया दशैव

---

१. एते दोषास्तु विज्ञेयाः सूरिभिर्नाट्यसंश्रयाः ।
एत एव विपर्यस्ता गुणाः काव्येषु कीर्त्तिताः ।। नाट्यशास्त्रे १६.९५

२. 'गुणविपर्य्ययात्मानो दोषाः' वामनस्य काव्यालङ्कारसूत्रम् २—९—१

३. अपूर्णतैव दोषस्तद् दोषाभावश्च पूर्णता। काव्यालङ्कारकारिका १४८।
या चैषा पूर्णता सैव गुणत्वेन मुनेर्मता, गुणाभावे च दोषत्वं वामनेन निरीक्ष्यते ।
पूर्णताभूमिकां रूढस्यास्य तत् सिंहवीक्षणम्, राकेन्दौ दत्तदृष्टेर्नु कुहूं यावन्निरीक्षणम् ।।
—कारिका १५०

भरत इव दण्डिन्यपि। उद्दिश्य निदर्शिताश्चैते काव्यलक्षणनाम्नि स्वकीये काव्यशास्त्रग्रन्थे काव्यादर्श इति प्रसिद्धे दण्डिना एवम्–
(१) श्लेषः (२) प्रसादः (३) समता (४) माधुर्यम् (५) सुकुमारता।
(६) अर्थव्यक्ति (७) रुदारत्व (८) मोजः (९) कान्ति (१०) समाधय (१.४१) इति।
उक्तञ्चानन्तर्येण–

**इति वैदर्भमार्गस्य दश प्राणा गुणाः स्मृताः ।**
**एषां विपर्य्ययः प्रायो दृश्यते गौणवर्त्मनी ।।** (१.४२)–ति।

सोऽयं सम्प्रदायो नाट्यशास्त्रकृतो मुनेर्भरतस्य। यदुक्तमेतेन षोडशेऽध्याये–

**एते दोषास्तु नाट्यस्य/काव्यस्य मया सम्यक् प्रकीर्त्तिताः ।**
**गुणा विपर्य्ययादेषां माधुर्यौदार्यलक्षणाः ।।**

ना.शा. १६.९५।

**श्लेषः प्रसादः समता समाधि–र्माधुर्यमोजः पदसाकुमार्यम् ।**
**अर्थस्य च व्यक्तिरुदारता च कान्तिश्च काव्यस्य गुणा दशैते ।।**

इति ना.शा. १६.९६।

अत्रेदं स्पष्टं यद् दोषाभावगतं दशसंख्यावत्त्वमेव गुणगतस्य दशसंख्यावत्त्वस्य नियामकम्। तदिदमाद्यमधिकरणं काव्यशारीरके।

भामहोऽत्र प्रतीपायते। स हि गुणनामकं तत्त्वं स्वीकर्त्तुं विचिकित्सते, प्रस्तौति च सहसैव प्रसादो माधुर्यं चेति द्वितयमेव लक्षणोदाहरणाभ्यां भामहालङ्कारनामके काव्यालङ्कार–नाम्ना प्रसिद्धिमापिते स्वकीये काव्यलक्षणग्रन्थे। अन्ते च 'ओजो'–पि समुद्दिशति किन्त्वलक्षयित्वाऽनुदाहृत्य च। मार्गोऽयमेतदीयो वामनेन परामृश्यते–'नाऽसन्तः सद्वेद्यत्वात्। न भ्रान्ताः, निष्कम्पत्वात्, न पाठधर्माः, सर्वत्राऽदृष्टेः।। (काव्यालङ्कारसूत्राणि ३.१५.२५–२७)

प्रसादस्य माधुर्यस्य च गुणत्वाय प्रकल्पते तयोः संप्लव ओजसा। तथोक्तमेतेन 'प्रसादो द्विविधः गाढबन्धः शिथिलबन्धश्चे'ति। अनयोः प्रथम ओजः, द्वितीयश्च माधुर्यम्। अनयोर्दोषाभावत्वेऽपि गुणत्वं कुत इति प्रश्ने वामनस्योत्तरसूत्रम्—'गुणः संप्लवात्'। अत्र वृत्तिः 'गुणः प्रसादः, ओजसा सह संप्लवात्, स शुद्धस्तु दोष एवेती'—ति (३.१.७)। संप्लवे पुनरनुभवं प्रमाणयति—'सत्वनुभवसिद्धः (३.१.८)। अत्र वृत्तिः 'स तु संप्लवो—ऽनुभवसिद्धः, तद्विदाम्, रत्नादिविशेषवत्' इति। अत्र श्लोकः—

**करुणप्रेक्षणीयेषु संप्लवः सुखदुःखयोः ।**
**यथाऽनुभवतः सिद्धस्तथैवौजःप्रसादयोः ।। इति**

केवलस्यौजसो गुणत्वाभावोत्प्रेक्षामिमां स्फोटयति कुन्तकाचार्यो यो हि वक्रोक्तिजीविते तमेतं गुणं न गणयति। वामने पुनः प्रसादस्यापि स्वातन्त्र्येण गुणत्वे प्रश्नः। माधुर्यस्य पुनरुभयोरप्यनयोराचार्ययोः समः समादरः।

भरतसंप्रदाये यदि न्यूनत्वमप्याद्रियते तर्हि समधिकत्वमपि कल्पयितुं शक्यत एव। तदपि च राजशेखरकुन्तकयोरालोक्यते। राजशेखरः काव्यमीमांसायां गुणाँस्त्यजति। कुन्तकः पुनः सामान्य—विशेषाभ्यां गुणान् राशिद्वये विभज्य सामान्यत्वेन (१) औचित्यम् (२) सौभाग्यं चेति गुणद्वयं कल्पयति, विशेषत्वेन पुनः माधुर्यम्, प्रसादश्चेति प्राचीनौ द्वौ नवीनौ च लावण्यम् आभिजात्यञ्चेति। माधुर्यप्रसादयोरपि मार्गत्रयगतत्वेन प्रायशो—ऽभिनवत्वमेव। सेयं स्वैरताया अनुज्ञा। प्रभव एतस्या भामह एव।

मध्ये वामनाचार्योऽपि स्वातन्त्र्यमधिश्रयते। स हि 'श्लेषप्रासादीने'व पृथगर्थगुणत्वेन परिकल्प्य गुणानां विंशतिसंख्याकत्वमुपपादयते। आनन्द—वर्धनाचार्यो माधुर्यम् ओजः प्रसादश्चेचि त्रीनेव गुणानाद्रियते, अन्येषां त्यागे मौनमाश्रयाणस्तेषामेषां नियमने रसानभिषिञ्चति। वस्तुतस्त्रितयेऽपि गुणास्तन्मतेन

रसनिष्ठा एव,ताननुसृत्य क्रियमाणाः शब्दार्थबन्धा अपि मधुरादिपदव्य-वदेश्या इति समेषामेव ध्वनिमार्गिणां संस्कारः। काव्यप्रकाशकारः श्रीमम्मटोऽप्यभिनवगुप्त इवैवानन्दवर्धनमनुसरति। मम्मटः पुनरन्येषां त्यागे हेतुत्रयमुपष्टम्भयति-

**केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः ।**
**अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ।।**-ति।

तदिदं द्वितीयमधिकरणं काव्यशारीरके। अत्र प्रमुखं प्रतिपाद्यं गुणः। अत्राचार्या भरतमारभ्य वामनं यावज्जाता मनीषिणः। एतस्मिन्नेवावधौ रुद्रटस्यापि गणना, किन्त्वसावपि राजशेखरवन्नैव स्पृशति गुणान्। एतेषां महावाक्यं भवति 'गुणाः खलु काव्यात्मे'-ति। उक्तमेव हि वामनेन-'रीतिरात्मा काव्यस्ये'-ति (१.२.६)। अत्र विशिष्टा पदरचना रीतिरिति, विशेषो गुणात्मेति[१] परवर्त्तिभ्यां सूत्राभ्यां 'गुणविशिष्टा पदरचना 'रीति'-रिति फलितार्थे विशेष्यतावच्छेदक-पदं गुण एव सिद्धं भवतीति।

वस्तुतस्तु वामनस्य मते रसरूपं सौन्दर्यमेव काव्यात्मपदं भजते, तस्यैवैकस्य साध्यत्वात्। सति च साध्ये साधनस्यात्मत्वमुपचारैकसाध्यम्। उक्तमिदमस्माभिर्द्वाविंशत्या कारिकाभिः काव्यालङ्कारकारिकाग्रन्थपरिशेष-भूताभिः। तथाहि-

**ततश्च वामनाचार्यो रीतिरात्मेति सूत्रयन् ।**
**सौन्दर्यमात्मा काव्यस्येत्येव सूत्रयतेऽस्फुटम् ।। १२।।**

**वामनाचार्यसिद्धान्तस्तर्कैरुक्तैस्ततो भवेत् ।**
**'सौन्दर्यवाद'-नाम्नैव व्यवहाराय युक्तिभाक् ।। १३।।**

**वामनाचार्यसिद्धान्ते न रीतिर् न गुणः, परम् ।**
**सौन्दर्यमेव काव्यात्मा यद्वाऽलङ्कार एव स ।। २२।।** इति

१. १.२.७, १.२.८ काव्यालङ्कारसूत्राभ्याम्।

सौन्दर्यमपीदं यथावल्लक्षितमस्माभिरेव 'वस्तुनिष्ठं करणप्रत्याहार-जनकत्वं सौन्दर्यम्' इति। ततश्च चित्रमूर्तिगीतिकाव्यार्थगता या सहृदयप्रत्याहारजनकता तदवच्छेदकत्वं सौन्दर्यमि'ति फलितोऽर्थ: प्रत्यपाद्यस्माभि: 'कलासमाधि'रिति ग्रन्थे नाट्यानुशासनस्य चतुर्थाध्यायरूपे।

तदिदं द्वितीयमधिकरणं काव्यनिष्पत्तिप्रक्रियायाम्, यत्र प्राधान्यमभजद् गुणतत्त्वमेव काव्यशरीरगतम्। अथ तृतीयमधिकरणम्।

**अलंभाव:**

'काव्यं ग्राह्यमलङ्कारादि'ति वामनोक्तौ अलमित्येकं पदम्, 'कार' इति च द्वितीयम्। अनयो: प्रथमम् अलेत्यजन्तमपि 'अलि'ति च हलन्तमपि भवति। प्रकृतिभूतो धातुरत्र 'अल' इति 'अल्' इति वा। अर्थश्चास्य भूषण—पर्याप्ति—वारणानि। एतेषु पर्याप्तिरेव प्रमुखा भूषणवारणयोस्तत्कार्यत्वेन प्रसिद्धत्वात्। यो हि तृप्तिं भजते स खलु नाधिकं जिघृक्षति, दीयमानञ्च 'अलमलमि'ति निवारयति, यश्च भूषितो भवति स खलु अलङ्कृत इत्युच्यते वरप्रभृति:। कियन्मात्रं वालङ्करणं वरादीनामङ्गेष्वपेक्ष्यत इति जिज्ञासिते समीचीनमुत्तरमेकमेव 'यतोऽधिक उद्वेजको माभूदि'ति। तदिदं तृप्तिमूलकमेव। पर्याप्तिमूलां च पश्यामस्तृप्तिम्। एवं पर्याप्तिरेव 'अल'—धातो: प्रमुखोऽर्थ:। अनेनार्थेन क्रोडीकृतं समग्रमपि विश्वम्। य एषोऽस्य सर्ग:, यो वा अस्य विसर्ग:, यश्चापि ऋतुचक्रात्मा परिणामोऽस्य, तत् सर्वमप्यत्रार्थरूपेण गृह्यते। अत एवाग्नेये महापुराणेऽलमिति ब्रह्मेति च पर्यायतयैवोपस्थाप्यते। तथा हि वचनम्—

**अक्षरं परमं ब्रह्म सनातनमलं विभुम् ।**
**वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम् ।।**

अध्याय: ३३९.१

वैदिकीयं परिभाषा, तत्र 'अरम्' इति श्रुति:[१]। रस्य लत्वे तु

१. ऐतरेय आरण्यके १.४.१।

'अलमि'ति। प्रसिद्धम्—'अलि'ति यद्धलन्तं पदं तेन सुशकमेव अपौरुषेये माहेश्वरे वर्णसमाम्नाये यः खल्वल्प्रत्याहारस्तस्य ग्रहणम्। स च 'अइउण्' इति सूत्रत आरभ्यते समाप्यते च 'हल्' इत्यनेन सूत्रेण। सोऽयं समग्रोऽपि वर्णसमाम्नायोऽपौरुषेयः। अलेनार्थजातमिवाऽलाऽनेन सम्पूर्णमेवाक्षरजातं संकेत्यते। ताविमौ शब्दार्थौ। अलिति शब्दः, अल इति चार्थः। उभयत्राऽपि पर्याप्तिरेव भगवती परमा।

अथ यत् 'कार' पदं तस्यापि नैकधा भवति व्युत्पादनम्। यथा चैतत् तत् पाणिनेर्भगवतोऽष्टाध्याय्यास्तृतीयस्याध्यायस्य द्वितीयतृतीय—पादगतैर्घञ्विधायकैः सूत्रैरवगन्तुं शक्यते। भवन्ति हि तत्र सूत्राणि यैर्विधीयते घञ्प्रत्ययः कर्त्रर्थेऽपि। कर्मण्यणि (३.२.१) ति कर्मण्युपपदे विद्यमाने करोतेः कर्त्रर्थ एव घञ् विधीयते। कुम्भकार इति चाऽत्रोदाहरणम्। प्रकृतेऽपि 'अल' पदस्य द्वितीयान्तं रूपं कर्मण्यादाय शक्यत एव व्युत्पादयितुं घञा 'कार' शब्दः। तथा चालं पर्याप्तं करोतीत्यलङ्कार इत्यपि स्वीकर्त्तुं शक्यतेऽलङ्कारशब्दस्य कर्त्तृव्युत्पत्तिः। 'वर्णात्कार' इत्यनेनापि पथा कारपदं स्वरूपेऽर्थे शक्यस्वीकारः ततश्चालमेवालङ्कार इति स्वीकर्त्तुं शक्योऽर्थोऽत्र। भावेऽपि घञः प्रयोगं पश्यामः। एवं चालम्भाव एवाऽत्रालङ्कार—पदप्रतिपाद्यो भवेदेव। उक्तं चैतदस्माभिरेव—

**अलंभावो ह्यलङ्कारः स च सौन्दर्य—तत्कृतोः ।**
**विभक्तात्मा विभुर्जीवब्रह्मणोश्चिद्घनो यथे ।।—ति।**

एष चालंभावः शब्दगतेष्वनुप्रासादिषु लक्ष्यते, अर्थगतेषु च रूपकोपमादिषु। य एष रस इति सर्वातिशायी धर्मः स द्विधोपलभ्यते इक्षुरस इत्यादिष्वास्वाद्यात्मतया, आस्वादतया च रसस्य तृप्तः इत्यादिषु प्रयोगेषु। काव्ये नाट्ये कलासु च सुलभ एषः। रत्याद्युपसृष्ट एष तॉस्तान—भिधानविशेषानादत्ते शृङ्गार इति हास इति वीर इति करुण इति वा।

योऽयमास्वादः अत्रहि विषयोपहितं प्रत्यक्चैतन्यमेव विषयः, तदेकमेव च विषयि। तच्चोच्यते 'स्वाकार इवाऽभिन्नोऽपि गोचरीकृत' इति। अयमास्वाद एव रसः, असावेव सौन्दर्यरूपो हृदयहारी विषयगतो विशेषः। प्रत्यक्चैतन्यस्य ब्रह्मरूपत्वेन स्वीकृताविययमेव तृप्तिप्रसूतिः पर्याप्तिः। एवं चालंभावार्थकेनालङ्कारपदेन आब्रह्म स्तम्बान्ताः सर्वेऽपि विसीयन्ते पदार्थाः, विसीयन्ते च तत्प्रतिपादनपरायणाः सर्वेऽपि वाचकाः स्फोटरूपाश्चैतन्यमूर्त्तयः शब्दा अला प्रत्याह्नियमाणस्वरूपाः। उपलब्धिरियमुपस्थाप्यते काव्यालङ्कारकारिकाया द्वितीयस्य संस्करणस्योपसंहारे—

**प्रत्यक्चैतन्यमात्मा चेद् ब्रह्माऽभेदेन रस्यते ।**
**अलम्भावोऽप्यलङ्काररूपो ब्रह्मेति रस्यताम् ।। इति।**

एवं चेयमेव काव्यनिष्पत्तेः प्रक्रिया यत् पूर्वं प्रतिभायां दोषाभावरूपा पूर्णता, ततस्तस्यां गुणा यौवनादयः, तेषां चालम्भावो रसपर्यवसानक इति।

◈

# किमिदं शब्दत्वं नाम

'शब्दः शब्द' इति यस्य कृते बंहीयान् प्रवादः, तद्गतं शब्दत्वं किमिति ताटस्थ्यं स्वरूपं चादाय प्रतिष्ठमानैः प्रविमृष्टचरमेवाभियुक्तै–र्व्याकरणमहाभाष्यकारं भगवन्तं पतञ्जलिमारभ्य नागेशभट्टं यावत्। सोऽयं सुमहानवधिः। साहस्त्रीद्वयमयमधिकुरुते संवत्सराणाम्। अत्र द्विधा प्रावर्त्तत सिद्धान्तपारम्परी। तत्राद्या– 'अर्थप्रतिपादकत्वे सति श्रोत्रेन्दियग्राह्यत्वं शब्दत्वमि'–ति, द्वितीया च 'श्रोत्रग्राह्यविषयत्वमेव शब्दत्वमि'–ति। अत्राद्यपक्षे व्याकरणमहाभाष्यकारो भगवान् पतञ्जलिरेवाद्यः। प्रतिज्ञातमेव तेन 'येनोच्चारितेन सास्नालाङ्गूलककुदविषाणिनः संप्रत्ययः सोऽयं प्रतीतपदार्थको गवादिध्वनिरेव शब्द इति।[1] चरमे पुनरापतन्ति मीमांसकमूर्धन्याः शबरस्वामि–कुमारिलमण्डनादयः। तथाहि–

(क) 'श्रोत्रग्रहणे हि अर्थे लोके शब्दशब्दः इतिशबरस्वामी[2] (१.१.१ पृ० १० चौ०)

(ख) लोके हि श्रोत्रेन्द्रियविज्ञेयमात्रानुपातिनी शब्दशब्दप्रवृत्तिः।

अतः श्रवणग्रहणतैव शब्दलक्षणं न्याय्यम्[3]।' इति मण्डनमिश्रः, भट्टकुमारिलस्य

**तस्माच्छ्रोत्रपरिच्छिन्नो यद्यर्थं गमयेन्न वा,**
**सर्वथा तस्य शब्दत्वं लोकसिद्धं न हीयत'।।**

इति (श्लोकवर्त्तिक स्फोटप्रकरणे पञ्चमं) वार्त्तिकम् आश्रित्य तु महामतेरस्येत्थमुक्तिः।

---

१. व्याकरणमहाभाष्यस्थ १.१.१ पृष्ठ १२

२. शाबरभाष्य १.१.१ चौखंभा० पृष्ठ १०

३. स्फोटसिद्धिः पृष्ठ००

आलङ्कारिका अपि तमिमं परमेव पक्षं परमयन्तः शब्दशब्दमात्रं स्वैरं प्रयुञ्जाना अवालोकिषत, नावेक्षिषत ते तस्यास्य 'शब्द' इति शब्दस्य को नु विषय इति विमर्शमनुजानानाः। यथेदं तदध्यक्षभूयिष्ठं तेषामेषां काव्यलक्षणवाक्यैः 'शब्दार्थौ काव्यमि'—ति, 'शब्दविशेषः काव्यमि'—ति प्रभृतिभिः।

पक्षयोरनयोश्चरमः सामान्यमात्रमधिकरोति शब्दस्य, प्रथमः पुनः सविशेषं तत्। वाग्व्यवहारे हि केवलस्य शब्दत्वस्य नोपयोग इति तत्रार्थप्रत्यायकस्यैव श्रोत्रग्राह्यस्य शब्दस्य, शब्दत्वं युज्यते वक्तुम्। तदेव चात्र वाक्पदेन भाषापदेन चाभिधीयते लोके।

किं तावद् वाक्त्वमिति प्रश्ने यदुच्यते सा वाक्, तत्त्वं वाक्त्वमिति 'वचोऽशब्दसंज्ञायामिति (७.३.६७) सूत्रे तत्रभवान् भगवान् पाणिनिः। अस्ति चात्र तन्त्रम् 'उच्यत इती'—ति पदे। तेन द्वितयस्याप्यत्र ग्रहणम् 'उच्चार्यमाणत्वधर्मिणः श्रोत्रग्राह्यस्य वस्तुनः, ततः प्रतीयमानस्य चेति। अनयोर्यः प्रतीयमानः स खलु वचो ण्यता प्रसिद्ध्यता 'वाच्य'—पदेनाभिधीयते, यश्चाऽपरः स खलु तथैव प्रसिद्ध्यता 'वाक्यपदेन'। एवं क्रियाकारकादिरूपा या वाच्यपदवाच्या अर्थात्मिका वाक् सा हि परमार्थसती, बहिरप्युपलभ्यमाना व्यवहारसत्तालङ्कृता सत्यत्वेनावसातुं शक्या, या पुनर्वाक्यपदवाच्या वाक् सा यादृच्छिकीति कृत्वा बहुधा, तद्यथा 'संस्कृतं, प्राकृतं, हिन्दी, अंग्रेजी'—ति। एक एव हि 'गमनानुकूलव्यापाराश्रयो देवदत्त' इत्येवंरूपो वाच्योऽर्थो विविधं प्रतिपाद्यमानो दृश्यते तेषु तेषु, वाक्येषु, भाषाभेदेन। तद्यथा देवदत्तो गच्छती'—ति संस्कृते, 'Devadatta goes' इति अंग्रेजीभाषाया 'देवदत्त जाता है' इत्यादि च हिन्दीप्रभृतिषु भाषासु समान एव प्रतिपाद्यस्वरूपो वाच्योऽर्थः। वाक्यवाच्ययोरसौ विषयभेदः प्रतिपन्न एव सर्वैर्दार्शनिकैः।

अत्र प्रश्नः भाषापदेन प्रागुक्तयोर्द्वयोरेव वा संग्रहः, वाक्यमात्रस्य

वा। द्वयोरेवेति पक्षे वाच्यरूपा या वाक् तस्या मध्यमात्वेन व्यपदेश:, या च वाक्यरूपा, तस्या वैखरीत्वेन। अयमत्र विशेषो मध्यमायां वाच्यरूपया वाचा सह वाक्यरूपाया अपि तस्या अनुवेधो नियत: इति। भवति च तयो: सादृश्यातिशय: 'गौर्गौरि'—त्यभिन्ना—भिधान—प्रत्ययविषयतया तन्मूला च तादात्म्यप्रसिद्धिरनयो:।

अथ येयं वाक्यरूपा वाक् तामधिकृत्य प्रश्न: 'किं तावद् वाक्यत्वमि'—ति। तत्रोत्तरं **'तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विते'**—त्यमरकोषादिषु प्रसिद्धम्। अन्वयपदेन विवक्षित: सम्बन्धोऽत्र द्वादशधा प्रसिद्ध:। तत्रापि—

**वृत्तिर्विवक्षा तात्पर्यं प्रविभागो व्यपेक्षणम् ।**
**सामर्थ्यमन्वयैकार्थ्येत्यष्टौ वृत्त्यादय: स्मृता: ।।**

इत्येवमष्टविधो य: संबन्धस्तस्य भाषात्वावच्छिन्नं प्रति निष्पादकत्वम्। न खलु किमपि वाक्यमष्टविधान् सम्बन्धान् इमान् प्रविहाय वाक्यतां प्रतिपद्यते। तेषामेषां लक्षणानि भोजराज:, साहित्यमीमांसाकार: शारदातनयश्चेत्ये—तैरस्माभिश्च बहुधा प्रपञ्चितानि। तथा च साहित्यमीमांसायाम्—

१. वृत्ति: पदानां व्यापार: पदार्थप्रतिपादने,
२. विवक्षा वक्तुमिच्छा स्यात् समसंक्षिप्तविस्तृतै: शब्दैरर्थस्य,
३. वर्त्तते यत्पर: शब्द: स शब्दार्थ इति स्थिति:,
४. एतावतोऽर्थभागस्य स्यादियान् शब्द इत्ययम् प्रविभाग:,
५. परस्परं, पदार्थानामाकाङ्क्षा स्याद् व्यपेक्षणम्।
६. समर्थ्यं च पदार्थानां भवेत् सम्बन्धिरूपता।
७. परस्परस्य ग्रथनं पदार्थानामिहान्वय:।
८. ततश्चैकत्वसम्पत्तिरेकार्थीभावनं विदु:।। इति।

अत्र योऽयं चरमाणां सामर्थ्यान्वयैकार्थीभावानां मध्ये सम्बन्धात्मान्तर्यामी, स एव वाक्यस्यार्थ:, स एव च तात्पर्यार्थ इति सर्ववादिसम्प्रतिपन्नोऽर्थ:।

अथ विप्रतिपत्तिः 'गौः' अत्र गकारौकारविसर्जनीया न शक्यन्त उदीरयितुं यौगपद्येन। गकारस्योच्चारणे जायमाने न श्रूयत औकारः, औकारस्योच्चारणे च विसर्गः, विसर्गस्य चोच्चारणे गकारौकाराविति नास्ति संभव एतासां गकारादीनां वर्णपदवाच्यानां श्रुतीनां समुदायस्य, अस्ति च समुदाय एवासामर्थप्रत्यायकः, केवलानां गकारादीनां श्रुतीनां प्रयोगे तस्यालाभात्। ततश्च वर्णसमुदायादर्थप्रत्ययः, समुदायश्चोच्चारणे न संभवतीति समुदाये कारणान्तरं स्थानान्तरं च कल्पनीयं भवति। तच्च कारणान्तरं संविदिति सर्वेषां तन्त्रकृतां संप्रतिपादः। हृदयरूपमाकाशं च स्थानान्तरमस्यै कल्प्यते क्रियते चास्य परिभाषा मध्यमा वागिति। सेयं शब्दार्थसंमिश्रलक्षणा विमर्शरूपा चितिः। द्वैतमत्र शब्दार्थयोः स्फुटमवमृश्यते। अतश्चास्या अपि भाषापदेन संप्रत्ययः। अत्रैवावभासते शब्दार्थयोरभेदोऽपि। तथाहि सत्यपि वस्त्रकाययोर्मेदे प्रतिबिम्बे तदभाव एव, न शक्यन्ते चित्रादिभ्यो वस्त्रादीनि निराकर्त्तुं, प्रच्यावयितुं च कायाद् वस्त्राणि, अस्ति चैतेषां तत्रोत्पत्तौ यौगपद्यम्। न खलु चित्रे पाश्चात्त्यानि भवन्ति वस्त्राणि शरीरेषु। छायाग्राहिका खलु अत्र प्रमाणम्, जलादिषु प्रतिफलितं प्रतिबिम्बादिकं च। शब्दार्थसंमिश्रोऽपि चितौ नतरां लभते भिदम्। अत एव प्रत्यवमर्शो 'गौः' इति शब्दः, 'गौरित्यर्थ' इति। अत एव सृष्टौ शब्दप्रत्यवमर्शोऽपि कारणतावच्छदेककोटिं प्रविशत्येव 'स भूरिति व्याहरत्, भुवमसृजदि'—ति, तत एव वाक्। इदं त्वत्रावधेयं यद् येयं चितिः नासौ परमार्थतः शब्दः, नापि वाक्, न चापि भाषा, लोके वैखरीमव्युदस्यैव प्रवर्त्तन्ततेरां वागादयः शब्दाः, न भवति च भगवती मध्यमा वैखरीस्पृष्टा, वैखर्य्या अवमर्श एव हि सा, ततश्चास्ति तयोर्विषयविषयिभावो, न त्वभेदः। ततश्च भागलक्षणया प्रायोवादिक एव प्रयोगो वागिति, वाणीति, शब्द इति मध्यमाख्यायै वाच्यवाक्ययोर्विज्ञानात्मने चितये।

अस्यां मध्यमायां गकारादिकमारभ्य विसर्गादिकान्ताः सर्वेऽपि गवादयो

वर्णा उच्चारणक्रमेण भासमाना अवतिष्ठन्ते, जहति च विनश्वरत्वं क्षणाय, संहरति भगवान् कालः वर्णसंहारकलां क्षणार्धायाप्यस्याम्। अत एवोच्यते मध्यमायां वर्णानां संस्काराश्चिरतरं तिष्ठन्तीति। त इमे वर्णसंस्काराः संस्कारात्मानो वर्णाः वा, तदात्मा भगवती संविदेव वा चरमवर्णानुभवेन प्रतिबुध्यते, तस्मिन्नस्मिन् प्रतिबोधे हि संस्कारक्रमोऽपि अनुवर्त्तते, ततश्च परिहीयते विपर्य्यासविकल्पो जारा राजा इति, सरो रस इति, पिकः कपिरिति, वनं नवमिति वा। संगिरन्तेतराममुमेव पन्थानं सिद्धान्ततया शबरस्वामिप्रभृतयः पूर्वमीमांसासु, शङ्करभगवत्पादप्रभृतयश्चोत्तर–मीमांसास्वविशेषेण। सोऽयं वर्णसमुदायनिष्पादः प्रत्यवमर्शश्च तस्य क्रमविशेषमनुरुन्धानस्य। सेयं मध्यमावाक्।

अथ प्रश्नः—'क्रमभाजां वर्णानां समुदयस्य प्रत्यवमर्शे सत्यपि न निश्चितोऽर्थप्रत्यवमर्शः, नदीति समुदायस्य प्रत्यवमर्शाज्जलप्रवाहम–वमृशतामपि 'रिवरे'—ति भाषान्तर–वर्ण– समुदायस्य प्रत्यवमर्शादतद्–विदामर्थप्रत्ययस्यानुदयात्। बालादिषु पुनरुभयेभ्योऽप्येभ्यो वर्णसमुदायेभ्यो–ऽसकृदभिश्रूयमाणेभ्योऽपि न ह्येव दृश्यतेऽर्थप्रतिबोधः। विद्वांसः पुनर्वर्णसमुदायविशेषप्रत्यवमर्शादवबुध्यन्त एवार्थविशेषान्। कथमसौ व्यभिचारः! कश्चास्य समाधिरिति।

अत्र मीमांसकाः 'शक्तिविशेषोऽत्र तन्त्रमि'—ति। शक्तिरियमतिरिक्तः पदार्थः, तमिममजानन्तः न प्रतिबोद्धुमलंभूष्णवो भूयासुरर्थविशेषान्। तार्किका 'अस्मात् पदसमुदायादयमर्थो बोद्धव्य' इति सम्बन्धबुद्धिरिह तन्त्रमि'—त्यभ्युपयन्ति। सोऽयं संबन्ध इच्छाजन्यः। इच्छा च द्विविधा ईश्वरीया, जैवी चेति। 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती'—ति जीवेश्वरयोरभेदान्नास्ति तत्र भेदः। अङ्गाङ्गिभावेन, शेषशेषित्वेन वा तत्र शक्यसंभवः समाधिः। सम्बन्धोऽप्यसौ चितिमात्रगः, लोके तस्यानुपलम्भात्, वाग्व्यवहारेऽपि सम्बन्धप्रतियोगिनां वर्णसमुदायानामनेकत्वात्। एक एव

ह्यनुयोगी गौः, प्रतियोगिनः पुनस्तत्र भूयांसः, 'गौ'रिति, Cow इति, गैया इति, धेनुरिति चेत्येवमादयः। शक्तिशब्दाभिधेयो विज्ञानात्मा सम्बन्ध एष वेदेषु शब्दप्रतियोगिकत्वमात्रावच्छिन्नः, अनुयोगिता पुनरस्य न नियमतः सावच्छेदका, सम्बन्धस्याप्यर्थकोटिप्रवेशात्, न च भवति सम्बन्धाय शब्दप्रयोगः 'गौः अधिकरणम्' इत्येवमादिकः, गवीत्येव तु केवलमुच्यते। अत एवास्याकाङ्क्षाभास्यता शाब्दिकेषु प्रतीता, आकाङ्क्षालक्षणत्वमेव वा। अतएव तार्किकेष्वपि अनुप्रतियोगिभावयोरभिधया नाभिमन्यते स्पर्शः। लौकिकेषु शब्देषु पुनरुभयी गतिः, शब्दत्वस्येवार्थत्वस्यापि तत्र अनुप्रतियोगितान्यतरावच्छेदकत्वे कामचारात्। तथा चोच्यते शब्दस्यार्थेनार्थस्य शब्देन वा सम्बन्ध इति, अस्मादयं बोद्धव्यः, अस्यायं बोधकः, अस्यायं बोद्ध्य इति लोके हि सम्बन्धसरिदियमुभयमपि कूलं युगपदेव स्पृशति।

सोऽयं सम्बन्धोऽपि नित्य एवेति वैदिकाः। 'औत्पत्तिकस्तु, शब्दस्यार्थेन सम्बन्ध' इति तेषामभिमानात्। औपाधिक एष न नित्य इति तु आलंकारिकाः। उपाधिरत्र वक्तुरिच्छैव। तथा च नास्ति शब्दार्थसम्बन्धे पारमार्थिकत्वमिति सनातनीयानां संप्रदायः।

शाब्दिकाः पुनरत्र गहनतरं निविशन्ते विमर्शसागरम्। निध्याय्यते हि तैः 'वर्णसमुदायस्यार्थप्रत्यायनात् पूर्वं विद्यमानायां स्थितौ। वैखर्य्या- मयौगपद्यस्येव मध्यमायां यौगपद्यस्य लाभे सार्वजनीनतया प्रतीते 'गौः' इत्यादिषु व्याहारेषु गकारौकारविसर्जनीयत्वावच्छिन्ना सत्तादितुल्य- कुल्याऽवश्यमभ्युपेया काचन समुदायवर्त्तिनी जातिः, अभ्युपेयाश्च तद्व्याप्याः जातयो गत्वादयः। ततश्च गत्वादिव्याप्यजात्यवच्छिन्ना या समुदायवृत्तिः परा जातिस्तस्या अधिष्ठानं समुदाय एव। स च न पारमार्थिकः, तद्विमर्शस्यैव पारमार्थिकतयाऽभ्युपेतचरत्वात्। मध्यमायां चितौ तु सः। अत्र योऽयं चित्परामृष्टो गत्वाद्यवच्छिन्नप्रतियोगिताकः समुदायप्रत्यवमर्शः, नायं केवलेन गौरिति व्याहारेणैव शक्योऽभिलपितुम्। प्रमेयमात्रसीमित एष व्याहारः।

परामर्शे पुन: प्रमातुरपि संनिवेश:। 'प्रमाणं, प्रमेयं, प्रमाता'चेति प्रमागतं यत् त्रिकं तस्याऽत्रापि जागरूकत्वात्। योऽयं संफेट:, संमिश्र:, संव्यवाय:, संकाय:, निकाय:, व्यूह:, संस्थानम् इत्यादिभि: संज्ञानशतैरभिलप्यमान: संविद्भट्टारिकाया आत्मप्रभोगाभोगप्रसर:, न शक्यत एष समुदाय–समुदायिभावचालन्या कणेहत्यावम्रष्टुं निरूपयितुं वा। पानकरस इवासौ पृथगेव कश्चिदपूर्व: सर्ग:।

'विभक्तेष्वप्यविभक्त एष:, पूर्णो निर्विभागश्च कश्चन सातिशयो लोकोत्तरश्च धर्मी। संहारमापद्यन्तेऽत्र वर्णानां क्रमा:, या चास्य संवित् तत्रावमर्शस्य यावानाभोगो लेशमात्रमपि नावशिष्यते तत्रावमर्शनीयस्य यो नावमृश्येत। अतएव स्तूयते संहृतक्रम इति निर्ग्राह्य इति तत्ताभिराभियुक्तिका–भिर्वचोभङ्गिभिरेष:। क्रियाऽवयवोपलक्षणीयस्य कालस्यापि नास्ति तत्र प्रसर:। वैखर्य्यामिव न भवत्यस्यां संविदि गौरित्येवमादिषु परामर्शेषु गकारविसर्जनीयादीनां प्रथमचरमाणां प्रत्यवमर्शनीयानां मध्ये कालव्यवाय:। छोटिकामिवाभिसरत्येष:। प्रतीयतेतमामकालहानि, झटित्येव चाखण्डतया। आहन्यमानायां महाघण्टायां निर्ह्राद इव, प्रताड्यमानेषु पुष्करेषु चरमतम–मार्ज्जनोत्थानदानदीक्षागुरुभूत आद्यश्चाढ्यश्च यो भैरवोऽप्यभैरवो महाराव: स इव चान्त्यावयवित्वेन श्रोत्राकाशमापद्यमानो ऽनुशील्यते तमिममेते स्फोट इत्यभिमन्यमाना: प्रसीदन्ति। द्विविधोऽप्येष स्फोटपदवाच्य: वैखरीरूपो विमर्शात्मा चेति। प्रत्यग्रतमैवैषा काचिदपूर्वा व्यक्ति:। तस्यामस्याम–भिव्यक्तिमापादितायां शक्तिभट्टारिकया प्रत्युपक्रम्यते ऽर्थोऽभिसर्त्तुम्। इत्थं च द्वैविध्यमेभि: उपेयते परामर्शस्य 'क्रमेण प्रतिभासमानां वर्णानां चरमानुभवोत्थसंस्कारसमुदायत्वेन, प्रतिबिम्बन्यायेन उत्तीर्णसर्वक्रमतया–ऽखण्डतया प्रतिभासमानत्वेनापूर्वापरपर्यायेण चेति।

विप्रतिपद्यन्ते त्वत्र शङ्करभगवत्पादप्रमुखा औपनिषदा: साग्रजा: सानुजाश्च। यथा चैतत् तत्तेषां शारीरकभाष्यप्रभृतिभि: प्रसिद्धचरमेव।

यावत् सायणोऽपि अथर्ववेदभाष्यस्य भूमिकायां तमिममर्थं क्रूरमधिक्षिपति, प्रतिक्षिपति च भामहोऽपि तमिममेवमेव निष्करुणं **'शपथैरपि चादेयं वचो न स्फोटवादिनाम्, आकाशपुष्पमस्तीति कः श्रद्दध्यात् सचेतन** इति। तार्किकाणामप्यत्र जगत्त्येव विमतिः। न च प्रसीदन्त्यत्रालङ्कारिका अपि। अत एवात्र वाचयंमो ध्वनिकारः, न्यक्कारकटुर्मम्मटः, अनुल्लेखग्रहिणश्चान्ये।

अत्रास्माकीना प्रतिपत्तिः। वाच्य—वाक्यत्वाभ्यां द्वैविध्येन प्रवृत्ताया वाचो या प्रातिस्विकता या विमर्शकलया संविद्भट्टारिकाया—मखण्डतत्त्वात्मनाऽवस्थितिस्तयोर्द्वयोरपि पीठिका केवला चिदेव। अत एव चेतन एव वाचमुदाहरति, प्रत्यवमृशति, प्रवर्त्तयति, रसयति च। तस्यास्य चेतनस्य या चित् तस्या अभावे व्यतिरेके वा को नु गुणो वाग्योगस्य। अत एव तामिमां चितिमपि संकलयन्ति वाग्मितायाम्। ततश्च योऽयं स्फोटः स चतुर्धा विभज्येत वैखरीरूपेण, मध्यमारूपेण, अखण्डाद्वैतशब्दार्थप्रविमर्शरूपेण, चितिरूपेण च। प्रतिज्ञायते हि शक्तिमता शक्तेरभेदः, सम्वादः, अपृथस्थितिरूपाऽयुतसिद्धता च दार्शनिकैः। इयमेव या संमिश्रावस्था शृङ्गारादिरसनेव न शक्यतेऽस्याः पृथग्रूपत्वं चतुर्मुखेनाप्यपलपितुम्। अतएव तामिमां तत्त्वादप्रच्युतां कलां नमस्कुर्वतेतमां तत्त्वविदः। भर्तृहरिप्रभृतीनां दर्शनानि तत्र नितान्तं पटिमानमावहन्ति दृश्यन्ते, ये च प्रत्याचिख्यासवस्तेषामपि भाषात्मना परिणमति वाग्व्याहारे न नाभिमतश्चैतन्यस्योपकारः। दृङ्मात्रतावादिनामद्वैतिनां पुनः चरमवर्णानुभवेन सह पूर्वपूर्ववर्णसंस्कारसहयोगसंकथापि अनुदरा कन्यैव। एवञ्च स्फोटनाम्ना स्थितिरियं व्यपदिश्यते चेन्नात्याहन्यते मतिमद्भिः। अत एव मीमांसका अपि मण्डनमिश्राः स्फोटसिद्धिनाम्ना संदर्भोत्तमेन स्वीकुर्वन्त्येव तामिमां स्थितिम्। इयं हि अष्टानामेव सम्बन्धानां स्थितिः।

इयमेव यदा चतुर्भिरपरैरपि 'दोषभावगुणालङ्काररसाख्यैः सम्बन्धैरनु—

सृज्यते, काव्यभावमापद्यते। एतदपि साहित्यमीमांसादिषु स्पष्टभूयिष्ठमेव। युज्यते च भाषादर्शने तेषामेषामपि संख्यानम्। काव्यस्यापि भाषारूपत्वेनैव स्वीकृतचरत्वात्। इमां भूमिकामापेदुषामेतत् सामग्र्यमापन्नं भाषादर्शनम्। अत्र यदेव भाषापदेन विवक्ष्यते तदेव शब्दपदेन, तदेव च वाक्यपदेन। तत्र समुद्रमन्थने यस्तावदाधारभूतश्चिद्रूपः कच्छपस्तस्यानुसन्धानेन शाब्दिका अपि अप्रम्लिष्टमपवर्गमापद्येरन्निति शब्दशास्त्रस्यापि दर्शनत्वमव्याहत–भूयिष्ठमेव।

◈

# साहित्यतत्त्वम्

'साहित्य'—शब्दो ब्रह्म—यज्ञ—धर्म—कर्मादिशब्दवदेव नितान्तमेवास्ति भारतीये वाङ्मये प्रतिष्ठितः। अस्त्यस्य सुमहत् पारम्पर्यं संस्कृतकाव्यशास्त्रे। ततस्तत्त्वमिदं संस्कृतकाव्यवाङ्मयमनुवीक्ष्य प्रमाणपुरःसरमिह कणेहत्य विमृशामः। तत्र—

'साहित्यम्' इति पदं धारणार्थकाद् दधातेः, गत्यर्थकाद् हिनोतेर्वा क्ते प्रत्यये निष्पन्नेन हितेतिशब्देन सह—समानान्यतरयोगात् सिद्धे सहितेति शब्दे भाववचनस्य ष्यञो योगेन व्युत्पद्यते, 'कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेने'ति तन्त्रकृदुक्तेः सम्बन्धवचनं च भवति। सम्बन्धश्चात्र प्रकृतिघटकीभूतधातूपपदशक्तिस्वाभाव्याद् धृतिसंविदोरन्यतरस्य द्वयोरेव वार्थयोः सहभावरूपः, समभावरूपः, अभिन्नानुपूर्वीकशब्दवाच्यतया तदुभयरूपो[१] वा सम्भवति। अर्श आदित्वात् (५.२.१२७) मतुबर्थेऽचि कृते चैतदेव पदं सम्बन्धवद्वचनमपि सम्भवति। पक्षेऽस्मिन् पदमेतत्

---

१. ज्ञानसाहचर्योभयार्थे साहित्यशब्दप्रयोगोऽभियुक्तैर्बहुत्र कृतः। तथाहि—

(क) परस्परसापेक्षाणां तुल्यरूपाणां युगपदेकक्रियान्वयित्वं साहित्यम्— श्राद्धविवेकः।

(ख) तुल्यवदेकक्रियान्वयित्धम्, बुद्धिविशेषविशेष्यत्वं वा साहित्यम्।
—शब्दशक्तिप्रकाशिका

(ग) साहित्यमेकक्रियान्वयित्वम्। तद् यथा—'धवखदिरौ छिन्धि' इत्यत्र धवखदिरप्रतियोगिकं यत् साहित्यम्, तन्निरूपितं यदवयवविभागरूपं फलम्, तज्जनिका या छिदिक्रिया, तदनुकूलकृतिमाँस्त्वम्—इति।—सारमञ्जरी।

(घ) श्राद्धविवेकस्य (चौखम्भासंस्करणस्य) पञ्चमे पृष्ठे 'अन्नोत्सर्गानन्तरं सप्रणवां सव्याहृतिकां गायत्रीं जपेत्' इति कात्यायनसूत्रव्याख्याने साहचर्यार्थे साहित्यशब्दो नैकवारं लभ्यते।

कीटात् कैटभवैरिणम्, सर्षपात् सुमेरुं रजःकणाच्च ब्रह्माण्डपिण्डं यावत् स्थितं कृत्स्नमप्येतद् विश्वं क्रोडीकर्त्तुमुत्कन्धरम्। प्रथितं च विश्वस्य तथाविधं साहित्यं निगमागमेषु। भगवती श्रुतिः 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते'—इति जीवात्मपरमात्मनोः साहचर्ये, समानुभवशालित्वम् एकाधिकरणवृत्तित्वं च सयुजेत्यादिपदत्रिकेण स्फुटमुदीरयति, पञ्चीकरणवादेन, 'त्रिगुणम—विवेकि विषयः सामान्यमचेतनं प्रसवधर्मी' त्यादिभिर्वचनैश्च तेषु तेष्वागमेष्वपि सहावस्थितिरेकप्रत्ययगोचरता चास्या पुष्कलं प्रपञ्चिते लभ्येते। तदित्थं साहित्य—शब्दो द्वन्द्वभावं विश्वं च तथैव क्रोडीकर्त्तुं क्षमते यथा निर्द्वन्द्वमवाङ्मनसगोचरं च किञ्चिदपोह्य प्रतिपाद्यं तत्त्वं ब्रह्मशब्दः।

आलङ्कारिकाः पुनः साहित्यपदं शब्दार्थयोरेव संकोचयन्ति। काव्यशास्त्रपरम्परायामिदं भामहस्य काव्यलक्षणे 'शब्दार्थौ सहितौ काव्यम्' इत्यत्र शब्दार्थविशेषणीभूते सहितपदार्थे गर्भितं दृश्यते। तत्र साहत्येतिशब्दप्रयोगपूर्वं ध्वनिकृतः श्रीमदानन्दवर्धनाचार्या एव सर्वथमं दृष्टिं निचिक्षिपुः, तेषामेव ग्रन्थे (ध्वन्यालोके)—

'शब्दार्थयोः साहित्येन काव्यत्वे.....' (४.६ वृत्तिः) इति पदस्यास्य सर्वप्रथमं स्फुटं प्रयुक्तत्वात्।[१] अत्र साहित्यशब्दः साहचर्यसामान्ये प्रयुक्त

(ङ) वाच्यप्रत्येययोर्नास्ति व्यङ्ग्यव्यञ्जकतार्थयोः ।
तयोः प्रदीपघटवत् साहित्येनाप्रकाशनात् ।। व्यक्तिविवेके

(च) यच्छब्दस्य पृथगिदमादिसाहित्ये तच्छब्दस्य च पृथगिदमादिसाहित्ये यत्तदोःपरस्परसाहित्ये च बहवो भेदाः व्यक्तिविवेकव्याख्याने—१७६ पृ. चौ. सं. तत्र 'वोपसर्जनस्ये—तिसूत्रेण बहुब्रीह्यवयवघटकीभूतस्य सहशब्दस्य सः।

१. बिहारराष्ट्रभाषापरिषत्प्रकाशितभामहाङ्कार— हिन्द्यनुवादभूमिकायां प्रॉ० देवेन्द्रनाथ—शर्माणः अन्ये चापि तदनुगन्तारः 'शब्दार्थौ सहितौ काव्यम्' इति वाक्यं भामहस्य काव्यलक्षणतया संमतं नास्तीति प्रत्यपादयन्। तत्खलूपरिनिर्दिष्टयाऽनन्द—

इति पङ्क्तेरस्याः पूर्वापरग्रन्थेन प्रमाप्यते। तथाहि—

**'बन्धच्छायाप्यर्थद्वयानुरूपशब्दसन्निवेशः। अनपेक्षितार्थविशेषा– क्षररचनैव बन्धच्छायेति नेदं नेदीयः सहृदयानाम्। एवं हि सति अर्थानपेक्षचतुरमधुरवचनरचनायामपि काव्यव्यपदेशः प्रवर्तेत। शब्दार्थयोः साहित्येन काव्यत्वे कथं तथाविधे विषये काव्यत्वव्यस्थेति चेत्? परोपनिबद्धार्थविरचने यथा तत्काव्यत्वव्यवहारः तथा तथाविधानां सन्दर्भाणाम्'** (ध्वन्यालोके ४.६ वृत्तिः) **इति।**

अत्र साहित्यतया द्विविधः सम्बन्धश्चर्चितो लभ्यते

१. शब्दार्थान्यतरप्रतियोगिकः तदुभयान्तरानुयोगिकः शब्दप्रतियोगिको– ऽर्थानुयोगिकः, अर्थप्रतियोगिकः शब्दानुयोगिकश्चेत्येकः।

---

वर्धनोक्त्याऽग्रिमेण च प्रतिपादनेन सर्वैरेव काव्यशास्त्रकृद्भिः प्रायेणास्यैव वाक्यस्य काव्यलक्षणतयाङ्गीकृतेः संप्रदायविरुद्धम्। भामहालङ्कारे च वाक्यान्तराणां काव्यलक्षणप्रतिज्ञावाक्यत्वेन ग्रहीतुमशक्यत्वाद् ग्रन्थत्वपरिहाणिश्च स्फुटा 'विशयो विषयश्चैवे' त्यादिक्रमेण प्रवर्त्तितस्यैवाधिकरणपञ्चकसनाथस्य सन्दर्भस्य ग्रन्थतया विद्वद्भिरभिमतत्वात्।

दण्डिनः काव्यादर्शे, वामनस्य काव्यालङ्कारसूत्रवृतौ, उद्भटस्य काव्यालङ्कार– सारसङ्ग्रहे साहित्यपदं न लभामहे। समकालिकस्य रुद्रटस्यापि काव्यालङ्कारे पदमेतन्नास्ति। वामनेन 'काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तत' इति यद्यप्युक्तं तथापि तत्र साहित्यपदं नोपलभ्यते।

महामहोपाध्यायः काणे साहित्यशब्दस्यानन्दवर्धनकृतमिमं प्रयोगं 'History of Samskrita Poetics' नाम्नि तस्य ग्रन्थरत्ने नोद्धरति (द्र० उक्तस्य ग्रन्थस्य १५२–१८८, ३२८ पृ०) डॉ० राघवन्महोदयोऽपि पङ्क्तिमिमां न स्पृशति (द्र० Name of Samskrita Poetics in 'Some concepts of the Alankara Shastra' तथा 'भोजाज् शृङ्गारप्रकाशः')

डॉ ग. त्र्यं. देशपाण्डेमहानुभावोऽपि तस्य 'भारतीय साहित्यशास्त्र'—नाम्नि ग्रन्थे ध्वन्यालोकस्येमां पङ्क्तिं न स्पृशति। एतेषां संरम्भो राजशेखरस्य साहित्यविद्येत्युद्धरणे दृश्यते।

२. शब्दार्थद्वयानुयोगिको गुणालङ्कारादिप्रतियोगिकश्चेति परः। तत्र प्रथमः पक्षः प्रायेण सर्वविदितः। काव्यप्रकाशटीकासु शब्दार्थयोर्व्यासज्यवृत्तितां काव्यस्यामनन्तो माणिक्यचन्द्रादयस्तमिमं बहुधा प्रापञ्चयन्। यथा—

**'शब्दार्थौ मिलितौ जातिव्यक्तिवदन्योन्याव्यभिचारित्वेन (काव्यम्)। एतेन शब्दार्थयोर्भेदवादिनः प्रत्युक्ताः। तैर्ह्युक्तं मुखे शब्दमुपलभामहे भूमावर्थमिति। एतेन ००० शब्दार्थयोः प्रत्येकं काव्यत्वमिति.....निराकृतम्।' इति।**

द्वितीयस्तु विरलमतिगोचरः। तमिमं पक्षं राजशेखरः स्वकृतौ काव्यमीमांसायां सर्वप्रथमं किञ्चिदुच्छूनयति। स हि कृत्स्नमपि वाङ्मयं पौरुषेयापौरुषेयतया द्विशाखीकृत्य तस्य चतुर्विधत्वमुपपाद्य तन्निष्यन्दात्मना साहित्यमपि विद्यास्थानत्वं लम्भयते—

**पञ्चमी साहित्यविद्येति यायावरीयः ।**
**सा हि चतसृणामपि विद्यानां निष्यन्दः ।**

(का.मी. बड़ौदा सं० पृ० ५) इति

अस्या लक्षणं च—

**'शब्दार्थयोर्यथावत् सहभावेन विद्या साहित्यविद्ये' ति**

सूत्रयति। न पुनरिमां विशकलय्य विवेचयति। ततोऽत्र संमूर्छता युक्तिवादेन विविधाः सम्प्रदायाः प्रवर्त्तन्ते। तत्र

**(१) कुन्तकस्य काव्यैकधर्मतावादः—**

राजानकग्रामणीः श्रीमान् कुन्तकाचार्यः काव्यालङ्कारनाम्नि स्वग्रन्थे तद्वृत्तौ च वक्रोक्तिजिविते साहित्यं काव्यैकवृत्तिधर्ममामनति। स हि—

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ।।** (१.७) इति

स्वसम्प्रदायानुरूपयोजनापुरस्सरं भामहस्यैव 'शब्दार्थौ सहितौ काव्यम्' इति वाक्यं काव्यलक्षणतयोद्धृत्य 'सहिता'–विति पदं व्याचक्षाणः साहित्यतत्त्वमित्थं परिभाषयते–

**साहित्यमनयोः शोभाशालितां प्रति काप्यसौ ।**
**अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः ॥** (१.१७) इति

वृत्त्या च–"अनयोः=शब्दार्थयोः शोभाशालितां=सौन्दर्यश्लाघितां प्रति या कापि=अलौकिकी चेतनचमत्कारितायाः कारणम्, अन्यूनानतिरिक्तत्व–मनोहारिणी=परस्परसाम्यसुभगा अवस्थितिः=विचित्रैव विन्यासभङ्गी सा सहितयोर्भावः साहित्यमुच्यते"–इत्याशयया कारिकार्थे विश्लेषयति। राजशेखरः शब्दार्थयोः स्वरूपं काव्यगतत्वेऽपि–

**व्याकरणस्मृतिनिर्णीतः शब्दः,**
**निरुक्तनिघण्ट्वादिभिर्निर्दिष्टस्तदभिधेयः अर्थः ।**
(का० मी० अध्यायः ९ व० सं०)–इति

वाङ्मयान्तरसाधारण्येनैव प्रत्यपादयत्। अन्वाख्याननदीष्णैर्वैय्याकरणैः प्रतिपादिता एव सुप्तिङ्कृत्तद्धितसमासभेदभिन्नाः पञ्च वृत्तीरपि च तथैव न्यदर्शयत्। भेदोपभेदाश्चामूषां प्रापञ्चयत्। कुन्तकः[१] प्रपञ्चमिममन्यथयन् काव्यत्वाभिमतयोः शब्दार्थयोस्तद्वैलक्षण्यमेवमाविरबीभवत्–

**वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि ।**
**तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः ॥** (१.८)
**शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि ।**
**अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः ॥** (१.९)

---

१. कुन्तको राजेशेखरं नामग्राहपूर्वं स्मरति–'भवभूतिराजशेखरादिविरचितेषु बन्धसौन्दर्यसुभगेषु मुक्तकेषु (विचित्रवक्रत्वविजृम्भितं) दृश्यते, (१.५२ वृत्तिः) इति। काव्यमीमांसां तु नोद्धरति।

राजशेखर: शब्दार्थयो: सहभावमब्रूत, प्रतियोग्यनुयोगिनौ त्वस्य नोदमीलयत्।

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।**
**औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः ।**
**वागार्थाविव सम्पृक्तौ**
**तमर्थमिव भारत्या सुतया योक्तुमर्हसि ।**

इत्येवमभियुक्तवचोभिस्तु शब्दस्यार्थेनार्थस्य च शब्देनानुयोगि–प्रतियोगिभाव: प्रचारितो लभ्यते। कुन्तकस्तत्र प्रत्यवतिष्ठते। तत्रोक्तं प्रचारं पूर्वपक्षतया–

**शब्दार्थौ सहितावेव प्रतीतौ स्फुरतो यदा ।**
**सहिताविति तावेव किमपूर्वं विधीयते ।।** (१.१६) इति

अभिधानाभिधेयाववियुक्तावेव सर्वकालं ज्ञाने प्रतिभासेते, तदेवं शब्दार्थयोर्निसर्गसिद्धं साहित्यम्, तदत्र[१] 'तदभिधानं निष्प्रयोजनम्' इति प्रदर्श्य सिद्धान्तपक्षाय प्रक्रममाण:–

**'न वाच्यवाचकलक्षणशाश्वतसम्बन्धनिबन्धनं वस्तुत: साहित्यमुच्यते, यस्मादेतस्मिन् साहित्यशब्देनाभिधीयमाने कष्टकल्पनो–परचितानि 'गाङ्कुटादि' (पा.सू. १.२.१) वाक्यानि, असम्बद्धानि शाकटिकादिवाक्यानि च सर्वाणि साहित्यशब्देनाभिधीयेरन्। तेन पदवाक्यप्रमाणव्यतिरिक्तं किमपि तत्त्वान्तरं साहित्यमिति विभागोऽपि न स्यात्।'**

–इति विप्रतिपाद्य–

**'वाचकस्य वाचकान्तरेण वाच्यस्य च वाच्यान्तरेण**

---

१. मूले–'क: सचेता: पुनस्तदभिधानेन निष्प्रयोजनमात्मानमायासयती'ति पङ्क्ति:।

**साहित्यमभिप्रेतम्, न तु[१] वाचकस्य वाच्येन, वाच्यस्य च वाचकेन, प्रयोजनाभावाद– समन्वयाच्च।'**

एवं तु शब्दप्रतियोगिकं शब्दान्तरानुयोगिकमर्थप्रतियोगिकमर्थान्तरानुयोगिकं च निगमयति। पूर्वाचार्येषु दृष्टां साहित्यतत्त्वविमर्शकृपणतामपि–

**'यदिदं साहित्यं नाम तद् एतावति निःसीमनि समयाध्वनि साहित्यशब्दमात्रेणैव प्रसिद्धम्, न पुनरेतस्य कविकर्मकौशला–धिरूढिरमणीयस्याद्यापि कश्चिदपि विपश्चिद् 'अयमस्य परमार्थः' इति मनाङ्मात्रमपि विचारपदवीमवतीर्णः**–इति

कटाक्षयन्–स्वोपज्ञतामेवास्य कण्ठरवेणैवमुद्भेदयति–

**'तदद्य सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दराणां सत्कविवचसामन्तरामोदं मनोहरत्वेन परिस्फुरदेतत् (साहित्यम्) सहृदयषट्चरणगोचरतां नीयते'** इति। साहित्यमनयोरिति लक्षयति च।

साहित्यस्येव पदवाक्यप्रमाणानामपि काव्योपयोगिताम्–

**'एतेषां पदवाक्यप्रमाणसाहित्यानां चतुर्णामपि प्रतिवाक्यमुपयोगः। तथा च (१) 'एतत्पदमेवं स्वरूपं गकारौकारविसर्जनीयात्मकम् एतस्य चार्थस्य प्रातिपदिकार्थपञ्चकलक्षणस्य आख्यातपदार्थषट्कलक्षणस्य वाचकमिति पदसंस्कारलक्षणस्य व्यापारः (२) पदानाञ्च परस्परान्वय–लक्षणसम्बन्धनिबन्धनमेतद्वाक्यार्थतात्पर्यमिति वाक्यविचारलक्षण–स्योपयोगः (३) प्रमाणेन प्रत्यक्षादिना एतदुपपन्नमिति युक्तियुक्तत्वं नाम प्रमाणलक्षणस्य प्रयोजनम्, (४) इदमेव परिस्पन्दमाहात्म्यात् सहृदयहारितां प्रतिपन्नमिति साहित्यस्योपयुज्यमानता।'**

एवमुरीकृत्य साहित्यस्यैव मौलिभूतत्वमेवमुद्दिशति–

---

१. मूले–'ननु च वाचकस्य वाच्यान्तरेण वाच्यस्य वाचकान्तरेण कथं न साहित्यमिति चेत् तन्न, क्रमव्युत्क्रमे प्रयो०' इत्येवंरूपा पङ्क्तिरस्ति। तत्र 'अन्तरेणे'–ति व्यर्थम्।

'एतेषां यद्यपि प्रत्येकं स्वविषये प्राधान्यम्, अन्येषां गुणीभावः, तथापि सकलवाक्यपरिस्पन्दजीवितायमानस्यास्य साहित्यलक्षणस्यैव कविव्यापारस्य वस्तुतः सर्वातिशायित्वम्। यस्मादेतदमुख्यतयापि यत्र वाक्यसन्दर्भान्तरे स्वपरिमलमात्रेणैव संस्कारमारभते तस्यैतदधिवास–शून्यतामात्रेणैव रामणीयकविरहः पर्यवस्यति। तस्मादुपादेयतायाः परिहाणिरुत्पद्यते। तथा च स्वप्रवृत्तिवैयर्थ्यप्रसङ्गः।'

तदित्थं कुन्तकः साहित्यं काव्यस्यैवासाधारणं धर्ममामनति येनेदं सौन्दर्यशालितां लभते। अतश्चासौ रसालङ्काररीतिगुणवृत्तिप्रभृतीनां समेषामेव शब्दार्थशोभाजनकानां परस्परस्पर्धया साम्यसुभगां तद्विदानन्दसम्पादनपटिष्ठां कामप्यन्तरिन्द्रियैकसंवेद्यां वाङ्मयान्तरासामान्यां यौगपद्येनावस्थितिं साहित्यपदव्यपदेश्यामामनति—

मार्गानुगुण्यसुभगो माधुर्यादिगुणोदयः ।
अलङ्करणविन्यासो वक्रतातिशयान्वितः ।।

वृत्त्यौचित्यमनोहारि रसानां परिपोषणम् ।
स्पर्धया विद्यते यत्र यथास्वमुभयोरपि ।।

सा काप्यवस्थितिस्तद्विदानन्दस्पन्दसुन्दरा ।
पदादिवाक्परिस्पन्दसारः साहित्यमुच्यते ।।

(१.१७ अन्तरश्लोकाः)

एवं स्थिता सौन्दर्यजनकता कुन्तकमते साहित्यस्य।

### (२) भोजस्य द्वादशसम्बन्धतावादः—

भामहस्य साहित्यसंविद् आनन्दवर्धनराजशेखरकुन्तकानां विवेचनात्रयीमापद्य यां सहृदयावर्जनचातुरीं भेजे सैव भोजराजस्य विश्लेषणप्रयागमुपेत्य तीर्थभावमुपेयुषी विबुधसंभावनास्पदं समपद्यत।

भोजराजः साहित्यस्य द्वादशसम्बन्धात्मकतां सिषाधयिषुः शृङ्गारप्रकाशं नाम प्रबन्धहीरकं प्रस्तौति। तत्रासौ महता विस्तरेणास्य विचारानुत्कीर्णयति। तथाहि—

'तत् (काव्यं) पुनः शब्दार्थयोः साहित्यमामनन्ति। तद् यथा 'शब्दार्थौ सहितौ काव्यम्' इति। कः शब्दः? येनोच्चारितेनार्थः प्रतीयते।०००। कोऽर्थः? यः शब्देन प्रत्याय्यते।०००। किं साहित्यम्? यः शब्दार्थयोः सम्बन्धः। स च द्वादशधा (१) अभिधा (२) विवक्षा (३) तात्पर्यम् (४) प्रविभागः (५) व्यपेक्षा (६) सामर्थ्यम् (७) अन्वयः (८) एकार्थीभावः (९) दोषहानम् (१०) गुणोपादानम् (११) अलङ्कारयोगः (१२) रसावियोगश्च। (शृङ्गारप्रकाशे १.१२ तः परम्)

सप्तमस्य प्रकाशस्यावतरणिकायां पुनरपीमानेवं स्मरति—

**'अभिधाविवक्षातात्पर्यप्रविभागव्यपेक्षासामर्थ्यान्वयैकार्थीभाव–दोषहानगुणोपादानालङ्काररसावियोगरूपाः शब्दार्थयोर्द्वादशसमर्थाः (सम्बन्धाः) साहित्यमुच्यते।'**

एषामाद्यानामष्टानां निरूपणं शृङ्गारप्रकाशस्य सप्तमाष्टमयोः प्रकाशयोः साटोपमुपलभ्यते। यथा—

१. शब्दस्यार्थाभिधायिनी शक्तिरमिधा (पृ० २२३ मैसूरसंस्करणम्)

२. शब्देष्वर्थेऽभिधानदानाभिप्रायो विवक्षा। विवक्षातः कारकाणि भवन्ति 'अक्षान् दीव्यति, अक्षैर्दीव्यत' इति। (पृ० २३८)

३. 'यत्परः शब्दः स शब्दार्थ' इति तात्पर्यम्। तच्च वाक्य एव। (पृ० २४६)।

४. पदे वाक्ये प्रबन्धे वास्यैतावतः शब्दस्यायमर्थोऽस्मिन्नर्थे चायमेतावच्छब्द इति शब्दार्थयोर्मिथःसम्बन्धितया पृथक्त्वेनाऽवधारणं प्रविभागः (पृ० २६३)

५. उद्भूतसम्बन्धव्यतिरेकाणां पदार्थानामितरेतरं प्रत्याकाङ्क्षा व्यपेक्षा (देवो

वर्षतीत्यादौ सन्निहितस्य, प्रविश पिण्डीं गृहं भक्षयेत्यादौ च व्यवहितस्य सा। (पृ० २६८)

६. व्यपेक्षावतां पदार्थानां मिथःसम्बन्धिरूपता सामर्थ्यम्। (पृ० २८४)

७. (कः पुनरयं) सम्बन्धो (अन्वयो) नाम अहानिर्व्यपेक्षा व्यतिषङ्ग इति। (पृ० २८४)

८. व्यपेक्षावतां समर्थानामन्वितार्थानां च पदार्थानां तिलतण्डुलवत्, नीरक्षीरवत्, पांसूदकवच्च यदविभागरूपेण भवनं स एकार्थीभावः। (पृ० २९७)

दोषहानादीनाञ्च चतुर्ण्णां सम्बन्धानां स्वरूपानुसन्धानं भोजराजस्यैव सरस्वतीकण्ठाभरणेत्यन्वर्थनाम्नि स्वतन्त्रे सन्दर्भरत्ने कर्तुं सुशकम्। तत्र प्रथमे परिच्छेदे ५७—तमकारिकां यावद् दोषान् लक्षयित्वा—

**एवं पदानां वाक्यानां वाक्यार्थानां च यः कविः ।**
**दोषान् हेयतया वेत्ति स काव्यं कर्तुमर्हति ।।** (५८)

इत्युपसंहृत्य गुणयोगमेवं प्रशंसति—

**अलङ्कृतमपि श्रव्यं न काव्यं गुणवर्जितम् ।**
**गुणयोगस्तयोर्मुख्यो गुणालङ्कारयोगयोः ।।**

बाह्यान्तरवैशेषिकभेदेन च त्रिविधाँस्तान् सप्रपञ्चं विवेचयति। द्वितीय—तृतीयचतुर्थेषु च परिच्छेदेषु—

**ये व्युत्पत्त्यादिना शब्दमलङ्कर्त्तुमिह क्षमाः ।**
**शब्दालङ्कारसंज्ञास्ते ज्ञेया जात्यादयो बुधैः ।।** (२.२)

**अलमर्थमलङ्कर्त्तुं ये व्युत्पत्त्यादिवर्त्मना ।**
**ज्ञेया जात्यादयः प्राज्ञैस्तेऽर्थालङ्कारसंज्ञया ।।** (३.१)

**शब्देभ्यो यः पदार्थेभ्य उपमादिः प्रतीयते ।**
**विशिष्टोऽर्थः कवीनां ता उभयालङ्क्रिया मताः ।।** (४.१)

इत्यादिभिरलङ्कारान् वितनोति। एवमन्त्ये पञ्चमे परिच्छेदे—

**रसोऽभिमानोऽहङ्कारः शृङ्गार इति गीयते ।**
**योऽर्थस्तस्यान्वयात् काव्यं कमनीयत्वमश्नुते ।।** (५.१)

**नवोऽर्थः सूक्तिरग्राम्या श्रव्यो बन्धः स्फुटा श्रुतिः ।**
**अलौकिकार्थयुक्तिश्च रसमाहर्त्तुमीशते ।।** (५.७)

इत्येवं रसयोगमपि सवैदग्ध्यं संदृभ्णाति।

साहित्यस्य द्वादशधात्वे भोजमतमनुवर्तमानो भावप्रकाशिकाकारः श्रीमान् शारदातनयोऽपि सम्बन्धानिमानेवमेव साहित्यतया मनुते। तत्र—

**'द्वादशधा सम्बन्धः शब्दस्यार्थस्य यः स साहित्यम्'**

इति साहित्यं लक्षयित्वा—

**वृत्तिर्विवक्षा तात्पर्यप्रविभागाविहोदितौ ।**
**ततो व्यपेक्षा सामर्थ्यान्वयश्चैकार्थभावना ।।**

**दोषहानं गुणादानं तथाऽलङ्कारयोगिता ।**
**रसावियोग इत्येते सम्बन्धाः कथिता बुधैः ।।**—

इति तानेकैकशः समुद्दिशति।

इतः परं साहित्यपदं नितान्तं प्रसिद्धिमापद्यते। क्षेमेन्द्रः काव्यलक्षण एतदेवं स्फुटं प्रयुङ्क्ते—

**'काव्यं विशिष्टशब्दार्थसाहित्यम्'**इति (सुवृत्ततिलके ३.२—४)

**(३) साहित्यमीमांसाकृतः अष्टसम्बन्धात्मकतावादः—**

साहित्यमीमांसाकारोऽनुपदीनावुभावपि वादावुपजीव्य तृतीयां सरणिमत्र प्रवर्त्तयति। स खलु निजं मतमेवमुपन्यस्यति—

**वृत्त्यादीनां समष्टिः स्यात् साहित्यं, तत्परिष्कृतिः ।**
**शब्दार्थयोः परिष्कारः कविस्तस्य प्रसाधकः ।।**

अष्टौ वृत्त्यादयस्तत्र परिष्कारश्चतुर्विधः ।
वृत्तिर्विवक्षा तात्पर्यं प्रविभागो व्यपेक्षणम् ।
सामर्थ्यमन्वयैकार्थ्ये अष्टौ वृत्त्यादयः स्मृताः ।
दोषत्यागो गुणाधानमलङ्कारो रसान्वयः ।
इत्थं चतुर्विधा क्लृप्ता साहित्यस्य परिष्कृतिः ।। (प्रकरणम्—१)

वृत्त्यादीनां लक्षणान्यपि स एवं निर्मिमीते—

१. वृत्तिः (अभिधा) पदानां व्यापारः पदार्थप्रतिपादने।
२. विवक्षा वक्तुमिच्छा स्यात् समसंक्षिप्तविस्तृतैः, शब्दैरर्थस्य।
३. वर्तते यत्परः शब्दः स शब्दार्थ इति स्थितिः।
४. एतावतोऽर्थभागस्य स्यादियान् शब्द इत्ययम्, प्रविभागः।
५. परस्परं पदार्थानामाकाङ्क्षा स्याद् व्यपेक्षणम्।
६. सामर्थ्यं च पदार्थानां भवेत् सम्बन्धिरूपता।
७. परस्परस्य ग्रथनं पदार्थानामिहान्वयः।
८. ततश्चैकत्वसम्पत्तिरेकार्थीभावनं विदुः। (प्रकरणम्—२)

परिष्कारत्वेनाभिमतानपि चतुरो धर्मान् ससंरम्भं तृतीयचतुर्थपञ्चमषष्ठेषु प्रकरणेषु मार्मिकतया यथासम्प्रदायं वितत्यैवं विश्लेषयति—

प्रयोगे दूष्यते येन स दोषः परिकीर्त्तितः ।
शास्त्रे लोके च समये निषेधात् त्याज्य एव सः ।। (प्र० ३)

गुणाः श्लेषप्रसादाद्या ये काव्ये समवायिनः ।
बाह्यान् शब्दगुणान् प्राहुरान्तरानर्थसंश्रयान् ।। (प्र० ४)

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते । (प्र० ५)
कान्तया गुणशालिन्या सर्वालङ्कारयुक्तया ।
किं फलं कामयानस्य यदि न स्याद् गुणावहा ।।

**स भावो रसनीयत्वं यत्प्रकर्षः प्रपद्यते । (प्र० ६)**

कुन्तकभोजराजयोर्मते अपि सोद्धरणं सपरिकरञ्च वैशद्येन विवेच्य प्रत्यादेष्टि। तत्र कुन्तकस्य मतं—

**शब्दार्थयोः सहस्थानं साहित्यमपरे जगुः ।**
**श्रिया परस्परस्पर्धायुक्तयोः काव्यसंस्थितिम् ।।—**

इति कारिकया संकलय्यास्मदुद्धृतं कृत्स्नमपि वक्रोक्तिजीवितं सकारिकं संक्षिप्य सोदाहरणं वृत्तावुपसंगृह्णाति। तत्र विश्वेश्वरशास्त्रिणा वक्रोक्तिपरतयाऽङ्गीकृतान्

**अपर्यालोचितेऽप्यर्थे बन्धसौन्दर्यसंपदा ।**
**गीतवद्धृदयाह्लादं तद्विदां विदधाति यत् ।।**

**वाच्यावबोधनिष्पत्तौ पदवाक्यार्थवर्जितम् ।**
**यत्किमप्युत्कयत्यन्तः[१] पानकास्वादवत् सताम् ।।**

**स्फुरितं जीवितेनेव जीवितं कविना विना[२]।**
**विना निर्जीवतां याति येन वाक्यं विपश्चिताम् ।।**

**यस्मात् किमपि सौभाग्यं तद्विदामोदगोचरम् ।**
**सरस्वती समभ्येति तदेतत्[३] प्रतिपादितम् ।।**

इमानपि श्लोकान् 'मार्गानुगुण्यसुभगः—साहित्यमुच्यते' इति पूर्वोद्धृतैः पद्यैः सह सामानन्तर्येण साहित्यपरतयैवोद्धरति। कुन्तकमतमात्ममतेनाभिन्नप्रायं

---

१. किमप्यर्पयत्यन्तः—इति विश्वेश्वरपाठः।

२. शरीरं जीवितेनेव स्फुरितेनेव जीवितम्—इति विश्वेश्वरपाठः।

३. तदिदानीं विचार्यते इति विश्वेश्वरपाठः। स च सर्वथा त्याज्यः। समनन्तरमेवापतितस्य 'इत्यन्तरश्लोकाः' इति वचनस्यासङ्गतेः। तदित्थं विश्वेश्वरकृतोऽनुवादोऽपि त्याज्य एव। वस्तुत इमा अपि कारिकाः साहित्यार्थपरा एव।

च प्रतिपादयन् ब्रूते–

**एतन्मतमपि प्रायो मतमस्माकमश्नुते ।**
**अभेदः ख्याप्यते किन्तु तत्र साहित्यकाव्ययोः ।।**

एतन्मतमप्यस्मन्मतमेवाप्नोति। इदमन्तरम्–परिष्कारः साहित्यमिति तेषां मतम्, वयं तु शब्दार्थयोः सम्मेलनमात्रमुक्तिरूपं साहित्यं तच्छास्त्राख्यानादि–साधारणम्, अन्यत् परिष्कारविशिष्टं तत् काव्यमिति मन्यामहे।

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ।।**

इत्यनेनापि विशिष्टोक्तिरेव काव्यं भवतीति मन्तव्यम्। अतो यत् केषाञ्चित् मतं कविकौशलकलितकमनीयतातिशयः शब्द एव केवलः काव्यमिति, केषाञ्चिद् रचनावैचित्र्यचमत्कारकारि वाच्यमेव काव्यमिति पक्षद्वयं निरस्तम्। उच्यते हि–

**शब्दार्थौ दोषरहितौ सगुणौ बन्धवर्तिनौ ।**
**काव्यं चारुतयात्यर्थमन्योन्यः (यं) सन्धिनाविव ।। इति'** इति।

भोजराजस्यपि मतं स्फुटं संकोचयति–

**ननु[१] अभिधाविवक्षातात्पर्यविभागव्यपेक्षासामर्थ्यान्वयैकार्थी–भावदोषहानगुणोपादानालङ्कारयोगरसावियोगरूपः शब्दार्थयोर्द्वादशविधः सम्बन्धः साहित्यमिति श्रूयते। कथमष्टौ सम्बन्धाः साहित्यमिति? उच्यते।**

---

१. साहित्यमीमांसायां 'ननु' इत्यतः पूर्वम् 'साहित्यं नाम सम्बन्धः सोऽष्टधेति मनीषिणः। शब्दार्थाविष्टभिर्मार्गैः सम्बध्येते परस्परम्।।' मनीषिणो भोजराजादयः ते हि शब्दार्थयोर्द्वादशविधः सम्बन्धः साहित्यमित्याचक्षते' इति कारिकासहिता पङ्क्तिरस्ति। तत्र 'मनीषिणो–चक्षते' इति भागो नूनं द्विरुक्तोऽसङ्गतश्च। पाण्डुप्रतावियं पङ्क्तिः पत्रपार्श्वे लिखिता स्यात्। संपादकेनेयं मूले योजिता स्यात्। कुन्तकस्यापि नाम्नोल्लेखोऽत्र नास्ति।

**चरमं चतुष्टयमागमापायित्वात् साहित्यस्वरूपं न प्रविशति। तस्मात् तत् परिष्कारत्वेन निष्कृष्टम्। तच्चाष्टधेति निर्णयः।** इति।

तदित्थं साहित्यमीमांसाकृतो मते 'वृत्तिः विवक्षे' त्यादयोऽष्टौ सम्बन्धा एव साहित्यपदव्यपदेश्या भवन्ति, अन्ये च चत्वारो दोषहानादयः परिष्कारभूता इति व्यक्तमुपपद्यते। अस्मिंश्च वादत्रये प्रथमद्वितीययोः साहित्यस्य काव्यैकवृत्तित्वं तृतीये च काव्येतरवृत्तित्वमपि (काव्येतरैकवृत्तित्वं वा) प्रसिद्ध्यति।

**(४) काव्यनाट्यसमष्टिवादः**

इयता प्रबन्धेन साहित्यस्य यद्वृत्तित्वं सिद्धं तौ केवलौ शब्दार्थाविव भवतः। शब्दार्थातिरिक्ते नाट्ये तत्सद्भावोऽद्यावधि नोन्मीलितः। काव्यशास्त्रपरम्परानुशीलनेन तत्रापीदमभिमतं प्रतीयते। तत्र

सर्वप्रथमं महिमाचार्यः साहित्यपदं काव्यनाट्योभयपरतया निनीषँल्लक्ष्यते। स हि 'संरम्भः करिकीटे'—ति पद्ये दर्शितविधेयाविमर्शसंरम्भः 'अम्बिकाकेसरी'—ति समासं—'विधेयोद्देश्यभावोऽयं वक्तुं वृत्त्या न पार्यत' इति दूषयित्वा स्वसमीक्षामेवमुपसंहरति—

**'यद्वा कवीनामेवैष विषयो न खण्डिकोपाध्यायानाम्। ते (कवयो) हि स्वप्नेऽप्यनासादित—साहित्य—सुधा—रसास्वादचमत्काराः शुष्कशब्द—व्युत्पत्तिमात्रोपजनिताभिमानदुर्विग्धा विविधाभिधानाधानोद्धारा अभिधेयप्रतीतिवैचित्र्यविवेककौशलशालीना लक्षणमस्तीत्येव रसाभिव्यक्ति—विघ्नभूतम् अपरमपि बहुतरमवकरप्रायं प्रयुञ्जत इति रसास्वादानुगुणप्रयोगावहितचेतसां कवीनामेव तच्चिन्तोचिता।'**

(व्यक्तिविवेकस्यास्मदनुवादे पृ० २७५—६)

अत्र स्पष्टमेव काव्यमात्रं साहित्यतयाभिमतम्। श्रव्यं दृश्यं वेति तत्र विकल्पः कर्त्तुं न शक्यते।

कुन्तकभोजयोः समकालिकः किञ्चिदनन्तरभावी वा लोचनाभिनव-भारतीप्रविधाता श्रीमानभिनवगुप्तः संस्कृतकाव्यशास्त्रे सार्वभौमां प्रतिष्ठामश्नुते। तदनुविधाता काव्यप्रकाशकारः सहृदयशिरोमणिर्मम्मटोऽपि कनिष्ठिका-धिष्टित एव। तावेतौ काव्यशास्त्रसार्वभौमौ काव्यशास्त्रमधिकृत्य कृतेषूक्तेषु ग्रन्थेषु साहित्यपदमपि न प्रयुञ्जाते, तद्व्याख्यानं तु दूरापास्तम्। अभिनवगुप्तो ध्वन्यालोके लोचनं प्रथमं व्यधात् तदुत्तरं[१] नाट्यशास्त्रेऽभिनवभारतीम्। तत्र चतुर्थ उद्योते यत्र पूर्वोद्धृतं साहित्यपदं समापतति तत्र लोचने तस्य स्पर्शोऽपि न दृश्यते। अभिनवगुप्तो मम्मट इव मात्रालाघवेन पुत्रोत्सवमानी नास्ति। स हि यत्रापि क्वचिदानुषङ्गिकतयाऽपि केचन रहस्यदिग्धाः प्रयोगा दृश्यन्ते तेष्वपि भृशं संरब्धवानालोक्यते। ध्वन्यालोक एव-

**सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन ।**
**यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः ।।** (१.८)

इत्यत्र प्रत्यभिज्ञेयपदे प्रकृतित्वेनापि समुपागतं 'प्रत्यभिज्ञा'-पदं प्रत्यभिज्ञाय तत्संकेतितां तत्परमगुरुप्रवर्त्तितां प्रत्यभिज्ञामनुन्मील्य न विरमति। 'प्रतिपत्तव्याविति वक्तव्ये[२] प्रत्यभिज्ञेया'विति वदतो ग्रन्थकृतोऽभि-सन्धिमुन्मीलयन्नसौ ब्रूते-

'प्रत्यभिज्ञेयशब्देनेदमाह-'काव्यं तु जातु जायेत कस्यचित् प्रतिभावतः' इति नयेन यद्यपि स्वयमस्यैतत् परिस्फुरति तथापीदमित्थमिति विशेषतो निरूप्यमाणं सहस्रशाखीभवति। यथोक्तमस्मत्परमगुरुभिः-[३]

१. 'स्वशब्दानभिधेयत्वं हि रसादीनां ध्वनिकारादिभिर्दर्शितम्। तच्च मदीयादेव तद्विवरणात् सहृदयालोकलोचनादवधारणीयम्' बड़ौदा सं. भागः १, पृ. ३४३।

२. 'प्रत्यभिज्ञेयावित्यनेनेदमाह'-इति प्रतीकस्यावतरणिकायामुत्तुङ्गोदयः 'तर्हि' 'यत्नतः प्रतिपत्तव्या' विति वक्तव्ये 'प्रत्यभिज्ञेयौ' इति वदतः कोऽभिप्राय इत्याह (कुप्पुस्वामी संस्करणे, पृ. १७५)

३. भट्टेन्दुराजस्य साक्षात् स्वगुरोर्गुरवोऽमीति परमगुरुत्वं प्रत्यभिज्ञाप्रस्थानप्रवर्त्तयितॄणा-मुत्पलदेवपादानाम् (कु. सं. पृ. १७५)

**तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके**
**कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं क्षमः ।**
**लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो**
**नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता ।।** इति [१]

**तेन ज्ञातस्यापि विशेषतो निरूपणमनुसन्धानात्मकमत्र प्रत्यभिज्ञानम्। न तु तदेवेदमित्येतावन्मात्रम्।**

साहित्यपदप्रयोगे पुनरकाण्डवाचंयमत्वमस्य कुत आपतितमिति प्रत्येतुं न प्रभवामः। 'शब्दार्थयोः साहित्येन काव्यत्वे' इत्यस्याः पङ्क्तेः काव्यत्वशब्दं व्युत्पादयन्—

**कवनीयं काव्यं तस्य भावः काव्यत्वम्,**
**न त्वयं भावप्रत्ययान्ताद् भावप्रत्यय इति शङ्कितव्यम् ।**[२]—इति

संरम्भमाश्रयते, साहित्यपदं तु प्रतीकतोऽपि न स्पृशति। अभिनवभारत्यामपि साहित्यपदमस्माभिर्नैव लभ्यते। मम्मटः काव्यप्रकाशे काव्यपदमसकृत् प्रयुङ्क्ते साहित्यपदं तु नैकदापि। न चानयोः समये साहित्यपदं प्रसिद्धं नासीत्, अभिनवगुप्तस्यैव श्रीतन्त्रालोके—

**पित्रा स शब्दगहने कृतसंप्रवेशस्तर्कार्णवोर्मिपृषतामलपूतचित्तः ।**
**साहित्यसान्द्ररसभोगपरो महेशभक्त्या स्वयंग्रहणदुर्मदया गृहीतः ।।**

(तन्त्रालोके ३७ आह्निके ५८ पद्यम्) इति

---

१. 'यद्यपीयं श्रीमदीश्वरप्रत्यभिज्ञाशास्त्रान्ते सामान्यतोऽवगतस्यापीश्वरस्य विशेषावगमन्तरेण न फलपर्यन्तीभावलाभ इत्येतमर्थं निदर्शयितुं लोकप्रसिद्धतत्तादृशविषयप्रदर्शनपरोक्तिः, तथापि तुल्यविषयत्वात् प्रस्तुतार्थोपपादकतयात्रोदाहृता'—इति सङ्गतिः कौमुदीकृता श्रीमदुत्तुङ्गोदयेनात्र दर्शिता।

२. कोः कवतेर्वा कवनीयं काव्यम्—इत्यभिनवभारत्यां संवादिनी व्युत्पत्तिः।
(अ.भा.ब.सं.पृ. ३४३)

ईश्वरप्रत्यभिज्ञाविवृतौ च—

**पूर्णव्याकरणावगाहनशुचिः सत्तर्कमूलोन्मिष—**
**त्प्रज्ञाकल्पलताविवेककुसुमैरभ्यर्च्य हृद्देवताम् ।**
**पीयूषासवसारसुन्दरमहासाहित्यसौहित्यभाग्**
**विश्राम्याम्यहमीश्वराद्वयकथाकान्तासखः साम्प्रतम् ।।**

(ई.प्र.वि. मङ्गलाचरणे ५ पद्यम्)

इति च साहित्यशब्दे दर्शितादरत्वात्। तच्छिष्यः क्षेमेन्द्रोऽपि साहित्यपदे ऽवधानमाबध्नाति। स हि बृहत्कथामञ्जर्या उपसंहारस्य ३७ तमे—

**'श्रुत्वाऽभिनवगुप्ताख्यात् साहित्यं बोधसागरात्'—**

इति पद्ये प्रागुद्धृते काव्यलक्षणे च साहित्यपदं प्रसिद्धपदत्वेनास्था—विशेषास्पदत्वेन चोपादत्ते। साहित्यमीमांसाकारश्च मम्मटं स्मरति। काव्यप्रकाशस्य—

**शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।**
**काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे ।।** इति कारिकां स

'श्रुताभियोगप्रतिभाशक्तियुक्तः कविः स्मृतः' इति साहित्यमीमांसायाः सप्तमप्रकरणस्थस्य कविलक्षणस्य समर्थने वृद्धवाक्यत्वेनोद्धरति। मम्मटाच्छतकद्वयानन्तरीयः साहित्यदर्पणप्रणेता विश्वनाथो ग्रन्थनाम्नि साहित्यपदमभिषेचयति, यद्यप्येतदत्रातीव विस्मयावहं यत् साहित्यनाम्ना ग्रन्थमध्ये किञ्चिदपि न विमृशति। एतेनाभिनवगुप्तमम्मटयोः साहित्यपद—प्रयोगाभावेन, विश्वनाथे च तत्सद्भावेनैतदुन्नेतुं सुकरं यदेतेषां मते 'काव्यनाट्ये मिलित्वा साहित्यपदव्यपदेश्यतामासादयतः, साहित्यमनयोर्व्यासज्य वर्त्तते, साहित्यमङ्गि काव्यनाट्ये चास्याङ्गभूते' इति। नाट्यशास्त्रे काव्यस्य निरूपणं नास्ति यत्राभिनवभारती, यत्र च लोचनं तत्र ध्वन्यालोके नाट्यस्य, काव्यप्रकाशोऽपि काव्यैकपरो विद्यते, साहित्यदर्पणे च तदुभयं दृश्यते।

ग्रन्थनाम कुर्वतो विश्वनाथस्य मनसि कदाचिदयं भावो भवेत्। ततश्च महिमभट्टस्येव साहित्यदर्पणकृतोऽपि काव्यनाट्ययोर्व्यासज्यवृत्तित्वं साहित्येऽभिमतम्। अभिनवगुप्तमम्मटौ तु साहित्यशब्दस्य महत्त्वमनिभाल्य तत्पर्यायतया मतस्य काव्यशब्दस्यैव तन्निभलयत:। तन्मते काव्यपद–मर्थद्वयवाचकं भवति दृश्यश्रव्योभयवाचकम्, श्रव्यमात्रवाचकञ्चेति। प्रथमे पक्षे काव्यपदं साहित्यपदार्थकमेव। एतच्च तत्तद्ग्रन्थै: स्पष्टतामञ्चति। भरतमुनि: स्वकीये नाट्यशास्त्रे नाट्यरसान् काव्यार्थमजूघुषत्। तद् यथा–

**वागङ्गसत्त्वोपेतान् काव्यार्थान् भावयन्तीति भावा:'** (७.१)

अत्र काव्यार्थपदेन रसा एव मुनेर्विवक्षिता। एतच्च तस्यैव–

**विभावेनाहृतो योऽर्थो ह्यनुभावैस्तु गम्यते ।**
**वागङ्गसत्त्वाभिनयै: स भाव इति संज्ञित: ।।**

**वागङ्गमुखरागेण सत्त्वेनाभिनयेन च ।**
**कवेरन्तर्गतं भावं भावयन् भाव उच्यते ।।**

**[1]नानाभिनयसंबन्धान् भावयन्ति रसानिमान् ।**
**यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभि: ।।**

इत्यग्रिमेण कारिकाग्रन्थेन स्पष्टम्। एवमेव–

१. **क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद् भवेत्। (१.११)**

२. **एवमेते काव्यरसाभिव्यक्तिहेतव एकोनपञ्चाशद् भावा:। (पृ० ३४८)**

३. **काव्यार्थसंश्रितैर्भावैरभिनिष्पद्यन्ते रसा:। (पृ० ३४८)**

इत्येवंविधैरपि प्रयोगै: काव्यस्य नाट्याऽभिन्नत्वं नाट्यशास्त्रात् सिद्ध्यति। अत एवाभिनवगुप्तोऽपि रसानां काव्यार्थत्वमसकृदामनति। तथा–

१. **'उक्तमेव मुनिना 'काव्यार्थान् भावयन्ति' इति। तत्काव्यार्थो रस:।**
(अध्याय: ६, पृ० २७८)

---

१. कारिकामिमां महिमभट्टोऽपि तस्य व्यक्तिविवेके समुद्दध्रे (व्य.वि. चौ. सं. पृ. ६८)

२. 'तत्र (काव्ये) च पदार्थवाक्यार्थौ रसेष्वेव पर्यवस्यतः इत्य-
साधारण्यात् प्राधान्याच्च काव्यस्यार्था रसाः। (अ. ७, पृ० ३४३)
३. काव्यार्थान् रसान् भावयन्ति कुर्वते ( ")
४. विभावाः काव्यबलानुसन्धेयाः[१]। (अ. ६, पृ० २७२)।
५. विभावाः काव्यादनुसन्धीयन्ते[२]। (अ. ६, पृ० २७५) इति।

नाट्ये रूपग्राहितया प्रधानतमस्य चक्षुरिन्द्रियस्य गोचरत्वसत्त्वाद् विभावादिप्रत्यक्षजनितः सूक्ष्मतमोऽनुभवो भवतीति तत्रैव रसास्वादजनकतां समर्थयतां तदभावाच्च काव्ये तां प्रत्यादिशताम् उपाध्यायादीनां मतानि—

भावाभिनयसम्बन्धान् स्थायिभावाँस्तथा बुधाः ।
आस्वादयन्ति मनसा तस्मान्नाट्यरसा स्मृताः ।। (ना.शा. ६.३३)

इत्यस्याः कारिकाया व्याख्याने—

१. 'तस्मात् नाट्यात् समुदायरूपात् रसाः। यदि वा नाट्यमेव रसः। रससमुदायो हि नाट्यम्। नाट्य एव च रसः। काव्येऽपि नाट्यायमान एव रसः। काव्यार्थविषये हि प्रत्यक्षकल्पसंवेदनोदये रसोदय इत्युपाध्यायाः। यदाहुः काव्यकौतुके—

'प्रयोगत्वमनापन्ने काव्ये नास्वादसंभवः ।'
वर्णनोत्कलिता भोगप्रौढोक्त्या सम्यगर्पिताः ।
उद्यानकान्ताचन्द्राद्या भावाः प्रत्यक्षवत् स्फुटाः ।।' इति

२. अन्ये तु काव्येऽपि गुणालङ्कारसौन्दर्यातिशयकृतं रसवर्णनामाहुः'
इत्येवमुपस्थाप्य स्वमते नाट्यात् काव्यस्याभेदमेवं प्रत्यतिष्ठिपत्—

'वयं तु ब्रूमः—काव्यं तावन्मुख्यतो दशरूपात्मकमेव। तत्र ह्युचितैर्भाषावृत्तिकाकुनेपथ्यप्रभृतिभिः पूर्यते रसवत्ता। सर्गबन्धादौ हि

---

१-२. 'काव्यस्य स्थाने कार्यस्येत्यपि पाठो दर्शितोऽस्ति।

नायिकाया अपि संस्कृता एवोक्तिः, इत्यादि बहुतरमनुचितं केवलं शक्तिरहितत्वाद् व्यावर्ण्यते। तावतैव हृद्यमिति न्यायेनानौचित्यं न प्रतिजहाति। तत एवोच्यते 'संदर्भेषु दशकरूपकं श्रेयः (वामनेन काव्या० १.३.३०) तेन तदङ्गं सन्ध्यादिसंघटनमुद्धृत्य सर्गबन्धादि यावन्मुक्तम्। यत्तु दशरूपकं तस्य योऽर्थस्तदेव नाट्यम्, यद् वक्ष्यते 'नाट्यस्यैषा तनूः' (ना.शा. १४.२) इति, तस्य हृदयसंवादतारतम्यापेक्षया श्रोतृप्रतिपत्तृस्फुरणं स्फुटास्फुटत्वेनातिविचित्रम्। तत्र ये स्वभावतो निर्मलमुकुरहृदयाः त एव संसारोचितक्रोधमोहाभिलाषपरवशमनसो न भवन्ति। तेषां तथाविधदशरूपकाकर्णनसमये साधारणरसनात्मकचवर्णग्राह्यो रससञ्चयो नाट्यलक्षणः स्फुट एव, ये त्वतथाभूतास्तेषां प्रत्यक्षोचिततथा–विधचर्वणालाभाय नटादिप्रक्रिया, स्वगतक्रोधशोकादिसंकट–हृदयग्रन्थिभञ्जनाय गीतादिप्रक्रिया च मुनिना विरचिता, 'सर्वानुग्राहकं हि शास्त्रम्' इति न्यायात्। तेन नाट्य एव रसा न लोके। काव्यं च नाट्यमेव। चित्रपुस्ताद्यपि च नाट्यस्यैवार्थभागाभिष्यन्दो यथा सर्गबन्धादिः शब्दभागाभिष्यन्दः।'

एतदत्र स्पष्टं यत् काव्यशब्दोऽयं नाट्याभिन्नतया प्रयुक्तोऽपि श्रव्यत्वं न जहाति। अतएव 'वागङ्गे'–त्यादेः पूर्वोद्धृतस्य पद्यस्य भावमाश्रित्य ततः पूर्वमेव सप्तमाध्यायारम्भे–

'अत्र आहार्यं तु यद्यपि नृत्यकलाध्रुवापातयोरन्तरङ्गं तथापि तदनन्तरचित्तवृत्त्यवगतौ वाचिकादीनामेवान्तरङ्गता। तथाहि काव्यादपि रसास्वादो भवतीत्युक्तम्।' (अ.भा.पृ. ३४४) इति

'नाट्यं नाम नटगताभिनयप्रभावसाक्षात्कारायमाणैकघनमानस–निश्चलाध्यवसेयः समस्तनाटकाद्यन्यतमकाव्यविशेषाच्च द्योतनीयः अर्थः। (६.१५ पृ० २६६)

इत्येवं च नाट्यात् काव्यस्य श्रव्यतामूलं भेदमपि स्वयमवोचत्। स्वयमभिनव एव काव्यं पठनीयत्वेन वाचिकाभिनयविषयमामम्नौ। ध्वन्यालोकेऽपि—

**'काव्यप्रभेदाश्रयतः स्थिता भेदवती हि सा'** (३.७)

इत्यस्याः कारिकाया वृत्तौ—'काव्यप्रभेद'—शब्दस्य

**'काव्यस्य प्रभेदाः मुक्तकं संस्कृतप्राकृतापभ्रंशनिबद्धम्, सन्दानितक—विशेषक—कलापक—कुलकानि पर्यायबन्धः, परिकथा, खण्डकथासकलकथे सर्गबन्धोऽभिनेयार्थमाख्यायिकाकथे इत्येवमादयः'**

इति व्याख्यानेऽभिनवगुप्तो निम्नाङ्किते लोचने—

**'महाकाव्यरूपः पुरुषार्थफलः समस्तवस्तुवर्णनाप्रबन्धः संस्कृत एव। अभिनेयार्थं दशरूपकं नाटिकात्रोटकरासकप्रकरणिकाद्यवान्तरप्रपञ्च—सहितमनेकभाषाव्यामिश्ररूपम्।**

इति काव्यनाट्ययोरन्तरमपि दर्शयति।

मम्मटोऽपि काव्यस्य तथाविधोभयरूपतां कण्ठरवेण यद्यपि नोदीरयति तथापि दोषप्रसङ्गे नाट्यस्यापि संग्रहात् उभयरूपताम्,

१. **तानि चेन्नाट्यकाव्ययोः**

२. **लोके प्रमदादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च'** (४ उल्लासः)

३. **अष्टौ नाट्ये रसाः स्मृताः—** (४—३) इत्यादिषु च तस्य श्रव्यरूपतामपि न न प्रकटयति।

पूर्वापरवर्तिष्वपि नाट्यकाव्ययोरिमौ भेदाभेदौ बहुशः प्राप्येते। भामहेन स्वीयेऽलङ्कारे—

**शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद् द्विधा ।** (१.१६)

**सर्गबन्धोऽभिनेयार्थं तथैवाख्यायिकाकथे ।**

**अनिबद्धं च काव्यादि तत्पुनः पञ्चधोच्यते** । (१.१८)
**सर्गबन्धो महाकाव्यं महतां च महच्च यत्** । (१.१९)
**नाटकं द्विपदी शम्या रासकस्कन्दकादि च** ।
**उक्तं तदभिनेयार्थम् ........................** । (१.२४)

इत्थं काव्यस्योभयरूपता प्रत्यपादि, श्रव्यरूपता च।
दण्डिनापि काव्यादर्शे—

**शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली** । (१.१०)
**पद्यं गद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम्** । (१.११)
**मुक्तकं कुलकं कोषः संघात इति तादृशः**
**सर्गबन्धांशरूपत्वादनुक्तः पद्यविस्तरः** । (१.१३)
**सर्गबन्धो महाकाव्यमुच्यते .................** । (१.१४)
**अपादः पदसन्तानो गद्यम्** । (१.२३)
**मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः** । (१.३१)

इत्येवं काव्यस्योभयात्मकता श्रव्यरूपता चाऽदर्शिषाताम्।
वामनोऽपि—

**'काव्यं गद्यं पद्यं च** । (१.३.२१)
**तद् (उभयम्) अनिबद्धं निबद्धं च** । (१.३.२७)
**संदर्भेषु (निबद्धेषु) दशरूपकं श्रेयः** । (१.३.३०)

इति काव्यस्य दृश्यश्रव्योभयत्वं केवलं श्रव्यत्वं चामनति।
रुद्रटोऽपि—

**ननु शब्दार्थौ काव्यम्** (२.१) इति

काव्यं लक्षयित्वा

**'सन्ति द्विधा प्रबन्धाः काव्यकथाख्यायिकादयः काव्ये'**
**उत्पाद्यानुत्पाद्याः**। (१६.२)

इति काव्यस्य द्विविधत्वं प्रतिपाद्यादिपदेन—

**'अन्यद् वर्णकमात्रं प्रशस्तिकुलकादि नाटकाद्यन्यत्, काव्यम्।'** (१६.३६)

इति रूपकं संगृह्णाति। तदित्थमस्यापि द्वैविध्यमभिमतम्।

महिमभट्टोऽपि स्वकीये व्यक्तिविवेकनाम्नि काव्यालङ्कारे—

**'कविव्यापारो हि ..... काव्यम्। तच्च अभिनेयानभिनेयार्थत्वेन द्विविधम्। सामान्येन तत् शास्त्रवत् ...... व्युत्पत्तिफलम्। केवलं व्युत्पाद्य ...... तारतम्यभेदात् काव्यनाट्यशास्त्ररूप उपायभेदः कृतः, न फलभेदः।** (पृ० ९५—९६ चौ.सं.) इत्येवं काव्यस्योभयविधत्वमुरीकरोति। राजशेखरः काव्यविद्याया अष्टादशस्वधिकरणेषु रूपकनिरूपणीयं नामकमधिकरणं पृथगाम्नासीत्[१]।

वक्रोक्तिजीवितकारोऽपि रसवदलङ्कारनिरूपणे[२] काव्यनाट्ययोर्भेदाभेदमेवं संकेतयति—

**'रसवतोऽलङ्कार इति पक्षे सर्वेषामेव रूपकादीनां रसवदलङ्कारत्वमेव न्यायोपपन्नतां प्रतिपद्यते।** (व.जी. ३.११ वृत्तिः)

चतुर्थे चोन्मेषे—

**कथावैचित्र्यपात्रं तद् वक्रिमाणं प्रपद्यते ।**
**यदङ्गं सर्गबन्धादेः सौन्दर्याय निबध्यते ॥** (४.९)

**क्वचित् प्रकरणस्यान्तः स्मृतं प्रकरणान्तरम् ।**
**सर्वप्रबन्धसर्वस्वकलां पुष्णाति वक्रताम्[३] ॥** (४.१३)

---

१. काव्यमीमांसा—१ अ०

२. नगेन्द्रसंस्करणस्य ३५२ पृष्ठे।

३. 'इदमत्र तात्पर्यम्—कुत्रचिदेव निरङ्कुशकौशलाः कुशीलवाः स्वीयभूमिकापरिग्रहेण रङ्गमलङ्कुर्वाणाः नर्तकान्तरप्रयुज्यमाने प्रकृतार्थजीवित इव गर्भवर्तिन्यङ्कान्तरे तरङ्गितवक्रतामहिम्नि सामाजिकीभवन्तो विविधाभिर्भावनाभङ्गीभिः साक्षात् सामाजिकानां किमपि चमत्कारवैचित्र्यमासूत्रयन्ति'—इति 'सर्वप्रबन्धसर्वस्वकलां = सकलरूपक—प्राणरूपाम्' इति वृत्त्या नाट्यपरत्वमस्याः स्फुटम्।

इत्येवं सर्गप्रबन्धरूपकप्रबन्धात्मना भेदं तदुभयात्मकतां च काव्यस्य ग्रन्थनाम्ना स्फुटमुल्लोचयति।

साहित्यमीमांसाकारोऽपि नाटकमीमांसानाम्ना कंचिद् ग्रन्थं निर्ममे इति तस्य ग्रन्थान्तरेभ्य: प्रमाण्यते[1]। स एव व्यक्तिविवेके व्याख्याननामकं व्याख्यानमपि चक्रे। तत्र–

**भावसंयोजनाव्यङ्ग्यपरसंवित्तिगोचर: ।**
**आस्वादनात्मानुभवो रस: काव्यार्थ उच्यते ।।**

अस्या: व्यक्तिविवेक उद्धृताया: कारिकाया: काव्यार्थपदव्यावर्णने–

**'काव्यार्थ इति व्यङ्ग्यतया वाक्यस्यार्थीभावनतोऽस्य काव्ये अवस्थानात्, काव्यग्रहणेन नाट्यमप्युपलक्षितम्**[2]**,**

इत्येवं काव्यवन्नाट्यमपि रसावियोगित्वेनाभिमते परिष्कृतेऽतएव काव्यत्वभाजि साहित्ये संगृह्णाति। एवमन्यत्रापि काव्यनाट्ययोर्युग्मं निबध्नाति। हेमचन्द्राचार्य:–

**'काव्यं प्रेक्ष्यं श्रव्यं च** (८.१ काव्यानुशासने)

**प्रेक्ष्यं पाठ्यं गेयं च** (८.२ काव्यानुशासने)

**पाठ्यं नाटकप्रकरणनाटिकासमवकारेहामृगडिमव्यायोगोत्सृष्टि–काङ्कप्रहसनभाणवीथीसट्टकादि।** (८.३ काव्यानुशासने)

**गेयं डोम्बिकाभाणप्रस्थानशिङ्गभाणिकाप्रेरणरामाक्रीडहल्लीसक–रासकगोष्ठीश्रीगदितकाव्यादि।** (८.४) काव्यानुशासने)

**श्रव्यं महाकाव्यमाख्यायिका कथा चम्पूरनिबन्धं च** (८.५ काव्या०)

---

१. अस्य च विधेयाविमर्शस्यानन्तेतरप्रसिद्धलक्ष्यपातित्वेनास्माभिर्नाटकमीमांसायां साहित्यमीमांसायां च तेषु तेषु स्थानेषु प्रपञ्च: प्रदर्शित:–(व्यक्तिविवेकव्याख्याने चौ. सं. २४३ पृष्ठे) अलङ्कारसर्वस्वस्योत्प्रेक्षाप्रकरणे–७७ पृष्ठे (नि.सा.सं.) च।

२. व्यक्तिविवेकव्याख्याने पृ. ६८ चौ. सं.।

इत्येवं वैदग्धीविशदेन पथा प्राञ्जलं प्रविवेकं च काव्यस्य तादृगुभयतां साधयाञ्चक्रे।

पण्डितराजोऽपि रसगङ्गाधरे—

**१. 'काव्ये नाट्ये च कविना नटेन च प्रकाशितेषु विभावादिषु'**

**२. 'यैरपि नाट्ये शान्तो रसो नाभ्युपेयते तैरपि बाधकाभावात् काव्ये सोऽवश्यं स्वीकार्य एव।'**

इति क्रमेण रसविषये नव्यमते शान्तरसप्रकरणे च काव्यनाट्ययोर्यौगपद्यं दर्शयति। यद्यपि स काव्यस्य शब्दमात्रतां साधयति तथापि हेमचन्द्राचार्यदिशा तन्मतेऽपि नाट्यस्य काव्यात्मकता न विखण्ड्यते।

एवमन्यत्रापि प्रतापरुद्रयशोभूषणादिषु[१] काव्यस्य सामान्यविशेषात्मना द्वैविध्यं भूम्ना चर्चितं लभ्यते।

इत्थं सामान्यरूपं काव्यं साहित्यञ्चेत्यर्थान्तरं न भवतः। ततश्च साहित्यशब्दप्रयोगपूर्वमकृतेऽपि साहित्यतत्त्वविवेचने काव्यनाम्ना—ऽभिनवगुप्तमम्मटयोस्तद्विवेचनमनुभूतिसाधितं दृश्यते। नामभेदे च प्रेक्षावन्तो न विवदन्ते। अयमत्रापरो विशेषो यद् योऽयं द्वितीयतृतीययोर्मतयोः साहित्यशब्दव्युत्पत्तिसमुत्थापितः प्रायेण वाङ्मयमात्रसाधारणो मतिप्रसरोऽनुभूयते सोऽत्र काव्यशब्दमाश्रित्य कृते तत्त्वविचारे परिह्रियते। यैरपि साहित्यस्य सर्वातिशायित्वमुदघोषि तैरपि कुन्तकाचार्यैरात्मनो ग्रन्थरत्नं काव्यालङ्कारनाम्नैव व्यपादेशि। किञ्चामीषु वादेषु साहित्यस्य धर्मरूपतैव सिद्ध्यति, न तु तद्विशिष्ट—(धर्मि)—तापि। ततश्च शब्दार्थयोः काव्यत्वसंसिद्धयेऽतिरिक्तो विचारः क्रियते। न च मतुबर्थीयस्याच्प्रत्ययस्य विधानात् साहित्यशब्दस्य तादृशब्दार्थपरता तेषामभिमता, तद्ग्रन्थेषु तादृश्या व्युत्पत्तेः क्वाप्यदृष्टत्वात्। न चैषाऽन्येष्वपि काव्यशास्त्रप्रमुखेष्वाचार्येषूपलभ्यते,

---

१. श्रीशङ्कररामशास्त्रिप्रकाशिते प्रतापरुद्रयशोभूषणस्य मइलापुरसंस्करणे नाट्यकाव्ययोः प्रकरणे भिन्नतया स्थापिते लभ्येते।

तेषु काव्यशब्दस्यैव दृष्टचरत्वात्, गुणालङ्कारसंस्कृतयोः शब्दार्थयोरेव च काव्यतया स्वीकृतत्वात्। तथाहि ध्वन्यालोकविधाता श्रीमानानन्दवर्धनः **''शब्दार्थशरीरं तावत् काव्यम्। तत्र शब्दगताश्चारुत्वहेतवोऽनुप्रासादयः, अर्थगताश्चोपमादयः, [1]संघटनाधर्माश्च....माधुर्यादयः......प्रतीयन्ते.... वृत्तयोऽपि ..... उपनागरिकाद्या गताः श्रवणागोचरं रीतयश्च वैदर्भीप्रभृतयः''** इत्येवं पूर्वाचार्यमतोपस्थित्या तादृशब्दार्थयुग्मस्य काव्यत्वमूरीकरोति। एवमेव—

१. **विविधवाच्यवाचकरचनाप्रपञ्चचारुणः काव्यस्य।** (पृ० ८७ चौ० सं०)

२. **काव्यस्य हि ललितोचितसंनिवेशचारुणः।** (पृ० ४५ चौ० सं०)

इत्येवं तदेव मुहुः स्मरति। अभिनवगुप्तोऽपि लोचने—

१. **शब्दार्थगुणालङ्काराणामेव शब्दार्थशोभाकारित्वाल्लोकशास्त्रातिरिक्त—सुन्दरशब्दार्थमयस्य काव्यस्य न शोभाहेतुः कश्चिदन्योऽस्ति।** (पृ० १५)

२. **गुणालङ्कारौचित्यसुन्दरशब्दार्थशरीरस्य सति ध्वननाख्यात्मनि काव्यरूपताव्यवहारः।** (पृ० ५८)

३. **काव्यग्रहणात् गुणालङ्कारोपस्कृतशब्दार्थपृष्ठपाती ध्वनिलक्षण आत्मेत्युक्तम्।** (पृ० १०४—५)

इत्येवं तत्तत्सन्दर्भे प्रोक्तमेव पन्थानमाशिश्रिये।

महिमभट्टोऽपि व्यक्तिविवेकापरनाम्नि स्वीये काव्यालङ्कारे पूर्वपक्षा—धिकृतत्वेन

**गुणालङ्कारसंस्कृतशब्दार्थमात्रशरीरं काव्यम्'** (पृ० ९८)

इति पूर्वमुद्धृतं वामनस्यैव काव्यलक्षणं ध्वनिकृदभिमततयोपस्थापयति। रुद्रटवामनभामहानाञ्च काव्यलक्षणानि प्रागुदाहृतान्येव। कुन्तकभोजयोरपि शब्दार्थयोरेव काव्यत्वमभिमतमित्यपि नाविदितमिदानीम्। साहित्य—

---

१. 'वर्णसंघटनाधर्मा' इति केचित् पठन्ति, तदशुद्धमेव सर्वथा।

मीमांसाकृदपि—'शब्दार्थौ दोषरहिता'—वित्यादि पूर्वमुद्धृतमेव काव्यलक्षण—मूरीकरोति। साहित्यविचारोऽपि कुन्तकभोजसाहित्यमीमांसाकृद्भिरङ्गतयैव काव्यस्य कृतः। अतः, अलङ्कारः, गुणः, रसादिः, एतदन्तःपातिन्यो रीतिवृत्तिप्रवृत्तयः एतत्सर्वाभिव्यापितया स्थितमौचित्यमिति सर्वैरेव यथासंभवं युक्तत्वमन्योन्यारहितत्वं च (परस्पर्धितयाऽन्योन्यसहितत्वं च वा) शब्दार्थयोः साहित्यपदेनाभिमतं भवति। ततश्च—

**'सहितं रसेन युक्तं विशिष्टं साहित्यम्[1], तस्य भावः साहित्यम्। अथवा हितेन निरतिशयप्रेमास्पदेन इतरेच्छा—नधीनेच्छाविषयेण रसेन सहितम्, उभयत्र व्यञ्जकत्व—प्रतिपादकत्वान्यतरसम्बन्धेन विशिष्टं तस्य भावः। किंवा हितं पिहितम् आवृतं तत्सहितम्। अपि वा हितं सन्निहितं नेदिष्ठम् 'हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्' 'तद्दूरे चान्तिके च यत्' इति च श्रुतेः। सद्भिर्महाकविभिः सम्यक् निहितं रक्षितं वा, तत्सन्निवेशेनैव महाकवित्वलाभात्, प्रहितं प्रेषितं साक्षात्परमानन्दरूपेण, परमेश्वरेण वा, अवहितं निगृहीतेन मनसा ध्यातं प्राचेतसद्वैपायनप्रभृतिभिर्महर्षिभिर्वा, हितं सुहितम् 'यं लब्ध्वा चापरं लाभं मन्यन्ते नाधिकं ततः' इति स्मरणात् अक्षय्यतृप्तिसम्पादनं वा, तत्सहितं तस्य भावः। सर्वथा चेदृश्यो व्युत्पत्तयो रसरूपमर्थं न व्यभिचरन्ति।**

इति यत् १९९७ विक्रमीये काशीतः प्रकाशिते ध्वन्यालोके तत्संपादकैः श्रीमद्भिः पट्टाभिरामशास्त्रिभिर्भूमिकायां साहित्यशब्दव्युत्पत्तयो दर्शितास्तत्सर्वमप्यसम्प्रदायशुद्धमिति सर्वथानुपजीव्यमेव। हितपदेन पिहितसन्निहितनिहितप्रहितावहितसुहितत्वानामवगमः किम्प्रमाणक इति तावदत्र

१. विशिष्टं तस्येति भाव्यम्। साहित्यमिति तन्मध्ये भ्रान्तम्।

विज्ञातुं न प्रभवामः, ततश्च योऽयं विभावादिजीवितावधित्वेन प्रसिद्धस्तस्य रसस्य पिहितत्वम्, निहितत्वम्, प्रेषितत्वं वा सुमनोऽननुमोदितं वर्त्म विहाय किमिवैते साधयेयुरिति न जानीमः। अयमत्रापरो गण्डे विस्फोटो यदिमेऽस्य स्वाकार इवाभिन्नतया गोचरीक्रियमाणस्यापि मनसा ध्यातत्वं व्युत्पादयन्ति, यद्यपि 'तत्तत्स्थाय्युपहितस्वस्वरूपानन्दाकारा समाधाविव योगिनश्चित्तवृत्ति– रुपजायते' इति पण्डितराजस्य स्वकृतौ रसगङ्गाधर एवंविधः कल्पको दृश्यते, तथापि तत्र चित्तवृत्तिस्वरूपस्य स्थायिनो वृत्त्यन्तरविषयत्वे स्वीक्रियमाणे वेदान्तस्य चित्तवृत्तीनां साक्षिभास्यत्वसिद्धान्तो विहन्यते, ततो निवारिता चानवस्था लम्भितप्रसरा जायते। यच्चात्र 'हितपदेन' अक्षय्यतृप्तिसम्पादनरूपं सौहित्यमेभिरुपकल्पितं तदपि न न्याय्यम्, काव्यरसस्य साध्यावस्थत्वात् क्षणिकत्वस्य सर्वाभियुक्तसंमतत्वात्। न चास्य तृप्तिरपि तथा, तस्यास्तद्रूपत्वस्यैव सिद्धान्तितत्वात्[1], भिन्नतायामपि तस्या अक्षय्यत्वे काव्यं प्रति पुनःप्रवृत्तेः असंभवात्, ब्रह्मास्वादसब्रह्मचारित्वस्य च निर्मूलनात्। काव्यनाट्यरसेनैव वा अक्षय्यायां तृप्तौ जनितायां कृतमष्टाङ्गयोगेन साधनचतुष्टयसम्पत्त्या ब्रह्मकैवल्यलाभेन वा। किं च रससहितत्वमात्रेण साहित्यवत्त्वे स्वीकृते नीरसे वस्त्वलङ्कारादिध्वनिसनाथे शब्दार्थालङ्कारचित्रे गुणीभूतव्यङ्ग्ये वा काव्ये स्फुटः साहित्यविगमः। न चात्र साहित्यशून्यता साधयितुं सुशका, संप्रदायविरोधात् सहृदयनेदीयसो वर्त्मनोऽतिक्रमाच्च।

तदित्थं सर्वैरप्येभिराचार्यैः काव्यधर्मत्वमेव साहित्यस्य स्वीकृतम्, न काव्यत्वम्। 'साहित्यदर्पण' इति स्वकाव्यालङ्कारनाम कुर्वतो

---

१. 'आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्' इत्यत्र 'आह्लाद एव आह्लादकः' इत्यस्या व्युत्पत्तेर्माधुर्यस्य यथाऽऽह्लादरूपत्वमेवाङ्गीक्रियते तथैव रसस्यापि। अतएव 'रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्' इति प्रयोजनकारिकावृत्तौ काव्यप्रकाशेऽपि ठक्कुरादिभिः तत्र कर्मधारयः समर्थितः।

विश्वनाथमहापात्रस्य धर्मितयापि तदभिमतं प्रतिभाति, किन्तु प्रतिभानमात्रमेतत्, तत्र स्फुटं किञ्चित् प्रमाणं न लभ्यते।

**(५) काव्याभेदवादः**

अच्प्रत्यययोगेन साहित्यशब्दस्य तादृशशब्दार्थरूपकाव्यपरत्वं यद्यपि प्रागुदाहृते काव्यशास्त्रसंप्रदाये न लभ्यते, तथापि कविषु तत्परत्वेनापि प्रयोगो बहुत्र दृश्यते। तथाहि–

दण्डिनो दशकुमारचरितस्य पूर्वपीठिकायां (यदि सा तन्निर्मितैव स्यात्) सर्वप्रथमं धर्मिपरत्वेन साहित्यपदप्रयोगो लभ्यते। तत्र राजकुमारस्य राजवाहनस्याधीतानां विद्यानां परिगणने लिपिः, निखिलदेशीया भाषाः, षडङ्गो वेदः, काव्यम्, नाटकम्, आख्यातम्, आख्यायिका, इतिहासः, चित्रकथाः, पुराणम्, धर्मशास्त्रम्, व्याकरणम् ज्यौतिषम्, तर्कः, मीमांसा, कौटिल्यकामन्दकादीनामर्थशास्त्राणि, वीणादिवाद्यम्, गजाश्वारोहणम्, विविधायुधप्रयोगः, चौर्यद्यूतादिकपटकलाः,–इत्येषु संगीतसाहित्ये अपि स्मृते स्तः। तत्र काव्यनाटकानां पृथगुल्लेखात् साहित्यपदं नृत्यादिकलापरतया टीकाकृता व्याकृतम्। वस्तुतः संगीतसाहचर्यात् साहित्यपदमत्र पद्यकाव्यैकपरतया नेयम्। प्रसिद्धं हि काव्यस्य पद्यमयत्वमेव प्रायेण। कालिदासः शाकुन्तले दुष्यन्तावदानं पद्येष्वेव गीतिक्षमेषु निबध्यमान–मप्सरोभिराद्रियते। तथाहि–

**विच्छित्तिशेषैः सुरसुन्दरीणां वर्णैरमी कल्पलतांशुकेषु ।**
**विचिन्त्य गीतिक्षममर्थबन्धं दिवौकसस्त्वच्चरितं लिखन्ति ।** (७.५)

रामायणेऽपि गानमसौ न विस्मरति–

**स्वकृतिं गापयामास कविप्रथमपद्धतिम् ।।** (रघुवंशे १५.३३)
**रामस्य मधुरं वृत्तं गायन्तौ मातुरग्रतः ।**
**तद्वियोगव्यथां किञ्चिच्छिथिलीचक्रतुः सुतौ ।।** (रघुवंशे १५.३४)

अथ प्राचेतसोपज्ञं रामायणमितस्ततः ।
मैथिलेयौ कुशलवौ जगतुर्गुरुचोदितौ ॥ (रघुवंशे १५.६३)

वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किन्नरस्वरौ ।
किं तद् येन मनो हर्तुमलं स्यातां न शृण्वताम् ॥ (रघुवंशे १५.६४)

तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ ।
हिमनिष्यन्दिनी प्रातर्निर्वातेव वनस्थली ॥ (रघुवंशे १५.६६)

गेये को नु विनेता वां कस्य चेयं कृतिः कवेः ।
इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसताम् ॥'

(रघुवंशे १५.६८) इति

अत्र च रामायणस्य कविप्रथमपद्धतित्वमपि तथ्यमिदं साधयति, तस्य पद्यमयत्वात्। 'आम्नायादन्यत्र नूतनश्छन्दसामवतार'[1] इति भवभूतिवचनं तमिममर्थं द्रढयति। काव्यमीमांसायां काव्यपुरुषोत्पत्तिप्रकरणे राजशेखरोऽपि—

**'सरस्वती००काव्यपुरुषं सुषुवे सोऽभ्युत्थाय सपादोपग्रहं छन्दस्वतीं वाचमुदचीचरत्—**

**यदेतद् वाङ्मयं विश्वमर्थमूर्त्या विवर्तते ।**
**सोऽस्मि काव्यपुमानम्ब पादौ वन्देय तावकौ ॥** इति।

**तामाम्नायदृष्टचरीमुपलभ्य भाषाविषये छन्दोमुद्रां देवी०००तमुदपालयत् 'वत्स सच्छन्दस्काया गिरः प्रणेतः! वाङ्मयमातरमपि मां विजयसे... इति। त्वत्तः पूर्वे हि विद्वांसो गद्यं ददृशुर्न पद्यम्। त्वदुपज्ञमथातः छन्दस्वद् वचः प्रवर्त्स्यति।'**

इति काव्ये पद्यमयताया एवासाधारणधर्मत्वं प्रतिपाद्य तदनन्तरं—

**'स सारस्वतेयस्तस्मै (उशनसे) छन्दस्वतीं वाचं समचारयत,**

---

१. उत्तररामचरिते—२.५६ गद्यम्।

अकस्माद् विस्मापयन् स चाभ्युवाच—

या दुग्धापि न दुग्धेव कविदोग्धृभिरन्वहम् ।
हृदि नः सन्निधत्तां सा सूक्तिधेनुः सरस्वती ।। इति

सा (सरस्वती) प्राचेतसायापि महर्षये सच्छन्दांसि वचांसि प्रायच्छत्। स निषादनिहतसहचरीकं क्रौञ्चयुवानं करुणक्रेङ्कारया गिरा क्रन्दन्तमुदीक्ष्य शोकवान् श्लोकमुज्जगाद—

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।। इति।

इति शुक्रवाल्मीकी अपि पद्यकर्तृत्वेनैव कवियशोभागिनावूरीकृत्य तदेव प्रमाणयति। चतुर्थेऽध्यायेऽपि कविभेदानामुदाहरणानि च श्लोकरूपाण्येव दर्शयति। अन्येष्वपि चाध्यायेषु श्लोकनिर्माणश्रममसौ कवेर्नित्यकर्मतया निर्दिशति। क्षेमेन्द्रोऽपि कविकण्ठाभरणे—

गीतेषु गाथास्वथ देशभाषाकाव्येषु दद्यात् सरसेषु कर्णम् ।
वाचां चमत्कारविधायिनीनां नवार्थचर्चासु रुचिं विदध्यात् ।। (१.१७)
पठेत् समस्तान् किल कालिदासकृतप्रबन्धानितिहासदर्शी ।। (१.१८)

महाकवेः काव्यनवक्रियायै तदेकचित्तः परिचारकः स्यात् ।
पदे च पादे च पदावशेसंपूरणेच्छां मुहुराददीत ।। (१.२०)

अभ्यासहेतोः पदसन्निवेशैर्वाक्यार्थशून्यैर्विदधीत वृत्तम् ।
श्लोकं परावृत्तिपदैः पुराणं यथास्थितार्थं परिपूरयेच्च ।। (१.२०)

शिक्षयानया कवित्वलाभाय श्लोकनिर्माणमेव प्रथमतयाऽजीगणत्। श्रीहर्षोऽपि नैषधे चिन्तामणिमन्त्रोपदेशफलं दर्शयन्—

**पुष्पैरभ्यर्च्य गन्धादिभिरपि सुभगैश्चारु हंसेन मां चे–**
**न्निर्यान्तीं मन्त्रमूर्त्तिं जपति मयि मतिं न्यस्य मय्येव भक्तः ।**
**तत्प्राप्ते वत्सरान्ते शिरसि करमसौ यस्य कस्यापि धत्ते**
**सोऽपि श्लोकानकाण्डे रचयति रुचिरान् कौतुकं दृश्यमस्याः ।।** (१४.९०)

पद्येनानेन श्लोकपरिणतिमेव कवित्वपरिणतिमामम्नौ। अतएवालङ्कारिक–शिरोमणिः श्रीमान् महिमाचार्यश्छन्दसोऽपि काव्यालङ्कारत्वमूरीचक्रे–
**'यमकानुप्रासयोरिव वृत्तस्यापि शब्दालङ्कारत्वमुपगतमस्माभिः[१]।'** इति

एवंविधैरन्यैरपि सन्दर्भैः संगीतसंपुटिते काव्य एव दण्डिन उक्ते प्रयोगे साहित्यपदस्य तात्पर्यमूरीकर्त्तुमुचितम्। संगीतस्य साहित्यं वाद्यादिसहितत्वमिति तु तत्र कल्पनैकपदं व्याख्यानमूरीकर्तुं न युज्यते समित्युपसर्गेण वीणाद्यशेषवाद्यदाक्ष्यमिति विशेषणान्तरेण च तदर्थप्रत्यायनात् पौनरुक्त्यापत्तेः। रागान्तरसाहित्यं त्वकिञ्चित्करम्, तस्य शब्दं विनाप्युप–लब्धेस्तादृशब्दप्रयोगेऽपुष्टिप्रसङ्गात्। संगीतसाहित्ययोर्यौगपद्यं प्रायेण–
**'साहित्यसङ्गीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः।'**[२]
इत्यादिषु सर्वतः प्रसिद्धमपि वरीवर्त्ति।

महाराजो भोजः शृङ्गारप्रकाशे काव्यस्य दृश्यं श्रव्यं चेत्युमयमपि प्रकारं विवेचयति। तत्रैकादशे प्रकाशे स 'साहित्यप्रकाश'–नामकमप्येकं काव्यभेदं श्रव्यान्तर्गततया स्थापयति वक्ति च–
**'प्रबन्धश्चेह द्विविधः प्रेक्ष्यः श्रव्यश्च। तयोरभिनेयः प्रेक्ष्यः, स च नाटकादिभेदाच्चतुर्विंशतिप्रकारो भवति...। अनभिनेयः श्रव्यः, सोऽप्याख्यायिकादिभेदाच्चतुर्विंशतिप्रकारो भवति–'आख्यायिका,**

---

१. व्यक्तिविवेकस्य १९१ पृष्ठे (चौखम्भा–संस्करणीयस्य)
२. भर्तृहरिनाम्ना प्रसिद्धमेतत्। एवमेव–

सङ्गीतमथ साहित्यं सरस्वत्याः स्तनद्वयम् ।
एकमापातमधुरमन्यदालोचनाऽमृतम् ।। इत्यादिष्वपि।

**उपाख्यानं....सर्गबन्धः,...संहिता साहित्यप्रकाश'** इति। लक्षयति चान्तिममेवम्—

**यस्मिन्नशेषविद्यास्थानार्थविभूतयः प्रकाशन्ते ।**
**संहत्य स साहित्यप्रकाश एतादृशो भवति ।।** इति

एतादृशपदेनास्य स्वकृतः शृङ्गारप्रकाश एवाभिमतः। सन्ति च तत्र सर्वेषामेव विद्यास्थानानां विषयाः। तदत्रास्य 'साहित्य'—पदेन महाभारतादिकाव्यमेव विवक्षितम्।

अभिनवगुप्तस्य पूर्वोद्धृत—विमर्शिनीपद्ये दर्शितं साहित्यपदं नियतमेव काव्यपरम्, सौहित्यपदसाहचर्यात्।

क्षेमेन्द्रः साहित्यपदं स्फुटं व्यवहरति—

**कुर्वीत साहित्यविदः सकाशे श्रुतार्जनं काव्यसमुद्भवाय ।**
**न तार्किकं केवलशाब्दिकं वा कुर्याद् गुरुं सूक्तिविकासविघ्नम्**[१] ।। इति

एवमेव—

**श्रुत्वाभिनवगुप्ताख्यात् साहित्यं बोधवारिधेः ।**
**आचार्यशेखरमणेर्विद्याविवृतिकारिणः**[२] ।। इति

उभयत्रापि साहित्यपदं काव्यपरं काव्यशास्त्रपरं च संभाव्यते।

श्रीकण्ठचरितप्रणेता मङ्खोऽपि—

**विना न साहित्यविदा परत्र गुणः कथञ्चित् प्रथते कवीनाम् ।**
**आलम्बते तत्क्षणमम्भसीव विस्तारमन्यत्र न तैलबिन्दुः ।।** (२.१२)

साहित्यपदान्नूनं काव्यमेवाभिप्रैति।

श्रीहर्षोऽपि भगवतीं सरस्वतीं वर्णयन्—

---

१. कविकण्ठाभरणे—१.१५

२. बृहत्कथामञ्जरी, उपसंहारे ३७ पद्यम्।

**मध्येसभं सावततार बाला गन्धर्वविद्याधरकण्ठनाला ।**
**त्रयीमयीभूतवलीविभङ्गा साहित्यनिर्वर्तितदृक्तरङ्गा ।।** (नैषधे १०.७३)

पद्येऽत्र काव्यार्थ एव साहित्यपदं प्रयुङ्क्ते। एवमेव—

**साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले**
**तर्के वा मयि संविधातरि समं लीलायते भारती**''ति स्वगर्वोक्तावपि।

विह्लणः स्वकृतौ विक्रमाङ्कदेवचरिते साहित्यपदं नैकधा प्रयुङ्क्ते—

**साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः ।**
**यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति ।।** (१.११)

अत्र साहित्यपदं काव्यसामान्यार्थकमेव। म.म. भरतरत्नं श्रीमान् काणेमहोदयः पद्यस्यास्य साहित्यपदं वाङ्मयपरतया व्याकरोति। स स्वकृतौ संस्कृतकाव्यशास्त्रेतिहासे लिखति—

'In the verse 'साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः it will be noticed that साहित्य means 'Literature in General and Kavya is said to arise like nectar from the ocean of साहित्य (i. e. काव्य is the quintessence of साहित्य[१])'

एवमन्येऽपि कन्हैयालालपोद्दारप्रभृतयः[२] पद्यस्यास्यैतत् पदं वाङ्मयपरमेव मन्वते। तत्र भावनयानया निमीलितधियः केचन 'कर्णामृतमि'ति पदं 'काव्यामृत'—मिति परिणमय्य योजयन्तो दृश्यते[३]। वस्तुतोऽत्रापि साहित्यपदं काव्यसामान्यार्थकं भवति। कर्णामृतपदेन निगीर्याध्यवसानयातिशयोक्त्यात्र श्रव्यकाव्यमात्रमभिप्रेतमस्ति। साहित्यपदेन वाङ्मये गृह्यमाणे नाटकस्य

१. History of Samskrta Poetics पृ० 341, 2002
२. 'संस्कृत साहित्य का इतिहास', कन्हैयालाल पोद्दार,
३. 'काशीनागरीप्रचारिणीसभायाः नागरीप्रचारिणीपत्रिकाया २०१७ संवत्सरीये द्वितीयेऽङ्के 'काव्यों में अन्योक्ति' इतिनामा लेखोऽत्र द्रष्टव्यः।

कर्णामृतत्वमपहस्तितं भवति। न च तल्लोचनामृतमस्तीति वाच्यम्, अभिनयमात्रस्य दृश्यतया स्थितेः शेषस्य श्रव्यत्वाविखण्डनात्। भवति चात्र तथैवाचार्यप्रतिपत्तिः पूर्वे हेमचन्द्रमते तस्या दृष्टचरत्वात्। न चात्र सर्गबन्धप्रकरणेऽनुत्थानपराहतैव नाट्यकथेति वक्तव्यम्, हर्षचरितादिषु[१] स्वप्नवासवदत्तादिस्मरणस्याप्रस्तुतत्वप्रसक्तेः। न चायमस्ति तत्राग्रहो यन्महाकाव्यकृतामेव काव्यारम्भे चर्चा स्यात्, तद्विरोधितया स्थितानामेव च खलानां निन्दा, प्रत्युतायमस्ति तत्राचार्याणां प्रणयो यत् काव्यसामान्यस्य प्रणेतृणामपहर्तृणां च तत्र ते स्याातामिति। किं च श्रव्यमपि कथाख्यायिका-दिभेदेन गद्यरूपमनेकधा दृश्यते काव्यम्। तत् कर्णामृतपदेनात्र न स्मर्यते। स्मर्यते केवलं संगीतिमयं पद्यकाव्यमेव। अतएव तत्कविः—

**जयन्ति ते पञ्चमनादमित्रचित्रोक्तिसन्दर्भविभूषणेषु ।**
**सरस्वती यद्वदनेषु नित्यमाभाति वीणामिव वादयन्ती ॥**[२] (१.१)

इति पूर्वतनेऽस्मिन् पद्ये कोकिलालापं स्मरति। यदि वाङ्मयव्यतिरेकेण कर्णामृतपदोपलक्ष्यतयात्र केवलं पद्यमात्रमाद्रियते तर्हि

**कटु क्वणन्तो मलदायकाः खलास्तुदन्त्यलं बन्धनशृङ्खला इव ।**
**मनस्तु साधुध्वनिभिः पदे पदे हरन्ति सन्तो मणिनूपुरा इव ॥**[३] इति

गद्यकाव्यविषयमाकर्षकत्वसंसाधनं दुरुपापादमुपपद्येत, कर्णामृतपदेन तदतिरिक्तस्यान्यस्य कस्यचिदपि धर्मस्य प्रतिपादनासम्भवात्, वाङ्मया-तिरेकिणोऽस्य धर्मस्य गद्येऽपि संभवाच्च। उभयसाधारण्येन कर्णामृतत्वस्य स्थितौ तु काव्यामृतमित्येवोक्तं स्यात्, स्याच्च 'काव्यार्थचौरा' इत्यस्य स्थाने 'परार्थचौराः' इति पदान्तरप्रयोगः। ततश्चोपजातिसौन्दर्यमपि

१. सूत्रधारकृतारम्भै० इति प्रसिद्धं पद्यम्।
२. कादम्बर्याम्।
३. कादम्बर्यामेव।

परार्धस्योपेन्द्रवज्रैकमयतया निष्पद्येत परिह्रियेत च समानश्रमोत्पन्ना–मृताधिकारिभिर्दैत्यैस्तथाविधानां खलानामुपनिबध्यमाने सादृश्ये जायमानस्यासामञ्जस्यस्य प्रसङ्गः, परार्थचौरत्वस्योपमेयोपमानोभयसाधारण्यस्य सिद्धेस्तत्कारित्वेनाभिव्यक्तस्यानौचित्यस्याप्युभयत्राप्यवस्थिततत्वप्रत्ययात्। दृश्यश्रव्योभयं साहित्यतयादाय दृश्यव्यतिरेकेण श्रव्यमात्रे कर्णामृतत्व–साधने तु नायमुपप्लवः। नाटकं चाभिनयक्रियामात्रतो भिन्नम्। न चेयं केनाप्यपहर्तुं शक्या। शेषस्यास्य श्रव्याविशेषितयाऽपहरणस्य संभवे तदर्थं प्रबोधस्य विधानमुचितं भवति। न चात्र पक्षे पाथोनिधिसाम्यं विघटते, क्षारतयाऽमृततुल्येन साहित्येन पाथोधेर्वैषम्यात् इति वाच्यम्, गाम्भीर्यमात्रस्यात्र साधारण्येन विवक्षितत्वात्। यद्वा पद्यापेक्षया गद्यस्यापातरमणीयत्वं नाधिकं भवतीति ततोऽस्य क्षारत्वप्रतिपादनेऽपि न दोषः। प्रतिपाद्यते हि पद्यस्य श्रुतिसुभगत्वं महद्भिः। जगद्धरः स्तुतिकुसुमाञ्जलौ काव्यस्य विशेषममुं निपुणं निर्वर्णयति–

**शब्दार्थमात्रमपि ये न विदन्ति तेऽपि**
**यां मूर्च्छनामिव मृगाः श्रवणैः पिबन्तः ।**
**संरुद्धसर्व–करण–प्रसरा भवन्ति**
**चित्रस्थिता इव कवीन्द्रगिरं नुमस्ताम् ।।** (५.१७) इति।

एवमेव–

**अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।**
**अनधिगतपरिमलापि हि हरति दृशं मालतीमाला ।।**

इत्यादयः सूक्तयो विषयेऽत्र प्रचलन्ति। पद्यस्य संगीतिसंभावनया सद्योहारितामुपलक्ष्यैव तदयुक्तस्य गद्यस्य कविनिकषत्वख्यातिः सत्सु प्ररोहति 'गद्यं कवीनां निकषं वदन्ती'–त्यादिः।[1] ततोऽत्र क्षारत्वव्यक्तिरपि

---

१. काव्यालङ्कारसूत्रवृत्तावुद्धृतमेतत्–'

नासाधीयसी। किं च वामनप्रभृतिभिः, यथा पूर्वमस्माभिर्दर्शितं[१], सन्दर्भेषु दशरूपकस्यैव श्रेयस्त्वमुदघोषि। सर्गबन्धप्रणेता विह्लणस्तत् सोढुमसहो दृश्यकाव्यतोऽपि श्रव्यस्य श्रेयस्त्वं प्रतिपादयन्नेवमस्य कर्णामृतत्वमुल्लिखति। न चास्ति वाङ्मयार्थे साहित्यपदं क्वापि संस्कृतसाहित्ये प्रयुक्तम्। साहित्यमीमांसाकृतापि साहित्यस्य यद् वाङ्मयत्वं प्रत्यपादि तदपि परिष्कारत्वेनाभिमतेष्वेव सम्बन्धेषु तस्य संरम्भदर्शनात्--

**न च काव्ये शास्त्रादिवदर्थप्रतीत्यर्थं शब्दमात्रं प्रयुज्यते, सहितयोः शब्दार्थयोस्तत्र प्रयोगात् साहित्यं च तुल्यकक्षत्वेनान्यूनानतिरिक्तत्वम् ॥**

इति च तस्यैव परवर्त्तिनि[२] ग्रन्थे व्यक्तिविवेकव्याख्यानाख्ये[३] सिद्धान्तत्वेन[४] कुन्तकमतस्यैवाङ्गीकृतेर्निर्मूलम्। भवतु च साहित्यमीमांसायां साहित्यपदस्य वाङ्मयपरत्वं तथापि नात्र काचन हानिः, तन्मतस्य सर्वैरप्यनङ्गीकृतत्वात्। स्वयं तेनापि स्वकीये[५] श्रीकण्ठचरिते साहित्यपदस्य यस्मिन्नर्थे प्रयोगः कृतः स तस्य प्रागुदाहृते 'विना न साहित्यविदा' इति पद्ये स्पष्टं दृश्यते, यावदन्यैरपि तस्मिन्नेवार्थे साहित्यपदं प्रायोजीति तैस्तैः कालक्रमागतैः सन्दर्भैर्लभ्यते—

विह्लणो विक्रमाङ्कदेवचरिते भूयोऽपि द्विः साहित्यपदं प्रायुङ्क्त। तथाहि—

---

१. अस्मिन्नेव निबन्धे।

२. व्यक्तिविवेकव्याख्याने साहित्यमीमांसाया उल्लेखो लभ्यते, स चात्रैव २३ तमायां पादटिप्पण्यां द्रष्टव्यः। विद्वांसोऽत्र प्रत्यवतिष्ठन्तेऽपि।

३. व्यक्तिविवेकस्य चौखम्भासंस्करणे २९८ पृष्ठे।

४. कुन्तकमतं पूर्वमुद्धृतम्।

५. श्रीकण्ठचरितस्य प्रणेता मङ्खः एव रुय्यकालङ्कारसूत्राणां भाष्यस्यालङ्कारसर्वस्वस्य साहित्यमीमांसाया व्यक्तिविवेकव्याख्यानस्य च कर्त्ता, किन्तु पूर्वोद्धृतैव साहित्यमीमांसा मङ्खकृतिरिति न निश्चितम्।

**कुण्ठत्वमायाति गुणः कवीनां साहित्यविद्याश्रमवर्जितेषु ।**
**कुर्यादनार्द्रेषु किमङ्गनानां केशेषु कृष्णागरुधूपवासः ।। (१.१४)**

अत्राङ्गनाकेशौपम्येन साहित्यस्य काव्यात्मकत्वमेव पुष्यति। अष्टादशे सर्गे स्वपरिचये—

**अङ्गैस्त्वङ्गत्कनकरुचिभिः कार्मणं लोचनानां**
**सूरेस्तस्मादजनि जगतां शेखरो विह्लणाख्यः ।**
**सान्द्रैर्वेदध्वनिभिरनभिव्यक्तमञ्जीरनादा**
**मौञ्जीबन्धात् प्रभृति वदने यस्य वाग्देवतासीत् ।। ८१ ।।**

**साङ्गो वेदः फणिपतिदिशा शब्दशास्त्रे विचारः**
**प्राणा यस्य श्रवणसुभगा सा च साहित्यविद्या ।**
**को वा शक्तः परिगणयितुं श्रूयतां तत्त्वमेतत्**
**प्रज्ञादर्शे किमिव विमले नास्य सङ्क्रान्तमासीत् ।। ८२ ।।**

इत्थं साहित्यविद्यां स्वप्राणतयाऽभिप्रैति। अत्रापि काव्यस्यैव तात्पर्यविषयता संभवति साहित्यविद्यापदात्, तस्यैव प्राणत्वेन हार्दिकतायाः संभवात्, न तु शास्त्रस्य।

उद्भटकृतेः काव्यालङ्कारसारसङ्ग्रहस्य टीकिता प्रतीहारेन्दुराजोऽपि—

**मीमांसासारमेघात् पदजलधिविधोस्तर्कमाणिक्यकोशात्**
**साहित्यश्रीमुरारेर्बुधकुसुममधोः शौरिपादाब्जभृङ्गात् ।**
**श्रुत्वा सौजन्यसिन्धोर्द्विजवरमुकुलात् कीर्त्तिवल्ल्यालवालात्**
**काव्यालङ्कारसारे लघुविवृतिमधात् कौङ्कणः श्रीन्दुराजः ।।[१]**

इति साहित्यपदं काव्यपरतयैव नियुङ्क्ते। काणेमहोदयः—

Here obviously the word साहित्य stands for साहित्यशास्त्र

---

१. टीकाया अन्ते।

as in the case of मीमांसा, व्याकरण and तर्क [१]—इत्येवं साहित्यस्य शास्त्रपरतामामनति। तदपि नानुचितम्। केवलं श्रिय औपम्यं तत्र नातिघटते। शास्त्रान्तरापेक्षया सरलतामात्रेण तु तत् कथञ्चिन्नीयेत। शास्त्रान्तरेषु पठितेषु साहित्यस्य गतार्थतात्रागूर्यते चेत् तत्राप्याधारतया काव्यमवश्यमपेक्ष्येत। नास्ति नामात्र तत्प्रतिपादकं किञ्चिदप्यन्यत् पदं साहित्यादृते। माघादीनां च काव्यानां शास्त्रात्मकताऽप्यस्त्येव सर्वबुधदृष्टचरा।

नीलकण्ठदीक्षितः साहित्यपदं शिवलीलार्णवे मुहुरादत्ते। तथाहि—

**साहित्यविद्याजयघण्टयैव सम्वेदयन्ते कवयो यशांसि ।**
**यथा यथास्यां ध्वनिरुज्जिहीते तथा तथा सार्हति मूल्यभेदान् ।।** (१.८)

**साहित्यविद्यां पदमेकमेव सर्वानवद्यामपि हन्ति दुःस्थम् ।**
**दन्तावलिं मौक्तिकदामरम्यां दंष्ट्रेव वक्त्राद् बहिरुल्लसन्ती ।।** (१.३५)

**तन्त्रान्तरेषु प्रतिपाद्यमानास्ते ते पदार्था ननु ते त एव ।**
**निर्वेदभीशोकजुगुप्सितान्यप्यायान्ति साहित्यपथे रसत्वम् ।।** (१.२२)

**बाल्यं विदुः प्राकृतभाषितानि श्रुतिस्मृतीर्वृद्धदशां वदन्ति ।**
**साहित्यमेकं तु गिरां सवित्र्यास्तारुण्यमुद्गाढमुशन्त्यभिज्ञाः ।।** (१.२८)

एतेषु साहित्यं साहित्यविद्या साहित्यपथश्चेति काव्यमात्रं प्रतिपादयन्ति।

एवमादिषु प्रयोगेषु साहित्यपदस्य काव्यसामान्यपरत्वं प्रकामं पुष्यति।

### (६) नाट्याभेदवादः

काव्यसामान्ये प्रागुक्तेन विधिना नाट्यमपि संगृह्यते, तथापि विशदतया व्याख्यानाय पृथगेतदुपन्यस्यते।

सर्वेश्वराचार्यः साहित्यसारनामकं [२] षड्भिः प्रकाशैर्युक्तं ग्रन्थं विनिर्ममे।

---

१. History of Samskrta poetics, पृ० 341, 2002.

२. केरलविश्वविद्यालयपाण्डुग्रन्थालयतः प्रकाशितः।

तत्र नाट्यमात्रं तेन विचारितम्। नाट्ये वाचिकाभिनयान्त:पातितया काव्यस्य दोषगुणालङ्कारा अपि संक्षिप्ता:। तत्र—

**अशेषाख्यातसाहित्यसारनिष्णातमानस: ।**
**सर्वेश्वर इति ख्यात: कविर्जयति भूतले ।।** (१.५)

**लसन्मृदुपदावल्या वालव्युत्पत्तिकारणम् ।**
**तेन साहित्यसारोऽसौ क्रियते नाट्यलक्षणम् ।।** (१.११) इति

कण्ठरवेण स्वयं तत्कृतैवेदं प्राकाशि। स हि साहित्यपण्डितमेवं लक्षयति—

**य: शब्दशास्त्रनिर्वृत्त: स्वभावविशदाशय: ।**
**भरतादिषु निष्णात: स हि साहित्यपण्डित: ।।** (१.१४) इति।

### (७) काव्यशास्त्राभेदवाद:

प्रागुदाहृतै: प्राय: सवैरेव साहित्यपदै: काव्यशास्त्रमप्यर्थतयाऽभिमन्तुं शक्यते। अन्यैरपि स्पष्टै: प्रमाणैरर्थोऽयं प्रमाणीक्रियते। सर्वप्रथमं राजशेखरस्य—

१. 'पञ्चमी साहित्यविद्या। सा हि चतसृणामपि विद्यानां निष्यन्द:।'
२. शब्दार्थयोर्यथावत्सहभावेन विद्या साहित्यविद्या—' इमे वाक्ये यद्यपि काव्यमात्रपरे तथापि काव्यशास्त्रायापि मन्तुं शक्ये। महामहो—पाध्यायकाणेप्रभृतय: प्रतीहारेन्दुराजस्य 'साहित्यश्रीमुरारे:'—इति प्रागुदाहृतं प्रयोगमपि तद्गुरोर्मुकुलभट्टस्य—

**पदवाक्यप्रमाणेषु तदेतत्प्रतिबिम्बितम् ।**
**यो योजयति साहित्ये तस्य वाणी प्रसीदति ।।**

इति कारिकाया व्याख्याने—

**'व्याकरणमीमांसातर्कसाहित्यात्मकेषु चतुर्षु शास्त्रेषूपयोगात्'** इत्यत्र

शास्त्रार्थतया प्रयुक्तस्य साहित्यपदस्य प्रकाशे शास्त्रपरमेव मन्वते[१]। अभिनवगुप्तस्यापि प्रागुद्धृते तन्त्रालोकपद्ये साहित्यपदं काव्यशास्त्रपरमेव प्रतीयते। रामचन्द्रगुणचन्द्रौ नाट्यदर्पणे साहित्ये हेमचन्द्रशिष्यतां गौरवेण प्रतिपादयत:—

**शब्दप्रमाणसाहित्यच्छन्दोलक्ष्मविधायिनाम् ।**
**श्रीहेमचन्द्रपादानां प्रसादाय नमो नम: ।।** (पुष्पिका)

क्षेमेन्द्रोऽपि स्वं प्रागुक्तदिशा साहित्येऽभिनवगुप्ताल्लब्धदीक्षं मनुते। नीलकण्ठदीक्षित:—

**मुधैव वाक्येषु पदेष्वधीतं मुधैव दीर्घं कवितापथेऽस्मिन् ।**
**आवश्यकं यत् किल पामराणामावर्जनं तन्न किमप्यधीतम् ।।** (१.६६)

**घट्टोपविष्टानिव वाग्भिरर्थै: काव्यागमज्ञानुपसान्त्वयाम: ।**
**आप्लुत्य भल्लूकवदापतन्त: कथं नु जय्या इह गौतमीया: ।।**
(१.७१) इति

शिवलीलार्णवे काव्यशास्त्रपरत्वेन कवितापथकाव्यागमपदे प्रयुङ्क्ते। वस्तुत: शास्त्रार्थे काव्यसाहित्यशब्दौ तदैव नान्तरीयकौ यदैते लक्षण–लक्ष्मालङ्कारादिशब्दैर्युज्येते। अद्यत्वे तु संस्कृतसंस्थाभि: साहित्यपदस्य काव्यं तच्छास्त्रञ्चेति द्वितयमपि वाच्यतयाऽस्त्यङ्गीकृतम्। अस्या: शताब्द्या: परम्परापारदृश्वभिर्महद्भिर्विद्वद्भिरेवैष व्याहार: साम्प्रतं प्रवर्त्तित इति नूनमत्र प्राचामप्यनुरोधोऽनुमातुं शक्यते।

तदित्थं काव्यानाट्यतदुभयशास्त्रप्रतिपादकस्य साहित्यपदस्य धर्मिपरत्वमवसीयते। शेषविषयकस्य च धर्ममात्रपरत्वम्। तदत्र प्रथमे पक्षे मतुबर्थीयस्याचोऽपि विधानं परम्परानुमोदितं तिष्ठति। सेयमुपस्थापिता

१. History of Samskrta Poetics-by Kane. Page-341, 2002.

साहित्यपदप्रयोगपूर्वं संस्कृतकाव्यशास्त्रे लभ्यमाना विचारसन्ततिः।

साम्प्रतं तत्रैव कांश्चनात्मनोऽपि निष्कर्षानुपच्छन्दयामः।

**यो यो यं यमवाप्नुयादवयवोद्देशं स्पृशन् पाणिना**
**तत्तन्मात्रकमेव तत्र स स ते रूपं परं मन्यते ।**
**अन्यासक्तदृशां पुरं करिपते! नीतोऽसि हा वेधसा**
**को नामात्र भवेद् बताखिलभवन्माहात्म्यवेदी जनः ।।**

इत्युक्तिदिशा तत्त्वान्तरविषक्तधिषणा हि भरतप्रभृतयो मुनयः काव्यविषयकं यदृच्छया कंचिदेव विशेषमापुः। तत्रैव च साकल्यधिया भामहदण्डिप्रभृतयः प्रववृतिरे। तत्र वामनानन्दवर्धनप्रभृतिभिः कृत्स्नवेदिभिरुद्धृतां संविद–मधिष्ठाय विमृश्यमानेऽवश्मेव क्रमप्राप्तो हृदयङ्गमो निष्कर्षः प्राप्तुं सुशकः।

भरतमुनेः समयो वस्तुतः सम्मुग्धज्ञानसमयः। तत्र तद्विषयता–सिद्धान्तानुसारं [1] भरतनाम्नैव तन्नाट्यशास्त्रे तच्छिष्यैर्यो विमर्शो घटितस्तत एव काव्यशास्त्रविषये मुनेरस्य सर्वज्ञत्वं पण्डितराजादिभिरङ्गीचक्रे।[2] अस्मन्मते भरतस्य स्वोपज्ञो विचारः स एव यत्रासौ 'नाट्यालङ्कारचतुराः' (१.४७) इत्यादिषु स्थलेष्वलङ्कारशब्दं प्रयुङ्क्ते। अत्र वस्तुतोऽलङ्कारशब्दस्य योगशक्तिलभ्य एवार्थो विवक्षितः। सोऽपि च भावार्थमात्रकः, न तु करणार्थोऽपि। यथा ध्वनितत्त्वेऽन्वेषिते त्रिधा पूर्वपक्षाः समजनिषत तथैव वाङ्मयान्तरवैलक्षण्यं काव्यस्यानुसंधित्सुभिरपि पुरा प्रश्ना उत्थाप्येरन्। तदुत्तरतया च प्राक् काव्यस्पृष्टत्वमात्रेण वाङ्मयान्तरलभ्यस्य वस्तुमात्रात्मनोऽर्थस्य व्याससमासाभ्यां न्यूनातिरिक्तभावशून्यतया योऽयमन्तःकरणावर्जकत्वमहिमा जायते तत्पिशुने 'अलम्' इति पदे भावार्थकस्य 'कार'—पदस्य योगाद्

१. यस्य गुरोः कुलेऽधीतं स्वनिर्मितस्य शास्त्रस्य तन्नाम्नैव ख्यापनं तद्विषयता—द्रष्ट० डॉ० वासुदेवशरणाग्रवालस्य 'पाणिनिकालीनभारतवर्ष' इति ग्रन्थः।

२. रसगङ्गाधरे नि. सा. संस्करणस्य पृ. ५७।

'अलङ्कार' इति नवनिर्मितेन पदेन गम्योऽर्थः 'सहृदयहृदयावर्जनक्षमत्व'रूपः प्रतिष्ठापितः स्यात्। ततश्च यथाहि बीजस्य शतशाखीभवनं तस्यालङ्कारः, बन्धुरायाः प्रस्तरशिलायाष्टङ्किकासंस्कारेण प्रतिमात्वापत्तिर्वा तस्याः, तथैव वाङ्मयान्तरे सूत्रात्मनेङ्गितस्य वस्तुनः काव्ये तूलिकया चित्रोन्मीलनमिव व्यक्तसमीकरणम्, आख्यानात्मना प्रपञ्चिततमस्य वा तस्य बंहिष्ठस्य वनखण्डस्य छायाग्राहिकया[1] चित्रितीकरणमिव यद् हृदयङ्गमनीयतापादनं तत् तस्यालङ्कारः। तस्य च ये चतुर्विधा आङ्गिकवाचिकसात्त्विकाहार्या अभिनया नाट्ये हेतुतया अभिमताः त एव काव्येऽपि वर्णनात्मनाऽभिव्यक्ता हेतुतां प्रतिपद्यन्ते। करणव्युत्पत्त्या तेषामपि 'अलङ्कार'—नाम्ना व्यपदेशः कर्तुं शक्यते। तत्राङ्गिकोऽभिनयोऽनुभावतया सात्त्विकः सात्त्विकभावतया, आहार्यश्चोद्दीपनविभावानुभावान्यतरतया परिणमते, यश्चायमपरो वाचिको नामाभिनयस्तस्यास्यात्र तदितरत्रितयाश्रयत्वमनुभावरूपत्वं च संभवति। आश्रयभावेऽपि स्वभावात्मता, वक्रात्मता चास्य संभाव्येते। ततश्च यथास्य स्वभावात्मता वक्रात्मता चाऽलङ्कारतयाऽभिमते तथैव विभावानुभाव—सात्त्विकभावतापि तत्तया स्वीकर्तुं नानुचिता। अत एव च **'स्वभावोक्तिश्च वक्रोक्ती रसोक्तिश्चेति वाङ्मयम्'** (५.८) इति सरस्वतीकण्ठाभरणकृताऽभ्यमानि, उद्भटादिभिरपि च तत्पूर्व्वै रसस्यालङ्कारतया व्यपदेशोऽक्रियत। अनुभूतिदृष्ट्या य एव रसो वेद्यान्तरस्पर्शशून्यतया प्राधान्यं ध्वनिरूपतां चार्हति व्यञ्जकत्वावच्छिन्नकाव्यनाट्यादिदृष्ट्या स एव भावसाधनोऽलङ्कारोऽपि भवितुं नानर्हः। मन्यते च सम्बन्धभेदेन विषयविषयिणोरन्योन्यनिष्ठता विमर्शकैः। किं च रसो वस्तुतः सामाजिकात्मरूपः, स चास्यात्मा शब्दार्थात्मनि स्थातुं न संभाव्यते, अतः किमिवास्य काव्यवृत्तित्वमाद्रियेत। व्यञ्जकत्व—सम्बन्धेनेति चेत्, एवं हि दीपादिष्वपि घटादिवृत्तित्वमभ्युपेतं स्यात्। न

---

१. कैमरापदवाच्यया।

चैतत् सत्तात्रितयेनापि स्पृष्टम्। ततो येयं विभावादियोजना काव्ये नाट्ये चोपनिबध्यते तस्या एवौपचारिकं रसत्वमूरीक्रियेत। तस्याश्च विभावादि-योजनायाः स्वभावोक्त्यव्यभिचारेण[1] स्वभावोक्तिरूपतैव स्वीक्रियेत, ततो रसोक्तेरप्यत्र नास्ति पृथगाम्नानस्यावश्यकता। सेयमापन्ना रसस्याप्यलङ्कारता।

इयमेव सहृदयावर्जनक्षमता काव्यनाट्ययोः सौन्दर्यपदेनोच्यते। अस्याश्चोद्भूततमं रूपमुपमारूपकोत्प्रेक्षादिषु दृश्यते, अतो भामहादिभिस्तेषामेव प्रतिपादनं प्रायेण कृतम्। नास्त्येषां रसादिष्वन्येषु धर्मेषु विमानना काचित्। सम्मुग्धिम्ना कवलिताश्चेमेऽपि सुव्यक्तं किञ्चिदुदीरयितुमशक्नुवानाः सौन्दर्यस्यैव हेतुभूतान् तत्त्वविशेषान् यथाकथञ्चित् परामृशन्तो दृश्यन्ते। अयमत्र विशेषो यदिमे काव्यशरीरनिष्ठानेव धर्मान् बहुलं प्रपञ्चयन्ति। अतएवैषां रसादिविषयेऽपि स्थिरो बहुमानः परवर्त्तिभिरागूरितः। पण्डितराजो रसगङ्गाधरे पर्यायोक्तालङ्कारप्रकरणे स्पष्टमुल्लिखति—

**'ध्वनिकारात् प्राचीनैर्भामहोद्भटप्रभृतिभिः स्वग्रन्थेषु कुत्रापि ध्वनिगुणीभूतव्यङ्ग्यादिशब्दा न प्रयुक्ताः इत्येतावतैव**

---

१. स्वभावोक्तिलक्षणं व्यक्तिविवेककृता—

वस्तुनस्तावद् द्वैरूप्यमिह विद्यते।

तत्रैकमस्य सामान्यं यद्विकल्पैकगोचरः ।
स एव सर्वशब्दानां विषयः परिवर्णितः ।
विशिष्टमस्य यद् रूपं तत्प्रत्यक्षस्य गोचरः ।
स एव सत्कविगिरां गोचरः प्रतिभाभुवाम् ।
अर्थस्वभावस्योक्तिर्या सालङ्कारतया मता ।
यतः साक्षादिवाभान्ति तत्रार्थाः प्रतिभार्पिताः ।।—इति

(चौ.सं.पृ. ३९०) यत् कृतं ततो वक्रोक्तिजीवितकृतस्तस्यास्तिरस्कारोऽवधीर्यते। अतएव 'नवोर्थो जातिरग्राम्या' इत्यादिषु जातिनाम्ना स्वभावोक्तिरूप एवालङ्कारः सुकविभिरप्यादृतः।

**तैर्ध्वन्यादयो न स्वीक्रियन्त इत्याधुनिकानां वाचोयुक्तिरयुक्तैव। यतः समासोक्तिव्याजस्तुत्यप्रस्तुतप्रशंसाद्यलङ्कारनिरूपणे कियन्तोऽपि गुणीभूतव्यङ्ग्यभेदास्तैरपि निरूपिताः। अपरश्च सर्वोऽपि व्यङ्ग्यप्रपञ्चः पर्यायोक्तकुक्षौ निक्षिप्तः। न ह्यनुभवसिद्धोऽर्थो बालेनाप्यपह्नोतुं शक्यते। ध्वन्यादिशब्दैः परं व्यवहारो न कृतः। न ह्येतावतानङ्गीकारो भवति।'**

(पृ० ५५५—६ नि.सा.सं)

अत एव च वामनस्यालङ्कारपरिभाषा महामाहेश्वरैरानन्दवर्धनाभिनवगुप्तैरपि नावधीरयितुं शक्या। स हि

**'काव्यं ग्राह्यम् अलङ्कारात्** (१.१.१ काव्यालङ्कारसूत्रम्)

**सौन्दर्यम् अलङ्कारः'** (१.१.२ काव्यालङ्कारसूत्रम्)

चारुत्वादिपदैस्तदिदं मतं तथैवाद्रियते। अभिनवगुप्तोऽपि[१] च तमनुसरति। मम्मटोऽपि[२] च सौन्दर्यतत्त्वमिदं नोत्पाटयति। असौ च सौन्दर्यरूपो धर्मो यादृशोऽत्रास्माभिर्व्याकृतस्तादृक्तया कं वा काव्यधर्मविशेषं स्प्रष्टुं नार्हति? रसोऽपिहि सौन्दर्यतयाऽभिमत एव प्राचाम्। व्यक्तिविवेके महिमाचार्यः—

**'सौन्दर्यातिरेकनिष्पत्तयेऽर्थस्य काव्यक्रियारम्भः कवेः, न त्वलङ्कार—(उपमादि) निष्पत्तये, तेषां नान्तरीयकतयैव निष्पत्तिसिद्धेः, भङ्गीभणितिभेदानामेवालङ्कारत्वोपगमात्'**[३] इति प्रतिपाद्यामुमेवार्थं

**न चालङ्कारनिष्पत्त्यै रसबन्धोद्यतः कविः।**
**यतते ते हि तत्सिद्धिनान्तरीयकसिद्धयः॥**[४]

---

१. पूर्वं पृष्ठे उद्धृतम्

२. पूर्व पृष्ठे उद्धृतम्

३. ३४१ पृष्ठे चौखम्भासंस्करणस्य

४. ३४२ पृष्ठे चौखम्भासंस्करणस्य

इत्यनया कारिकया सङ्गृह्णाति। अत्र हि सौन्दर्यस्यैव कृते कारिकायां रसशब्दः प्रयुज्यत इति स्पष्टमेव।

तदित्थं भरतेन प्रयुक्तोऽलङ्कारशब्दः सामान्यार्थवाचकतयैव स्थिरः सर्वानपि काव्यधर्मानभिव्याप्तुं क्षमते। अस्यैवार्थस्य सूचनं भरतस्यैव–

**यदा समुदिताः सर्व एकीभूता भवन्ति हि ।**
**अलङ्कारः स तु तदा मन्तव्यो नाट्यसंश्रयः ।।** (ना.शा. २७.१३)

इत्यनया कारिकया कैश्चित्[१] स्वीक्रियते ततो यन्नाम षोडशाध्याये लक्षणगुणालङ्काराणां विवेचनं लभ्यते तद् वस्तुतो भरतशिष्यस्य कस्यचित् परिशेषणम्। तत्र लक्षणानामेव लक्षणानि भरतोक्तानि मन्तव्यानि। अतएव तयोः पार्थक्येन विवेचनं परवर्त्तिभिराचार्यैर्न कृतम्। यैरपि कृतं तैरप्येषामलङ्कारत्वाविशेषो न विखण्डितः। भावाध्यायेऽपि योऽयं 'रसः काव्यार्थः' इति ग्रन्थो दृश्यते तत्रापि क्षेपकत्वमुन्नीयतेऽस्माभिः। यद्यप्यसौ भागो महिमभट्टाभिनवगुप्तकालपर्यन्तं भरतनाम्नैव प्रसिद्धिमीयिवान् दृश्यते! एवमेव भागान्तराण्यपि नाट्यशास्त्रेऽस्मिन् भूलग्रन्थस्य व्याख्यानात्मकानि परवर्त्तिभिर्विनेयैः संकलितानि भवन्ति। तेषां विचारः पृथक् कदाचित् करिष्यते।

ततश्च भरतोक्तोऽलङ्कारपदार्थोऽपि परवर्त्तिभिरुन्नीतेन साहित्य–पदार्थेनानर्थान्तरत्वमश्नुते। एवमन्यैरपि यै रीतयो, वृत्तयो, गुणाश्च प्रवर्त्तितास्तेषामपि शब्दार्थान्यतरधर्मतया कर्तृत्वेन पोषकत्वेन वा शोभां

---

१. गणेशत्र्यम्बकदेशपाण्डेयमहोदयैः स्वकीये भारतीयसाहित्यशास्त्रे कारिकेयमेवमेव पठितास्ति तस्याः सन्दर्भोऽपि तेन '२७.९२' इत्थं दर्शितः। बड़ौदासंस्करणीये नाट्यशास्त्रे कारिकाया उत्तरार्धे 'अलङ्काराः सकुतपा मन्तव्या नाट्यसंश्रयाः' इति पाठो लभ्यते। सन्दर्भश्च '२७.१०३' इति। वस्तुतोऽयमेव बड़ौदासंस्करणीयः पाठो मूलभूतः पाठः स्यात्।

प्रति हेतुत्वस्याविच्छेदात् साहित्यतयाऽभ्युपगतिर्न दुष्करा, कामं तत्र साहित्यमिति पदं प्रयुक्तं मा भूत्।

इदमत्रान्यदुपक्षिप्यते यत् साहित्यनाम्ना येयं कुन्तकभोजमङ्खानां विचारत्रयी लभ्यते तत्र वस्तुतः कुन्तकस्यैव विचारा विचारसहाः, चालनीन्यायेन साहित्यतया दोषाभावरसगुणालङ्काराणामेव वाङ्मयान्तर–व्यतिरेकेण काव्यैकवृत्तितायाः संभवात्। यच्च मङ्खेन साहित्यस्य वाङ्मयान्तरसाधारणं सम्बन्धमात्रत्वमूरीकृत्य तत्परिष्कारत्वेनोक्ताश्चत्वारोऽपि धर्माः प्रतिपादितास्तत्रापीयमेवारुचिर्मन्ये मूलम्। अतएवोक्तक्रमेणात्मनः[1] परवर्तिनि सन्दर्भे व्यक्तिविवेकव्याख्यानाभिख्ये प्रागुक्तरीत्या[2] कुन्तकमतमेवैतेन सिद्धान्ततयोद्धृतम्, न तु स्वकीयम्। यच्च काव्यनाट्ययोर्द्वयोरेव धर्मयोः साहित्यत्वेनाभिमतत्वम् तत्रापि प्रयोगरूपेणाभिनयेनैव भिन्नतामादधति नाट्येऽङ्गान्तराणां काव्यसाधारण्यस्य सर्वाभिमतत्वे नाभ्युदेति काचनानुपपत्तिः।

धर्मितया च काव्यनाट्यतच्छास्त्राणां यत् साहित्यमुपगतं तदपि मुकुलभट्टतोऽद्य यावत् साहित्यपदस्य तादृशव्यवहारान्नानुपपन्नम्।

अयमत्रापरः प्रश्नो यद् यदिदं कुन्तकेन वाच्यस्य वाच्यान्तरेण वाचकस्य च वाचकान्तरेण साहित्यमुपगतम्, प्रत्यादिष्टं च वाच्यस्य वाचकेन वाचकस्य वा वाच्येन, यच्च तदन्यैः पर एव पक्ष उपादायि तत्र किं नु खलु मान्यमिति। वस्तुतः पर एव पक्षोऽत्र मान्यः। अत्र च हेतुः कुन्तकोपपत्तेरसाधुत्वम्, सुजनसंप्रदायाननुरोधश्च। तथाहि वाचकस्य वाचकान्तरेणेत्यादिपक्षमुपस्थापयता कुन्तकेन पक्षान्तरप्रत्याख्याने द्वावेव हेतू दर्शितौ–(१) प्रयोजनाभावः (२) असमन्वयश्चेति[3]–

---

१. पूर्वोद्धृते–'काव्ये००सहितयोः शब्दार्थयोः प्रयोगः। 'साहित्यं च तुल्यकक्षत्वे–नान्यूनानतिरिक्तत्वम्' इति ग्रन्थे।

२. ५८ टिप्पणीदर्शित–लक्षणाभिधानरूपया।

३. वक्रोक्रिजीविते १.१७ वृत्तिः।

**'ननु वाचकस्य वाच्यान्तरेण, वाच्यस्य वाचकान्तरेण कथं न साहित्यम्' इति चेत्, तन्न, क्रमव्युत्क्रमे प्रयोजनाभावादसमन्वयाच्च'** इति।

तत्र योऽयं प्रयोजनाभावरूपः प्रथमो हेतुः 'प्रथमेनैव पक्षेण कार्ये सिद्धे किं द्वितीयेने'– तिरूपः प्रतीयते। कार्यसिद्धिश्चात्र वाङ्मयान्तर–व्यतिरेकः काव्यशब्दार्थयोः। अत्र नेदमसत्यं यत् 'प्रथममरुणच्छायस्तावत्ततः कनकप्रभः' इत्यादिषु–

**उन्मीलल्लील–नीलोत्पलदलदलनामोदमेदस्विपूर–**
**क्रोडक्रीडद्द्विजालीगरुदुदितमरुत्स्फालवाचालवीचिः ।**
**एतेनाखानि शाखानिवहनवहरित्पर्णपूर्णद्रुमाली–**
**व्यालीढोपान्तशान्तव्यथपथिकदृशां दत्तरागस्तडागः[१] ॥**

इत्यादिषु च शब्दार्थयोर्यथास्वं योजनेनैव काव्यस्य तदितरश्लोकव्यतिरेकः सिद्धः तथापि मृदङ्गमुरलीमार्जनातः, वीणाक्वणितात् स्तनयित्नुनिःस्वनाद् वा तत्र व्यतिरेकलाभायात्र शब्दानामर्थापेक्षिताऽकामेनापि मान्या। स्वीकरोति च कविरेवैतत् 'लौकिकानां हि साधूनामर्थं वागनुवर्तत'[२] इति। एवमेव लौकिकेभ्योऽपि प्रमाणान्तरवेद्येभ्योऽर्थेभ्यः काव्यार्थव्यतिरेकाय तेषां शब्दैकवेद्यत्वमाश्रयणीयमेव। उच्यतेऽपि चैतत्– 'शब्दप्रमाणवेद्योऽर्थ'[३] इति। किं च सरसे काव्ये येयं परुषमधुरादिरनुप्रासवृत्तिराद्रियते सापि रसाव्यभिचारिणां गुणानामेवाभिव्यञ्जनाय। अतएव ध्वनिकृताऽपि तृतीय उद्योते संघटनाया गुणाश्रितत्वमेव सिद्धान्तितम्। अतएव च 'अनु = रसाद्यनुगुणः, प्र = प्रकृष्टः, आसः = न्यासः' इति व्युत्पत्त्या अनुप्रासस्यानुप्रासता[४]

१. नैषधे १२.१०१ पद्यम्।
२. उत्तररामचरिते १.१०।
३. काव्यप्रकाशे ३.३ कारिका।
४. वर्णसाम्यमनुप्रास इति १०४ सूत्रस्य वृत्तौ (९ उल्लासे)

काव्यप्रकाशकृताऽभिमता, तद्वैपरीत्येन च अकुण्ठोत्कण्ठयेत्यादौ प्रतिकूलवर्णता[१]। ततश्च स्थितं शब्दसन्निवेशस्यापि काव्येऽर्थमुखापेक्षितैव। न चैवं नीरसेषु स्वच्छन्दोच्छलदच्छकच्छेत्यादिषु चित्रकाव्येषु स्थितायाः शब्दच्छटायाः, सरसेष्वपि वा 'कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकम्' इत्यादिषु निरनुप्रासेषु काव्येषु किमुक्तं स्यादिति वाच्यम्, सा हि कवेरशक्तिः[२] अतएव तत्काव्यस्य चित्रत्वं निरनुप्रासत्वं वा मन्यते। अत्रोत्कटैकशब्द–कोटिकतयाऽर्थानुरोधः काव्ये न्यक्कृत एव। अतएव च कुन्तकोऽपि–

**शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि ।**
**अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः[३] ।।**

इति स्वयमप्यर्थानुरोधं शब्दानां व्याजह्रे, अर्थानां च सौन्दर्यानुभूतावन्तरङ्गत्वम्।

यश्चायमपरः 'असमन्वय'–रूपो हेतुः तत्र पुरोद्धृतया माणिक्यचन्द्रोक्त्या 'मुखे शब्दमुपलभामहे भूमौ चार्थम्' इति विप्रतिपत्तिरेव मूलमुन्नीयेत। अन्यदपि चाऽत्र शब्दार्थयोः क्षणप्रध्वंसवादः, त्रैकालिकाभाववादः इत्यादिकमङ्गीकर्तुं सुशकम्। एतदपि च नासत्यम्। अथापि शब्दादर्थक्रिया–निष्पत्तिमनुभवसाक्षिकामनुरुन्धानैस्तयोः सम्बन्धोऽवश्यमभ्युपेयः। स चाभिधादिरूपः स्वीकृत एव। न चासावन्वयः केवलः, अपितु समन्वयः साहित्यरूपः, लक्षणाव्यञ्जनारूपाभ्यामतिरिक्ताभ्यां व्यापाराभ्यां तस्यापि तद्रूपताया अक्षुण्णत्वात्। अतएव–

---

१. रसानुगुणत्वं वर्णानां वक्ष्यते (९ उल्लासे) तद्विपरीतं प्रतिकूलवर्णम्। यथा शृङ्गारे–
अकुण्ठोत्कण्ठया तूर्णमाकण्ठं कलकण्ठि! माम्!
कम्बुकण्ठि! क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर।। इति (७ उल्लासेऽर्थदोषेषु)

२. रसगङ्गाधरे रौद्ररसोदाहरणे 'कृतमनुमतमित्यत्र रौद्ररसव्यञ्जनक्षमा नास्ति वृत्तिः अतस्तत्कवेरशक्तिरेव' इति पंडितराजोऽपि।

३. पूर्वमुद्धृतम्।

**अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः ।**
**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥** (१.२)

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।**
**यत्तत् प्रसिद्धाऽवयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥** (१.४)

**सरस्वती स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम् ।**
**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ॥** (१.६)

**प्रतीयमानच्छायैषा भूषा लज्जेव योषिताम् ।** (३.३७)

इति महता प्रबन्धेन ध्वनिकृद्भिर्व्यापारान्तरप्रतिपाद्य एवार्थे महतां संरम्भं प्रतिपाद्य **'काव्यस्यात्मा स एवार्थः' (१.५)** इति स एवार्थः काव्यात्मतया स्थापितः। स्वयं कुन्तकोऽपि चामुमर्थं स्वालङ्कारे प्रथमोन्मेष एवाभिजात्यवर्णनावसरे प्रसङ्गेनानन्दवर्धनस्य **'प्रतीयमानमि–'** त्यादिपद्ये **'न पुनः सकललोकलोचनसंवेद्यस्य ललनालावण्यस्य सहृदयहृदयानामेव संवेद्यं प्रतीयमानं समीकर्तुं पार्यते'** इति विप्रतिपाद्य **'विभाति सौभाग्यमिवाङ्गनासु'** इति योजनया लावण्यपदे सौभाग्यमभिषेच्य **'प्रतीयमानं पुनः काव्यपरमार्थज्ञानामेवानुभवगोचरतां प्रतिपद्यते, यथा कामिनीनां किमपि सौभाग्यं तदुपभोगोचितानां नायकानामेव संवेद्यतामर्हति'** इत्येवं समर्थयते।

संप्रदायविरोधश्चात्र महाकविपरम्परामनुपेक्षमाणो यः कोऽपि समुन्नेतुं क्षमः कालिदासो वागर्थयोर्दाम्पत्यमूरीकरोत्येव, यावदन्येऽपि

**सव्यं वपुः शब्दमयं पुरारेरर्थात्मकं दक्षिणमामनन्ति ।**
**अङ्गं जगन्मङ्गलमैश्वरं तदर्हन्ति काव्यं कथमल्पपुण्याः ॥**

(शिवलीलार्णवे १.१५)

इत्येवमेतदूरीकृत्यैव क्रमन्ते। साहित्यमीमांसाकारः पुनः–

**निदानं जगतां वन्दे वस्तुनी वाच्यवाचके ।**
**ययोः साहित्यवैचित्र्यात् सतां रसविभूतयः ।।**

इति मङ्गलात्मना ग्रन्थारम्भ एवामुमभिप्रायमार्षेणेव सौष्ठवेनाबध्नाति।

किं च काव्यस्य शिवरूपता कलाविद्भिरिवालङ्कारिकैरप्युपेता। काव्यप्रकाशादिशब्देषु तेषां 'काव्यं काव्यो वा शिवः, तस्य प्रकाशः परामर्शकला' इत्येवम्विधानि व्याख्यानानि दृश्यन्ते[१]। नीलकण्ठदीक्षितस्य 'सव्यं वपुरि'त्यनुपदोद्धृते पद्ये काव्यस्य शिवता मुखरतयोच्यत एव, लोचनान्ते श्रीमदभिनवगुप्ताचार्या अपि—

**वस्तुतः शिवमये हृदि स्फुटं सर्वतः शिवमयं विराजते ।**
**नाशिवं क्वचन कस्यचिद्वचस्तेन वः शिवमयी दशा भवेत् ।।**

इति स्फुटं काव्यस्य शिवप्रतिष्ठां संकेतयन्ते। एवमेव

**समस्तगुणसम्पदः सममलङ्क्रियाणां गणै—**
**र्भवन्ति यदि भूषणं तव तथापि नो शोभसे ।**
**शिवं हृदयवल्लभं यदि यथा तथा रञ्जये—**
**स्तदेव ननु वाणि! ते भवति सर्वलोकोत्तरम् ।।**[२] इति

**स्थायी प्रबुद्धहृदये व्यभिचारिभूतः**
**कामाकुलासु जनतासु महानुभावः ।**
**अन्तर्विभावविषयो रसमात्रमूर्त्तिः**
**श्रीमान् प्रसन्नहृदयोऽस्तु मम त्रिणेत्रः ।।**[३]

इति च साहित्यस्य मूलभूतं रहस्यबीजमसावुन्मीलयति। न केवलं कविकर्मणो

---

१. सारस्वतीसुषमायाः प्रथमवर्षीये प्रथमेऽङ्के 'दर्शनेषु साहित्यस्य स्थानम्' इति नाम्नः पद्मभूषणपण्डितराजराजेश्वरशास्त्रिद्रमिडलेखस्यान्ते भावोऽमुदीरितो लभ्यते।

२. ध्वन्यालोकस्य २.५ कारिकाया रसालङ्कारलोचनेऽभिनवगुप्तस्य च।

३. अभिनवभारत्यां सप्तमाध्यायमङ्गलम्।

फलभूतस्य काव्यस्य यावत् प्रतिभाया अपि शिवात्वमेतैरङ्गीकृतम्—

**यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात् ।**
**स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्** [१]।। इति

तन्त्रान्तरेष्वपि परापश्यन्तीमध्यमावैखरीरूपतया वाण्याः शिवरूपत्वमभ्युपगतमेव। नादनाम्नी काचन कलापि नूनं परमेश्वरस्य शब्दरूपैव। तदित्थं काव्यरहस्यमुपजीव्यापि कुन्तकमतमभ्युपेतुं न शक्यते। किं च नानार्थशब्दप्रयोगस्थलेऽर्थानां शब्दमुखापेक्षिता शब्दानाञ्चार्थाश्रितता किमिवान्यथा योजयितुं शक्येत? अतएव च ध्वनिकारिकेयं—

**वाच्यानां वाचकानां च यदौचित्येन योजनम् ।**
**रसादिविषयेणैतत् कर्म मुख्यं महाकवेः ।।** (३.३२)

अत्र निजमौदार्यं विवृणोति।

एवमिह प्रथमपक्षस्य द्वितीयपक्षाविनाभावित्वाद्, द्वितीये च पक्षे प्रथमपक्षस्यान्तर्भावाद् उदारतमः सम्प्रदायरहस्यदक्षिणो द्वितीय एव वाच्यवाचकयोरन्योन्यसाहित्यात्मा स्वीकर्तुं युज्यते।

साहित्यस्य निष्कृष्टं लक्षणं चेत्थमिव किञ्चिन्निष्पद्यते—

**'शब्दार्थयोरन्योन्यं गुणालङ्कारादिभिश्च परस्परस्पर्धितया यत् साम्यसुभगमवस्थानं तत्, तद्युक्तं च साहित्यमिति।'**

अत्र शब्दार्थान्यतरप्रतियोगिकस्तदन्यतरानुयोगिकः, तदुभयानुयोगिको गुणालङ्कारादिप्रतियोगिकश्चेत्युभयविधोऽपि सम्बन्धः, तत्र च सम्बद्धानां समभावेन साहचर्येण च स्थितिप्रत्यययोः समन्वयश्चेति सर्वं साहित्यं सम्पद्यते। तदत्र—

**रेवाप्रसादेन मयात्मबुद्ध्या साहित्यतत्त्वस्य यथाप्रमाणम् ।**
**सोऽयं कणेहत्य कृतो विमर्शो मेधाञ्चितानां शिवतातये स्तात् ।।**

◊

---

१. लोचने प्रथमोद्योतान्तमङ्गलम्।

## साहित्यदर्शने तात्पर्यरूपम्

दर्शनान्तरेष्विव साहित्यदर्शनेऽपि तात्पर्यसामान्यं सर्वैरेव सांप्रदायिकैः संप्रतिपद्यते। नास्ति तत्र कस्यचिदपि विप्रतिपत्तिः। किन्तु यदस्याधिकरणं, यो विषयः यच्च वैशेषिकं रूपं तत्र कश्चनापि विप्रतिपत्तिं न त्यजति। ततश्च तात्पर्यविषये विदुषां यः साहित्ये कलहस्तमत्र यथास्वमुपस्थापयामः। तत्र–

साहित्यमिति काव्यस्यैवापरं नाम। काव्यं च शब्दार्थशरीर–कमुपगम्यते[1]। ततो द्वयं तत्र घटकं भवति शब्दश्चार्थश्च। तात्पर्यपदं पुनरेवं व्यक्रियते मतिमद्भिः–

'तदेव परं साध्यं प्रतिपाद्यं प्रयोजनम् उद्देशो वा यस्य स तत्परः, तस्य भावः तात्पर्यम्।' इति

(न्यायकुसुमाञ्जलि–५६ मकरन्द)

ततश्चात्र कदलीगर्भपत्रन्यायेनानेके प्रश्ना उदयन्ते। तथाहि तात्पर्य–पदप्रकृतिभूत–तत्पर–शब्द–निष्ठस्य बहुव्रीहेः, तत्पर–पद–घटकीभूतस्य परशब्दस्य य काव्यशरीरघटकयोः शब्दार्थयोर्मध्ये एकतरो वा कश्चित् प्रतिपाद्यः, उभयं वा। आद्येपि कतरः कतरस्य प्रतिपाद्यः। द्वितीये भावरूपमेतत् तात्पर्यं शब्दार्थयोरनयोः प्रत्येकपर्याप्त्या वा तिष्ठति व्यासज्यवृत्त्या वा। उभयथापि भावस्यास्याधिकरणतावच्छेदकतां किं नु प्राप्नोति, शब्द–गतयोः 'पदत्व–वाक्यत्वयोः', अर्थगतयोः 'अभिधेयानभिधेयत्वयो'–श्चात्र समस्ततया व्यस्ततया वा धुरमेतामुद्वोढुमुत्कन्धरायितत्वात्। अत्रापि येयम्

---

१. ध्वन्यालोकारम्भे 'शब्दार्थशरीरं तावत् काव्यम्' इति ध्वनिकृतो वाक्यम्, तदनुसारीण्य–न्यानि तानि।

अनभिधेयार्थगत— यत्किंचिदुक्त—धर्म—निष्ठाऽधिकरणता—वच्छेदकता तस्या अप्यवच्छेदकं किम्, लक्ष्यत्वं वा व्यङ्ग्यत्वं वा, अनभिधेयस्य काव्यार्थस्यैतदुभयतयैव प्रतिष्ठापितत्वात्[१]। इयमत्र तात्पर्याधिकरणताया गाथा। तत्परशब्दावयवीभूत—पर—शब्द—प्रतिपाद्यस्य तात्पर्यविषयस्यापि विषय एषैव स्थितिः। तत्र शब्दस्य साधनत्वात्, अर्थो हि प्रधानं तद्गुणः शब्द' इति यास्कोक्तेश्चार्थस्यैव तात्पर्यविषयत्वं परिशिष्यते। तत्र—

**अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः ।**
**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ**[२] ।। इति,

**स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।**
**वाच्यादयस्तदर्थाः स्युः'**।[३] इति च

सहृदयोक्तेः काव्यार्थस्य त्रैविध्याद् विषयतावच्छेदकस्याप्यधिकरण—तावच्छेदकस्येव विजिज्ञास्यत्वमेव प्रमुखे स्थितम् ततश्च वाच्यत्वं वा तद् भवेत्, लक्ष्यत्वं वा, प्रतीयमानत्वं वा। अस्ति च स्वरूपविषयेऽप्यस्य कलहः। शक्ति—स्वरूपं वा तद् भवेद् वस्त्वन्तररूपं वेति। अत्र समाधिमनुसंदधानाः साहित्यशास्त्राचार्या एवमभिप्रतिष्ठन्ते—

## १. तात्पर्यस्याधिकरणम्

यद्यपि सहृदयानन्दवर्धन आनन्दवर्धन[४], प्रज्ञानधनिको धनिकः[५],

---

१. साहित्यसंप्रदाये वाच्य—लक्ष्य—व्यङ्ग्येति—त्रिविधस्यैव काव्यार्थस्य प्रथितत्वात्।

२. ध्वनिकारिका १.२ ध्वन्यालोके। अस्याः पूर्वार्धस्य परं रूपमेवमुपलभ्यते—'योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।' इति

३. काव्यप्रकाशे २.१—कारिका

४. 'व्यङ्ग्यस्य प्राधान्येनाविवक्षायां वाच्यत्वं तावद् भवद्भिर्नाभ्युपगन्तव्यम्, अतत्पर—त्वाच्छब्दस्य'।—ध्वन्यालोकस्य चौखंभासंस्करणे पृ० ४२२

५. दशरूपकावलोकस्य ४.३६—३७ कारिका।

रसाभिषवलुप्तोऽभिनवगुप्तः[१], शृङ्गारप्रकाश–संसरदोजा भोजः[२], मधुकरीलम्पटो[३] मम्मटः, भावप्रकाशनाबिष्कृत–स्वशारदाविनयः शारदातनयः[४], साहित्यविद्याधररुचको रुचकः[५] अन्ये चापि 'यत्परः शब्दः स शब्दार्थ' इत्येवं शब्दस्यैव तात्पर्याधिकरणतामुल्लिखन्ति, तथापि प्रतीयमानमर्थं प्रति[६] वाच्यस्योपसर्जनभावम् उदीरयन्तस्ते अर्थस्यापि तदधिकरणतां न प्रत्याचक्षते। मम्मटादयश्च 'सर्वेषां[७] प्रायशोऽर्थानां व्यञ्जकत्वमि' ति ब्रुवाणाः पार्यन्तिकमर्थं प्रति प्राथमिकानां समेषामेवार्थानां तात्पर्याधिकरणतां प्रकाशयन्ति। इत्थं शब्दोऽर्थश्चेत्युभयमपि तात्पर्याधिकरणभावमञ्चति। ततश्च शब्दत्वमर्थत्वं चेत्युभयमपि तात्पर्य–निरूपितामधिकरणतामवच्छिनत्ति। ये चेमे, शब्दत्वव्याप्ये पदत्व–वाक्यत्वे, अर्थत्वव्याप्ये चाभिधेयानभिधेयत्वे ते अपि स्व–स्वाधिकरणगतां कुर्वद्रूपता–मुपजीव्य तात्पर्याधिकरणतामवच्छेत्तुं सावकाशे।

---

१. चौखंभासंस्करणीये ध्वन्यालोक–लोचन–पुस्तकस्य ४२२–पृष्ठतः प्रभृति।

२. 'यत्परः शब्दः स शब्दार्थ इति तात्पर्यम्'। तच्च वाक्यमेवे'–ति मैसूरतः प्रकाशितस्य शृङ्गारप्रकाशस्य २४६ पृष्ठे।

३. काव्यप्रकाशस्य पञ्चम उल्लसे।

४. 'वाक्यार्थे प्रति शेषत्वं यत् स्यादुच्चारणस्य तु, तत् तात्पर्यम्' इति भावप्रकाशनस्य बड़ौदासंस्करणे पृ० १४७।

५. 'वर्त्तते यत्परः शब्दः स शब्दार्थ इति स्थिति'–रिति साहित्यमीमांसायाः प्रथमे प्रकरणे। यद्यपि व्यक्तिविवेकहिन्दीभाष्यभूमिकायामस्माभिः साहित्यमीमांसाकर्त्रभिन्नकर्तृकं व्यक्तिविवेकव्याख्यानं मंखकृतमुपेतं तथापि प्रसिद्धिरीदृश्येवेतीत्थमुक्तिः।

६. ध्वनिकारिका १.१३, काव्यप्रकाशीयमुत्तमकाव्यलक्षणम्, रसगङ्गाधरीयमुत्तमोत्तम–काव्यलक्षणं वा।

७. काव्यप्रकाशकारिका–२ उल्लासः २।

अस्ति च शिवयोरिव वागर्थयोः साहचर्यनित्यता काव्ये[१]। अस्ति च सा सर्वानुमोदिता। ततश्च तात्पर्यस्य प्रत्येकपर्याप्तिः व्यासज्यवृत्तिता चेत्युभयमपि शब्दोऽर्थश्चेत्युभयत्र एकैकशो यौगपद्येन च विद्यमानतया वेदितुं सुशकम्, यत्र यस्य कुर्वद्रूपता तत्र तस्य प्राधान्यमिति तदुत्तानभावदृशा प्रत्येकपर्याप्तेरपि तत्रोचितत्वात्। ततश्च सापेक्षमेवैतत् कृत्स्नमत्रावस्थितम्। अस्ति चैष ध्वनिकृतैवोन्मीलितः पन्थाः 'यत्रार्थः[२] शब्दो वे'–ति ध्वनिकारिकायाम् 'अर्थः शब्दो वा तमर्थं व्यङ्क्त' इति प्राधान्यापेक्षया विकल्पार्थकं वाशब्दं प्रयोज्य साहचर्यनित्यत्वापेक्षया तत्रैव 'व्यङ्क्त' इति द्वित्वावच्छिन्नायां क्रियायां तयोरन्वयं दर्शयता, अनुमोदित–श्चायमभिनवगुप्तेन व्यवस्थामिमां समर्थयता[३]। एवं च विकल्पापेक्षया प्रत्येकपर्याप्तिः साहचर्यापेक्षया च व्यासज्यवृत्तिस्तात्पर्यस्य काव्यशब्दार्थ–द्वन्द्वेऽभिमन्येत। अभिमाने चास्मिन् प्रत्येकपर्याप्तिपक्षे समुन्मेषं भजन्ती 'इदमेकं तात्पर्यम्, इदं चैकमि'–ति द्वित्वबुद्धिः सुषुप्तौ नाडी–पुरीतद्–ब्रह्मसु[४] मनोलुप्तिरिव क्रमव्यवस्थामुपपाद्य व्यवस्थाप्येत, व्यवस्थाप्येत

---

१. यदुच्यते मम्मटेन–

> तद्युक्तो व्यञ्जकः शब्दो यत् सोऽर्थान्तरयुक् तथा ।
> अर्थोपि व्यञ्जकस्तस्मात् सहकारितया मतः ।
> शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः ।
> अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता ।–इति

२. ध्वन्यालोककारिका १.१३

३. ध्वन्यालोक–१.१३ कारिकालोचने–'व्यङ्क्त इति द्विवचनेनेदमाह यद्यप्यविवक्षितवाच्ये शब्द एव व्यञ्जकः तथापि अर्थस्य सहकारिता न त्रुट्यति।००। विवक्षितान्यपरवाच्ये च शब्दस्यापि सहकारित्वं भवत्येव। इति सर्वत्र शब्दार्थयोरुभयोरपि ध्वननं व्यापारः।००। अर्थः शब्दो वेति विकल्पाभिधानं प्राधान्याभिप्रायेणे'ति।

४. तदुक्तम् ३.२.७ ब्रह्मसूत्रभाष्ये भगवता शङ्कराचार्येण–'श्रुतिषु त्रीण्येव सुषुप्तिस्थानानि संकीर्तितानि नाड्यः, पुरीतत्, ब्रह्म चेति। तत्र द्वारं नाड्यः पुरीतच्च, ब्रह्मैव त्वेकमनपायि सुषुप्तिस्थानमिति।

च नित्यसाहचर्यदृशा व्यासज्यवृत्तितायामप्यदोषः[1]।

## २. तात्पर्य—विषयः

योऽयं तत्परशब्दावयवीभूत—पर—शब्द—प्रतिपाद्यः तात्पर्यस्य विषयः तत्र 'यत्परः शब्द स शब्दार्थ' इति न्यायमातिष्ठमानाम् अर्थसामान्यस्य तद्विषयतायां नास्त्येव विवादः, अर्थविशेषस्य तु तद्विषयत्वे सैव वैमत्यमयी स्थितिः साहित्यसंप्रदाये। तत्र—

१. आनन्दवर्धनः (ई०सं० ८५०) प्राधान्येन प्रतिपिपादयिषितस्यार्थस्य तात्पर्यविषयतामूरीकुरुते[2] प्राधान्यं चानेकधा व्यवस्थापयते। तत्र द्वयं प्रधानं कविसंरम्भगोचरता, चमत्कारातिशयपात्रता च[3]। एतदुभयमपि संप्रदायेस्मिन् ध्वन्यमान एवार्थे भवतीति तन्मते ध्वनेरेव तात्पर्यविषयत्वं प्रतितिष्ठति।

२. तत्र केचित्—

**अप्रतिष्ठमविश्रान्तं स्वार्थे यत्परतामिदम् ।**
**वाक्यं विगाहते तत्र न्याय्या तत्परतास्य सा ।**
**यत्र तु स्वार्थविश्रान्तं प्रतिष्ठां तावदागतम् ।**
**तत् प्रसर्पति तत्र स्यात् सर्वत्र ध्वनिना स्थितिः[4]।।** इति

---

१. असाहचर्ये त्वेकमात्रस्य स्थितेः अनेकमात्रवृत्तेः व्यासज्यवृत्तिताया असंभवोऽत्र दोषः।

२. यदुक्तमाचार्येण ध्वनिग्रन्थे—

रस—भावादितात्पर्यमाश्रित्य विनिवेशनम् ।
अलंकृतीनां सर्वासामलंकारत्वसाधनम् ।। संग्रहकारिका पृ० १९७।।
प्रकारोऽयं गुणीभूतव्यङ्ग्योपि ध्वनिरूपताम् ।
धत्ते रसादितात्पर्य—पर्यालोचनया पुनः ।। ध्वन्यालोकका० ३.४०।।
रसादिषु विवक्षा तु स्यात् तात्पर्यवती यदा ।
तदा नास्त्येव तत् काव्यम्०० ।। संग्रहकारिका पृ० ४९७।।
यस्मिन् रसो वा भावो वा तात्पर्येण प्रकाशते ।
संवृत्त्याभिहितौ वस्तु यत्रालंकार एव वा ।। संग्रहकारिका ध्वन्या० १.१३ वृत्तिः।।

३. 'चारुत्वोत्कर्षनिबन्धना हि वाच्य—व्यङ्ग्ययोः प्राधान्यविवक्षा'। ध्वन्यालोकस्य १.३ वृत्तिः

४. दशरूपकावलोके ४.३७ कारिकाप्रकरणे।

वदन्तो ध्वनितात्पर्ययो: भिन्नतां सिषाधयिषन्ति।

३. धनिक: (ई०स० ९९०) तत्र प्रत्यवतिष्ठते। स हि प्रतिपाद्यगताम्–विश्रान्तिमिव प्रतिपादयितृजन–गतां प्रतिपिपादयिषितार्थप्राप्त्यभाव–रूपाम् अविश्रान्तिमपि तात्पर्यप्रयोजिकामातिष्ठते। आतिष्ठते च ध्वनितात्पर्ययोरभिदाम्। यदुच्यते तेन–

**प्रतिपाद्यस्य विश्रान्तिरपेक्षापूरणाद् यदि ।**
**वक्तुर्विवक्षिताप्राप्ते–रविश्रान्तिर्न वा कथम् ।।**
**पौरुषेयस्य वाक्यस्य विवक्षापरतन्त्रता ।**
**वक्त्रभिप्रेत–तात्पर्यमत: काव्यस्य युज्यते**[1] ।। इति।

४. भोजराज: (ई०स० १०५०) अत्र मध्यस्थधर्ममातिष्ठते। स एतदुभयं समन्वयति। एतदर्थं स

'अभिधा--विवक्षा–तात्पर्य–प्रविभाग–व्यपेक्षा–सामर्थ्या–न्वयै–कार्थी–भाव–दोषहान–गुणोपादानालंकार–रसावियोग–रूपा: शब्दार्थयोर्द्वादश समर्था: साहित्य–मुच्यत[2]'–इत्येवं

तात्पर्यस्य साहित्यावयवतामाविष्कृत्य तस्य त्रैविध्यमेवं प्रतिपादयति–

'यत्पर: शब्द: स शब्दार्थ इति तात्पर्यम्। तच्च वाक्य एवोपपद्यते। पदमात्रेणाभिप्रायस्य प्रकाशयितुमशक्यत्वात्। तच्च वाक्यप्रतिपाद्यं वस्तु त्रिरूपं भवति–

१. अभिधीयमानम्

२. प्रतीयमानम्

३. ध्वनिरूपं चेति[3]। इति।

---

१. दशरूपकावलोके ४.३७ कारिकाप्रकरणे।

२. शृङ्गारप्रकाशस्य सप्तमप्रकाशावतरणिका, अस्माकं 'साहित्यतत्त्वविमर्श'श्च।

३. शृङ्गारप्रकाशस्य सप्तमे प्रकाशे, ज्योशेरसंस्करणस्य २४६ पृष्ठे डॉ० राघवमहोदयस्य 'Bhojas Srngaraprakasha' नाम्नो ग्रन्थस्य १७३–७४ पृ०

एतेषां विवरणानि चैवमुपस्थापयति—

१. यद् उपात्तशब्देषु मुख्या—गौणी—लक्षणाभिः शब्दशक्तिभिः स्वमर्थम् अभिधायोपरतव्यापारेषु, आकांक्षा—सन्निधि—योग्यतादिभि—र्वाक्यार्थमात्रमभिधीयते तद् अभिधीयमानम् यथा 'गौर्गच्छतीति'।

२. वाक्यार्थावगतेरुत्तरकालं वाक्यार्थ उपपाद्यमानोऽनुपपद्यमानो वा अर्थ—प्रकरणौचित्यादिसहकृतो यत् प्रत्याययति तत् प्रतीयमानम्। यथा 'विषं भुङ्क्ष्व, मा चास्य गृहे भुक्था'—इत्युक्ते 'वरं विषं भक्षितं न पुनरस्य गृहे भुक्तम्' इति प्रतीयते।[1]

३. 'अर्थशब्दोपायाद् उपसर्जनीकृतस्वार्थः वाक्यार्थावगतेरनन्तरम् अनुनादरूपं प्रतिशब्दरूपं वा (यत्) अभिव्यञ्जयति तद् ध्वनिरूपम्। तच्च न सार्वत्रिकम्। तथा हि निवृत्तेभिघाते कस्यचिदेव कांस्यादेः द्रव्यस्यानुनादो जायते, कस्यचिदेव कन्दरादेः प्रतिशब्दः तथा कस्यचिदेव वाक्यस्य प्रतीयमानाभिधीयमानवाक्यार्थप्रतीतेरनन्तरं ध्वनिरुपलभ्यते। निमिषत्येषे—त्युक्ते अक्ष्णोर्निमेषोऽभिधीयते, देवी न भवतीति प्रतीयते, रूपातिशयश्च ध्वन्यते[2]। इति।

'प्राप्तश्रीरेष' इत्यादिपद्ये व त्रितयमप्येतत् संगमयँल्लिखति—

'अत्र वर्णनीयराजविषेस्य विजयिनः यथाश्रुतवाक्यार्थः अभिधीयमानः, त्वयीति पदे विष्णवध्यवसायादवतारस्त्वमसीति प्रतीयमानः, तदवतारान्तराणां निद्रालसत्वादिदोषयोगात् अस्य च तद्व्युदासात् ततो वैशिष्ट्यप्रतिपादनं तात्पर्यम्, यस्य काव्येषु, ध्वनिरिति प्रसिद्धिः'[3] इति।

---

१-२. शृङ्गारप्रकाशस्य सप्तमे प्रकाशे, ज्योशेरसंस्करणस्य २४६ पृष्ठे डॉ० राघवमहोदयस्य 'Bhojas Srngaraprakasha' नाम्नो ग्रन्थस्य १७३—७४ पृ०

३. शृङ्गारप्रकाशस्य ज्योशेरसंस्करणे पृ० २४६। अत्र डॉ० राघवस्य कृतौ भोजस्य शृङ्गारप्रकाशे' 'रूपातिशयं ध्वनती'—ति मुद्रा पृ० १७४।

ध्वनितात्पर्ययोर्भेदकमप्येवमसावुपस्थापयति[१]—

'कः पुनः काव्य—वचसोर्ध्वनितात्पर्ययोर्विशेषः? उच्यते—

**यदभिप्रायसर्वस्वं वक्तुर्वाक्यात् प्रतीयते ।**
**तात्पर्यमर्थधर्मस्तत्, शब्दधर्मः पुनर्ध्वनिः ।।**

**सौभाग्यमिव तात्पर्यमान्तरो गुण इष्यते ।**
**वाग्देवताया लावण्यमिव बाह्यस्ततो ध्वनिः ।।**

**अदूरविप्रकर्षात् तु द्वयेन द्वयमुच्यते ।**
**यथा सुरभि—वैशाखौ मधु—माधव—संज्ञया**[२] ।। इति।

इदमप्यसौ कथयति यत् लोकवाक्ये यत् तात्पर्यं तदेव काव्यवाक्ये ध्वनिः तथैवोच्यते यथा वल्लभावपुषि यदेव सौन्दर्यं लावण्यमित्युच्यते तदेव वल्लभगुणेषु सौभाग्यमिति। सर्वं च तद् दाम्पत्यसौमनस्यविधृतं विराजते। यदुच्यते तेन—

---

१. शृङ्गारप्रकाशस्य ज्योशेरसंस्करणे पृ० २२१, डॉ० राघवमहोदयस्योक्त एव ग्रन्थ 'विघ्नवध्यवसायावतार' इति पाठः पृ० १८०

२. शृङ्गारप्रकाशस्य ६—७ प्रकाशौ ज्योशेरसंस्करणे पृ० २२१, २५१—२. अत्र—

(क) ध्वनेः शब्दधर्मत्वं पराभिमतत्वेनैव, भोजेन स्वयं व्यञ्जनाया अनङ्गीकारात्। यथा चैतत् तत् तस्य शब्दवृत्तिनिरूपणात् स्पष्टम्। 'ध्वनिमत्ता तु गाम्भीर्यमि'—ति सरस्वतीकण्ठाभरणे ध्वनिपदेन यद्यपि शब्दव्यापार एवाभिमतः, किन्तु प्रसिद्ध्य—नुरोधादेव, पार्थक्येन व्यञ्जनायाः शब्दवृत्तित्वस्य कण्ठरवेणानुल्लेखात्। एतदर्थं द्रष्टव्योऽस्माकं 'भोजराजस्य ध्वनिसंबन्धिनो विचारा' इति संदर्भः।

(ख) मधुपदेन चैत्रमासोऽपि गृह्यते, किन्तु प्रकृते सुरभिवैशाखाविति शब्दान्तरसाहचर्याद् वसन्तमात्रपरः सः। वस्तुतश्चैत्रमास एव वसन्तश्रीर्वास्तविकी, न वैशाखे, तदा ग्रीष्मोपरागात्, अतएव मधुसम्बन्धितया स माधव एव न मधुः।

तात्पर्यमेव वचसि ध्वनिरेव काव्ये
सौभाग्यमेव गुणसंपदि वल्लभस्य ।
लावण्यमेव वपुषि स्वदतेऽङ्गनायाः
शृङ्गार एव हृदि मानवतो जनस्ये [१] ।—ति

सर्वथा भोजराजस्य भेदाभेदगाथेयं ध्वनितात्पर्ययोः समन्वयमात्र—प्रयोजनिका न तु तत्त्वनिरूपणात्मिका। तदत्र ध्वनि—तात्पर्ययोर्मध्ये शृङ्गारप्रकाशनामकस्य साहित्यप्रकाशस्य रचयिता भोजराजो माधव—वसन्तयोरिव सामान्यविशेषभावं तद्रूपमेव व्याप्यव्यापकभावं वा सिद्धान्तयति।

५. अभिनवगुप्ताचार्यो (१०१० ई०) विषयभेदेन वृत्तिभेदमूरीकृत्य ध्वनितात्पर्ययोः भेदं चिकीर्षुः तात्पर्यस्य पदार्थान्वयमात्रनियतत्वमामनति। ततस्तन्मते 'घटम्' इत्युक्ते घटत्वावच्छिन्न—कर्मत्वा—वच्छिन्नयोरन्वय एवाभेदात्मा तात्पर्यविषयतामाजिहीते एतच्च तस्यैव—

(क) 'समयापेक्षा वाच्यावगमनशक्तिरभिधाशक्तिः, तदन्यथानुपपत्ति—सहायार्थावबोधनशक्तिः तात्पर्यशक्तिः, मुख्यार्थ—बाधादि—सहकार्य— पेक्षया—र्थप्रतिभासनशक्तिर्लक्षणाशक्तिः, तच्छक्तित्रित—

---

१. शृङ्गारप्रकाशस्य ज्योशेरसंस्करणे पृ० २२१—२ अत्रेदमवधेयं यद् वक्रोक्तिजीवितकारोपि सौभाग्यमेव ध्वन्युपमानपदे दिदृक्षते। यथोक्तं तेन 'ननु कैश्चित् प्रतीयमानं वस्तु ललनालावण्यसाम्याल्लावण्यमित्युपपादितम्—'प्रतीयमानं पुनरन्यदेव विभाति लावण्यमिवाङ्गनास्वि'—ति तत् कथं बन्धसौन्दर्यमात्रं लावण्यमित्यभिधीयते। नैष दोषः। यस्मादनेन दृष्टान्तेन वाच्यवाचक—लक्षण—प्रसिद्धावयवाति—रिक्तत्वेनास्तित्वमात्रं साध्यते प्रतीयमानस्य। न पुनः सकललोकलोचनसंवेद्यस्य ललनालावण्यस्य सहृदयहृदयानामेव संवेद्यं तत् प्रतीयमानं समीकर्त्तुं पार्यते। तच्च बन्धसौन्दर्यमेव।००। प्रतीयमानं पुनः काव्यपरमार्थज्ञानामेवानुभवगोचरतां प्रतिपद्यते यथा कामिनीनां सौभाग्यं तदुपभोगोचितानामेव नायकानां संवेद्यतामर्हति। 'वक्रोक्ति जी० १.३३—कारिकावृत्तिः।

योपजनितार्था— वगमनमूल—जात—तत्प्रतिभास—पवित्रित—प्रतिपतृ— प्रतिभा—सहाया—र्थ— द्योतन—शक्तिः ध्वनन—व्यापारः ।००००। सहकारिभेदाच्च शक्तिभेदः स्पष्ट एव। यथा तस्यैव शब्दस्य व्याप्तिस्मृत्यादिसहकृतस्य विवक्षावगता—वनुमापकत्वव्यापारः, अक्षादिसहकृतस्य वा विकल्पकत्वव्यापारः। एवमभिहितान्वयवादिनामियदनपह्नवनीयम्। योऽप्यन्विताभिधानवादी 'यत्परः शब्दः स शब्दार्थ' इति हृदये गृहीत्वा शरवद—भिधाव्यापारमेव[1] दीर्घदीर्घमिच्छति तस्य यदि दीर्घो व्यापारः तत् एकोऽसाविति कुतः, भिन्नविषयत्वात्। अथाऽनेकोऽसौ तद् विषयसहकारिभेदादसजातीय एव युक्तः। सजातीये च कार्ये विरम्य व्यापारः शब्दकर्म—बुद्ध्यादीनां पदार्थविद्भिर्निषिद्धः। असजातीये चास्मन्नय एव। इति।

(ध्वन्यालोकलोचनस्य चौखम्भा सं० पृ० ६३, वि० संव० १९९७)

(ख) 'यस्तु तात्पर्यशक्तिमेव ध्वननं मन्यते स न वस्तुतत्त्ववेदी। विभावानुभावप्रतिपादके हि वाक्ये तात्पर्यशक्तिः भेदे संसर्गे वा[2]

---

१. अत्र कौमुदीकार उत्तुङ्गोदयः—'यथा धानुष्केण केनापि क्षिप्रहस्तेन क्षिप्तः शरः शरीरावयवं शरीरं व विनिर्भिद्य प्राणानादाय पृथिवीं प्राप्नोति तद्वदान्तरालिकानेक—कक्ष्यास्कन्दक्रमेण पर्यन्तकक्ष्यापर्यन्तम् एकैवाभिधाऽभिधावत्येवेत्यर्थः।—'इति। कुप्पुस्वामिसं० पृ० ११९। ''व्यापारस्य हि विषयमुखेनैव स्वरूपप्रतिलम्भः न स्वरूपेण।००। अतो विषयभेदे स्थिते सति तन्निबन्धनो व्यापारभेदोऽप्यवश्यं भवन् न निवारयितुं शक्य इत्यर्थः। 'इति च तत्रैव।

२. अत्रोच्यते कौमुदीकृता—'विशेषविषया हि तात्पर्यशक्तिः।००। विशेषस्यैकस्य वाक्यार्थस्य वाक्यार्थान्तरात् भेदापरपर्याया व्यावृत्तिरेव व्यावर्त्तकभूतविशेषणसंबन्धो वा 'गामानये—'त्यत्र गोकर्मकानयनविशेषस्य अश्वादिकर्मकानयनादितो व्यावृत्तिप्रतीतेः तस्याः क्रियाकारक—संबन्धनिमित्तत्वाच्च। अतएव भेदो वाक्यार्थः संसर्गो वा इति वैकल्पिकी वाक्यार्थविदां स्थितिः। रसादिरर्थस्तु स न भेदरूपः संसर्गरूपो वा सिद्धस्वरूपो वा सिद्धस्वभावत्वात्।

पर्यवस्येत्। न रस्यमानतासारे रसे' (तस्यैव ८४ पृ०) इति।

(ग) ननु यत्परः शब्दः स शब्दार्थ इति व्यङ्ग्यस्य प्राधान्ये वाच्यत्वमेव न्याय्यम्, तर्हि अप्राधान्ये किं युक्तम्? व्यङ्ग्यमिति चेत् सिद्धो नः पक्षः। (तस्यैव ४२२—पृ०) इति—

एवं प्रभृतिभिरन्यैश्च युक्त्युपन्यासैर्ध्वन्यालोकलोचनात् स्पष्टम्।

६. महिमाचार्यः (१०५०) प्रतीयमानमात्रस्य तात्पर्यस्वरूपत्वमुत्प्रेक्षते। स—

'विषं भक्षय मा मास्य गृहे भुक्था' इत्यादावपि यदेतत् विषभक्षणानुज्ञानं तद् अर्थप्रकरणादिसहायम् एतद्गृहे भोजनस्य ततोपि दारुणतरपारिणामत्वनुमापयति।००। विषभक्षणानुज्ञाना—देर्वाक्यार्थस्याप्रस्तुतस्यैवोपन्यासो हि पूर्वोक्तेन नयेन प्रस्तुताति—रिक्तार्थान्तरप्रतिपादनपरत्वात् तत्र हेतुतयाऽवगन्तव्य इति न शब्दस्य तत्र व्यापार परिकल्पनीयः।—

**विषभक्षणादपि परामेतद्गृहभोजनस्य दारुणताम् ।**
**वाच्यादतोऽनुमिमते प्रकरणवक्तृ—स्वरूपज्ञाः ।।**

**विषभक्षणमनुमनुते न हि कश्चिदकाण्ड एव सुहृदि सुधीः ।**
**तेनात्रार्थान्तरगतिरार्थी तात्पर्यशक्तिजा न पुनः[१] ।।**

इत्येवं तात्पर्यस्यानुमानातिरिक्तत्वं नाभ्युपैति। ततश्च सिद्धमेतन्मते तात्पर्यविषयस्यानुमानविषयतया प्रतीयमानत्वमात्रम्। असौ ध्वनिमपि प्रतीयमानात्मन्यनुमानावगम्येऽनुमेय एवार्थे गतार्थयतीति प्रायेण भोजराजसरणिमनुसरति। अयमेवात्र विशेषो यद् भोजराजस्तात्पर्ये—ऽर्थेऽर्थान्तरमन्तर्भावयति, असौ पुनरनुमानरूपे प्रतीयमानम् इति।

---

रस्यमानतैकसारो ह्यसावलौकिकोऽर्थः। तेन तात्पर्यशक्तिगोचरातिलङ्घी चतुर्थकक्ष्यानिविष्ट एव। पृ० १५७ साहित्यमीमांसाकारस्तु 'राजभृत्य इत्यादौ स्वाम्यन्तरात् भृत्यविशेष—व्यावृत्तिरेव भेद 'इत्यामनति। —साहित्यमीमांसा २.७।

१. व्यक्तिविवेकस्यास्मत्कृतानुवादसहितसंस्करण पृ० १३३ संग्रहकारिके १.६७—६८।

७. मम्मटभट्ट: (१११० ई०) तात्पर्यस्य द्वैरूप्यमुत्पश्यति। एकमभिनवगुप्त–प्रतिष्ठापितम् अन्वयरूपमेव, अपरं च मीमांसकप्रसिद्धं विधेयार्थरूपम्। काव्यप्रकाशे स शास्त्रान्तरसिद्धान्तोल्लेखावसरे 'अकाङ्क्षा–योग्यता–सन्निधि–वशात् ०० पदार्थानां समन्वये विशेषवपुरपदार्थोपि वाक्यार्थ: समुल्लसतीत्यभिहितान्वयवादिनां मतम्, वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिन' इति मीमांसाप्रसिद्धस्य वाक्यार्थरूपस्य पदार्थसंसर्गात्मकस्यैव अर्थस्य स्ववाचकपदानुपयोगात् विशेषवपुष्ट्वम् अपदार्थत्वं च, वाक्यात्मकशब्द–बोधिततया च शब्दत्व–व्याप्य–वाक्यत्वा–वच्छिन्न–हेतुताकत्वं द्वितीय उल्लासे प्रतिपित्सते, पञ्चमे च तस्मिन् 'यत्पर: शब्द: स शब्दार्थ' इति पार्यन्तिकोऽप्यर्थ: शब्दबोध्य एवेति च दीर्घदीर्घाभिधाव्यापारादेव ध्वन्यमानस्यार्थस्य शाब्दत्वेनाभिधानमूरीचिकीर्षन्तं तात्पर्यवादिनमन्विताभिधानिनं निराचिकीर्षन्नेवमुत्क्रोशते–

'ये त्वभिदधति 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापार' इति 'यत्पर: स शब्दार्थ' इति च निश्शेषच्युतचन्दनादिध्वनिस्थलेषु विधिरेव वाच्य इति तेऽप्यतात्पर्यज्ञास्तात्पर्यवाचोयुक्तेर्देवानां प्रिया:। तथा हि भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते ततश्चादग्धदहनन्यायेन यावदप्राप्तं तावद् विधीयते। ततश्च यदेव विधेयं तत्रैव तात्पर्यम् इत्युपात्तस्यैव शब्दस्यार्थे तात्पर्यम्, न तु प्रतीतमात्रे। 'विषं भक्षय' इत्यस्यापि वाक्यस्य 'मा चास्य गृहे भुक्था' इति उपात्त एव चकारप्रतिबोध्ये वाक्यार्थशेषे तात्पर्यमिति।।[१]

---

१. अत्र चण्डीदास: काव्यप्रकाशदीपिकायाम्–

(क) यथा खल्विषुर्धनुष्मता मुक्त एकेनेव वेगव्यापारेण वैरिण: कवचत्वगादिकं सर्वमेव निर्भिनत्ति तथा शब्दोऽपि एकेनैवाभिधाव्यापारेण यावदुद्देश्यं प्रकाशयति यत्पर: यदुद्देश्येन प्रयुक्त: शब्द: स शब्दार्थ शब्देनावश्यं बोध्य:, अन्यथा तत्प्रयोगवैयर्थ्यप्रसंगात्। 'इति,

अस्मिन्नेव संदर्भेऽसावभिनवगुप्तोन्मीलिताम्—

'अतिशयानुशीलनाभ्यासात् तत्र पदार्थवाक्यार्थयोः संभाव्यमानोपि क्रमः सजातीयतद्विकल्पपरम्परानुदयात् अभ्यस्त—विषय—व्याप्ति—स्मृति—क्रमवत् न संवेद्यते। निमित्तनैमित्तिकभावश्चावश्यमाश्रयणीयः। अन्यथा गौण—लाक्षणिकयोर्मुख्याद् भेदः,[१] श्रुतिलिङ्गादिप्रमाणषट्कस्य पारदौर्बल्यम् इत्यादिप्रक्रियाविघातः, निमित्ततावैचित्र्येणैवास्याः समर्थितत्वात्, निमित्ततावैचित्र्ये चाभ्युपगते किमपरमस्मास्वसूयया'—इति इमां दिशमनुवर्त्मानस्तात्पर्यवादिनमप्येवमाक्षिपति—

'यदि च शब्दश्रुतेरनन्तरं यावानर्थो लभ्यते तावति शब्दस्यैवा—भिधाव्यापारः ततः कथं ब्राह्मण पुत्रस्ते जातः, ब्राह्मण कन्या ते गर्भिणी'—त्यादौ हर्षशोकादीनामपि न वाच्यत्वम्। कस्माच्च लक्षणा, लक्षणीयेप्यर्थे दीर्घदीर्घतराभिधाव्यापारेणैव प्रतीतिसिद्धेः। किमिति च श्रुतिलिङ्गवाक्य—प्रकरणस्थानसमाख्यानां पूर्वपूर्वबलीयस्त्वम्—[२] इति। एतेन सिद्धं यद् मम्मटाचार्यः मीमांसानुगन्तारं तात्पर्यवादिनं मीमांसापथेनैव पराजिगीषति, अभिधीयमानत्वं च तात्पर्यस्य प्रत्यभिजिज्ञापयिषति। ततश्चैतन्मते तात्पर्यार्थो व्यक्तमेव ध्वनेः दूरं भिन्नः।

---

(ख) अयमत्र तात्पर्यार्थः—०० भूतानि कारकाणि सिद्धरूपाणि, भवत् क्रियारूपं साध्यम्, तेषां समुच्चारणे समभिव्याहारेण तद्वाचकपदानामुच्चारणे भव्यतया समुदितकारकात्मकसाध्यपरतया।'

(ग) तात्पर्यस्योपात्तपदार्थसंसर्गमात्रे संसृष्टाकारप्रधानपदार्थे वा परिक्षीणत्वात्'। इति।

१. ध्वन्यालोकलोचनस्य चौखम्भासं० पृ० ६७। तत्र कौमुदीकारः—

''शीघ्र—विलम्बित—प्रवृत्तिकत्व—निबन्धने ह्येतेषां पूर्वप्राबल्य—दौर्बल्ये। तच्च निमित्त—नानात्व—कृतमेव। तुल्यव्यापारत्वे सति हि तत्प्रवृत्तेः शैघ्र्यविलम्बितत्वविशेषः निर्निबन्धन स्यात्। अतो ००० लौकिक—वैदिक—प्रमाण—व्यवस्थामवस्थापयता निमित्तनैमित्तिकभावोऽवश्यमभ्युपेयः।—' इति।—। कुप्पुस्वामिसंस्करणे पृ० १२४।

२. काव्यप्रकाशस्य पञ्चम उल्लासे। भाष्यमस्य काव्यप्रदीपे द्रष्टव्यम्।

८. साहित्यमीमांसाकारो—(११५० ई०)—पि तात्पर्यं प्रति दर्शितादरानेता—नाचार्याननतितरामाद्रियते ब्रूते च—

**'अपदार्थोपि[१] वाक्यार्थो रसस्तात्पर्यवृत्तितः।'** इति।

विवृणोति चैतदेवैवं पूर्वोत्तराभ्यां पक्षाभ्याम्—

'ननु अद्वितीयकक्ष्यावगाहि तात्पर्यं प्रथमम्। अतो विभावादि—पदार्थसंसर्ग—प्रतीतिमतो वाक्यस्य तदविनाभूतरामादिरसलक्षणा द्वितीयकक्ष्या। तदतिलङ्घितृतीय—पर्व—भूत—तत्सदृश—सामाजिक—रस—प्रतिपादनं ध्वनेर्विषयः कथं तात्पर्यस्येति चेत्, उच्यते, यथा तात्पर्यम् अनुद्देश्यत्वात् प्रथमं पर्व विहाय द्वितीयमवगाहते तथैतदपि परित्यज्य तृतीयमपि स्पृशेत्। उक्तमाचार्यैः—

**तत्तत्कक्ष्याविभेदेऽपि बहुधा प्रसृता सती ।**
**तात्पर्यवृत्तिरुद्देश्यं यावन्न प्रतिहन्यते ।।**

**एतावतैव विश्रान्तिस्तात्पर्यस्येति किंकृतम् ।**
**यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम् ।।**

**तत्तत्कक्ष्या—विभागेन वाक्य—तात्पर्य—कन्दली ।**
**यथारुच्यभिधा वस्तुध्वनिर्वा वृत्तिरेव वा ।।** इति।

**कविश्च रसमुद्दिश्य सूक्तिमुद्राः करोति हि ।**
**सामाजिकानां हृदयं रसयेयमहं कथम् ।।**

**इति प्रवर्त्तते काव्ये कविस्तत्परमानसः ।**
**विशिष्टैः शब्दसंदर्भैर्ज्ञापयेयं रसं यतः ।।**
**इति प्रवृत्ते सुकवौ तेषामुत्पद्यते रसः ।।**[२] इति।

---

१. साहित्यमीमांसा ६ पृ० ८५ त्रिवेन्द्रमसंस्करणे

२. साहित्यमीमांसायाः प्रकरणं ६—तत्रैव।

एतदेव च धनञ्जयस्य—

वाच्या प्रकरणादिभ्यो बुद्धिस्था वा यथा क्रिया ।
वाक्यार्थः कारकैर्युक्ता स्थायी भावस्तथेतरैः ॥

रसः स एव स्वाद्यत्वाद् रसिकस्यैव वर्त्तनात् ।
नानुकार्यस्य वृत्तत्वात् काव्यस्यातत्परत्वतः[१] ॥

इत्येताभ्यां कारिकाभ्यां प्रगुणयति।

विवरणेनैतेन स्पष्टं यत् साहित्यमीमांसाकारो ध्वनितत्त्वमपि तात्पर्यतत्त्व एवान्तर्भावयति। धनञ्जय—धनिकयोः पदवीं च काव्यस्योपनिषद्—भूतार्थायौपयिकीं मनुते।

१. शारदातनयो (१२५० ई०) भावप्रकाशने काव्यप्रकाशकारं मम्मटमुपजीव्य प्रवर्त्तमानोऽपि तात्पर्यविषयस्य विषये समन्वयवादमेव भोजोपनत—मुपजिजीविषति। स भोजराजस्य कृत्स्नामपि प्रागुद्धृतां तात्पर्यत्रै—विध्यगाथाम् अक्षरश एवं कारिकाबद्धां करोति—

द्वादशधा संबन्धः शब्दस्यार्थस्य यः स साहित्यम् ।
त्रिस्कन्धः स चतुर्भिस्तनुभिः स्याच्चतुश्चतुर्भिश्च ॥

वृत्तिर्विवक्षा तात्पर्यप्रविभागाविहोदितौ ।
ततो व्यपेक्षासामर्थ्यान्वयश्चैकार्थभावना ॥

दोषहानं गुणादानं तथालङ्कारयोगिता ।
रसावियोग इत्येते सम्बन्धाः कथिता बुधैः ॥

वृत्तिस्त्रिधा पदार्थेषु पदानामुच्यते बुधैः ।
अभिधा लक्षणा गौणीत्येतासां रूपमुच्यते ॥

---

१. दशरूपकस्य चतुर्थे प्रकाशे

शब्दार्थयोः समन्यूनाधिकताभेदतस्त्रिधा ।
विवक्षा सा तु संदर्भे कविभिस्तु नियम्यते ।।

वाक्यार्थं प्रति शेषत्वं यत् स्यादुच्चारणस्य तु ।
तत् तात्पर्यं त्रिधा तत् स्याद् वाक्यार्थत्रिविधत्वतः ।।

स चाभिधेयः प्रत्याय्यो ध्वनिरूप इति त्रिधा ।
कारकादिविशिष्टो यः सोऽभिधेयः क्रियादिकः ।।

यथाभिधीयमानार्थादन्यथानुपपत्तितः ।
प्रतीयमानो वाक्यार्थो यः स प्रत्याय्य ईरितः ।।

विषं भुङ्क्ष्वेति वाक्यादावेष तादृक् प्रतीयते ।
ध्वनिर्द्विधा स चैकः स्यादर्थतः शब्दतोऽपरः ।।

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ।।[१] इति।

धनिकस्य काव्यनिर्णयकारिकाभिः पूर्वं द्वितीय—तृतीय—मतत्वेन प्रतिपादितां ध्वनि—तात्पर्य—भेदाभेद—व्यवस्थामप्यसौ—(भावप्रकाशनकारः)—

ध्वनि—तात्पर्ययोः कैश्चित् पृथक्त्वं कथ्यते बुधैः ।
अप्रतिष्ठमविश्रान्तं स्वार्थे००० ध्वनिना स्थितिः[२] ।।

ध्वनितात्पर्ययोर्भेदं केचिन्नेच्छन्ति तन्मते ।
समानलक्षणत्वाच्च तयोर्न च पृथक्स्थितिः ।।

उक्तं च टीकाकारैश्च तयोरैक्यं प्रति क्वचित् ।
एतावतैव विश्रान्तिस्तात्पर्यस्येति किं कृतम् ।।

---

१. भावप्रकाशस्य षष्ठेऽधिकारे। बड़ौदासंस्करणस्य पृ० १४५—५०

२. अस्यैवानुच्छेदस्य द्वितीये भागे कारिकेयं पूर्णमुद्धतास्ति।

यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम्[१] ।। इति

प्रस्तवीति। अन्ते च भोजोपनतां व्याप्यव्यापकभावेन स्थितां ध्वनितात्पर्ययोः स्थितिमपि ब्राह्मणब्रह्मचारिदृष्टान्तेन—

ध्वनितात्पर्ययोर्भेदो ब्राह्मणब्रह्मचारिवत् ।
तदवान्तरभेदो हि प्रायेण पृथगुच्यते[२] ।। इति

उद्धरति, निगमयति चामुं कृत्स्नमपि प्रपञ्चमेवम्—

अतो ध्वन्यर्थ—तात्पर्य—गम्यमानत्वतः स्वतः ।
काव्ये रसालङ्कारादिर्वाक्यार्थो भवति ध्रुवम् ।।

एवं त्रिरूपं तात्पर्यं तत्तत्तात्पर्यवेदिभिः ।
वक्तृ—द्वारा वाक्यधर्म एवेति परिकीर्त्यते[३] ।। इति।

भोजराजः 'संबन्धो[४] (अन्वयो) नाम अहानिर्व्यपेक्षा व्यतिषङ्ग' इति स्वलक्षितम् अन्वयतत्त्वाख्यं साहित्यं पूर्वचर्चितस्य प्रथमाद् भेदाद् भेदयितुं न यतते, नापि च तदुपज्ञमेवार्थं 'परस्परस्य प्रथनं पदार्थनामिहान्वय'[५] इति श्लोकयन् साहित्यमीमांसाकारोपि। शारदातनयस्तु यतते। स पदार्थगततया नीतम् अन्वयममुं पदगततया नयति। वक्ति च—'परस्परस्य ग्रथनं पदानामन्वयः[६] स्मृत' इति। युक्तं चैतत्। पद्येषु गद्यबन्धेषु च यथाकारकान्वयं पदप्रयोगस्थानुपरलब्धेः। स्पष्टं चैतत् 'ततो मृगेन्द्रस्य मृगेन्द्रगामी'[७] त्यादिषु,

---

१-३. भावप्रकाशनबड़ौदासंस्करण पृ० १५०

४. शृङ्गारप्रकाशस्य मैसूरसं० पृ० २८४

५. साहित्यमीमांसाप्रकरण—१

६. भावप्रकाशन पृ० १५१

७. रघुवंशस्य २.३०

'विद्युत्वन्तं ललितवनिता: सेन्द्रचापं सचित्रा'[१] इत्यादिषु च तिलतण्डुलवत्,[२] नीरक्षीरवत्, पांसूदकवद् वा महाकविभि: संदृब्धेषु पदरत्नेषु।

एवं तात्पर्यमन्वयादपाकृत्य दर्शितप्राज्ञभावो भावप्रकाशनकारो भोजनरेन्द्रस्य 'तात्पर्यमेव वचसी'–ति प्रागुद्धृतं समन्वयमन्त्रमपि प्रस्तावेऽत्रोद्धरति। इत्थं ध्वनिसंप्रदाये श्रद्दधानोपि शारदातनय एवमत्र तात्पर्यं प्रति भृशमाद्रियमाणो लक्ष्यते, तस्य महाविषयतायां च सिद्धान्तबुद्धिं द्रढयति।

१०. साहित्यदर्पणकारो विश्वनाथमहापात्र: (१३१० ई०) पुनरभिनवगुप्त–मम्मट–पक्षाभिनिविष्ट: सन् तदुन्मीलितेनाध्वना तात्पर्यवादिन एवं प्रतिक्षिपति–

'अथ केयमभिनवा व्यञ्जना नाम वृत्तिरित्युच्यते–

**वृत्तीनां विश्रान्तेरभिधा–तात्पर्य–लक्षणाख्यानाम् ।**
**अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम् ।।** इति।।

अभिहितान्वयवादिभिरंगीकृता तात्पर्याख्या वृत्ति: संसर्गमात्रे परिक्षीणा न व्यंग्यबोधिनी। यच्च केचिदाह:–'सोऽयभिषोरिव दीर्घदीर्घतरोऽभिधा–व्यापार' इति यच्च धनिकेनोक्तं–

**तात्पर्याव्यतिरेकाच्च व्यञ्जकत्वस्य न ध्वनि: ।**
**यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम् ।।** इति

तयोरुपरि 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव' इति वादिभिरेव पातनीयो दण्ड:। एवं च किमिति लक्षणापि, दीर्घदीर्घतराभिधाव्यापारेणैव तदर्थबोधसिद्धे:। किमिति च 'ब्राह्मण पुत्रस्ते जात: कन्या ते गर्भिणी'–

---

१. मेघदूतस्य २.१

२. भावप्रकाशनस्य १५१ पृष्ठे, एवमेव भोजस्य शृङ्गारप्रकाशेऽपि।

त्यादावपि हर्षशोकादीनामपि न वाच्यत्वम्। यत् पुनरुक्तं 'पौरुषेयमपौरुषेयं च वाक्यं सर्वमेव कार्यपरम्, अतत्परत्वे अनुपादेयत्वादुन्मत्तवाक्यवत्। ततश्च काव्यशब्दानां निरतिशय–सुखास्वादव्यतिरेकेण प्रतिपाद्यप्रतिपादकयोः प्रवृत्त्यौपयिक–प्रयोजनानुपलब्धेः निरतिशयसुखास्वाद एव कार्यत्वे–नावधार्यते 'यत्परः शब्दः स शब्दार्थ इति न्यायादि'ति, तत्र प्रष्टव्यम्–

किमिदं तत्परत्वं नाम। तदर्थत्वं वा तात्पर्यवृत्त्या तद्बोधकत्वं वा। आद्ये न विवादः, व्यङ्ग्यत्वेपि तदर्थतानपायात्। द्वितीये तु केयं तात्पर्याख्या वृत्तिः अभिहितान्वयवादिभिरङ्गीकृता तदन्या वा। आद्ये दत्तमेवोत्तरम्[१] द्वितीये तु नाममात्रे विवादः, तन्मतेपि तुरीयवृत्तिसिद्धेः।

नन्वस्तु युगपदेव तात्पर्यशक्त्या विभावादिसंसर्गस्य रसादेश्च प्रकाशनमिति चेत्, न तयोः हेतु–फल–भावाङ्गीकारात्। यदाह मुनिः–'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिरि'ति। सहभावे च कुतः सव्येतरविषाणयोरिव कार्यकारणभावः पौर्वापर्यविपर्ययात्[२]।

११. प्रायेण साहित्यदर्पणकृदेककालिकः प्रतापरुद्रयशोभूषणवेधाः श्रीविद्यानाथो ध्वनितात्पर्ययोरैक्यमेव स्वीचक्रे–'तात्पर्या–र्थोऽपि व्यङ्ग्यार्थ एव, न पुनः पृथग्भूतः'[३]–इत्येवमाचक्षाणः। एतट्टीकाकारो मल्लिनाथसूनुः श्रीमान् कुमारस्वामी विषयममुमेवं ससंरम्भं स्थिरयति–

'तात्पर्यार्थ इति। अत्र वक्तृबुद्धिसन्निधापितो वाक्यावगम्यो वाक्यार्थो रसादिरूपः तच्छब्देनोच्यते। तस्मिन् पराः तत्पराः तदासक्ताः तद्विषया इत्यर्थः, तेषां भावः तात्पर्यम्।

नन्वभिहितानां पदार्थानाम् अर्थाभिधायिनां वा पदानां विशिष्टार्थप्रत्यायनशक्तिस्तात्पर्यमिति मतभेदेन मीमांसका वर्जयन्ति।

---

१. तात्पर्यवृत्तिः संसर्गमात्रे परिक्षीणेति।

२. साहित्यदर्पणस्य ५

३. प्रतापरुद्रयशोभूषण–१.५ कारिकावृत्तौ।

अतस्तन्मते 'देवदत्त दण्डेन गामानय' इत्यादौ देवदत्तकर्तृक—दण्डकरणक—गोकर्मकानयनरूपो विशिष्टार्थ एव व्यङ्ग्यत्वविधुरः तात्पर्यादवगतत्वात् तात्पर्यार्थ इत्युच्यते। तत् कथमस्य व्यङ्ग्येऽन्तर्भाव इति चेत्, सत्यम्, न हि तावन्मात्रे कविसंरम्भविश्रान्तिः, काव्यशब्दानामन्वयव्यतिरेकाभ्यां प्रवृत्तिनिवृत्तिविषयभूतस्य प्रधानस्य प्रयोजनान्तरस्यासंभवात्, किन्तु तदर्थन्यक्कारेण प्रतीयमाने सामाजिकानन्दास्वादफले रसादावर्थान्तरे। अतः स एव तात्पर्यार्थः, तत्प्रत्यायकपदार्थशक्तिरेव तात्पर्यं कविसमये। तच्च नाभिधा, स्वार्थे संकेताभावात्, नापि लक्षणा मुख्यार्थबाधाद्यभावात्। अतो वक्ष्यमाणलक्षणस्य व्यञ्जनस्यैवेदं नामान्तरकरणमिति तदर्थस्य व्यङ्ग्यार्थत्वमेव। तर्हि, अत्र संसर्गरूपो वाक्यार्थः कथं प्रतीयेते इति चेत् तार्किकाणामिव वाक्यमहिम्ना, न पुनस्तात्पर्येण मीमांसकानामिवेति ब्रूमः। अत एव वर्णयति—'आकांक्षादिमत्त्वे सति पदानां पदार्थानां वा समन्वयशक्तिर्वाक्यम्, तद्बलायातो वाक्यार्थः। तात्पर्यार्थस्तु परिणतिविरसं पनसफलं, परिणतिसरसम् आम्रफलमित्यादिनिन्दाप्रशंसादिवाक्येषु हानोपादानादिरूप एव, नान्यः। वस्तुतः तात्पर्यमपि भावाभिप्रायाद्यपरपर्यायम् उद्देश्यं नाम वक्तृधर्मः, न मीमांसकानामिव वाक्यधर्मः। यद्वा—

अर्थान्तराभावे संसर्ग एव तात्पर्यार्थः। तत्सद्भावे तत्रैव विश्रान्तिरिति स एव तात्पर्यार्थो न संसर्गः। काव्ये च संसर्गमात्रविश्रान्तिर्न संभवतीत्युक्तम्। तस्माद् व्यञ्जनापरपर्यायमेव तात्पर्यं कविभिरङ्गीकृतम्, नान्यदिति सिद्धम्। अत एवोक्तं भावप्रकाशे—

**अतो ध्वन्याख्य—तात्पर्य—गम्यमानत्वतः स्वतः ।**
**काव्ये रसालंक्रियादिर्वाक्यार्थो भवति स्फुटम् ।।**[१]

इति। उक्तं च ध्वन्याचार्यैः—'यत् त्वभिप्रायविशेषरूपं व्यङ्ग्यं शब्दार्थाभ्यां

---

१. भावप्रकाशस्य पृ० १५० बड़ौदासंस्करणे

प्रकाश्यते तद् भवति विवक्षितं तात्पर्येण प्रकाश्यमानम्'[१]—इति।

संप्रदायेनानेन द्वयोरेवार्थयोः तात्पर्यविषयत्वम् एषितव्यकुक्षौ पतति अभिधेयस्य, लक्ष्यवर्जम् अनभिधेयस्य च। तत्र अभिधेयत्वम्, अनभिधेयत्वव्याप्ये प्रतीयमानत्व—व्यज्यमानत्वे चेति धर्मत्रयमपि यथास्वं विषयताम् अवच्छिनत्ति तात्पर्यस्य। यच्चेदमभिधेयत्वम् अस्यापि व्याप्यतामश्नुवानो यः संसर्गः, यश्च तदुत्तीर्णो विधिनिषेधादिरर्थः, तदपि द्वितयम् अस्य विषयतामवच्छिन्द्यात्। तत्र सिद्धान्तधीः क्व नु क्रियेतेति प्रश्ने तात्पर्यस्य स्वरूपमेवैकं शरणमिति तदेवेदानीमन्वीक्ष्यते।

## ३. तात्पर्यस्वरूपम्

प्रागुद्धृतैः संदर्भैरन्यैश्च तदधिकरणकैरनल्पसंख्यैस्तैरिदं न न स्पष्टं यत् साहित्यसंप्रदाये तात्पर्यस्य स्वरूपे मतित्रैधं लभ्यते—

१. एकं वाक्यात्मक—शब्द—शक्तिरूपम्

२. द्वितीयं प्राधान्यरूपम्

३. तृतीयं च मानसाध्यवसायरूपम्।

एष्वाद्यं साहित्यक्षेत्रे क्षेत्रान्तरीयम्, द्वितीयं तृतीयं च निर्विवादमपि व्यञ्जनानिर्विशेषमेव। यच्चेदमाद्यमस्य स्वरूपं तद् वाक्यनिष्ठं सदपि शब्दशक्तेरभिधाया भिन्नम्, अभिन्नं वेति वादमतिरत्रापि स्फुरन्ती लभ्यते, वाक्यस्यापि शब्दरूपत्वात्। अत्र येऽभिहितान्वयवादिनः ते कोषव्याकरणादिभिरपि संकेतग्रहमभ्युपयन्तः पदार्थस्य वाक्यार्थतः स्वातन्त्र्यमूरीकृत्य प्रथमेऽभिधां द्वितीये च वैकल्पिकीं तात्पर्यशक्तिमुपयन्ति। पक्षे च पदार्थेऽभिधामात्रमूरीकृत्य वाक्यार्थे मानसाध्यवसायरूपम् आकांक्षादित्रिकमेवाश्रित्य विश्राम्यन्ति, न ह्येवातिषजन्ते तात्पर्यस्य शक्तित्वे। ये पुनरन्विताभिधानिनो व्यवहारमात्राच्छक्तिग्रहमूरीकृत्य व्यवहर्तव्यताया एकमात्रे पात्रे

---

१. प्रतापरुदयशोभूषणस्य रत्नापणनाम्नो भाष्यस्य संक्षेपः।

वाक्ये अभिधानाम्नीमाद्यां शक्तिं साक्षात्कुर्वन्ति तेष्वेके संबन्धस्य सामान्यं रूपं यावद् वीतप्रत्यूहं पदवीं लभन्ते, विशिष्टे चास्य स्वरूपे विघ्निता–भिधाशक्तिका: तात्पर्यशक्तिमेवाशिश्रीषन्ते, अपरे पुनरभिधां पटुना धानुष्केण प्रयुक्ताया इषो: परप्राणापहार–पार्यन्तिकीम् अविच्छिन्न सन्ततिं दीर्घदीर्घां व्यापृतिमिव अविघ्नित–गतिकामेव स्वीचिकीर्षन्ति संबन्धविशेषावधि, इतरे च विवक्षितार्थावगतिपर्यन्तमिमां निनीषन्ते। तत् किंन्वत्र प्रतिपत्तव्यम्।

अत्र वयमेवमातिष्ठासामहे–यत्र हि व्यवहारमात्रौपयिका: शब्दसंकेता: तत्र आपाततोन्विताभिधानमेव सिद्धान्तीक्रियेत यथा लोके, यत्र पुनर्नास्ति तादृशी स्थिति:, ततश्च वाङ्मात्रेणार्थकल्पना: क्रियन्ते तत्र पद–वाक्य–वाक्यार्थ–रूपानुच्छेदकल्पनयैव प्रवृत्तिर्युज्येत। अपौरुषेयेषु वचनेषु दृश्यत एवैषा स्थिति:। तत्राद्यानाम् ऋषीणां या वच:प्रवृत्ति: तामेवार्था अनुधावन्ति। सैव च स्थिति: कविप्रौढोक्तिमात्रनिष्पन्नात्मनामर्थानां पौरुषेयेष्वपि काव्यवाङ्मयेषु। ततश्चात्र व्यवहारेतरस्यैव संकेतग्राहकसमुदायस्य कोषव्याकरणादेराश्रयो युक्त:। तेन चाभिहितान्वय एवात्र शरणम्। एवं वादयोरनयोर्यथास्वं निष्पादितायां स्थितौ विचार्येत योऽयमेको न्यायो वेदार्थ इव शिरसि ध्रियत ''शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव'' इति, यच्चासौ चारेतार्थ्यते ''विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे'' इति तत्र का नु तर्कौचितीति। आनुभविकमेतदिति संप्रतिपत्तव्यमेवेति नास्त्येवात्रानौचितीकलंक इति चेत्, सत्यम्, योऽयमत्र विराम: स कीदृग्रूप:। सोपानक्रमेणैकैकश उत्तरोत्तरम् अर्थविशेषावगतिनिष्पत्तिरूप इति चेत् सोपानसाहस्री–रोहणैकलभ्यां भूमिकामारुरुक्षुणा यदिदमेकं सोपानमाक्रम्य अपरमाक्रम्यते तत्रास्य कालाश्रयविषयभेदेन भिन्नोपि गमनव्यापार: स्वरूपतोऽपि भिद्यते किम्? यदि भिद्यते तर्ह्यधिश्रयणावाश्रयणयोरान्तरालिका अपि व्यापारा भिद्यन्ताम्, प्रतिपद्यतां च तत: पाकक्रियायामप्यनेकासामवान्तरक्रियाणामस्तित्वम्, उच्छिन्तां च क्रियाया: पूर्वापरीभूतावयवरूपत्वम्। यदि क्रियाङ्गभूतानां

क्रियाणां स्वातन्त्र्यं नास्ति श्रीमाननवस्थाभिया स्वीचिकीर्षुः, तर्हि शब्दव्यापारेण किं नामापराद्धं यदवगमित–विशेषणमिमं विशेष्यपर्यन्तमपि नेच्छति विसृत्वरम्। कश्चायं श्रीमतां व्यामोहो यद् अर्थगतां भिदां व्यापारशिरसि पिपातयिषन्ति। यदि चानुच्छेद्य एवासौ विषयभेदेन व्यापारभेदस्यानुरोधः तर्हि विमृशतु स्तोकमक्षिणी निमील्य यद् नाट्यसन्धिषु किं नाम प्रवृत्तिनिमित्तम् इति।

ननु फलनिष्पत्तिपर्यन्तमक्षुण्णतया विद्यमानत्वेन नायकव्यापार–स्यैकत्वमेव, फलरूपस्य विषयस्याभिन्नत्वादिति नास्त्येवावान्तरार्थ–भेदेनावान्तरव्यापार–भेदेऽपि क्षतिरस्ति च सन्धित्वमत्र संधीयमानत्वेन सुरक्षितमिति नास्ति प्रश्नस्याप्यवकाश इत्युच्यते, तर्हि काव्येन भवतां किमपराद्धं यदभिनयस्वीकृतामिमां सुबुद्धिं तत्र न व्यापारयन्ति। कथातन्तुसन्तानस्योभयत्राप्यविशेषेण प्रवृत्तेः सामाजिकान्तःकरणधारायाश्च रसैकलीनतया स्थितेः य एवाभिनये तर्कक्रमः स एव काव्येऽपि प्रयोज्यः। एवं चावस्थार्थप्रकृति–गत–नायक–व्यापार–सन्धिषु अनतिसन्धीयमानाः श्रीमन्तः पदार्थ–वाक्यार्थ–काव्यार्थ–बुद्धि–धारायां कुतो न्वतिसंधीयमाना दृश्यन्ते, दृश्यन्ते च जिघांसन्तः वक्तुः कवेः प्रतिपत्तुः सहृदयस्य वा शृङ्गारादिपर्यन्तं प्रसृमरां संवित्संततिम् अर्थभेदेन शब्दभेदमिव विषयभेदेन व्यापारभेदं मुधैव मनसिकृत्य।

ननु शब्दः संकेतसहाय एवार्थविशेषं प्रतिपादयति, नास्ति चार्थान्तरे तस्य संकेतः। तत् कथमसौ सकामोऽपि तत् स्प्रष्टुमीशेत। सत्यम्। लोष्टघातेन जनितस्तरङ्गस्तरङ्गान्तरं यदम्भसि जनयति तत्र तरङ्गान्तरेणापि किं लोष्टघातस्यास्य संपर्क इष्यते। नेष्यते चेत्, किं तर्हि तत्र तरङ्गान्तरे तन्त्रम्। लोष्टघातजनितस्तरङ्ग एवेति तर्हि तरङ्ग एव तरङ्गान्तरस्य जनकः, न लोष्टघातव्यापारः। ततश्चाभिधया वेदितादर्थाद् यद् अर्थान्तर–प्रतिपत्तिरभिप्रसूयते तत्रापि नास्त्येव कारणीभूतार्थप्रतिपत्तिप्रसुवः शब्दशक्तेस्तन्त्रताया गौरवपूर्णाय अङ्गीकाराय औचित्यम्। नास्ति च ततो

विरम्य—व्याराभाव—सिद्धान्तमभ्युपेत्य व्यापारान्तकल्पनायाः शब्दगतत्वे—नैवाङ्गीकृतेरावश्यकता। अत एव मुकुलभट्टैः अर्थस्यैव अर्थान्तरावगतौ हेतुत्वमूरीक्रियते, न तु शब्दस्य। उक्तमेभिरभिधावृत्तमातृकाया आरम्भ एव—

**शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता ।**
**अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते ।।**—इति।

अत एव च मम्मटभट्टोऽपि लक्षणाया आरोपितत्वमेव शब्दे स्वीकरोति **'लक्षणाऽऽरोपिता क्रिये'**—ति लक्षणालक्षणकारिकायाम्। अवोचाम च 'रसस्य शाब्दत्वम्'[1] इति स्वसंदर्भे अस्यैव पथो वैज्ञानिकत्वं वयमपि।

अपि च लोके लोष्टपातादिप्रसूतास्तरङ्गादयो ये पदार्थान्ते भौतिका एव। शब्दबोधावगमितानां तु तेषां नैषा स्थितिः। ते हि सर्वात्मना बौद्धा एव। बुद्धिरप्येषा न कवेः, तस्य वृत्तत्वात्। विद्यमानस्यापि वा चर्वणाकालेऽनुपस्थितत्वात्। सामाजिकस्यैव सा तस्यैव रसयितृत्वेनो—पस्थितत्वात्। तर्हि द्वितयमपि तद् बुद्धिवीचिभूतमेव यदुत्पादयति, यच्चोत्पाद्यते। एष च बुद्धेर्बुद्ध्यन्तरोत्पादो बोद्धुरन्तःकरण एव भवति, न नभसि शब्दाश्रये, येन तदर्थं कल्पितस्य व्यापारस्य शब्दगतत्वमूरीक्रियते। बौद्धिकश्चेदेष व्यापारः किं तत्र विश्रान्तिकल्पनया विरामजल्पनया वा। रसभोगावधि तस्य धानुष्कप्रक्षिप्तशिलीमुखव्यापारस्येव दीर्घदीर्घत्वस्यैव कल्पयितुमुचितत्वात्। ततश्च युक्तमेव उच्यते—

**प्रतिपाद्यस्य विश्रान्तिरपेक्षापूरणाद् यदि ।**
**वक्तुर्विवक्षिताप्राप्तेरविश्रान्तिर्न वा कथम् ।।**—इति।

---

१. सागरिकायाः ७.२ अङ्के डॉ० आदित्यनाथझाभिनन्दनग्रन्थे च प्रकाशितोऽस्माकं व्यञ्जनायाः शब्दवृत्तित्वस्य विरोधी लेखः। सागरिकायाः ७.३ अङ्के 'रसस्य शाब्दत्वमीमांसा'—इति नाम्ना यत् तस्य खण्डनं प्रकाशितं तत्र दत्ताः सर्वा अपि युक्तयोऽस्माभिः तत्रैव संदर्भे दत्तोत्तराः।

अस्य च पार्यन्तिकार्थोपलब्ध्यवधि प्रधावतो मानसस्य व्यापारस्य तात्पर्यमिति युज्यत एवाभिधानम्, किन्तु को नामास्य शाब्दिकेना–भिधात्मना श्रीमतां बहुमानपात्रेण व्यापारेणाभेदः येनाभिहितान्वयान्विता–भिधानिनोः केशाकेशि प्रवर्त्त्येत। अन्या हि शब्दबोधजनिता संकेतसहाया साधनीभूतार्थ–मात्र–विलेशया अभिधानाम्नी शेमुषीमूषी, अन्या च तादृशार्थ–कशाभिघात–प्रपलायिता अर्थान्तरशतावबोध–राज–पथचतुराङ्गिका प्रतिभातुरंगिका। कश्च नामास्य संबन्धः विधिनिषेधौपयिक–प्रामाण्य–निर्भर–मीमांसाशास्त्रप्रसिद्धेन शब्दोपात्तत्वावच्छिन्नेन अभिधीयमानेन तात्पर्येण। पृथगेव हि मुख्यार्थप्रमुखात् मीमांसाशास्त्रात् प्रतीयमानार्थप्रमुखं कान्तासंमितौपदेशिकं काव्यम्। काव्यस्य चात्र तात्पर्यं विचार्यते न शास्त्रस्य। ततश्च कीदृशी नामात्र देवानां प्रियता। तेनात्र मा भूद् विनायकनिर्मित्सायां वानरनिर्माणोद्योगः। ततश्च–

तात्पर्यनाम्नि नभसि प्रतिभोषसा यः
संवित्प्रकाश उपदीक्रियते महद्भ्यः ।
अर्थान्तराणि तत एव बहिस्थितानी–
वात्मस्थितान्यपि भवन्ति चितिं स्पृशन्ति[१] ।।

विश्रान्तिरत्र ननु का, ननु को विरामः
संवित्सुपर्णदयितैव यदा प्रडीना ।
आत्म–प्रकाश–विशदीकृत–कञ्चुकायां
सत्यां चितौ निखिल-चेत्य[२]-विभूषितायाम् ।।

इति केवलं निवेदयामः ।।[३]

---

१. चितिस्पर्श एव हि रत्यादीनां चेत्यानां रसत्वलाभः।

२. प्रत्यभिज्ञाहृदयादिषु प्रसिद्धं चिति–चेत्य–चित्तानां रहस्यबीजमत्र जीवातु।

३. लेख एषः अखिलभारतीयप्राच्यविद्यापरिषदः २५–शेऽधिवेशनेऽशतः श्रावितः संस्कृतशाखोपवेशने।

## संस्कृतकाव्यशास्त्रे ध्वनिसंज्ञा

वाच्यचमत्कारापेक्षया यत्र प्रतीयमानचमत्कारस्य प्राचुर्यं काव्य–विशेषस्य तस्य ध्वनित्वं ध्वन्यालोकाकृता ससंरम्भं प्रतिपादितम्। तथा चोक्तं तेन–

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ।।** इति,

**तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रति स्थितौ ।**
**ध्वनेः स एव विषयो मन्तव्यः संकरोज्झितः ।।** इति च।

अस्ति चैतत् सुप्ररूढं 'भ्रम धार्मिक विस्रब्ध' इत्यादौ संदर्भे यत्र हि विधिरूपस्य वाच्यस्य चमत्कारं निषेधरूपस्य प्रतीयमानस्य चमत्कारोऽतिशेते। एवमेव 'आर्या अत्र निमज्जति' इत्यादौ, यत्र निषेधरूपस्य चमत्कारं विधिरूपस्य प्रतीयमानस्य चमत्कारो न्यक्करोति।

**वीराणां रमते घुसृणारुणे न तथा प्रियास्तनोत्सङ्गे ।**
**दृष्टी रिपुगजकुम्भस्थले यथा बहलसिन्दूरे ।।**

इत्यादौ प्रतीयमानस्य प्रियास्तनगजकुम्भस्थलयोः साम्यस्य यथा चमत्कारातिशयो न तथा वाच्यस्य प्रियास्तनापेक्षया गजकुम्भस्थले–ऽभिधीयमानस्य रमणीयतातिरेकरूपस्य व्यतिरेकस्य। एषैव च स्थितिः 'शिखरिणि क्व नु नामे'–त्यादौ प्रतीयमानत्वेन प्रतिष्ठितस्य शृङ्गाररसस्य। त एते वस्त्वलङ्कार–रस–लक्षणैः प्रतीयमानैः पिच्छिलाः काव्यविशेषा आनन्द–वर्धनाचार्येण ध्वनिकाव्यत्वेनाभिमन्यन्ते। अत्र च मूलं व्याकरणशास्त्रम्। तथा चोक्तमानन्दवर्धनेनैव ध्वनिकारिकाया 'सूरिभिः कथित' इति भागं व्याकुर्वाणेन–

'सूरिभिः कथित' इति विद्वदुपज्ञेयमुक्तिः, न तु यथा—कथञ्चित् प्रवृत्तेति प्रतिपाद्यते। प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरमूलत्वात् सर्वविद्यानाम्। ते हि श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः काव्यतत्त्वार्थदर्शिभिः वाच्यवाचकसंमिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।। इति (पृ० १३३—३५)

अत एव 'इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथित' इत्युत्तमं काव्यं लक्षयित्वा मम्मटभट्टोऽपि ध्वनिसंज्ञाया मूलत्वेन व्याकरणशास्त्रमेवं स्मरति—

'बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः, ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावित—वाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य।।' इति।

क्षुण्ण एष पन्थाः परम्परया। प्रसिद्धेः परां कोटिमाटीकितश्चायं ध्वनिः काव्यशास्त्रे। यथाचेदं तत् साहित्यदर्पणरसगङ्गाधरादिभिः स्पष्टभूयिष्ठमेव—

**रसध्वनेरध्वनि ये चरन्ति, संक्रान्तवक्रोक्तिरहस्यमुद्राः ।**
**तेऽस्मत्प्रबन्धानवधारयन्तु, कुर्वन्तु शेषाः शुकवाक्यपाठम् ।।**

**निषेधवेषो विधिरेष तेऽथवा, तवैव युक्ता खलु वाचि वक्रता ।**
**विजृम्भितं यस्य किल ध्वनेरिदं, विदग्धनारीवदनं तदाकरः ।।**

**साहित्यविद्याजयघण्टयैव, संवेदयन्ते कवयो यशांसि ।**
**यथा यथास्यां ध्वनिरुज्जिहीते, तथा तथा सार्हति मूल्यभेदान् ।।**

इत्येवंविधैरुद्गारैः महाकविप्रबन्धेष्वपि यावत् सुप्ररूढम्।

तस्यास्य आ ध्वनिकृतम् आ च पण्डितराजं लब्धप्रतिष्ठस्य ध्वनि—शब्दस्य प्रौढि—वादमात्रेणैव साहित्ये प्रसरः, न तु परीक्षया। तथाहि

व्याकरणशास्त्रे वैखरीध्वनिः स्वाकारेण स्फोटं व्यनक्ति। स च ध्वनिः स्फोटव्यक्तौ स्वरूपत एव कारणम्, न तु अभिधाद्वारा। अभिधायकत्वं हि व्यङ्ग्ये स्फोटे तिष्ठति। एवं च वैयाकरणानां ध्वनिः निरभिधः व्यञ्जकश्च। आलंकारिकाणां पुनः साभिधः। वैयाकरणानां व्यङ्ग्यः स्फोटः अभिधायुक्तः, अर्थात् वैयाकरणे प्रस्थाने व्यञ्जनैव पूर्ववर्त्तिनी अभिधैव च परवर्तिनी। विपरीतं च अलंकारशास्त्रे। तत्र हि अभिधैव पूर्ववर्त्तिनी व्यञ्जनैव च परवर्त्तिनी। वैयाकरणसम्प्रदाये हि शब्द एव व्यञ्जकः, शब्द एव च व्यङ्ग्यः। साहित्यसम्प्रदाये पुनर्व्यञ्जकत्वं शब्द इवार्थेऽपि कृतपदम्। सोयं सुमहानुपप्लवो वैयाकरणस्य संप्रदायस्य साहित्यसंप्रदाये।

यच्चोच्यते व्यञ्जकत्वसाम्याद् ध्वनिरिति व्यवहार इति, तत्र ब्रूमः 'यदि व्यञ्जकत्वसाम्याद् ध्वनिरिति व्यवह्रियते तर्हि व्यङ्ग्यत्वसाम्यात् स्फोट इत्यपि व्यवह्रियेत, प्रवर्त्तेत च ध्वनिकाव्यमितिवत् स्फोटकाव्यमित्यपि व्यवहारः। प्राधान्येन व्यपदेश इति समुदाचारस्य चास्मिन्नेव व्यपदेशे रक्षा। अस्ति हि प्रधानं स्फोटः। व्यपदेशचयने न युज्यते प्रधानस्य परित्यागो–ऽप्रधानस्य परिग्रह इव।

नास्ति च कोषेषु ध्वनिरित्यस्याः संज्ञायाः काव्यस्य कृते प्रसिद्धिः। यदि हि प्रौढ्यैव व्यवहारः प्रवर्त्त्यते, अनुस्त्रियते च प्रौढ्येव परम्परया तत् किमपराद्धं मायाऽविद्यादिभिः प्रतिभासपरमाभिः संज्ञाभिः यदेता विहाय ध्वनिसंज्ञायां बहुमानो ध्वनिकृताम्। एवं च ध्वनिकाव्यमितिवत् स्फोटकाव्यमित्यप्युच्येत मायाकाव्यमित्यपि, अविद्याकाव्यमित्यपि च। युज्यते च ब्रह्मकाव्यमिति वक्तुमधिकम्। ईश्वरोपाधिर्माया जीवोपाधिश्चाविद्येति संप्रदायविदः। तत्रोपाधेस्त्रैकालिकसंसर्गावच्छिन्नाभावप्रतियोगित्वमते यत्किञ्चिन्निष्ठजन्यतानिरूपिता जनकताऽनुत्थानपराहता। व्यञ्जकता पुनः प्रकामप्रसरा। रज्जौ प्रतीयमानस्याहेरत एव प्रातिभासिकत्वापरपर्यायं व्यङ्ग्यत्वमेव स्वाभाविकम्। ईश्वरेऽपि 'पश्यामि देवाँस्तव देव देहे' इत्यादिभिः

स्मृतिवाक्यैः प्रसिद्ध एवोपाधिः। 'मया हताँस्त्वं जहि', 'पश्यामि देवाँस्तव देव देहे' इत्यादिभिः स्मृतिवाक्यैः प्रसिद्ध एवोपाधिः। 'मया हताँस्त्वं जही'ति वदता भगवतैव तस्मिन् प्रतिभासमानानां विश्वेषामपि प्रपञ्चानां मिथ्यात्वं प्रतिज्ञातमेव। अधिष्ठानसत्तातिरिक्तसत्ताकत्वरूपविवर्त्त—विषयस्यास्य विश्वप्रपञ्चस्य पारमार्थिके ब्रह्मणि यो नाम सुप्रतीतोऽध्यासः सोऽपि नातिरिच्यते व्यङ्ग्यव्यञ्जकभावात्। ततश्च व्यञ्जकत्वसाम्याद् ब्रह्मण इव व्यङ्ग्यत्वसाम्याद् विश्वस्यापि ध्वनिरिति संज्ञानमवारितप्रसरमेव। उच्येत तर्हि 'विश्वस्यात्मा ध्वनिरि'—त्यपि। अस्ति च चारुत्वमपि विश्वस्मिन्। अत एवात्र स्वारसिकी प्रवृत्तिर्भूतानाम्। अस्ति काव्यमपि आविद्यिकं मायिकं वा वस्तु। तर्हि अङ्गाङ्गिभावाद् शेषशेषिभावाद् वा अविद्याया मायायाश्चापि ध्वनित्वं सांसिद्धिकमेव। 'रसो वै स' इति श्रुत्या रसस्य ब्रह्मरूपत्वे रसस्येव ब्रह्मणोऽपि व्यङ्ग्यत्वमव्याहतम्। एवं हि तदिदमर्थभूतस्य सर्वस्याप्येतस्य प्रमेयजातस्य ध्वनिसंज्ञा न ह्येव व्यभिचरति। 'अथातो ब्रह्मजिज्ञासेत्युपन्यासे अथातो ध्वनिजिज्ञासे'—त्यपि विकल्पः तर्हि विवृताननविलः।

अथ—'प्रथमे हि विद्वांसो वैयाकरणा इति वैयाकरणा एव प्रथमोपस्थितिकाः, ते च शब्दस्यैव ध्वनित्वमूरीकुर्वन्ति, अस्ति च काव्यमपि शब्दात्मकमिति त एवात्रालंकारिकैरनुरोद्धव्याः, नान्ये ब्रह्मवादिप्रभृतय' इत्युच्यते चेत् पराहतं समशीर्षिकत्वं काव्यलक्षणे शब्दार्थयोः, प्राप्तं च शब्दस्य प्राधान्यं तत्रेति समापतिता अकुतोमुखता काव्यलक्षणे, ध्वनिवादिना—दण्डी वाऽनुस्त्रियेत भामहो वेति। शब्दार्थयोः समशीर्षिकत्वे शब्दस्य व्यञ्जकत्वमादाय ध्वनित्वमिव अर्थस्य व्यङ्ग्यत्वमादाय स्फोटत्वमपि काव्ये सुलभमेव। ततश्च पुनस्तत्रैवावलम्बितो वादवेतालः। अथ—'अर्थस्यापि व्यञ्जकत्वमस्तीति व्यञ्जकत्वमेव ध्वनिसंज्ञाया आश्रयणे प्रमुखमिति स्फोटकाव्यादिवादा वैतण्डिकत्वमात्रस्य ताण्डवम्, इत्युच्यते चेद् भूयोऽप्युच्यते

साध्यसाधनयोर्मध्ये साध्यस्यैव प्राधान्यं दृति—सलिलयोर्मध्ये सलिलस्येवेति प्राधान्येन व्यपदेशा भवन्तीति स्फोटकाव्यवाद एव रमणीयतां परिणामस्य। अथ स्फोट एव व्यञ्जकः, ध्वनिरेव व्यङ्ग्य इत्यपि पक्षो न न हि प्रसिद्धस्त्रिकाण्ड्यादिष्विति स्फोटकाव्यवादोऽपि न न समर्थ्येत संप्रदायेन। ननु स्फोटसंज्ञा विवादभूमिः, ध्वनिसंज्ञा च निर्विवादेति निर्विवाद एव तत्त्वे प्रेक्षावतां युज्यते प्रवृत्तिर्न तु विवादभूमा'—विति चेत् तथ्यमुच्यते, अत एव आनन्दवर्धनोऽपि स्फोट—पदं परिहृत्यैव व्यवसितो ध्वनिप्रतिष्ठायां ध्वन्यालोके ग्रन्थे, तथापि क्व जडो ध्वनिः, क्व च चैतन्यात्मा स्फोटः। स्थूलात् सूक्ष्मं प्रति सुप्रस्थितानां कीदृश एष व्यामोहो यदेते जडं बहु मन्यन्ते चेतनं विहाय। नूनमसौ पिण्डखर्जूरैरुद्वेजितस्तिण्तिणीं बहु मन्यते।

ननु 'भम धम्मिअ'—प्रभृतिषु 'मा निषाद प्रतिष्ठां त्वमगम' इत्यादिषु च मुख्योऽर्थः, अमुख्योऽर्थः, मुख्यतोऽमुख्यस्य व्यञ्जना चे'ति या काचिदपूर्वा संपत् कथमसौ भेद्येत चित्रादिसंपदो यदि ध्वनिसंज्ञा नाद्रियत इति चेत्, ब्रूमः, सर्वंसहसामर्थ्या भगवती काव्यसंज्ञैव तत्र प्रगल्भेत। प्रतीयमानार्थ—संपत्परिस्पन्दसुभगमेव हि शब्दार्थबन्धं काव्यत्वेनाद्रियन्ते महामेधसः। अत एव भामहादयः प्राञ्चः, वक्रोक्तिजीवितादिविधातारोऽर्वाञ्चश्च काव्यशब्देनैव संतुष्यन्ति। काव्यशब्द एव तेषां दृष्टौ समग्रभरसहः। अत एवानन्द—वर्धनोऽपि ध्वनिभिन्नस्य काव्यत्वे विप्रतिपद्यत एव गुणीभूतव्यङ्ग्यमिति शब्देन ध्वनिभिन्नं काव्यं धिक्कुर्वन्। एको ध्वनिः अपरः काव्यविशेषः पुनर्देवदत्तो वा यज्ञदत्तो वा विडालो वा मूषको वेति वक्तव्यमेव तस्य संज्ञानं किञ्चिदपि। न चासावब्रूत। मम्मटोऽपि शब्दव्यापारविचारनामनि काव्यप्रकाशाऽनुजे सन्दर्भे ध्वनिसंज्ञां परिजहारैव। सोऽयं महिमा काव्य—शब्दस्यैव यदेतं श्रुत्वा रसादिपार्यन्तिकीं सर्वामपि संपदं सचेता अनुसन्दधाति। ततश्च अलमन्येन ध्वन्यादिसंज्ञानेन। तस्मात्—

**काव्ये ध्वनिरिति संज्ञा या, सा रामस्य दाशरथिसंज्ञा ।**
**नैषाऽनुचिता स्फोटब्रह्मरसाख्या महीयसी किन्तु ॥**

अत एव काव्यप्रकाशकृता परमशिवापरपर्यायेण प्रकाशेन काव्यमभेदितम्। ततश्च यदेव काव्यं स एव प्रकाशः, स एव रसः, य एव रसस्तदेव च ब्रह्मेति–व्यक्तिवादिनां मम्मटादीनां मतेऽपि नास्त्युपकारो ध्वनिसंज्ञया।

◈

## रसस्य शाब्दत्वम्

रसपदेनात्र काव्यरसो विवक्षाविषयः। स चास्वादैकरूपः। आस्वादश्चासावानन्दभोगरूपः। तत्र प्रश्नः—'लोके यथा माधुर्यादीनामास्वादभोगे सितादिप्रत्यक्षं कारणं तथा मेघदूतादौ शृङ्गारादिभोगे किं कारणम्' इति। न तावत् प्रत्यक्षं विषयितया जनयिष्यमाणे तस्मिन् तादात्म्येन कारणतयापेक्षितस्याननुद्भिन्नरूपस्य यक्षादिविषयस्य तदानीमभावात्। नानुमानम्, आस्वादं प्रति तत्कारणतायामूरीक्रियमाणायामपहार एव स्यात् स्थूलविषयाभिप्रवृत्तेः, स्याच्चानुमानस्यापि हेतु—पक्ष—प्रत्यक्षबन्धान्मोक्षः, काव्यरसास्वादकाले तयोरनुपस्थितस्थूलशरीरत्वात्। नापि शब्दः, आस्वादं प्रति तस्याप्यनुमानतुल्ययोगक्षेमत्वात्।

ननु 'काव्यरसस्य काव्यैकोपस्थाप्यत्वात्, काव्यस्य च शब्दोपस्थापिताभिरूपार्थरूपत्वाच्छब्द एवात्र कारणमि'—ति चेत्, प्रसक्तं तर्हि काष्ठादीनामपि क्षीर—(खीर) प्रभृतीनामास्वादं प्रति रासभादीनामपि घटान् प्रति, प्रपितामहस्यापि च प्रपौत्रं प्रति जनकत्वम्। प्रणष्टं च वराकं करण—कारणत्वमर्यादाबीजम्। यदि च शब्दश्रुतेरनन्तरं जायमाने कृत्स्नेपि बोधे शब्दजन्यत्वमेव मन्यते तर्हि 'ब्राह्मण पुत्रस्ते कुलपतिः' इत्यादिवाक्यार्थावगमानन्तरीये प्रहर्षेऽपि प्रसक्ष्यमाणं शाब्दत्वं किमिव वार्येत, वार्येत च किमिव 'रसः, शृङ्गार' इत्येवं स्वशब्दप्रयोगादपि रसास्वादसंभूतिप्रसङ्गः, किमिव च वार्येत वमनाख्यः[१] कश्चिदवामनो दोषः। ततश्च कवलीक्रियेत काव्योपस्थापिता कृत्स्नापि विभावादिसामग्री

---

१. रसगङ्गाधरे रसदोषप्रकरणे द्र. पृ० ६२ निर्णयसागरीये षष्ठ संस्करणे।

व्यर्थत्वापरपर्यायैः अवाच्यवचनत्वादिभिः दुष्टिमुष्टिभिः,[1] विच्याव्येत च निखिलापि रससिद्धकवीश्वरपरंपरा महाकवित्वात् प्रभ्रश्येत च सकलोऽपि विभावादिप्रतिपादनपरः परोऽप्यालङ्कारिकवर्गः प्रामाण्यात्।

ननु— **शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान् ।**
**प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते ।।**

वाक्यपदीये ३.७.५

इत्युक्तनीत्या विभावादिप्रत्यक्षं प्रति शब्दस्य हेतुत्वे सिद्धे 'अनुविद्धमिव ज्ञानं सर्वं शब्देन भासत' इत्युक्तनीत्या च ज्ञायमानानां विभावादीनां शब्दानुविद्धत्वेन तादृशास्वादोत्पत्तिप्राक्क्षणावच्छेदेन शब्दस्यापि विद्यमानत्वान्नास्ति तत्कारणताभ्युपगमे दोष'—इति चेद्, उच्छिन्ने तर्हि प्रत्यक्षानुमाने, तदुपस्थितस्यापि विषयजातस्य शब्दानुविद्धत्वात् तयोरपि शब्द एवान्तःपातात्। किं च यत्र क्वापि शब्दगतानामनुप्रासादीनां रसादिवाक्यार्थं प्रत्युपस्कारकत्वमूरीक्रियते तत्रान्यथानुपपत्त्या शब्दानामपि वाक्यार्थबोध—क्षण—वृत्तित्वमवश्यमभ्युपेयते, तत्र का नु हानिः शब्दानां तदलङ्काराणामेव वा साक्षादेव वाक्यार्थोपस्कारकत्वाभ्युपगमे। ततश्च को नामाग्रह 'उपकुर्वन्ति[2] तं सन्तं येऽङ्गद्वारेण जातुचिदि'—त्युक्तनीत्या तेषामुपस्कारं प्रति कादाचित्कत्वसध्रीचीनेऽङ्गद्वारकत्वे। का चावश्यकता तत्रार्थमुखावेक्षणदाक्षिण्यस्य। शब्दानुवेधपक्षे शब्दोपस्थितार्थजन्येऽपि विषये शब्दजन्यत्वस्यैवोपगमे लाघवात्। किंप्रयोजना च 'शब्दबुद्धिकर्मणां तृतीयक्षणवृत्तिध्वंसप्रतियोगित्व'—गाथा।

यद्युच्यते—'मा भूत् कारणत्वम्, करणत्वे तु का हानि'—रिति, तत्र पृच्छ्यते—'को नामास्य तत्र व्यापार' इति, कार्यपौत्रं प्रति करणपितामहस्य

---

१. अवाच्यवचनाय द्रष्टव्यो व्यक्तिविवेकस्य द्वितीयो विमर्शः। अस्मदनुवादे पृ० ४३६—४५५।
२. काव्यप्रकाशे ८.२ कारिका।

व्यापार–पुत्र–द्वारैव जनकत्वात्। 'व्यञ्जनं' तत्र व्यापार इत्युच्यते चेद् उच्यतां तर्हि 'किमिदं व्यञ्जनं नाम'। न ह्येतत् प्रस्थानान्तरेषु श्रूयते। श्रूयते हि तत्र 'शब्दोऽयमस्मिन्नर्थे शक्तः, अर्थोऽयमेतच्छब्दशक्य' इत्येवमनुयोग–प्रतियोग–भेदेनाप्यभिन्न एवैकः सङ्केतात्मा शब्दार्थयोर्बौद्धिकः संसर्गोऽभिधा नाम। श्रूयते च तत्पुच्छप्राया रूढि–प्रयोजनान्यतरेण संबन्धविशेषात् मुख्यार्थ–तात्पर्या–न्यतर–बाध–वर्त्मना प्रसूता 'कर्मणि कुशल' इत्यादिषु 'गङ्गायां घोष' इत्यादिषु च स्थलशतेषु दक्ष–तटाद्यर्थप्रतिपत्तय उपजीव्यमाना भक्ति–गुणवृत्ति–लक्षणे–त्येवं विविधमभिधीयमाना काचिदमुख्याप्ये–कोपचारवृत्तिः। तद्व्यतिरिक्तं किमिदं व्यञ्जनं नाम।

यद्युच्यते 'अस्ति व्यतिरिक्तम्। अपोहवर्त्मना पारिशेष्याच्च तदुपपन्नम्। तथाहि यत्र क्वचित् प्रयोजनेन केनचिदमुख्यः शब्दः प्रयुज्यते तत्र तादृशप्रयोजनसंपत्तये प्रमाणं शब्द एव। नास्ति च तत्र तस्य पूर्वोक्तं व्यापारद्वयं कार्यसहम्, प्रयोजनविषयीभूतेषु शैत्यादिषु गङ्गादिशब्दानां सङ्केतस्येव तात्पर्यबाधादिसामग्र्या अप्यनुपलब्धेः। प्रयोजनविषयीभूतैः शैत्यादिभिरन्वितस्य तु लक्ष्यत्वे हेतुहेतुमद्भावोपप्लवप्रसङ्गः। तटे हि शैत्यादिज्ञानमेव प्रयोजनम्। न च तत् तटाय गङ्गाशब्दप्रयोगं विनोपपद्यते तेनैव तस्य गङ्गात्वेन प्रतीतौ सत्यामेव गङ्गात्वसमनियतानां शैत्यादीनां तत्र प्रतीतेः। यच्चेदं गङ्गात्वप्रकारकं तटविशेष्यकं च ज्ञानं तल्लक्षणा–जन्यज्ञानजन्यमेव, तदनन्तरमेव तस्य जायमानत्वदर्शनात्। ततश्च जन्यजनकयोर्युगपदुत्पादं प्रेक्षकोऽपि सन् को नु विचारसहं मन्वीत। एवं च परिहृतयोरभिधालक्षणयोः शब्दादेव जायमानः शैत्यादिबोधो येन व्यापारेण जन्यते स एव हि व्यञ्जनागूरणादिभिरभिधानैरभिधीयेत। असावेव च शृङ्गाराद्यास्वादभोगायापि शब्दे करणत्वं प्रसुवीत। उच्यते च मम्मटभट्टैः–

**यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते[१]।**
**फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।।** इति,

**नाभिधा समयाभावाद्धेत्वभावान्न लक्षणा ।।** इति

**प्रयोजनेन सहितं लक्षणीयं न युज्यते ।**
**ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् ।।** इति चेति,

तत्रानुयुज्यते–'मम्मट एव लक्षणाया अर्थवृत्तित्वमूरीकुरुते–'लक्षणाऽऽरोपिता[१] क्रिये'–ति। आरोपितत्वमस्या इदमेव यन्मुख्यार्थवृत्तित्वेपि तद्वाचकनिष्ठत्वेन प्रवादः। यत् स एवाह–'स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणे–ति[१]। यदा च लक्षणैवास्यार्थव्यापारस्तदा तदाश्रितः प्रयोजनप्रतिपादको व्यापारः शब्दव्यापार इति कीदृशी कथा। अर्थव्यापारत्वे पुनरर्थव्यञ्जनाया अस्या को भेदः। शब्दान्वयव्यतिरेकित्वेन तु भिन्नत्वेऽवधेहि– 'तत्रार्थान्वय–व्यतिरेकित्वमपि विद्यते न वे'–ति। 'मुखं[२] विकसितस्मितम्–' इत्यादिषु 'भद्रात्मनो[३] दुरधिरोहतनोरि'– त्यादिष्विवैवार्थपरिवृत्तिः सोढुं शक्यते किमु। अस्ति किं तत्र 'पुष्पसाधर्म्यसुमानुषत्वा'–दिषु[४] परिवृत्तिसहत्वम्। नास्ति चेत् प्रयोजनप्रतिपादनपरस्यापि व्यापारस्यार्थैक– वृत्तित्वमेवादरणीयम्। न च शब्दवृत्तित्वं तर्हि व्यञ्जनाया उच्छिन्नमिति भेतव्यम्, क्लृप्तेष्वियं भीतिः नाक्लृप्तेषु।

किं चेदमर्थव्यंञ्जनं भवतां किम्। 'गतोऽस्तमर्को' भातीन्दुर्यान्ति वासाय पक्षिण[५] इत्यादौ निष्पन्ने पदार्थप्रकारके वाक्यार्थे 'सान्ध्यो

---

१. काव्यप्रकाशस्य द्वितीय उल्लासे।

२. काव्यप्रकाशे लक्षणमूलाया व्यञ्जनाया उदाहरणम्।

३. काव्यप्रकाश एवाभिधामूलाया व्यञ्जनाया उदाहरणम्।

४. मुखमित्यत्र पुष्पसाधर्म्यम्, भद्रात्मन इत्यत्र च सुमानुषत्वम्।

५. भामहस्य काव्यालङ्कारे २.८७–कारिका।

विधिरुपक्रम्यतामि'—त्यादयस्तद्विलक्षणा अप्यर्था यदौपयिकप्रतीतिकास्तदेव नन्वर्थव्यञ्जन'—मिमि चेत्, सर्व एव श्रोतात्र तादृगर्थप्रतिपत्तिभाक् कश्चिदेव वा। कश्चिदेवेति चेत् सोऽप्यप्रकरणाद्यभिज्ञस्तमर्थं प्रतिपद्यतेऽन्यथा वा। अन्यथा चेत् सर्ववादिसंप्रतिपन्नत्वेन प्रथिते स्वार्थानुमाने को रोषः यदेतदौपयिकप्रतीतिकेऽपि विषये नवीनं किंचिदर्थव्यञ्जनं कल्प्यते सहृदयत्वसहकृतेन प्रकरणादिबोधेन प्रागुक्तेषु वैलक्षण्यभाक्ष्यर्थेषु पदार्थप्रकारकतादृशवाक्यार्थबोधहेतुकत्वस्य स्वार्थानुमानस्यापि व्यापारसंभवात्। 'न च पक्षनिष्ठविरहाप्रतियोगिसाध्यैकाधिकरण्यभाजैव हेतुनानुमितिप्रसवः, नान्यादृशेने'—ति वाच्यम्, विधि—निषेधादि—धर्म—व्यवस्थोपयोगिने प्रामाण्यग्रहायैव हि सा स्थितिः, न व्यवहारसामान्यसाधनाय। दृश्यते हि व्यवहारे गृहीतसमाधावपि योगिनि सुखशायित्वभ्रान्त्या दाम्भिकत्वबुद्धिः, निर्विकल्पं गृहीतेषु स्थाण्वादिषु च भूतत्वभ्रमेणानिष्टशङ्का। द्वितयमपीदं शिथिलानुमितिरेव। अभिलेखैः देवकुलादिस्थापत्यैः, कविप्रबन्धैश्च यदिदं युगविशेषैतिह्यनिर्धारणं तदपि हेत्वाभासविधृतमेव, अन्यथाभावस्यापि तत्र बहुत्रोपलम्भात्। आस्तां तावत् कृत्स्नमिदं शिथिलेनानुमितिविशेषेण विना पदमात्रमपि प्रक्रमितुं न शक्यम्। 'अविषमेयं स्थलीति नास्ति मेऽत्र भीतिरि'—ति गृहीतानुमितिरेव सर्वः सर्वत्र क्रमते। विडालोपि हि श्मश्रु—लोमायाम—प्रमाणमनुमायैवच्छिद्रविशेषान्निर्जिगमिषति, व्याधोपि सन्धानवेधयोरिमामेव प्रमाणीकुरुते, वणिगपि वाणिज्याय स्थितिविशेष—हेतुकामिमामेवातिष्ठते। किं बहुना केशकर्तने व्यापृतो नापितः कर्णकर्तनं यत् परिहरति, तत्रापीयमेव भगवती रक्षिका। का नामात्र व्यञ्जनायाः कथा।

ननु 'शब्दसमर्पितानां विभावादीनां समूहालम्बनात्मकेन ज्ञानेन निराकृते स्थायिविषयिण्यात्मावरणे यदिदमात्मचैतन्यं प्रकाशते तत्र किमुच्यते'। (उत्तरम्) तदेव यद्धि लौकिके रसे तद्गतावरणभङ्गादुपजायमान आत्मप्रकाशे। व्यञ्जनैव सा किन्तु को नु गुणः काव्यस्य तया। न हीयमलौकिकी काचिद्

व्यक्तिः, अपितु लौकिक्येव। स्वीक्रियते हि प्रकाशादिना घटादिषु दृश्यमाना सा। उच्यत एव चानुमितिप्रस्थापनपरमाचार्यैर्महिमाचार्यैः—

**'सतोऽसत एव वार्थस्य संबंधस्मरणानवेक्षिणा प्रकाशकेन सहैव प्रकाशविषयतापत्तिरभिव्यक्तिः। तत्र सतोऽभिव्यक्तिस्त्रिधा, कारणात्मनि.... कार्यस्य शक्त्यात्मनाऽवस्थानात् तिरोभूत-स्येन्द्रियगोचरापत्तिलक्षण आविर्भाव एका, यथा क्षीराद्यवस्थायां दध्यादेः। तस्यैवाविर्भूतय कुतश्चित् प्रतिबन्धादप्रकाशमानस्य प्रकाशकेनोपसर्जनीकृतात्मना सहैव प्रकाशो द्वितीया, यथा प्रदीपादिना घटादेः। तस्यैवानुभूतपूर्वस्य संस्कारात्मनान्त-र्विपरिवर्त्तिनः कुतश्चिदव्यभिचारिणोऽर्थान्तरात् तत्प्रतिपादकाद् वा संस्कार-प्रबोधमात्रं तृतीया, यथा धूमादग्नेः, यथा चालेख्य-पुस्तक-प्रतिबिम्बानुकरणादिभ्यः शब्दाच्च गवादेः। असतस्त्वे-कप्रकारैव, यथार्कालोकादिनेन्द्रचापादेः। इति** (व्यक्तिविवेकस्य प्रथमे विमर्शे अस्मदनुवादे पृ० ८०)

ननु 'रसस्यालोकसामान्यत्वमेव लोकोत्तरालौकिकत्वादिपर्यायान्तर-व्यपदेश्यमालङ्कारिकाणामभिमतम्, न लौकिकत्वम्'। रसास्वादः काव्यस्थले लोकोत्तर एव, किन्तु येयमेतत्प्रसूरात्माभिव्यक्तिः सा पुनः शराबादिनिवृत्तौ जायमानायास्तदावृतस्य दीपादेरभिव्यक्तेरेव सोदरा। तत उपजायमान आस्वादस्त्वलौकिक एव तत्र करुणादीनामप्यानन्दमात्रजनकत्वात् मरिचामलक्यादिमिष्टपाकवत्। यद्वा रसास्वादोपि वस्तुतः लौकिकास्वादकल्प एव। सत्त्वोद्रेकस्य,[१] संविद्विश्रान्तेः,[२] प्रकाशानन्दसंभोगस्य चोभयत्राप्यभेदात्। लयावस्थाया उभयत्रापि समानत्वं को नु न ब्रूयात्। य एव वेद्यान्तरसंपर्कशून्यः संविद्विश्रमः काव्योपस्थापितया विभावादिसामग्र्या जायते स एव

१. रसगङ्गाधरे रसनिरूपणम्।

२. भट्टनायकस्य रसनिष्पत्तिप्रक्रिया।

सङ्गीतादिसामग्र्यापि। यदि न स एव तर्हि तत्कल्पस्तु स न न जायते। अभिनयेन, शिल्पेनापि वा स्थितिरेषा जायत एव। ततश्च कलान्तरेणापि जायमान आस्वादो यदा समानरूप एव तदा लोकस्थितेरपि जायमाने तस्मिन् तत्त्वकल्पने को नु दोषः। काव्याकाव्यत्वविवेकप्रश्नस्तु समाहितप्राय एव सुन्दरासुन्दरत्वभेदात्, साधारणासाधारणत्वद्वैविध्याच्च। न ह्युत्कर्षाप–कर्षमात्रेण वस्तुभेदो युज्यते मन्तुं राजरङ्कयोः सत्यपि तादृशे भेदे जात्येकत्वस्य निर्विवादत्वात्। अस्ति च वस्तुतः लौकिको रस एव रसः, काव्यरसस्य तत्कल्पत्वेनैवोपादेयत्वात्। असति तु काव्यरसस्य तथात्वे तेनैव तृप्तिसंभवे लौकिकस्यास्याविषयत्वमेव स्यात् सामाजिकप्रवृत्तेः। न च तत्र सामाजिका न प्रवर्त्तन्ते, अभिनवगुप्तस्यापि[१] मधुरादिषु रसेषु प्रवृत्त्यभावस्याप्रमाणसिद्धत्वात्। उच्यते हि तेन–'न हि वीतरागो विपर्यस्तान् भावान् पश्यति, न ह्यस्य वीणाक्वणितं काकरटितकल्पं प्रतिभाती'[२]–ति न हि वीतरागोपि वीणाक्वणिताद् विरज्यते रज्यते च काकरटितेषु । सिद्धमेतेनास्य विषयान् प्रति लोकसाधारणत्वमेव। अस्ति च सर्वेषामेव रसानां शान्तप्रायास्वादकत्वमेवाभिनवगुप्तसंमतम्। यदुक्तमेतेन–'सर्वेषां रसानां शान्तप्राय एवास्वाद[३]' इति। न चोद्वेगप्रायो लोकेऽपि सः। तथा सति तत्र प्रवृत्त्यभावः प्रसज्येत। यच्चेदं–'यथा जायया प्रियया परिष्वक्तो न बाह्यं किंचन वेद नान्तरम्' इति, 'ब्रह्मास्वादमिवानुभावयन्नि'[४]–ति च ब्रह्म–लोक–काव्य–रसानामन्योन्यौपम्यं तत्तच्छास्त्रकृद्भिरुपनिबध्यते तत्र कैवल्याकैवल्यमात्रभेदेनैकस्यात्मतत्त्वस्यैव परामर्शो मूलतां प्रतिपद्यते। नास्ति च तत्र भेदः। न च 'नास्ति तत्र केवलस्यात्मतत्त्वस्योदयः, अपितु जीवात्मनः,

---

१. प्रत्यभिज्ञाविमर्शिनीप्रभृतिभ्य इदं स्पष्टं यदसावकृतदारपरिग्रहः साधुरेवासीत्।

२. ध्वन्यालोक ३.४० कारिकालोचनम्।

३. अभिनवभारतीरसनिरूपणम्।

४. काव्यप्रकाशे रसाभिव्यक्तिवादनिरूपणम्।

करणाद्यनधिष्ठितेऽपि घटादिशरीरे व्यापकत्वेनाभिमतस्यात्मतत्त्वस्य सत्त्वात्, तदधिष्ठितशरीरगतत्वेन च रसस्योदयात्, जीवत्वं चेदमेव यज्जीवच्छरी–रावच्छिन्नत्वम्[1]। ततश्च चित्तवृत्तिव्रातस्यापि रसेऽनुवेधादुपपद्यत एवास्वादभेदो लोककाव्यरसयोः। प्रत्येकं रसः परस्परं भिद्यत एव चित्तवृत्तिरूपाभी रतिचिन्तादिस्थायि–संचारिनामिकाभिर्भावधाराभिः। एवं को नामावसरः काव्याकाव्य–साधारणत्वसंप्रतिपादनेन, ततश्च व्यक्तिनिराकरणेने–ति वाच्यम्, चित्तवृत्तीनामप्यन्तत एकरूपत्वात्। न्यूनाधिकभावस्तु वृत्तीनामकिंचित्करः। ब्राह्मण–क्षत्रिययोरिव मनस्थितिभेदेपि द्विजत्वादेरिव रसत्वस्यावैषम्येण विद्यमानत्वात्। अथ च वज्रमेतद् भवत्सु पातयामहे यद् यदिदं शृङ्गारादिकं नाम तस्य यदिदं काव्यवृत्तित्वं भवद्भिर्भूम्ना प्रचारितं तद्धि शशशृङ्गकल्पम्। न ह्येतच्छब्दार्थात्मनि काव्ये तिष्ठति, सहृदय–जीवात्मनि तस्य संभवात्। नास्ति च सहृदयः काव्यम्। काव्यसाध्यत्वेन काव्यवृत्तित्वोपगमस्तु हासास्पदम् तथा सति लोकेपि रत्यादिरसस्य शरीरसाध्यत्वात् तन्निष्ठत्वमेव स्यात्। यदि च काव्यनिष्ठत्वं रसस्य भवद्भिरूरीक्रियते किमर्थं तर्हि रामाद्यनुकार्यनिष्ठत्वमपि तस्य नोरीक्रियते, काव्यार्थात्मनां रामादीनामिदानीमपि विद्यमानत्वात्। यदा च रसोऽकाव्यनिष्ठस्तदा को नु लाभः काव्यस्य रसनिष्ठतयाभिमतेनाप्यभिव्यञ्जनेन। न हि तन्निष्ठमभिव्यञ्जनं काव्यनिष्ठ–तयाभ्युपगम्येत। न ह्यसौ शब्दवृत्तिः, नापीयमर्थवृत्तिरेव, रामदशरथादिरूपस्य काव्यार्थस्यास्वादरूपेण रसपदार्थेनाभेदाभावात्। नास्ति च शब्दार्थाभ्यां भिन्नमपि किंचित् यस्य काव्यत्वमालङ्कारिकसंमतं स्यात्। किमधिकेन रामदशरथादिरूपा अर्था[2] यथा काव्ये स्वज्ञानात्मनैव कार्यक्षमास्तथैव शाब्दा अपि ज्ञानात्मनैव

१. अलङ्कारसर्वस्वविमर्शिनी निर्णयसा० सं० पृ० १३, अस्मदनुवादे पृ० ३१।

२. अभिनवगुप्तो रसस्य रसनामपि बोधरूपामेव मनुते–'रसना च बोधरूपैव' अभिनवभारती, बड़ौदा पृ० २८५।

काव्ये तथा। न केवला शब्दार्थां एव, अनयोः सङ्केतोपि ज्ञानरूप एव। ज्ञानं च वस्तुतोऽर्थरूपमेव। प्राप्तं तर्हि काव्यस्य केवलार्थात्मकत्वम्। अस्ति च यदा तत्र ज्ञानमात्रसाम्राज्यं तदा को नु प्रश्नो शाब्दाशाब्दत्वस्य तत्र। शाब्दत्वं हि शब्दज्ञानमात्रावधिकं काव्ये समुचितम्, ततः परस्य तु तत्त्वे मानाभावः। शब्दमूलकत्वमात्रेण शाब्दत्वे तु सूर्यमूलकत्वमात्रेण मनोरिव रघुदिलीपादेरपि सौरत्व इव संतोष्टुं शक्येत। प्रचलन्त्येव हि लोके स्थूलभूयिष्ठा व्याहाराः। शास्त्रे पुनर्नेदृशी स्थितिः। तर्कविधृतं हि तत्। अलङ्कारशास्त्रमपि शास्त्रमेव, न काव्यम्, काममिदं काव्यविषयकमेव स्यात्। अतश्चात्रापि सूक्ष्मेक्षिका तथैव प्रतिष्ठास्पदतामञ्चति यथा न्यायादिषु शास्त्रान्तरेषु। तदित्थमशाब्द एव वस्तुतः काव्यरसः। अत एव व्यञ्जनावादिभिरप्यसौ 'स्वप्नेप्यवाच्यतासह'[१] एव जेगीयते। किं बहुना—

**अकृत—विपुलाऽऽभोगस्यान्ते मम प्रणयोऽस्त्यसौ**
**न खलु विदुषा क्वापि त्याज्या मतिर्हृदयं न वा ।**
**यदि सुकृतिनां श्लाघ्यं जीवातवे मह ऐन्दवं**
**न खलु न तदा तेषामादित्यदीप्तिरपि प्रिया ।।**[२]

◈

१. ध्वन्यालोक—१.४—कारिकालोचनम् काव्यप्रकाशपञ्चमोल्लासः।

२. लेख एष सागरिका ७.२ अङ्के प्रकाशितः।

## रसनिष्पत्तिप्रक्रियायामुत्पत्तिवादः

'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्ति'—रिति यद् भरतस्य रससूत्रम् एतस्य निष्पत्तिपदं बहुधा व्याकृतं व्याकृतिक्रीडानदीष्णैराचार्यैः। स्पष्टमिदमभिनवगुप्तस्य ध्वन्यालोकलोचनाद्, नाट्यवेदविवृतेरभिनव—भारत्याश्च। तत्र निष्पत्तिरुत्पत्तिरित्येके, अनुमितिरित्यपरे, अभिव्यक्तिरित्यन्ये, भुक्तिरिति चेतरे। व्याख्यास्वास्वन्तिमा भट्टनायकोपज्ञा, अभिव्यक्तिरानन्द—वर्धनप्रोक्ता, अनुमितिः शङ्कुकोपगीता, उत्पत्तिश्च लोल्लटोत्प्रेक्षिता। अयमेव भूयान् प्रचारः। सर्वाचार्यसंप्रतिपन्नश्चासौ। वस्तुस्थितिस्तु भिन्ना।

वस्तुस्थितिस्त्वियं यद् योऽयमुत्पत्तिवादः स खलु यदुपज्ञः स स्वयं भरत एव। मुनिना भरतेन नाट्यशास्त्रस्य षष्ठे सप्तमे चाध्याये 'समुत्पद्यत' इति 'उत्पद्यते' इति चानेकशः प्रोक्तत्वात्। तथाहि तस्य वचः—

१. एषां रसानामुत्पत्तिवर्णदैवतनिदर्शनान्यभिव्याख्यास्यामः।

२. तेषामुत्पत्तिहेतवश्चत्वारो रसाः (पृ० २८८ अध्यायः ६

३. एतेषामुत्पत्ति—वर्ण—दैवतान्यभिव्याख्यातानि (पृ० २९३ भाग १)

४. शृङ्गारो नाम रतिस्थायिभावप्रभवः (पृ० २९४ भाग १)

५. शृङ्गारस्य द्वे अधिष्ठाने सम्भोगो विप्रलम्भश्च। तत्र सम्भोगस्तावत् ऋतुमाल्यानुलेपनालङ्कारेष्टजनविषयवरभवनोपभोगोपवनगमनानुभवन—श्रवणदर्शनक्रीडालीलादिभिर्विभावैरुत्पद्यते। (पृ० २९६—९७)

६. **ऋतुमाल्यालङ्कारैः प्रियजनगान्धर्वकाव्यसेवाभिः ।**
**उपवनगमनविहारैः शृङ्गाररसः समुद्भवति** ।। ना.शा. ६.४७।

७. हास्यो नाम हासस्थायिभावात्मकः। स च विकृतपर—वेषालङ्कार—धाष्र्य००दोषोदाहरणादिभिरुत्पद्यते। (पृ० ३०७ प्रथमो भागः)।

८. करुणो नाम शोकस्थायिभावप्रभव:। स च शापक्लेशविनिपतितेष्टजन ०० व्यसनसंयोगादिभिर्विभावै:समुपजायते। (ना.शा.भा.—१ पृ० ३११)

९. रौद्रो नाम क्रोधस्थायिभावात्मक:। स च क्रोधाधर्षणाधिक्षेपानृतवचनोप घातवाक्पारुष्याभिद्रोहमात्सर्यादिभिर्विभावैरुत्पद्यते। पृ० ३१३ ना.शा.—१

१०. **युद्धप्रहारघातनविकृतच्छेदनविदारणैश्चैव ।**
**सङ्ग्रामसम्भ्रमाद्यैरेभि: सञ्जायेत रौद्र: ।।** ना.शा. ६.६४

११. वीरो नामोत्साहात्मक: स चासंमोहाध्यवसाय००विभावैरुत्पद्यते। ना.शा. ६.६६ वृत्ति, भाग—१ पृ० ३१८।

१२. भयानको नाम विकृतरवसत्त्व००दिभिर्विभावैरुत्पद्येत। (पृ० ३२०)

१३. बीभत्सो नाम अहृद्यदर्शनादिभिर्विभावैरुत्पद्यते। पृ०

१४. उद्वेजनैश्च बहुभिर्बीभत्सरस: समुद्भवति। पृ० ३२३।

१५. अद्भुतो००दिव्यजनदर्शनेप्सितादिभिर्विभावैरुत्पद्यते। पृ० ३२३

१६. शान्तो नाम तत्त्वज्ञानवैराग्याशयशुद्ध्यादिभिर्विभावै: समुत्पद्यते। पृ० ३२६ भा० १।

१७. रतिर्नाम प्रमोदात्मिका 'ऋतुमाल्या०००दिभिर्विभावै:समुत्पद्यते। पृ० ३४४ ना.शा—७

१८. हासो नाम परचेष्टा००विभावै: समुत्पद्यते (पृ० ३४४)

१९. शोको नाम००विभावै: समुत्पद्यते (पृ० ३४५)

२०. क्रोधो नाम०० समुत्पद्यते। (पृ० ३४६)

२१. उत्साहो००विभावैरुत्पद्यते। पृ० ३४७

२२. भयं नाम००विभावै: समुत्पद्यते। पृ० ३४७

२३. जुगुप्सा नाम००विभावै: समुत्पद्यते। पृ० ३४८

२४. विस्मयो नाम००विभावै: समुत्पद्यते। पृ० ३४९

२५. निर्वेदो नाम दारिद्र्यादिविभावै: समुत्पद्यते। पृ० ३५०

२६-५७. ग्लानिः समुत्पद्यते (पृ० ३५१), शङ्का समुत्पद्यते (पृ० ३५२), असूया समुत्पद्यते (पृ० ३५३), मदः समुत्पद्यते (पृ० ३५४) श्रमः समुत्पद्यते (पृ० ३५५)

एवं भरतमुनिः स्वयमेव रसानामिव भावानामपि उत्पत्तिं प्रतिजानीते।

अथ प्रश्नः। इक्षुरसन्यायेन स्वाद्यस्य, स्वादस्य च प्रियाप्रियस्य रसपदवाच्यता व्यवहारे दृश्यते। तत्र योऽयं स्वादस्तस्य या निष्पत्तिः सा का? नूनमुत्पत्तिरेवैका सा। अथ वासनारूपेणान्तःकरणवृत्तितया च विद्यमाना ये रत्यादयो भावा उत्पन्नपूर्वास्ते। काव्यनाट्ययोस्तेषामभिव्यक्तिरेव तर्कसिद्धेति तत्रोत्पत्तिवादस्य का गतिरिति पृच्छ्यते, तत्र पर्यनुयुज्येत यस्योत्पत्तिरेव तस्य निष्पत्तेरभिव्यक्तिवादे का नु स्थितिरिति।

अथ तार्किका आक्रोशेयुः—'कथन्नाम एकस्यैव रसस्य व्यक्तिश्चोत्पत्तिश्चेत्युभयी गतिरि'—ति। तत्रोत्तरं ते दद्युर्ये हि व्यक्तिमात्रतत्पराः। त एव हि उपप्लविनः।

कथमिति चेत् त एव हि भरतमतं वादमिमं लोल्लटमूर्ध्नि समारोप्य प्रोच्छ्वसन्ति। अयं हि गुप्तपाद एव येन उत्पत्तिवादाद् भरतो विच्यावितः। आधीयामहे वयं केवलं लोल्लटमेव रसोत्पत्तिवादसन्दर्भे। ननु गुप्तपादेन दण्ड्यप्युत्पत्तिवादित्वेन कौलीनपात्रितो, न केवलो लोल्लट इति चेद् दण्डी भरतानुयाय्येवेति प्रत्यनीकन्यायेन दण्डिद्वारा भरत एव स्मृतोऽत्र।

अथ गुप्तपादः प्रक्रियापक्षमेव परेषामुपस्थापयते अनुभूतिपक्षे पुनर्वाचंयमायते। प्रक्रियायां वासनार्थं सामाजिकानामप्यन्तःकरणेन रत्यादिमता भाव्यमेव। सेयमुत्पत्तिरेव रत्यादेः। तामिमां भूमिकाभूतामाश्रित्य प्रवर्त्ततेतरां विचारलतिकाऽऽरोहक्रमेण। नावहेलयति च प्रथमसोपानभूतामिमाम्। द्वितीयसोपाने प्रथमस्यापि समाश्रयणं क्रियत एवेति उत्पत्तिवादिना यावदुच्यते,

तत्राग्रिमाणां सोपानानामपेक्षा न पूर्यत इति न्यूनतामात्रमत्र शक्योत्प्रेक्षम्, नाऽशुद्धिः। उच्यते च स्वयमभिनवगुप्तेन

**ऊर्ध्वोर्ध्वमारुह्य यदर्थतत्त्वं**
**धीः पश्यति श्रान्तिमवेदयन्ती ।**
**फलं तदाद्यैः परिकल्पितानां**
**विवेकसोपान–परम्पराणाम् ।।**

इति।

◈

## भुक्तिवादे स्थायिभावाश्रयः

लोक इव काव्येऽपि रसमेव जीवातुभूतं मन्यन्ते भारतीयाः। तत्र लोकरसः प्रसिद्ध एव। काव्यरसः पुनर् 'विभावानुभावव्यभिचारिणां स्थायिभावेन सह संयोगान्निष्पद्यमान' उच्यते। अत्र केयं निष्पत्तिरिति प्रश्ने क्रमेण जातानामाचार्याणां चत्वारि दर्शनानि प्रतिष्ठन्ते—

१. उत्पत्तिरिति

२. अनुमितिरिति

३. अभिव्यक्तिरिति

४. भुक्तिरिति

चेति। एषु प्रथमं लोल्लटः, द्वितीयं शङ्कुकः, तृतीयम् आनन्दवर्धनः, तुरीयं च भट्टनायक उपजज्ञौ। लोल्लटः, शङ्कुकः, भट्टनायकश्चेति त्रयाणां मूलग्रन्था इदानीं यावदनुपलब्धाः। अभिनवगुप्तस्य ध्वन्यालोक—लोचनेऽभिनवभारत्यां चैतन्मतोल्लेखा एव तत्र प्रमाणम्। आनन्दवर्धनस्य तु ध्वन्यालोको दिष्ट्या लभ्यते। ततश्चाभिनवगुप्तानुसारेण लोल्लटः शङ्कुकश्चेति प्रथमौ द्वावप्याचार्यौ रामाद्यनुकार्यगतस्यैव स्थायिनो रसत्वं प्रतिपद्येते। आनन्दवर्धनः पुनः सामाजिकगत एव स्थायिनि रसत्व[1]मीक्षते। तदित्थम् आद्यानां त्रयाणामाचार्याणां मतेषु वर्गद्वयं स्थितम्। भट्टनायकः पुनः किंनिष्ठस्य स्थायिनो भुक्तिं मनुत इति नास्ति स्फुटं लोचनात्, तदनुजाया अभिनवभारत्याश्च। काव्यप्रकाशकारोऽप्यभिनवपञ्जरशुकः, ततः सोऽपि तथैव संदिग्धवाक्[2]। रसगङ्गाधरकारस्य जगन्नाथस्यापि भट्टनायक—

१. द्रष्टव्योऽस्माकं हिन्दीग्रन्थ 'आनन्दवर्धन' पृ० १६०।

२. काव्यप्रकाशस्य चतुर्थोल्लासारम्भे।

स्थायि–विषयेऽभट्टतैव[1] स्फुटा। ततश्च केचिदिमं लोल्लटशङ्कुक–मतानुयायिनं मन्यन्ते, केचिच्चानन्दवर्धनमतानुयायिनम्। एवं च यस्य भुक्तिर्भवति तं स्थायिनं भट्टनायकमते केचिदनुकार्यगतमेव मन्यन्ते, केचिच्च सामाजिकगतमेव। काव्यप्रकाशे बालबोधिनीमारचितवान् वामनः प्रथममेव पक्षमाद्रियते, ब्रूते च–

**'भट्टनायकस्यैष सारः– .... 'काव्यार्थबोधोत्तरं भावकत्वव्यापारेण विभावादिरूपसीतादयो रामसम्बन्धिनी रतिश्च सीतात्व–रामत्व–संबन्धांशमपहाय सामान्यतः कामिनीत्व– रतित्वादि–नैवोपस्थाप्यते। अन्त्येन भोजकत्वव्यापारेण तु उक्तरीत्या साधारणीकृतविभावादिसहकृतेन सा रतिः सहृदयैरास्वाद्यते। अत एवासत्या अपि रतेरास्वादोऽलौकिकत्वादुपपन्न'इति।**[2]

अत्र 'सा रतिः' इति यो वाक्यांशस्तस्य 'सा' इति तत्पदं रते रामादिनिष्ठत्वमेव पिशुनयतीति समनन्तरीयेण 'असत्या एव रतेर्' इति वाक्यांशागतेन 'असत्या' इति रतिविशेषणेन सुस्फुटम्। अभिनवगुप्तमताद् भट्टनायकमतस्य भेदं स्पष्टयतापि टीकाकृताऽनेनैतदेवोदीर्यते–

'पूर्वमते असत्या अपि रतेरास्वादः। अत्र तु वासनया स्थिताया एवेत्यनयोर्मतयोर्भेद इति।[3]

साम्प्रतिकेष्वपि भूयांस एतेनैव प्रतिष्ठन्ते पथा[4]।

काव्यप्रकाशटीकाकृत्सु मूर्धन्यतामभिपेदिवान् प्रदीपकारस्तत्रभवान्

---

१. रसगङ्गाधरस्य प्रथमाननीये रसप्रकरणे।

२. भण्डारकरप्राच्यशोधसंस्थानतः प्रकाशितस्य काव्यप्रकाशस्य षष्ठे संस्करणे पृ० ९१। वामनो वाक्यमिदं विवरणकारवाक्यतयोद्धरति। ततस्तस्याप्ययमेव पक्षः।

३. तस्यैव संस्करणस्य पृ० ९४, पं० २

४. Principles of Literary criticism in Sanskrit, page 249, last line of para II. प्रदीपकारो भट्टनायकं सांख्यदर्शनानुयायिनं ब्रूते। एतदेव मतस्यास्य मूलमाभाति।

गोविन्दठक्कुरः पुनश्चरममेव पक्षमाद्रियमाणो भट्टनायकमतेप्यानन्दवर्धनमतवदेव भुज्यमानस्य स्थायिनः सामाजिकगतत्वमेव सूचयति। यथा चैतत् तदधोदत्तेन तस्यैव टीकाग्रन्थेन स्फुटम्—

**'अन्यनिष्ठः स्थायी अन्यनिष्ठैरेव विभावादिभिः कथमन्येन भोक्तव्यः, अतिप्रसङ्गादिति चेदुच्यते—'शब्दात्मनः काव्यस्य त्रयो व्यापाराः 'अभिधा, भावकत्वं, भोजकत्वं च। तत्राभिधा निरन्तरार्थसान्तरार्थनिष्ठत्वेन द्विधा। भावकत्वं साधारणीकरणम्। तेन हि व्यापारेण विभावादयः स्थायी च साधारणीक्रियन्ते। साधारणीकरणं चैतदेव यत् सीतादिविशेषाणां कामिनीत्वादिसामान्येनोपस्थितिः, स्थाय्यनुभावादीनां च सम्बन्धिविशेषानवच्छिन्नत्वेन। एवं द्वितीयव्यापारेण साधारणीकृतैर्विभावादिभिस्तृतीयव्यापारसाहित्येन तथाकृत एव स्थायी भुज्यते।'**[1] इति,

अत्र स्थायिनोऽन्यनिष्ठत्वं सामाजिकेतरनिष्ठत्वमेव। अत एवाभिनवगुप्तमतनिरूपणावसरेऽपि साधारणीकरणभूमिकामाबध्नता विदुषानेन भूयोऽप्यन्यनिष्ठत्वमेवं स्मर्यते—

**'सामाजिकानां सूक्ष्मतयाऽन्तःस्थितो रत्यादिः स्थायी व्यज्यते। तथाप्यन्यनिष्ठैर्विभावादिभिः कथमन्यनिष्ठस्य स्थायिनोऽभिव्यक्तिः। उच्यते—तेषां साधारण्येन प्रतीतेः।'**[2] इति

एवं च प्रदीपकारो भट्टनायकमतेऽपि स्थायिनः सामाजिकनिष्ठत्वमेव प्रतिपद्यते। सोऽयमुपस्थितो मतिभेदः। कोन्वत्र सिद्धान्तपक्ष इति जिज्ञासिते

---

१. काव्यमालातृतीयसंस्करणीये काव्यप्रदीपे पृ० ६६—६७

२. तथैव।

पश्यामः— 'सामाजिकगतत्वपक्ष एव सिद्धान्तपक्ष' इति। अत्र हेतवः (भुक्तिवादे स्थायिनोऽनुकार्यगतत्वरूपे)

प्रतिपक्षे—

१. प्रमाणाभावः,

२. स्थितिविरोधः

३. क्रमभेदः

४. स्वपक्षहानिः

५. सम्प्रदायविरोधश्च

तत्र—

**१. प्रमाणाभावः—**

अभिनवगुप्तस्य लोचनम् अभिनवभारती चेति द्वयमेव हि भट्टनायकमतस्वरूपपरिज्ञाने प्रमाणम्। तत्र लोचनेऽभिनवो भट्टनायकमतमेवं प्रस्तवीति—

**'न प्रतीयते, नोत्पद्यते, नाभिव्यज्यते काव्येन रसः, किन्त्वन्यशब्दवैलक्षण्यं काव्यात्मनः शब्दस्य, त्र्यंशता—प्रसादात्। तत्राभिधायकत्वं वाच्यविषयम्, भावकत्वं रसादिविषयम्, भोगकृत्त्वं सहृदयविषयमिति त्रयोंऽशभूता व्यापाराः।.....तच्चैतद् भावकत्वं नाम रसान् प्रति, यत् काव्यस्य तद्विभावादीनां साधारणत्वापादनं नाम। भाविते च रसे तस्य भोगः[१]।'**

अत्र स्थायिनो नामापि नास्ति, का वार्त्ता तस्य स्व—परगततायाः। अभिनवभारत्या अप्येषैव स्थितिः। तत्रापि—

**'काव्ये दोषाभावगुणालङ्कारमयत्वलक्षणेन, नाट्ये च**

१. ध्वन्यालोकलोचनस्य चौखम्बाप्रथमसंस्करणे पृ० १८२—१८३ निर्णयसागरस्य चतुर्थे संस्करणे ८३—पृष्ठे।

**चतुर्विधाभिनयरूपेण निबिडनिजमोहसङ्कटकारिणा विभावादिसाधारणीकरणात्मनाऽभिधातो द्वितीयेनांशेन भावकत्वव्यापारेण भाव्यमानो रसो....भुज्यत[१]'** इति।

निष्कृष्टतमे भट्टनायकमते नास्त्येव स्थायिनश्चर्चा। अभिनवभारतीमिमां यथातथमनुवदता[२] काव्यानुशासनविवेके हेमचन्द्राचार्येणापि न ह्येव स्मर्यते स्थायी। काव्यप्रकाशे–

**'न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते, नोत्पद्यते, नाभिव्यज्यते, अपि तु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायी........ भुज्यत[३]'** इति।

स्मर्यमाणस्यापि स्थायिनः सामाजिकगतत्वमनुकार्यगतत्वं वा न स्मर्यते। सैव च स्थितिः पण्डितराजकृते रसगङ्गाधरे। तत्रापि–

**'अभिधया निवेदिताः पदार्था भावकत्वव्यापारेणागम्यात्वादिरसविरोधिज्ञानप्रतिबन्धद्वारा कान्तात्वादिरसानुकूलधर्मपुरस्कारेणावस्थाप्यन्ते। एवं साधारणीकृतेषु दुष्यन्त–शकुन्तला–देश–काल–वयो–ऽवस्थादिषु, पङ्गौ पूर्वव्यापारमहिमनि तृतीयस्य भोगकृत्त्वव्यापारस्य महिम्ना निगीर्णयो रजस्तमसोरुद्रिक्तसत्त्वजनितेन निजचित्स्वभावनिर्वृति–विश्रान्तिलक्षणेन साक्षात्कारेण विषयीकृतो भावनोपनीतः साधारणात्मा रत्यादिः स्थायी रसः[४]।'**

---

१. अभिनवभारती पृ० २७६–७७ बड़ौदासंस्करणीयनाट्यशास्त्रप्रथमभागे।

२. निर्णयसागरतः प्रकाशितस्य काव्यानुशासनस्य द्वितीयावृत्तेः ७३ पृष्ठे।

३. काव्यप्रकाशचतुर्थोल्लासारम्भे रसप्रकरणे।

४. रसगङ्गाधरस्य रसप्रकरणे।

इत्येवं स्मर्यमाणस्यापि स्थायिनः स्व–पर–गततायाः अस्फुटत्वस्यैव जागरूकत्वात्। न च 'भावनोपनीत' इति पदं 'भावना भावकत्वव्यापारः, तयोपनीतः परगतोऽपि सामाजिकानामनुभवविषयतामापादित' इति व्याख्यानेनानुकार्यगतत्वं स्थायिनः सुखं साध्यम्' इति वाच्यम्, 'भावना वासना तयोपनीतः सामाजिकान्तःकरणे विहितस्थितिः ततश्चानुकूल–सामग्रीलाभेन स्मृतिन्यायेन जागरित' इत्येवं वैपरीत्येनाप्यस्य व्याख्यानसंभवात्। एवं भट्टनायकमते स्थायिनोऽनुकार्यगततायाः कल्पना नास्तितरामभिनव–गुप्त–मम्मट–हेमचन्द्र–जगन्नाथ–वचनप्रमाणिता।

ननु 'तत्रभवानभिनवगुप्तो नाट्यशास्त्रस्य 'नाट्यरस'[१] इति शब्दं बहुधा विगृह्णन्–

**नाट्यं नाम नटगताभिनयप्रभावसाक्षात्कारायमाणैकघन–मानसनिश्चलाध्यवसेयः समस्तनाटकाद्यन्यतमकाव्यविशेषाच्च द्योतनीयोऽर्थः। स च यद्यप्यनन्तविभावाद्यात्मा तथापि सर्वेषां जडानां संविदि, तस्याश्च भोक्तरि, भोक्तृवर्गस्य च प्रधाने भोक्तरि पर्यवसानान्नायकाभिधानप्रधानभोक्तृविशेष–स्थायि–चित्तवृत्तिस्वभावः। सा चैकचित्तवृत्तिः स्व–परकीयमिति प्रतीयमानानन्तचित्तवृत्त्यन्तरशतविशेषिता लौकिक–गीत–गेय–पदादि–लास्याङ्ग–दशकोपजीवन–स्वीकृत–लक्षण–गुणा अलङ्कार–गीतातोद्यादिसम्यक्सुन्दरीभूत–काव्य–महिम–प्रयोग–मालाऽभ्यासविशेषाश्रयत्वात् प्रच्याविता अतएव**

---

१. नाट्यशास्त्रस्य षष्ठाध्यायगतायाः 'शृङ्गारहास्यकरुणा' इत्यस्याः कारिकाया व्याख्यायाम्। कारिकायामस्यां 'नाट्यरसा' इति पदं 'नाट्ये रसा' इत्थमपि मुद्रितम्। तदभिनवभारतीविरुद्धम्। लोचनतोऽपि तद् विरुद्धम्, तत्रापि २.४ कारिकाव्याख्यायां बुद्ध्युपारूढस्याभिनवभारतीपदस्यास्य 'नाट्ये रसः', नाट्यमेव रसः 'नाट्याद् रस' इत्येवं विविधं व्याख्यातत्वात्।

**साधारणीभूततया सामाजिकानपि स्वात्म–सद्भावेन समावेशयन्ती तादात्म्यादेव चानुमानागम–योगिप्रत्यक्षादिकरणक–तटस्थप्रमातृ प्रमेय–परकीय–लौकिकचित्तवृत्ति–विलक्षणतया निर्भासमाना परिमित–स्वात्मा–न्याश्रयता–निर्भासना–विरहाच्च लौकिक–प्रमदादि–जनित–निजरति–शोकादिवत् तज्ज–हाना–दिचित्तवृत्त्यन्तरजननाक्षमा तत एव निर्विघ्न–स्वसंवेदना–त्मकविश्रान्तिलक्षणेन रसनापरपर्यायेण व्यापारेण गृह्यमाणत्वाद् रसशब्देनाभिधीयते। तेन रस एव नाट्यम्।"[१]**

इत्येवं स्पष्टमेव स्थायिनः परगतत्वमभ्युपगच्छतीति कथमुच्यते नास्ति प्रमाणमिति चेत्, साधु, त्रयमत्र गवेषयस्व (१) कस्येदं मतमित्येकम्, (२) एकचित्तवृत्तिरित्यत्र चित्तवृत्तिगतमेकत्वं तावत् किमिति द्वितीयम्, (३) 'विशेषाश्रयत्वात् प्रच्याविता, अतएव साधारणीभूततया सामाजिकानपि स्वात्मसद्भावेन समावेशयन्ती'–त्यत्र च कस्तावदयं समावेशः, किं च तदनन्तरोक्तं तादात्म्यमिति च तृतीयम्। तत्र स्पष्टमेवेदमभिनव–भारतीसन्दर्भविदां 'नायं भट्टनायकस्य पक्ष' इति, ततश्चेदमपि न न स्पष्टं 'विद्यत एष स्वयमभिनवगुप्तस्यैव निजोऽभिप्राय' इति। एवं चाभिव्यक्ति–वादिनोऽभिनवगुप्तस्यापि शिरसि पातनीय एषोऽनुकार्यगतस्थाय्य–भिव्यक्तिसिद्धान्तदण्डः, ततश्च न नाऽपरित्याज्यस्तत्रभवान् ध्वनिप्रस्थानपरमाचार्य आनन्दवर्धनोऽपि परगतस्थायिरसत्वसहजग्धौ। सोऽयमुपप्लवः समयस्य। नास्ति चायं प्रतिपक्षस्याप्यभिमतः। एवं च व्यक्तिवादे समयभङ्गभियाऽवशमभ्युपेये स्थायिनः सामाजिकगतत्वे स्वात्मसद्भावसमावेशेऽपि नान्यः स्व–सजातीय–रत्यादिजागरणावेशौ विहाय। नाट्याद्धि रामादिगतानां येषां रत्यादीनां स्थायिनामनुभावा अभिनीयन्ते तेषां

१. नाट्यशास्त्रबड़ौदासंस्करणप्रथमखण्डे पृ० २६६–६७ (१९५६), २६१ (१९९२)।

सद्भावः सामाजिकात्मन्यपि भवत्येव, लोकानुभवात् काव्यादिभाव—नाजनितसंस्काराद् वा। यश्च तत्र भेदः स विषयभेदौपयिकः। रामगता रतिः सीतां विसिनोति, सामाजिकगता रतिश्च सामाजिकप्रेयसीम्। एवं विषयरूपोपाधिमात्रकृत एवानुकार्य—सामाजिक—चित्तवृत्तिभेदः, निरुपाधिभावे पुनः स्थितमेवैतयोरभिन्नत्वम्। एवं च नाट्ये या रतिः साऽनुकार्यगतैव, या च रसे सा सामाजिकगतैव। अस्ति च तयोरभेदः। यश्चाभेदस्तदेव तादात्म्यम्। सेयं भेदाभेदलीला यत्सत्यं निगूढाशया।

येयमत्रैक्यसंप्रतिपत्तिः स्व—पर—गतयोः स्थायिनोः सापि कलामात्रमेव महारसगताया अभेदलीलायाः। महारसे हि रतिः, शोकः, क्रोधः, हासः अन्येऽपि च स्थायिनोऽर्वागेव स्फुरन्ति। तत्रास्वादसमाधिरेव केवलो जागर्त्ति। अत एवानुपदोदाहृतसन्दर्भसमनन्तरतयैव स एव श्रीमानभिनवगुप्ताचार्य उदैरयत्—

> **'तेन रस एव नाट्यम्।......। ततश्च मुख्यभूतान्महारसात् स्फोटदृशीवासत्यानि वा, अन्विताभिधानदृशीवोपायात्मकानि सत्यानि वा, अभिहितान्वयदृशीव तत्समुदायरूपाणि वा रसान्तराणि।'**[1] इति।

इत्थमकिञ्चित्कर एष शब्दप्रमाणोपन्यासप्रयासाध्यवसायः।

ननु 'नास्ति चेद् वचनम्, अनुमानमत्र प्रमाणतया स्वीक्रियेत। अस्ति हि भट्टनायकः सांख्यसिद्धान्तोपजीवितया ख्यातः। अत एव गोविन्दठक्कुरः काव्यप्रकाशप्रदीपे स्पष्टं ब्रूते—

> **'सत्त्वरजस्तमसां गुणानामुद्रेकेण क्रमात् सुखदुःखमोहाः प्रकाश्यन्ते। उद्रेकश्च स्वेतरावभिभूयावस्थानमिति सांख्यसिद्धान्तानुसारेण विवृणुत'**[2] इति।

---

१. नाट्यशास्त्रस्य बड़ौदासंस्करणीये प्रथमभागे २६७ पृष्ठे।

२. काव्यमाला—तृतीयसंस्करणीये काव्यप्रदीपे पृ० ६६।

अस्ति च सांख्ये प्रकृतिनिष्ठानां गुणानां पुरुषकर्त्तृको भोगः प्रसिद्धः। ततश्चान्यनिष्ठानां गुणानामन्येनोपभुज्यमानतायामुपजीव्ये स्थितताया-मनुजीविन्यपि तत्स्थितौ का नु विप्रतिपत्तिः। तस्माद् 'भट्टनायकोऽनुकार्य-निष्ठस्थायिभोगवादी सांख्यानुयायित्वादि'–त्यनेनानुमानेन सुकरसंसिद्धिको भट्टनायकमते परगतवृत्तिभोगवादः। ततो नास्ति प्रमाणाभाव' इति चेद् भारतस्य राष्ट्रध्वजे हरितपट्टिकाप्यस्तीति भारतेऽपि पाकिस्तानमतानुयायिता कल्प्येत। न ह्येकदेशमात्रोल्लेखः सर्वांशानुहरणैककल्पनासाधकः। अस्ति च शास्त्रान्तरेष्वपि सत्त्वरजस्तमसामभ्युपपगमः। तर्हि तेषामपि सांख्यतादात्म्यमभ्युपगम्येत, न्यायसाम्यात्। न चाभ्युपगम्यते तत्। न च मन्यते तत्र दोषः। किं च यदि भट्टनायकः सांख्यैकप्रतिनियतः किमित्यसौ भावकत्वमूरीकुरुते, सांख्ये तादृशव्यापारस्य कुत्राप्यदृष्टत्वात्। इदमप्यार्या विचारयन्तु लोचनेऽभिनवगुप्तो भट्टनायकं मीमांसकनाम्नापि कदर्थयति। का तत्र संगतिः। सांख्यस्य च मीमासकत्वं मीमांसकस्य च सांख्यत्वं तादृशमेव यादृशं पटस्य घटत्वं घटस्य च पटत्वम्। प्रदीपकारस्यापि 'उद्रेक'–पदव्याख्यान एव संरम्भः। एवं चानुमानमप्यत्र पङ्गु।

ननु 'अर्थापत्ति'रस्त्यत्र प्रमाणम्। तथा हि लोचनाभिनव-भारत्योर्भट्टनायकपक्षो लोल्लटपक्षानभ्युपगमेनैवानभ्युपगतत्वेन भूम्ना प्रतिक्षिप्तः। यथा चैतत् तदधोदत्ताभ्यां वचनाभ्यां स्पष्टम्–

१. **काव्यं च रसान् प्रति भावकमिति यदुच्यते तत्र भवतैव भावनाद् उत्पत्तिपक्ष एव प्रत्युज्जीवितः।**[१] इति।

२. **'काव्ये दोषाभाव......[२] भोगेन भुज्यते'** इति, तत्र **पूर्वपक्षोऽयं भट्टलोल्लटपक्षानभ्युपगमादेव नाभ्युपगत इति तद्दूषण-मनुत्थानोपहतमेव[३]।'** इति।

---

१. चौखम्बाध्वन्यालोक प्रथमसंस्करणीयस्य लोचनस्य १८८–८९ पृ०

२. त्यक्त एषोंऽश उद्धृत एवात्रैव पूर्वम् इति।

३. बड़ौदानाट्यशास्त्रप्रथमभागे पृ० २७७।

एवं चैतद्वचनान्यथानुपपत्त्या कल्प्यमेव भट्टनायकस्य लोल्लटपक्षानुगामित्वं परगतस्थाय्यनुभववादित्वं च। एवं चार्थापत्त्या प्रमाणयितुं शक्यत एवानुकार्यनिष्ठस्थायिभोगवादित्वं भट्टनायकस्येति प्रामाणान्तराण्यपि तत्रानुगुण्यभाञ्ज्येवाभ्युपगम्येरन्। ततो नास्ति प्रमाणाभावभीतिरि'ति चेत्, यत्किञ्चिदेतत्। 'उत्पत्तिपक्षे ये दोषास्त एव भुक्तिपक्षेऽपी' त्येवाचार्यस्यात्र विवक्षितम्, नाधिकं किञ्चित्। अतश्च 'भवतैवोत्पत्तिपक्षः प्रत्युज्जीवित' इत्यत्रैवकारः सङ्गच्छते। भवतैव येनोत्पत्तिपक्षः 'नोत्पद्यत' इति प्रत्याख्यातस्तेनैवेति वचोभङ्गी प्रत्युत वैपरीत्यसुभगैव स्थिता। नूनमेतैरेव वचनैर्विप्रलब्धानामेष पक्षो 'भुक्तिः परगतस्यैव स्थायिनोऽभिमते'ति। तदित्थं स्थित एवात्र प्रमाणाभावः।

## २. स्थितिविरोधः—

किञ्च भोग इति पदेन यदुच्यते कोऽसौ पदार्थः, का च तत्र स्थितिः। तत्र भोगः सत्त्वोद्रेकाज्जायमाना प्रकाशमय्या आनन्दमय्याश्च संविदो विश्रान्तिः। सा चैषा आत्माधिष्ठितमनोऽधिष्ठितेनेन्द्रियेण सह विषयस्यासन्निकर्षे न भवतीति स्थितिः। न च सम्भवति स परगतत्वेनाभिमतै रत्यादिकैर्भावैः, स्थविष्ठस्य धातुनिकायस्य व्यवधेः। अस्ति चायं सर्वजनीनः पक्षः, व्यतिरेकेऽनुभवोपप्लवप्रसङ्गात्। एवं च भोगश्च विषयस्य परगतत्वं चेति विप्रतिषिद्धम्। नो चेद् दिल्लीगतस्य राष्ट्रपतिभवनस्य भोगो मद्रनगरस्थैरपि सुलभः स्यात्, सुलभश्च पाकिस्तानीयैर्बङ्गभूपयोगः। किमर्थं चानुष्ठीयेरन् यागाः, इन्द्रादिपदानामतद्गतानामपि भोगोपलम्भसंभवात्। किमर्थं च सर्वैरप्यहमहमिकया समुपार्ज्येरन्विषयाः, एकेनैव केनचिद्भाग्यभाजा समुपभुक्ते विषये तदतिरिक्तसकल—भाग्य—भाक्समुदयेन तत्सम्भोग—स्योपलब्धुं शक्यत्वात्। हन्त, ईषत्कर एष पन्थाः कृतयुगोपपत्तेः। विघ्नितश्च भवता भगवतः स्वयम्भुवो युगान्तरनिर्मितिरभसः। तदित्थं सिद्ध एष चतुराननोऽचतुरश्चतुराणां भवतां पुरस्तात्।

ननु 'साधाकरणीकरणेन परकीयत्वमपहन्यते, ततः कीदृशोऽत्रोपप्लव' इति चेत्, सत्यम्, किन्तु परकीयत्वापहननेनानेन परकायप्रवेशोऽपि सम्पाद्यते योगेनेवेति केनोच्येत। सामाजिकानां प्रवृत्तिं प्रति हि साधारणीकरणमुपायः, न तु परकायप्रवेशं प्रति। सामाजिका हि शिष्टरुचयः। अगम्यात्वकलुषिते न ह्येव प्रसजेत तच्चेतः। सन्ति च शकुन्तलादयस्तादृशा विषयाः, तेषां परस्त्रीत्वेन प्रतीतेः। को नु शिष्टः सचेताः परस्त्रियं प्रति प्रवर्त्तेत नाट्यप्रयोगेऽपि। अप्रवृत्तौ चानारम्भपात्रतैवागता कलाशिल्पानाम्। एवं च निस्सपत्नोऽद्य विहितो विश्वविधाता, कविसचेतसौ निरतिशयनिर्माणास्वादाभ्यां विमुखीविधाय श्रीमता। सोऽयं रसिकानां भवतां देवं विक्रीय तद्यात्रोत्सवे प्रयासः, काव्यमुच्छिद्य तद्रसनिष्पत्तिं विचारयताम्। सम्भवति हि साधारणीकरणेन परकायप्रवेशे का नामार्थवत्ता दुष्यन्तपत्नीत्वादीनाम–साधारण्यसाधकानां प्रत्यूहभूतानां भावानां प्रच्यावनायाः, का चावश्यकता भगवतोऽष्टाङ्गयोगस्य। सोऽयं स्थितिविरोधो भुक्तिवादे स्थायिनः परगततायां स्वीकृतायाम्।

**३. क्रमभेदः–**

अस्ति चात्र भट्टनायकस्य मन्दबुद्धित्वप्रसङ्गः समुपार्जितप्रजागरः, क्रमभेदात्। भट्टनायक आनन्दवर्धनं प्रत्याचक्षाणोऽसकृदावेदितो लोचनकृता। यथैतत् तद् ध्वनिलक्षणकारिकादिलोचनांशैः सुस्फुटम्। अस्ति चानन्दवर्धनः सामाजिकगत–स्थायिव्यक्तिवादी। तदिदं रसनिष्पत्तिप्रक्रिया–सोपानपरम्परायास्तृतीयं सोपानम्। तदिदमारूढवती संविद् भुक्तिवादिना भूयोऽपि द्वितीयं प्रथमं वा सोपानं प्रत्युन्मुखीक्रियत इति नास्ति किं क्रमभेदः।

अस्ति चायमारोहक्रमोऽभिनवगुप्तस्याप्यभिमतः। अत एवासौ स्वमतोपक्रमे–

**ऊर्ध्वोर्ध्वमारुह्य यदर्थतत्त्वं धीः पश्यति श्रान्तिमवेदयन्ती ।**
**फलं तदाद्यैः परिकल्पितानां विवेकसोपानपरम्पराणाम् ॥[१]**

इति आरोहणक्रममेव स्मरति, न त्ववरोहक्रमम्।

अस्ति च भाव्यभावकभावे भट्टनायकस्येव शिष्यतामुपगतो दशरूपकृद् धनञ्जयो '[२]रसः स एव स्वाद्यत्वाद् रसिकस्यैव वर्त्तनादि'ति ध्वनिकारवदेव रसस्य सामाजिकस्थायिरूपतां स्वीकुर्वाणः। भट्टनायको हि व्यक्तिवादागतानेव दोषानपाचिकीर्षन् साधारणीकरणं, व्यञ्जनान्तरव्यतिरेकस्य च रसव्यञ्जनायां साधकं भोगमुपस्थापयति। नास्ति ह्यानन्दवर्धने साधारणीकरणप्रक्रिया, नास्ति च रसानुभूतिप्रक्रिया—

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥**

इत्येवं वाल्मीकेः स्वहृदयगतः संस्कारात्मना स्थितः शोक एव 'मा[३] निषादे'ति काव्यवाक्यस्यात्मा, नास्ति च तत्कृते वाक्येऽत्र 'शोक' इति 'करुण' इति वा वाचकप्रयोगः। अस्ति च करुणो रसोऽत्रानुभूति-साक्षिकतयाऽप्रत्याख्येयत्वेन स्थितः। ततश्च व्यञ्जनैकसाध्यतामेषोश्नुत इति ध्वन्यालोके रसस्य व्यङ्ग्यतायाः, तदुपजीव्यस्थायिभावस्य च प्रेक्षकैकनिष्ठताया एव संकेतितत्वात्। इत्थं ध्वनिकारैकसंशोधनपरायणस्य भट्टनायकस्य शङ्कुक—लोल्लटौ प्रति प्रतिप्रधावनं प्रेक्षावदीक्षाया अदाक्षिण्यमेव वस्तुतत्त्वानुवीक्षायाम्। सोऽयमुपस्थित एव प्रक्रियाक्रमभेदः।

### ४. स्वपक्षहानिः—

अस्ति चात्र स्वपक्षहानिः। भट्टनायको हि व्यापारत्रयवादप्रवर्त्तकत्वेन प्रसिद्धः। अमी च ते त्रयो व्यापाराः—

---

१. विश्वेश्वरः अलमिति पाठमादत्ते। स तुच्छः प्रसङ्गाननुगुणत्वात्।

२. दशरूपकस्य चतुर्थे प्रकाशे।

३. द्रष्टव्योऽस्माकमानन्दवर्धनः।

१. अभिधा

२. भावना

३. भोजकत्वं चेति।

यथोक्तमभिनवेनानुपदोद्धृते सन्दर्भे, कारिकाभ्यां चैताभ्याम्—

**अभिधा, भावना चान्या, तद्भोगीकृतमेव च ।**
**अभिधाधामतां याते शब्दार्थालङ्कृती, ततः ।।**
**भावनाभाव्य एषोऽपि शृङ्गारादिगणो हि यत्**
**तद्भोगीकृतरूपेण व्याप्यते सिद्धिमान्नरः ।।**[1]''

अत्र भावकत्वं नामासाधारण्यनिवर्त्तनेन सामाजिकान् प्रति विभावत्वादिसम्पादनं शकुन्तलादीनाम्। तस्य च फलं भोगः। भोगश्च स्वभोगायतनैकप्रतिनियतः। परगतभावानां ज्ञायमानतैकविभवत्वात्। ततश्च भोगस्य परगतभावविषय-त्वेऽभ्युपगते नाधिकत्वं परिपणते ज्ञानात्। तच्च तटस्थताकलुषम्। तादृशं चैतत् प्रमाणान्तरादपि सुलभमनुमानरूपात्। तदर्थं भोजकत्वरूपस्य भावकत्वरूपस्य च व्यापारान्तरस्य कल्पना नातिप्रयोजनिका, शब्दार्थस्यानन्यलभ्यतायाः सर्ववादिसम्प्रतिपन्नत्वात्। एवं चानुमानेनैव सकलार्थसम्प्रत्यये को नु भेदो भट्टनायकस्य शङ्कुकात्। सेयमुपस्थिता भुक्तिवादे स्वपक्षहानिः।

**५. सम्प्रदायविरोधः—**

सम्प्रदायविरोधश्चात्र। आचार्यपदाभिषिक्तस्य तत्रभवतोऽभिनवगुप्तस्य नास्त्येव भट्टनायकमतेऽपि स्थायिनो विषये परगतत्वधीः। अत एव भुक्तिवादे भूमिकाबन्धमाबध्नन्नसौ प्रागेव ब्रूते—

---

१. (क) अभिनवभारतीप्रथमभागे पृ० २७७।

(ख) हेमचन्द्रस्य काव्यानुशासने च पृ० ७३ विवेके।

**'ननूक्तं भट्टनायकेन—'रसो यदा परगततया प्रतीयते तर्हि ताटस्थ्यमेव स्यात्, न च स्वगतत्वेन रामादिचरितमयात् काव्यादसौ प्रतीयते'**[१] इति।

अत्र 'ताटस्थ्यमेव स्यादि'ति वचनोपन्यासः किंप्रयोजनः, यदि परगतत्वमेव भुज्यमानस्याभिमन्येत पर्यवसितौ। यतः पराङ्मुखः, यस्माच्च भीतः, प्रेक्षवान् सन्नप्यसौ किमिति तमेव पक्षं सिद्धान्ततया प्रचिख्यापयिषेत्। उपक्रममनुरुध्यैव ह्युपसंह्रियन्तेऽधिकरणानि शास्त्रकृद्भिः। उपक्रमेऽत्र स्वगतत्वौन्मुख्यम्, उपसंहारे च परगतत्वपरायणतेति कोऽयं नयः। किं चोद्धृतपूर्वेषु वचनेषु महामाहेश्वरोऽभिनवगुप्तोऽपि 'भावकत्वव्यापारेण भाव्यमानो रसः' इति यस्य भावनां मनुते तं रसपदेनाभिधत्ते, न तु स्थायिपदेन। रसश्च सामाजिकैकवृत्तिः। नायं सिद्धावस्थामनापन्नो भावकत्वोत्तरं भावनाविषयतामासादयेत्। नास्ति च रसस्तादृशः, तस्य विभावादिजीविता—वधित्वस्यैव प्रसिद्धत्वात्। ततश्चात्र रसपदवाच्यः स्थाय्येव। एवं च स्थायित्वं त्यक्त्वा रसपदोपादाने किं न्वनन्यथासिद्धं मूलम्, ऋते तस्य सामाजिकगतत्वाभ्युपगतेः।

किं च का नाम स्थायिता स्थायिनः। आ प्रबन्ध—समाप्तेः, आ महावाक्यार्थस्फोटाद् वा विरुद्धाविरुद्धभावान्तरानुपहन्यमानत्वे सति कुसुमकल्पेषु तेषु सूत्रात्मना विद्यमानत्वं हि भावविशेषस्य स्थायित्वम्[२]। अत्र पृच्छा। एतावन्तमवधिं यावत् किं नु तद् यदत्राधिकरणतामञ्चत्येतेषां समेषामेव भावानाम्। नानुकार्यः, तस्य वृत्तत्वात्, नानुकर्त्ता, तस्य रसभोगेऽ—नधिकृतत्वात्। यश्चात्र विद्यमानः, यश्चाधिकृतः स केवलः सामाजिक एव। एवं च सामाजिकान्तःकरणाधिकरणकतयैव हि कस्यचन भावस्य सञ्चारित्वं, कस्यचन च स्थायित्वम्। न च 'मिथ्याभूता एव सर्वेऽपि

---

१. लोचनस्य पृ० १८०—८१ ध्व० २.४ कारिकालोचने।

२. 'विरुद्धैरविरुद्धैर्वा०' इति कारिका, पण्डितराजस्य आप्रबन्धव्यज्यमानपक्षश्च।

पदार्थाः काव्यनाट्ययोः, तयोः कविप्रतिभैकप्रसूतत्वात्। ततश्च का नु सत्यतागवेषणा तेष्विति वाच्यम्, अनुकार्यस्य पदार्थसार्थस्यासत्यत्वेऽपि तज्ज्ञानस्य, तादृशज्ञानजनितस्य द्रुतिविस्तरादेरनुभवस्य च सत्यतायाः सर्वजनीनत्वात्। अत एव युक्तवादी तत्रभवान् धर्मकीर्तिः—

**मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः ।**
**मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति[१] ॥**

इत्येवमभिनवादिनिखलाचार्याभिमतं मणिप्रदीपन्यायमुदाहरन्। तदित्थं स्थायिन इदमेव स्थायित्वं यत् सामाजिकान्तःकरणे सुचिरं प्राधान्येनानुभूयमानत्वम्। तत्र का नु परगतताधीः।

नन्वेवं विभावा अनुभावा अपि ज्ञायमानतैकसाराः सन्तो रसौपयिका इति तेषामपि सामाजिकान्तःकरणैकवृत्तित्वमूरीक्रियेत? ओमिति ब्रूमः। शकुन्तलादिज्ञानान्येव हि विभावादीनि। अत एव तत्रभवान् धनञ्जयः—

**शब्दोपहितरूपाँस्तान् बुद्धेर्विषयतां गतान् ।**
**प्रत्यक्षानिव कंसादीन् साधनत्वेन मन्यते ॥[२]**

इत्येतां वाक्यपदीयकारिकां प्रमाणीकृत्य—

**ज्ञायमानतया तत्र विभावो भावपोषकृत् ।[३]**

इति विभावस्य ज्ञायमानतैकसारतामभ्यधात्, अभ्यधाच्च—

**अनुभावो विकारस्तु भावसंसूचनात्मकः ।[४]**

---

१. अभिनवभारतीप्रथमभागे पृ० २७३, व्यक्तिविवेके वक्रोक्तिजीविते, वेदान्तभाष्यादिषु च निपुणमियं प्रमाणीक्रियते प्रमाणवार्त्तिककारिका।

२. वाक्यपदीये ३.७.५१।

३. दशरूपकस्य ४.२—३, तदवलोकश्च।

४. तत्रैव।

इति, यत्र 'ज्ञायमानतये' त्यनुवर्त्तते। अत एवावलोककारस्तत्रभवान् धनिकोऽपि—

**'अमीषां चानपेक्षितबाह्यसत्त्वानां शब्दोपधानादेवासादित—तत्तत्स्वरूपाणां सामान्यात्मनां स्वस्वसम्बन्धित्वेन विभावितानां साक्षाद्भावकचेतसि विपरिवर्त्तमानानामालम्बनादिभाव इति न वस्तुशून्यता'—[१]**

इति विभावानामपि सामाजिकान्तःकरणविपरिवर्त्तमानतामनुवदति। किं च विद्यामहे काव्यस्य ज्ञानैकरूपतां साधितवन्तः[२]। ज्ञानं चात्र सामाजिकस्य पाठकत्वेन प्रेक्षकत्वेन वोपस्थितस्य। तदित्थं स्थितैव विभावादीनामपि सामाजिकान्तःकरणवृत्तिरूपता। अत एव च पण्डितराजोऽपि स्वप्नतुरगादीनामिव विभावादीनां साक्षिभास्यतामुदीरयति।[३] प्रातिभासिका भावा इव चित्तवृत्तयोऽपि साक्षिचैतन्यभास्या उच्यन्ते। विभावादीनां साक्षिभास्यतायां तदुभयमप्यस्य सिषाधयिषितम्।

एतेन स्थितमेतद् यद् भट्टनायकोऽपि ध्वनिकार इवैव सामाजिकान्तःकरणगतस्यैव स्थायिनो भोगं मनुते। सर्वोऽपि च दशरूप—तदवलोकयो रसविचारोऽमुमेव पक्षमेवं संक्षिपति—

**विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।**
**आनीयमानः स्वाद्यत्वं स्थायी भावो रसः स्मृतः॥**

**सुखदुःखादिकैर्भावैर्भावस्तद्भावभावनम्।**
**वाच्या प्रकरणादिभ्यो बुद्धिस्था वा यथा क्रिया।**
**वाक्यार्थः कारकैर्युक्तः स्थायी भावस्तथेतरैः॥**

---

१. दशरूपकस्य ४.२—३, तदवलोकश्च।

२. अलङ्कारसर्वस्वभाष्यप्राक्कथने।

३. रसगङ्गाधरे रसप्रकरणे।

रसः स एव स्वाद्यत्वाद् रसिकस्यैव वर्त्तनात् ।
नानुकार्यस्य वृत्तत्वात् काव्यस्याततपरत्वतः ।।

द्रष्टुः प्रतीतिर्व्रीडेर्ष्यारागद्वेषप्रसङ्गतः ।
लौकिकस्य स्वरमणीसंयुक्तस्येव दर्शनात् ।।

धीरोदात्ताद्यवस्थानां रामादिः प्रतिपादकः ।
विभावयति रत्यादीन् स्वदन्ते रसिकस्य ते ।।

ता एव च परित्यक्तविशेषा रसहेतवः ।
क्रीडतां मृन्मयैर्यद्वद् बालानां द्विरदादिभिः ।।
स्वोत्साहः स्वदते तद्वच्छ्रोतृणामर्जुनादिभिः ।।

स्वादः काव्यार्थसंभेदादात्मानन्दसमुद्भवः ।
विकासविस्तरक्षोभविक्षेपैस्स चतुर्विधः ।।

पदार्थैरिन्दुनिर्वेदरोमाञ्चादिस्वरूपकैः ।
काव्याद् विभावसंचार्यनुभावप्रख्यतां गतैः ।।

भावितः स्वदते स्थायी रसः स परिकीर्त्तितः ।
लक्षणैक्यं विभावैक्यादभेदाद् रस—भावयोः ।।[१]

एवं च सम्प्रदाय एवैष महात्मनां 'विभावादयः सर्वेऽपि भावाः सामाजिकान्तःकरणवृत्तिस्वरूपा भवन्ती'ति। भुक्तिपक्षे परगततायामेषामुपारूढ एव संप्रदायविरोधः प्रतिपक्षस्य। अत एव च—
धाराधीशस्तत्रभवान् श्रीभोजराजोऽपि स्वकीये शृङ्गारप्रकाशप्रबन्धे—

आभावनोदयमनन्यधिया जनेन
यो भाव्यते मनसि भावनया स भावः ।
यो भावनापथमतीत्य विवर्त्तमानः
साहङ्कृते हृदि परं स्वदते रसोऽसौ ।।[२]

१. दशरूपकस्य चतुर्थे प्रकाश।
२. अस्माकं 'साहित्यसन्दर्भा' इति ग्रन्थस्य १६ पृष्ठे।

इत्येवं भावरसयोः सामाजिकैकवृत्तितामेव प्रतिपद्यते। एवं भावनापक्षो नास्ति भट्टनायकैकनियतः। दशरूपककृतः प्रभृति भोजराजं यावदप्यसौ भगवतेतिहासविष्णुना श्रीवत्सायितः। ततश्चास्य परम्परामुदीक्ष्य केवलमिदमेव निगमयितुं क्षमं 'भाव्यमानानां भुज्यमानानां च भावानां सामाजिकैकगतत्वमेव[१] भुक्तिवादिनां भावनावादिनां च भट्टनायकादीनामभिमतमि'ति।।

◈

१. अत एव रससिद्धान्तादिषु ग्रन्थेषु डा० नगेन्द्रप्रभृतय आधुनिका अप्यमुमेव पक्षं सिद्धान्तयन्ति।

# कवी रसं स्वदते न वा

कविः, काव्यं रसिकश्चे—ति त्रयः स्कन्धाः काव्यसमीक्षायाः। तत्र स्वादस्य चेतनैकनिष्ठत्वात् पराहतं काव्यम्, तस्यास्माभिः स्वकीये नवीनतमे संदर्भे—

**काव्यं ज्ञानैकरूपं हि, बाह्यत्वं तत्र न क्षमम् ।**
**तस्य मूलं कविप्रज्ञा सा च ज्ञानात्मिका यतः ।।**

इत्येवं बहुधा विकल्प्यान्ते

**ज्ञानात्मकेन शब्दाख्येनार्थेनार्थान्तरात्मकः ।**
**यः कश्चन चमत्कारी बोधः काव्यं तदुच्यते ।।**

एवं ज्ञानात्मताया एव सिद्धान्तितत्वात्, ज्ञानस्य च जडत्वात्। याविमौ कविरसिकौ तयोः रसिकपक्षे नास्ति सन्देहः। तदिदमस्य 'रसिक'—संज्ञयैव स्फुटम्, स्फुटं च 'रसः स एव स्वाद्यत्वाद् रसिकस्यैव वर्तनादि'—त्यादिभिर्वचनैः[१]। अथ कविरवशिष्यते। असौ रसं स्वदते न वेति प्रश्नः। तत्र वादः। स्वदत इत्येके, नेति च परे। तत् किमत्र प्रतिपत्तव्यम्।

साधु। अवधत्स्व पूर्वम् 'रसपदेन किन्वत्र विवक्षितमि'—ति। ननु 'काव्यरस' इति चेत्, साधु, आसन्नः समाधिः। कथमिति चेदित्थम्—

योऽयं काव्यरसस्तस्यास्य किं नु खलु काव्येतिपूर्वपदाव्यभि—चरितत्वमेव। काव्याभिव्यंग्यत्वेनेति चेदुदीर्यताम् 'निष्पन्नं वा काव्यं व्यञ्जकम्, अनिष्पन्नमेव वा' इत्ति। चरमे न्यायविरोधः, न हि स्वयमनिष्पन्नं तिलं तैलमुद्भावयितुं शक्नुते, न वा तथाभूतम् अन्नम् अशनायां शमयितुं

---

१. दशरूपकस्य ४.३८ एवमेव 'स्वदन्ते रसिकस्य ते' इति ४.३९

तथा। आद्ये दूरमुत्सृष्टः कविः निष्पन्ने कलशे कुलाल इव। निष्पत्तिक्रियायाः साध्यावस्थायां पुनः न ह्येव निष्पन्नं काव्यम्, ततश्च मनोराज्यमेतद् वराकस्य सोमशर्मणः। अनिष्पन्नस्यापि स्वाद्यत्वे कृतमेतेन तत्पुरुषार्थ–समुपार्जन–प्रयासेन महद्भिरपि समुपक्रान्तचरेण। ततश्च कीदृशो नु काव्यरसः फलरस इव पुष्पे विषयरस इव वा सिद्धे। पुष्पं हि फलत्वेन परिणम्य पुष्पभावमेव मुञ्चति, ततश्च तदुत्थं फलं परेषामेवास्वादपात्रं भवति, न तु तस्यैव, एवमेव कविमतिरपि काव्यतया परिणम्य काव्यत्वेन परेषामेवास्वादनीया भवति, न तस्या एव। सिद्धो हि सिद्धिभिर्विषयानु–पस्थाप्यापि विरक्ततया तद्भोगाभियोगपराङ्मुख एव तिष्ठति। कविरपि स्वकीयं कविभावं काव्यतया परिणम्य निर्वृतक्रियः सन् स्व–समाधिनैवोपस्थितानपि विभावादीन् विषयान् स्वदितुं न सजते। सजेतापि कथम्। जागरूक–काव्यघटनानुकूल–शब्दार्थोपस्थितिक एव हि पुरुषविशेषः कविः। काव्यस्य निष्पन्नत्वे तादृशोपस्थितेर्जागरूकताया उपशमात् पुरुषत्वमेव कवेरवशिष्टम्, न कवित्वम्। योऽसाविदानीं काव्यरसाय सजते स पुरुषमात्रं भवति, न कविः, कवित्वस्य कार्यैकानुमेयत्वात्। पुरुषोऽप्यनितर–साधारणहृदयतयैव रसं स्वदते। अनितरसाधारण्यं चास्य नान्यद्, ऋते भावकत्वात्। भावकत्वमेव च रसिकत्वम्। एवं च काव्यं निर्माय तद्रसं स्वदमानो जनो रसिक एव भवति, न कविः। अस्ति हि रसन–व्यापारस्यापि कवित्वसामानाधिकरण्यम् आचार्यजनाभिमतम्। उच्यत एवैतैः–

**कश्चिद् वाचं रचयितुमलं भोक्तुमेवापरस्तां**
**कल्याणी नो मतिरुभयथा[१]–इति।**

अत एव च

---

१. काव्यमीमांसायायाः २ अध्याये
'या व्यापारवती रसान् रसयितुमि'–ति ध्वनिकृत्पद्यं तु भिन्नोद्देश्यमेव।

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।।–इति**

कारिकाया 'यथायोगं कवेः सहृदयस्य च करोति'–ति विवृतौ यद् यथायोगपदं तद् विवृण्वानाः काव्यप्रकाशटीकाकाराः सद्यःपरनिर्वृतिं सहृदयैकविषयतया नयन्तो दृश्यन्ते। तथाहि साहित्यचूडामणिकारः श्रीमान् भट्टगोपालः–

यथायोगम् इति। योगो युक्तिः औचित्यम्, तमनतिक्रम्य। कीर्त्तिः अर्थः अनर्थप्रतीकारश्च कवेः परनिर्वृतिः कान्तासम्मितोपदेशश्च सहृदयस्य'।[१]–इति।

संप्रदायप्रकाशिनीकारः श्रीविद्याचक्रवर्ती–

''कवेः सहृदयस्य चेत्यधिकारकथनम्। यथायोगमिति। योगो योग्यता तमनतिक्रम्य। अत्राशयः यशः, अर्थः, अनर्थक्षतिश्चाविशेषेणोभयोरपि। व्यवहारोपदेशस्तु ग्रथनादर्वाक् कवेः, अपरिज्ञातव्यवहारोपदेशस्या–कवित्वप्रसंगात्, परस्तात् सहृदयस्य, निर्वृतिकाले कविरपि सहृदय एवेति द्वयोरपि परस्तादेव[२]।'' इति।

काव्यप्रदीपकारः श्रीगोविन्दठक्कुरः–

''कवेः कालिदासादीनामिव यशः, श्रीहर्षादेरपादानाद् धावकादीनामिव धनम्, मयूरशर्मादीनामिवानर्थनिवारणम्, सहृदयस्य तु काव्यश्रवणानन्तरमेव सकलप्रयोजनेषूत्तमं स्थायिभावास्वादनसमुद्भूतं वेद्यान्तरसंपर्कशून्यं रसास्वादरूपम् आनन्दं ........ निर्मिमीते। काव्यास्वादकाले कवेरपि सहृदयान्तःपातितया रसास्वादः''।[३]–इति

काव्यप्रदीपटीकायां श्रीवैद्यनाथश्च–

---

१. टीकेयं त्रिवेन्द्रमतः १९२६–यीशुसम्वत्सरे प्रकाशिता।

२. इयमपि त्रिवेन्द्रमतः १९२६ यीशुवत्सरे साहित्यचूडामणिटीकया सह प्रकाशिता, साम्प्रतं मोतीलालबनारसीदाससंस्थानतः डा० रामचन्द्रद्विवेदिना भूयो–पि प्रकाशिता।

३. काव्यप्रदीपः तस्य टीका प्रभा च निर्णयसागरतः तृतीयवारं १९३३ वत्सरे प्रकाशिते।

"रसस्य प्राग् असिद्धत्वेन आस्वादनरूपत्वेन च तदास्वादना-संभवात्"।[१] इति, रसास्वादं सहृदयमात्रनिष्ठमूरीकुर्वाणा दृश्यन्ते।

निजनिर्मितकाव्यास्वादकाले रसिकत्वमपि कवेर्नास्तितमां शुद्धम्। भवति हि तत्र तस्य बहुमानसंस्पर्शः। "शोभनमिदं परिपणितम्, आः, अहमेवास्य रचयिता, जातोऽस्मि संभावनापात्रम्, धार्षितान्यमित्राणि, सुप्रसन्ना मयि भगवती वाग्देवी, लब्धाभिलाषोऽस्मि संवृत्तः, विद्ये च सांप्रतं कृतकृत्य" इत्येवंरूपः। नासौ काव्यरसः। किं तर्हि, आत्मरसः। एवं च निष्पन्नायामपि काव्यक्रियायां न ह्येव शुद्धतया स्वदितुं क्षमते काव्यरसं कविः, यावद् रसिकत्वेनापि। इत्थं विज्ञानपराहतमिदं यत् काव्यनिर्माणक्षणे कवेः निर्मीयमाणकाव्यरसास्वादः।

अथोच्यते–

**यावत्[२] पूर्णो न चैतेन तावन्नैव वमत्यमुम्–इति,**
**शृङ्गारी[३] चेत् कविः काव्ये जातं रसमयं जगत्–इति,**
**रसोल्लासी[४] कवेरात्मा इति,**
**काव्यस्यात्मा[५] स एवार्थस्तथा चादिकवेः पुरा ।**
**क्रौञ्च–द्वन्द्व–वियोगोत्थः शोकः श्लोकत्वमागतः ।। इति च**

रसस्य कविनिष्ठतायै दृश्यन्तेतरामभियुक्तानां व्याहाराः। का न्वेषां संगतिरिति। उच्यते च 'रस–पूर्ण–कुम्भोच्चलन–धर्मता'[६] रसस्य महामतिभिः। कवौ रसास्वादाभावे सर्वस्याप्येतस्य प्राप्तैव निरवकाशता। किं च सहृदयः

१. काव्यप्रदीपः तस्य टीका प्रभा च निर्णयसागरतः तृतीयवारं १९३३ वत्सरे प्रकाशिते।

२. ध्वन्यालोकः–१.५–लोचन उद्धृतं हृदयदर्पणवचनम्।

३. ध्वन्यालोकः–३.४२–कारिकाया वृत्तौ परिकरश्लोकः।

४. काव्यालङ्कारसारसंग्रहस्य ६.६–लघुवृत्तौ।

५. ध्वन्यालोकः–१.५ कारिका।

६. ध्वन्यालोकः–१.५–कारिकालोचने।

संवादि–हृदयतयैव तादृशं व्यपदेशमर्जयते। संवादश्च नान्येन, कविं विहाय। इदमेव हि सहृदयत्वं यत् कवि–हृदय–संवादित्वं काव्यरसलाभ–क्षणे। अत एव दर्पणतुल्येऽस्य हृदये प्रशस्यतेतमां तन्मयीभवनयोग्यताऽभिनवैः[१]। अत एव च धनञ्जयोऽपि नर्त्तके काव्यार्थभावनास्वादं मन्वानो वदति–

**काव्यार्थभावनास्वादो नर्त्तकस्य न वार्यते**[२] इति।

व्याचष्टे चात्रावलोककारः श्रीधनिक एवं–

''नर्तकोऽपि न लौकिकरसेन रसवान् भवति। तदानीं भोग्यत्वेन स्वमहिलादेरग्रहणात् काव्यार्थभावनया त्वस्मदादिवत् काव्यरसास्वादोऽस्यापि न वार्यते[३]'' इति।

अत्रोच्यते–'यावत्पूर्णो न चैतेन तावन्नैव वमत्यमुम्' इति, 'शृङ्गारी चेत् कविः' इति, 'रसोल्लासी कवेरात्मा' इति, 'काव्यस्यात्मा स एवार्थः ...... 'शोकः श्लोकत्वमागत' इति यानि वचनानि, एषु रसपदेन यो विवक्षितः स काव्यरस एवेति केनोच्यते। अस्ति हि रसशब्दः संस्कृतभाषायामनेकार्थकः, धर्म–ब्रह्म–शब्दवत्। लोके हि षाडवादयो रसाः प्रसिद्धा एव। पाकरसोऽपि विदित एव सर्वेषाम्। अतएव पाकशाला 'रसवती'–पदेऽभिषिच्यते संस्कृतभाषायाम्, 'रसोई'–पदेन च प्राकृतेषु। ये हि काव्यरसाचार्यास्ते निदर्शनन्त्येव पानक–रस–नामानं प्रपक्वाम्ररस–स्वरूपं रसम्, यदर्थं लोकभाषायां 'पना' इति, 'पन्ना' इति, 'आम का पन्ना' इति, 'अम–रस' इति च प्रचलन्तितमां शब्दाः। लौकिकस्यैव विषयसंभोगस्य क्रियानिर्वृतिरपि रसपदाभिधेयैव। यथैतत् तत् वात्स्यायनो मुनिर्जानाति यो हि स्वकीये कामशास्त्रे स्पर्श–संभोग–निर्वृतिं

१. ''येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता ते स्वहृदय–संवादभाजः सहृदयाः''–ध्वन्यालोकः–१–१ कारिकाव्याख्यानान्ते लोचनम्।

२. दशरूपकस्य ४.४२–कारिका।

३. दशरूपकस्य ४.४२–कारिकाया अवलोके।

रसपर्यवसायिनीमेव वक्ति। 'पदे पदे सन्ति भटा रणोद्भटा न तेषु हिंसारस एष पूर्यते'[१] इति श्रीहर्षः, 'क्रीडारसं निर्विशतीव बाल्ये' इति कालिदासः, 'वतरस लालच लाल की मुरली लई चुराय' इति च विहारी हिंसा–क्रीडा वार्तास्वपि रसविशेषं पश्यन्ति। उच्यते च 'न हि रसादृते कश्चिदर्थः प्रवर्त्तते' इति। अत एव महाकविः कालिदासोऽपि–

**रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।**
**देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ।।**

(रघुवंश–१०.१७)।।

इत्येवं रस–पद–प्रयोगे स्वरस–प्रवृत्तिकः पश्यत्येव किञ्चित् स्वारस्यम्। अतएव कोषेष्वपि शब्द एष विविधार्थकतया प्रसिद्धः, यथा–

**शृङ्गारादौ जले वीर्ये सुवर्णे विषशुक्रयोः ।**
**तिक्तादावमृते चैव निर्यासे पारदे ध्वनौ ।**
**आस्वादे च रसं प्राहुः, इति,**
**शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः, इति,**
**रसो गन्धरसे स्वादे चित्तादौ विषरागयोः ।**
**शृङ्गारादौ द्रवे वीर्ये देहधातौ च पारदे ।। इति च**

वचनानि। ततश्च भिन्न एव कविरसः, भिन्नश्च भावकरसः। यदुच्यते–

**कश्चिद् वाचं रचयितुमलं भोक्तुमेवापरस्ताम् ।**
**एकः सूते कनकमुपलस्तत्परीक्षा–क्षमोऽन्यः ।। इति**

यायावरेण। एवं च कविः यमेव ललनाद्यालम्बनकं, निर्जनोद्देशचन्द्रा–तपाद्युद्दीपकं, लज्जादि–संचारिभावकं, स्वेदादिसात्त्विकभावकं यमेव शृंगारिकं रसं सहृदय–हृदय–मुकुरे बाष्पतयाच्छादयितुमिच्छति तमेव काव्यनिर्माणक्षणे

१. नैषधीयचरितम् १.१३२

स्वयमप्यनुभवतीति नास्ति नियमः। वाल्मीकिप्रभृतीनां वीतरागाणां व्यावृत्तविषय–प्रवृत्तीनां कैवल्यमात्रनिष्ठानामपि कवीनां शृङ्गारादि–रस–सामग्रीसमुपनिबन्धने दृश्यतेतरां प्रवृत्तिः। न ह्येते तत्र कान्तारसं स्वदमाना मन्येरन् मनःसमाधिना काव्यप्रसूतिसमये। येऽपि च पिच्छलात्मानः केचिद् रागाभिभूताः सन्तो रसनिबन्धे व्यापिपुरति तेष्वपि विकास–विस्तर–क्षोभद्रुत्यात्मनां तद्गत–ज्वलनादि–भोगानामेव वा लोकसाधारणानां स्पर्शो दृश्येत, न रसस्य। रसो हि विगलितवेद्यान्तर आनन्दः। कविश्च विभावादियोजनाव्यापृतः स्पृशत्येव नान्तरीयकतया वेद्यान्तराणि। ततश्च रससदृशस्य वेदनाविशेषस्य संभवेऽपि न नाम संभवति तत्र स्वयं रसस्यैवानुभवः। किंच प्रसिद्धमेतत् यद् विभावादयः काव्यैकनिष्ठा भवन्ति, न तु लोकनिष्ठाः। काव्यनिष्पत्तेः प्राक् कविरपि लोक एव। न हि लौकिकानां प्रमदादीनां भावानां विभावत्वं स्वीक्रियेत केनापि सुमेधसा, न वा स्वीक्रियते। एवं कवौ लोकरसः, आत्मरसः, विषयरसो वा आशंसापरिकल्पितः पदं कुर्वीत, न काव्यरसः काव्यनिर्माणक्षणे। स च यद्गतः सः सहृदय एव केवलः, न तु तद्भिन्नः कश्चित्। ततश्च योऽयं लोकरसादिव्यपदेश्योऽनुभवविशेषः स एव 'रसोल्लासी'–ति, 'शृङ्गारी'–ति वाग्जिृम्भणेषु मूलं कविविषयकेषु।

यच्चेदमानन्दवर्धनेन शोकस्य श्लोकात्मना परिणमनमत्रोदगारि तत्राप्ययमेवाभिप्रायः। यथा चैतत्तत् अवोचामैवात्मन 'आनन्दवर्धन'–नाम्नि हिन्दीग्रन्थे–द्वौ खलु वाल्मीकी। एकस्तमसातीरगतः क्रौञ्चवधघटनाविह्वलो निषादधिक्करणस्वतन्त्रो 'मा निषादे'–त्यादिच्छन्दस्वत्यात्मकलालक्षण–कवितागायत्रीविश्वामित्रः पाञ्चभौतिकशरीराधिष्ठितः प्राचेतसः, परश्च तादृशप्राचेतसोपज्ञस्य रामायणनाम्ना प्रथितलक्षणस्य 'सीताचरित'–काव्य–बन्धस्य बालकाण्डगत– द्वितीयसर्गगतः पात्रविशेषः। आनन्दवर्धनो वचनेनानेनामुं पात्ररूपमेव वाल्मीकिं विषयीकरोति। अस्याख्यानं

गर्भांक–न्यायेन बालकाण्डस्य द्वितीये सर्गे प्रस्तूयते। तत्र क्रौंचवधवृत्तान्त उपस्थाप्यते, उपस्थाप्यते च तद्द्रष्टृत्वेन स्वयं वाल्मीकि: वाल्मीकिना। सोऽयं पात्रभूतो वाल्मीकि: क्रौंचवधेन निर्मथितात्मा 'मा निषादे'–ति पद्यमुच्चारयते। आनन्दवर्धन: कथयति 'अस्मिन् पद्ये शोक–पदं नास्ति, अनुभूयते च शोक:, न च नानुभूयतेऽसौ, तदनुभावतयैव 'मा निषादे'–तिपद्यस्योच्चार्यमाणत्वात्। ततश्चायमत्र अवाच्योऽपि सन्नवश्याभ्युपगम्यपद:, अभ्युपगम्यपदश्चास्य प्रतीयमानभाव:। एवं च रामायणस्यास्मिन् पद्ये रामायणागतवाल्मीकिशोकानुभावताया अन्यथानुपपत्त्या स्वीकार्य एव शोक:, शोकस्य प्रतीयमानभाव:, प्रतीमानभावस्यास्य चमत्कारातिशय:, ततश्च एतत्पद्य–रूप–काव्य–जीवातुभाव: तत एव च ध्वनिभाव:,। यथा चैतत् तदपि ध्वन्यालोकस्यैवाधोनिर्दिष्टेन कारिकासंदर्भेण स्पष्टम्–

**अर्थ: सहृदयश्लाघ्य: काव्यात्मा यो व्यवस्थित: ।**
**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥१.२**

**तत्र वाच्य: प्रसिद्धो य: प्रकारैरुपमादिभि: ।**
**बहुधा व्याकृत: सोऽन्यै: काव्यलक्ष्मविधायिभि: ॥१.३**

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।**
**यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥१.४**

**काव्यस्यात्मा स एवार्थस्तथा चादिकवे: पुरा ।**
**क्रौञ्च–द्वन्द्व–वियोगोत्थ: शोक: श्लोकत्वमागत: ॥१.५**

एवं रूपेण।

अत्र विचार्यं प्रतीयमानोऽर्थ: कुत्र प्रतिपिपादयिषित:, काव्ये वा लोके वा। काव्यलक्ष्मविधायिभि: किं वा विहितम्, काव्यस्य वा लक्ष्म लोकस्य वा। महाकवीनां वाणी काव्यरूपा वा भवति लोकरूपा वा। नियतमेव सर्वमपीदं काव्यमेव लक्ष्यीकृत्य उच्यते। ततश्चोदाहरणमपि काव्यत एव दित्स्येत।

ततश्च रामायणकाव्यमेवात्र लक्ष्यीक्रियते, न तु तदुदयभूः लौकिको घटनाविशेषः। अस्ति चैतदुदीरितमपि स्वयमानन्देनैव सानन्दम् तस्य हि ध्वनेः स्वरूपं सकल–सत्कवि–काव्योपनिषद्भूतम् अतिरमणीयम् अणीयसीभिरपि काव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वम्, अथ च रामायण–महाभारतप्रभृतिनि लक्ष्ये सर्वत्र प्रसिद्ध–व्यवहारम्'–इति प्रथमकारिकावृत्त्यन्ते। अत एव वाल्मीकिरत्र रामायणपात्ररूप एव भवति, न तु रामायणनिर्माणात् पूर्वं तमसास्थितमुनिविशेषरूपः। इदमप्यत्र चिन्तनीयम् 'अस्माभिरत्र प्रथमं किमनुभूयते रामायणस्थः कौञ्चवधवृत्तान्तः, रामायणनिर्माणात् पूर्वं घटितस्तमसातटीयस्तद्वधवृत्तान्तो वा'। नियतमेव रामायणस्थः सः, परस्य तन्मूलतयैवावबोधात्। तत् कोऽयमस्माकं मोहो यद् वयं रामायणं विहाय तमसातीरं भजामः। रामायणमेव हि ध्वनिकृत आदर्शतमं काव्यम्। यदुक्तमेतेन

**सन्ति सिद्धरसप्रख्या येऽपि रामायणादय इति**
**वाल्मीकिव्यासमुख्याश्च ये विख्याताः कवीश्वराः ।**
**तदभिप्रायबाह्योऽयं नास्माभिर्दर्शितो नय ।। इति,**

'प्रबन्धे चाङ्गी रस एक एवोपनिबध्यमानोऽर्थविशेषलाभं छायातिशयं च पुष्णाति। कस्मिन्निवेति चेत् यथा रामायणे यथा वा महाभारते। रामायणे हि करुणो रसः स्वयमादिकविना–सूत्रितः 'शोकः श्लोकत्वमागत' इत्येवंवादिना, निर्व्यूढश्च स एव सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्ध–मुपरचयता' इति च चतुर्थोद्योतेऽपि।

अत्र यदि स्पष्टमेव रामायणकाव्यमेव लक्ष्यं तर्हि तत्र प्रथमोद्योतस्थले तद् विहाय को नु व्यामोहः तमसातीरपर्यन्तानुधावनस्य।।[१]

---

१. अत्रास्माकं लेखः A Fresh treatment of Dhvanikarika 1.5. Bicenknary issue volume 77-78 for 2002-2003 of Journal of the Asiatie Society of Mumbai, 2004.
प्रकाशितश्चासौ संस्कृतलेखः सागरिकाया ११.४ अङ्के।

## ध्वनिसम्प्रदाये केचन प्रश्नाः

प्रतीतपदार्थको हि भारतीये साहित्यशास्त्रे ध्वनिशब्दः। भवन्त्येतस्य प्रवृत्तेर्विषयाः पञ्च (१) काव्यविशेषः, (२) वाचकविशेषः, (३) वाच्यविशेषः, (४) प्रतीयमानार्थविशेषः, (५) व्यापारविशेषश्चेति। तदिदं प्रतीतचरमेव ध्वन्यालोक— तल्लोचन—काव्यप्रकाशादिभ्यः। ध्वन्यालोके हि तस्य प्रणेता—

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥**

ध्व. १.१३

इत्येवं धर्मिभूतं काव्यविशेषं ध्वनिसंज्ञया परामृशत्येव, यावत्—

**उक्त्यन्तरेणाशक्यं यत् तच्चारुत्वं प्रकाशयन् ।**
**शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयीभवेत् ॥**

ध्व. १.१५

इत्थं शब्दविशेषमपि।

'सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपी'ति मम्मटवचनात्। 'इतश्च वाचकत्वाद् व्यञ्जकत्वस्य अन्यत्वं यद् वाचकत्वं शब्दैकाश्रयम् इतरत्तु तु शब्दाश्रयमर्थाश्रयं च, शब्दार्थयोर्द्वयोरपि व्यञ्जकत्वस्य प्रतिपादितत्वात्' (ध्व० १.१३ कारिकाव्याख्याने) इत्यादिभिर्वचनव्रातैर्वाच्यमर्थमपि ध्वनतीति, ध्वन्यतेऽनेनेति च व्युत्पत्त्या न न परामृशति।

योऽयं व्यङ्ग्योऽर्थस्तत्कृतस्य चमत्कारस्याधिक्ये तस्यापि ध्वनित्वम्—

**सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः ।**
**कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित् ॥**

ध्व. ३.१६

इत्येवं कण्ठरवेणैव ध्वनिकृतैवाम्नायते।

यश्चायं शाब्दो व्यापारस्तस्यापि वाचकत्वं गुणवृत्ति: व्यञ्जकत्वमिति त्रिप्रकारकत्वं व्यञ्जकत्वकृतस्य चमत्कारस्याधिक्ये च तस्यैव केवलस्य ध्वनित्वं ध्वनिसम्प्रदाये प्रसिद्धचरमेव। तदिदं ध्वननावगमनद्योतनानु–रणनादिभिस्तैस्तैर–भिधानैरभ्युपेतचरं भूम्ना। व्यञ्जनं पुनरस्य प्रतीततमा संज्ञा, तस्या एव भूम्ना प्रयोगात्।

व्यञ्जनावाटीं प्रविष्टा आनन्दवर्धनप्रमुखा: सहृदयशिरोमणयो व्यङ्ग्यं व्यञ्जकं चेत्युभयत्रापि त्रैविध्यमामनन्तस्त्रैवर्गिकत्वमप्यामनन्ति। तथा च वस्तु, अलङ्कार:, रस इति तिस्रो व्यङ्ग्यविधा:, एता एव च व्यञ्जकस्य। वर्ग: पुन: स्वत:सम्भवित्वेन, कविप्रौढोक्तिसिद्धत्वेन कविनिबद्धवक्तृप्रौढोक्ति–सिद्धत्वेन चेति त्रेधा प्रतिष्ठाप्यते। उक्तमेव ध्वन्यालोककारिकावृत्तिभ्याम्–

**प्रौढोक्तिमात्रनिष्पन्नशरीर: संभवी स्वत: ।**
**अर्थोऽपि द्विविधो ज्ञेयो वस्तुनोऽन्यस्य दीपक: ।।**

इति। (ध्व.२.२४)

अर्थशक्त्युद्भवानुरणनरूपव्यङ्ग्ये ध्वनौ यो व्यञ्जकोऽर्थ उक्तस्तस्यापि द्वौ प्रकारौ कवे: कविनिबद्धस्य वा वक्तु: प्रौढौक्तिमात्रनिष्पन्नशरीर एक:, स्वत:संभवी च द्वितीय:।। इति च। (तत्रैव)

अयमत्र विशेषो यदानन्दवर्धन: स्वत:संभवित्वं प्रौढोक्तिसिद्धत्वं च वस्तुमात्रगतत्वेन व्यवस्थापयति, न पुनरलङ्कारगतत्वेनापि। मम्मट: पुनरलङ्कारगतत्वमपि तत्र पश्यति।। तथा हि–

**अर्थशक्त्युद्भवस्त्वर्थो व्यञ्जक: संभवी स्वत: ।**
**प्रौढोक्तिमात्रात् सिद्धो वा कवेस्तेनोम्भितस्य वा ।**
**वस्तु वाऽलङ्कृतिर्वेति षड्भेदोऽसौ ।।**

का.प्र.(४.१६–१७)

इति काव्यप्रकाशे तस्य कारिकाग्रन्थः—

'स्वतःसंभवी = न केवलं भणितिमात्रनिष्पन्नो यावद् बहिरप्यौचित्येन संभाव्यमानः, कविना प्रतिभामात्रेण बहिरसन्नपि निर्मितः कविनिबद्धेन वा वक्त्रेति द्विविधः, वस्तु वाऽलङ्कारो वासाविति षोढा व्यञ्जकः'।।

इति च तत्रैव वृत्तिग्रन्थः। अलङ्कारस्य स्वतःसंभवित्वमुदाहृतमपि तेनैव महामतिना—

**गाढकान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः ।**
**ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरम् ।।**

विवृतमप्येतेनैवेदमेवं वृत्त्या—

'अत्र विरोधालङ्कारेणाऽधरनिर्दशनसमकालमेव शत्रवो व्यापादिता इति तुल्ययोगिता, मम क्षत्याऽप्यन्यस्य क्षतिर्निवर्त्ततामिति तद्बुद्धिरुत्प्रेक्ष्यत इत्युत्प्रेक्षा च। एषूदाहरणेषु स्वतःसंभवी व्यञ्जकः।।' इति।

**दर्पान्धगन्धगजकुम्भकपाटकूटसंक्रान्तिनिघ्नघनशोणितशोणशोचिः ।**
**वीरैर्व्यलोकि युधि कोपकषायकान्तिः कालीकटाक्ष इव यस्य करे कृपाणः।।**

अत्रोपमालङ्कारेण सकलरिपुबलक्षयः क्षणात् करिष्यत इति वस्तु—इति समनन्तरेणापि कारिकावृत्तिसन्दर्भेण स्वतःसंभवित्वमलङ्कारस्य काव्य—प्रकाशकृता निपुणं न्यरूपि।

टीकितारोऽपि भट्टगोपाल—गोविन्दठक्कुर—चण्डीदास—विस्तारिका—कारादयः अविसंवादिन एव। गोकुलनाथस्तु किञ्चिदाश्लिष्टविचिकित्सोऽपि दूरङ्गमेण तर्कज्योतिषा तदिदं छिद्रं पिदधाति—'यावद् बहिरप्यौचित्येन संभाव्यमान' इति मम्मटभाषाम् 'औचित्येनेति' धर्मितावच्छेदकावच्छेदेन धर्मस्य बाधनिर्णयाभावेनेत्यर्थ इति एवमर्थयन्। तथा च 'दर्पान्धेति पद्यार्थे कालीकटाक्षस्य यत् सादृश्यं संभावनं वा तन्निरूपिता धर्मिता कालीकटाक्षे तत्रावच्छेदकत्वं तादृशकटाक्षत्वस्य तच्च न बाध्यमानत्वेनानुभूयते, प्रसिद्धत्वात्।

पण्डितराजो जगन्नाथोऽपि स्वतःसंभवित्वमिदं लोकसिद्धत्वेन निनीषन्नविसंवाद्येव दृष्टः, विश्वनाथोऽपि च। सैव च गतिः साहित्य–सारेऽच्युतस्यापि (४.१९१–१९२ सा.सा.)।

काव्यानुशासनकारः कलिकालसर्वज्ञतया यथार्हमार्हन्तीं लम्भित–स्तत्रभवान् हेमचन्द्राचार्यस्त्वत्रान्यथैव प्रतिष्ठमानो दृष्टः। तन्मते कविप्रौढोक्ति–कविनिबद्धवक्तृप्रौढोक्तिस्वतःसम्भवित्वानां कविप्रौढोक्तित्वमेव। उच्यते त्वेतेन–

'इह चार्थः स्वतःसंभवी कविप्रौढोक्तिमात्रनिष्पन्नशरीरः कविनिबद्ध–वक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरो वेति भेदकथनं न न्याय्यम्, प्रौढोक्तिनिर्मित–त्वमात्रेणैव साध्यसिद्धेः प्रौढोक्तिमन्तरेण स्वतःसंभविनोऽप्यकिञ्चित्करत्वात्। कविप्रौढोक्तिरेव च कविनिबद्धवक्तृप्रौढोक्तिरिति किं प्रपञ्चेन'–इति। (पृ० ५५–५६ काव्यमाला, सं० १९३४)

सोऽयमुपस्थितो वादः।

अत्र विमर्शः–

चन्द्रमण्डलमिवाह्लादकं मुखमण्डलमित्यत्रोपमास्थले विम्रष्टव्यं 'चन्द्रो, मुखं, सादृश्यसाधर्म्यान्यतरप्रतिपादक इवशब्दः, समानो धर्म आह्लाद' एतावती या सामग्री तस्या प्रत्येकमौचित्येन बहिरपि प्रकाशत इति निर्बाधमत्र स्वतःसंभवित्वमुपमाया इति सुवचमपि न तर्कसहम्, काममत्रोपमा स्वतःसंभविनी, किन्तु प्रकृते न तया अर्थः, वस्तुमात्रं हि सा, नालङ्कारः, अलङ्कारत्वस्य चमत्कृतिजनकत्वाव्यभिचारित्वेनैव प्रतिपद्यमानत्वात्। अत एव त्वत्पुस्तकं मत्पुस्तकमिव बहुमूल्यमिति वाक्यार्थे न काव्यत्वम्, तत्रोल्लासिन उपमानादेश्चमत्कृतिजनकत्वादर्शनात्, सति च चमत्कृति–जनकत्वे पद्ममिव मुखमित्यादावव्याहत– मेवालङ्कारत्वमुपमायाः। ततो वक्तव्यम् अपर्याप्तमिदमुपमालंकारस्य संपूर्णभावे यदुत उपमानमुपमेयं

साधारणो धर्म उपमाप्रतिपादकश्चेति, अवशिष्यत इदानीं यावदुपमाया–मलङ्कृतित्वस्यापादयित्र्याश्चमत्कृतेर्गणनम्। या च चमत्कृतिः न सा मुखादिवद् बहिः स्फुरन्ती दृश्यते। ततश्च रिक्तं वचो यदुत स्वतःसंभवी उपमालङ्कार इति। रूपके आरोपोत्थापितायाः उत्प्रेक्षायां संभावनजनितायाः, अतिशयोक्ताव–ध्यवसायप्रभवाया इव अलङ्कारान्तरेषु निमित्तान्तर–प्रभवायाश्चमत्कृतेः संविन्मात्रधर्मतायाः सर्ववादिसम्प्रतिपन्नत्वान्न तेषामपि बाह्यत्वं स्वतःसंभवित्वलक्षणम्। किञ्च यदिदं शुक्तिकाशकल–रजतखण्डयोः सादृश्यं यच्च मुखमण्डलविधुमण्डलयोः, अस्त्यनयोर्विशेषो न वा? अस्त्येवात्र विशेष। स चानुभवसाक्षिकः। नासौ शक्यापह्नवो गीष्पतेरपि, आत्मनो मिथ्यावचनत्वं परिहर्त्तुकामस्य। यश्चायं विशेषः किंकृत एषः, ऋते कविप्रौढोक्तिपरिस्पन्दात्। ततः कीदृशी तत्रोपमालङ्कृतेः स्वतःसंभवित्वन्यक्कृतिः। एवं च विप्रतिषिद्धमेव परस्परमलङ्कारत्वं स्वतः संभवित्वं चेति।

किञ्च पृच्छामः किंकृतो ननु भेदः काव्यं लोकश्चेत्यनयोः। यद्युच्येत काव्यं हि कविकर्मस्वरूपम्, लोक पुनः स्वत एव सिद्ध इति। ब्रूमस्तर्हि काव्यवत् काव्यधर्मा अपि कविकर्मनिर्वर्त्तिताः सन्तः लोकोत्तरा एव, न पुन स्वतःसंभविनः। अलङ्कारा अपि रूपकादयस्तादृशा एवाभिमन्तुं शक्येरन्, न तद्विजातीयाः। अर्थान्तरन्यास–काव्यलिङ्ग–निदर्शना–दृष्टान्त–प्रतिवस्तूपमा–दीपक–तुल्ययोगिताप्रभृतिषु समर्थकारिताप्रविष्टानामपि पदार्थानां बाह्यत्वेन स्फुरणमनुभूयमानमपि तज्जनितायाश्चमत्कृतेरतथाभूतत्वान्न भवत्येव साधकं प्रतिपक्षिणः। या चात्र गोकुलनाथादीनां स्वतःसंभवित्वसाधने प्रतिपत्तिः सापि कल्पितोपमादिसीमितत्वान्न समग्रभरसहा। तथा हि 'धम्मिल्लः श्यामलाङ्ग्याः स्मर' इति स्थलं तद्दत्तमत्र निदर्शनम्, 'धम्मिल्लः स्मर' इत्यादौ उपमाने स्मरे श्यामलाङ्गत्वादिसाधारण–धर्मसम्बन्धो न दृष्ट इति प्रौढोक्तिसिद्धतैव तस्येति तत्र तस्योपपत्तिः (पृ० १८२)। तदिदं सर्वं

'स्तनाभोगे पतन् भाति कपोलात् कुटिलोऽलकः, शशाङ्कबिम्बतो मेरौ लम्बमान इवोरग' इत्यादेः पण्डितराजादिप्रस्तुतस्योपमायाः कल्पिता–त्वप्रपञ्चस्यैवानुहरतीति तद्विषयेणैव न्यायेन सुकरसमाधिः। ततश्च युक्तवचनस्तत्रभवान् हेमचन्द्राचार्यो यदुत स्वतःसंभवित्वेनोत्प्रेक्ष्यमाणा अपि पदार्था अत्र कविप्रौढोक्तिनिष्पन्नशरीरा एवेति। अत एव ध्वनिप्रस्थान–स्यप्रख्यामिवोपाख्यामप्यातन्वानाः श्रद्धेयवचना एव तत्रभवन्त आनन्द–वर्धनाचार्या अलङ्कारेषु स्वतःसंभवित्वमप्रतिपद्यमानाः। **सोऽयमेकः प्रश्नः। अथ द्वितीयः।**

संवादिन एव सर्वेऽपि ध्वनिप्रस्थानानुयायिन आचार्या उपमादीना–मलङ्काराणां वाच्यवृत्त्यालिङ्गितत्वाभ्युपगमे। उपमादयो विच्छित्तिविशेषा अभिधेया अपि भवन्तीति तेषां प्रतिपत्तिः। आनन्दवर्धनाचार्यमारभ्य पण्डितराजं जगन्नाथं यावत् सर्वेषामेवाभिधास्पृष्टत्वमेवालङ्कारेषु संमतम्। तथा चानन्दवर्धनः—

**रूपकादिरलङ्कारवर्गो यो वाच्यतां श्रितः ।**
**स सर्वो गम्यमानत्वं बिभ्रद्भूम्ना प्रदर्शितः ।।**

इति। (२.२६)

**वाच्यालङ्कारवर्गोऽयं व्यङ्ग्यांशानुगमे सति ।**
**प्रायेणैव परां छायां बिभ्रल्लक्ष्ये निरीक्ष्यते ।।**

इति। (२.३६)

**शरीरीकरणं येषां वाच्यत्वेन व्यवस्थितम् ।**
**तेऽलङ्कारा परां छायां यान्ति ध्वन्यङ्गतां गताः ।।**

इति। (२.२८)

अन्यैश्च बहुभिर्वचनैरलङ्काराणां वाच्यत्वमुज्जगौ। अभिनवगुप्तोऽपि अलङ्कारस्य वाच्यतायां निर्विचिकित्सं श्रद्दधाति। मम्मटाचार्यस्यापि सैषा प्रतिपत्तिर–व्युच्छिन्नैव। व्यञ्जनासिद्ध्युपोद्घाते पञ्चम उल्लासे स्पष्टमसौ ब्रूते—'सङ्कलनेन

पुनरस्य ध्वनेस्त्रयो भेदाः, व्यङ्ग्यस्य त्रिरूपत्वात्। तथा हि किञ्चिद् वाच्यतां सहते, किञ्चित् त्वन्यथा। तत्र वाच्यतासहमविचित्रं विचित्रं चेति। अविचित्रं वस्तुमात्रम्, विचित्रं त्वलङ्कारररूपमि'ति। अन्ववादीदमच्युतेनापि साहित्यसारे—

**तदनन्तमपि व्यङ्ग्यमगौणाद्यखिलं त्रिधा ।**
**रसालङ्कारवस्त्वाख्यभिदाऽऽद्यं वाच्यताऽसहम् ।। ५.७० ।।**

इत्यनया कारिकया, वृत्त्या च स्वोपज्ञया सरसामोदनाम्न्या। अत्र विचार्यते—

अलङ्कारो वाच्यत्वं सहत इत्यस्य कोऽर्थः? उक्त एव भीमसेनदीक्षितेन प्रदीपमनुहरता 'वाच्यत्वसहत्वं त्वभिधया प्रतिपाद्यमानस्यापि चमत्कार-कारित्वमि'ति। (पृ० २५६) एवमेव भट्टगोपालेनापि 'व्यङ्ग्यं वस्तु वाच्यतां सहते न त्वतिशेते' इति। (पृ० २५७) एषैव प्रतिपत्तिरुद्योतकृतोऽपि 'सालङ्कारैर्ध्वनेरिति काव्यप्रकाशकारिकां व्यावृण्वानस्य 'सालङ्कारैर्वाच्या-लङ्कारसहितैरित्यर्थः' इति। वाच्यत्वमभिधीयमानत्वमिति स्वयं मम्मटस्यापि मतम्। अत एव तस्य वृत्तिरेवंविधा—'रसादिलक्षणस्त्वर्थः स्वप्नेऽपि न वाच्यः, स हि रसादिशब्देन शृङ्गारादिशब्देन वाऽभिधीयेत, न चाभिधीयते, तत्प्रयोगेऽपि विभावाद्यप्रयोगे तस्याप्रतिपत्तेः'—इति। स्थितमेतदेतेन यद् वाच्यतासहपदेन मम्मटस्यापीदमेवाभिमतं यदलङ्काराणामभिधयाऽपि कथनं संभवतीति। तच्च तर्कविरुद्धम्। तार्किको हि नरसिंहमनीषाकारो रहस्यमिदं प्रतिपद्यमानो वक्ति—'वाक्यार्थबोधविषयत्वेऽपि चमत्कारित्वमेवाऽत्र वाच्यत्वसहत्वम्' इति। अत्र वाक्यार्थबोधविषयत्वञ्चानभिधेयत्वं चानर्थान्तरम्। वाक्यार्थस्य तात्पर्यार्थरूपत्वं मम्मट एव प्रतिजानीते 'पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसती'ति द्वितीय उल्लासे 'तात्पर्यार्थोऽपि केषुचिदि'ति सूत्रस्य वृत्तौ, 'अतिविशेषभूतो वाक्यार्था-न्तर्गतोऽसंकेतितत्वादवाच्य एवे'—ति च पञ्चम उल्लासे। अयमत्रार्थः 'घटमानये'ति यद् वाक्यम्, तत्र निर्विकल्पके ज्ञाने घटत्वावच्छिन्नो वस्तुविशेषः,

कर्मत्वम्, आनयनव्यापारो लोडर्थ इत्येते ये पदार्थपदाभिधेया अर्था भासन्ते तेषामेव संसर्गः सविकल्पके ज्ञाने 'कर्मत्वं घटनिष्ठमि'—त्यादिके। अयं यः संसर्गः स एवाऽन्वयः। स एव वाक्यस्य प्रतिपाद्यः, तद्वाचकस्य पदस्य स एषोऽर्थ आकाङ्क्षायोग्यतासन्निध्यादिभिः प्रतिनियम्यते, न त्वभिधया स्पृश्यते, अत एव त्यज्यत एष वाक्येऽनुपलम्भात्, अत एव तस्याऽपदार्थत्वम्, पदप्रतिपादितेभ्योऽर्थेभ्यो व्यतिरिक्तत्वाद् विशेषवपुष्ट्व—मप्यस्य। पदार्थगणनायां 'गौः शुक्लश्चलो डित्थ' इति चतुष्टयी शब्दानां प्रवृत्तिरि'ति प्रतीततमायाम्। वाक्यार्थबोधविषयत्वमत्र सर्वेषामेव कर्मत्वाव—च्छिन्नप्रकारतानि रूपितघटत्वावच्छिन्नविशेष्यताविशिष्टानयनव्यापारादीनामति—विशेषविरुदविषयीकृतानामिति पङ्गुरेवात्र महिमाऽभिधाभिधानस्य शब्दव्यापारस्य पदार्थमात्रसीमितसंकेतकस्य 'अत एव प्रत्याहतमेव वाक्यस्याभिधायकत्वमिति वाक्यार्थस्याभिधेयत्वमपि तर्कवीथ्याम—किंपचानखिली—कृतगर्भायां विचक्षणैकसंचारनाडिन्धमायाम्। उपमादयोऽलङ्कारा अप्यत एवानभिधेयाः। वाक्यार्थधर्मा ह्यलङ्काराः, वाक्यार्थ—श्चानभिधेय इति कुतस्तेषामप्यभिधेयत्वप्रसङ्गः। या चेयं वाक्यार्थविषयता साऽपि उपमादिनिष्ठं वस्तुत्वमेव स्पृशति, नालङ्कारत्वमपि। अत एव चमत्कारकारित्व—पर्यन्तानुधावना प्रदीपकृताम्। अर्थान्तरन्यासे समासोक्तौ अप्रस्तुतप्रशंसायां च योऽयमपरोऽर्थस्तस्य वैयधिकरण्यमेव प्रतीतिकालस्य कुक्षौ पौर्वापर्य—प्रसाधिताभोगे। योऽयमेकार्थीभावः स खलु संविद्भट्टारिकाया विलासोऽर्थान्तर—न्यासादिषु। 'गुह्यकस्तं ययाचे' इत्येको वाक्यार्थः। 'कामार्त्ता हि प्रणयकृपणाश्चेतनाऽचेतनाऽचेतनेषु' इति चापरः। पौर्वापर्यमिदं कालकुक्षिगतं वैयधिकरण्यं न प्रसाधयते। न च प्रक्षीयतेऽत्रैकार्थीभावः समर्थ्यसमर्थ—कभावाभिवे— ष्टितसर्वस्वः। कालकृतस्य वैयधिकरण्यस्याऽस्याणीयसी मात्राऽप्रस्तुतप्रशंसायाम् अणिष्ठा च समासोक्तौ। स्थविष्ठा तु सा दृष्टान्तनिदर्शनादिषु न प्रजागर्ति। एतेषु योऽयमपरोऽर्थः सोऽपि अलङ्कारशरीरे

घटकीभूतः। तत्र न सर्वत्राभिधायाः प्रसरः, समासोक्त्यादावपरस्यार्थस्य व्यञ्जनाव्यापारसाध्यताया एव ध्वनिवादिसंप्रतिपन्नत्वात्। यश्चायमपर–स्तात्पर्यविषयीभूतः समर्थ्यसमर्थकभावादिरर्थः का ह्यत्र कथा तस्याभिधेयतायाः। अतिविशेषभूत एष नयचतुष्टयेऽप्यन्तःकरणमात्रसंवेद्यः। अभिहितान्वयनय इवान्विताभिधाननयेऽपि अविषय एवाभिधायाः। यश्चैतदुभयसमाहारभूतः समुच्चयनयः, यश्च वाक्यार्थस्य प्रातिभत्वं प्रसाधयन्नखण्डार्थनयः, तत्रोभयत्राप्यविषय एवाभिधायाः सम्बन्धविशेषरूपश्चमत्काररूपश्च पार्यन्तिकोऽर्थः। ततश्च मुकुलभट्टादिसमर्थितया पदव्या न ह्येव प्रसज्यते व्याकोपः, अलङ्काराणामनभिधेयतायास्तर्कोऽनुभवश्चेत्युभाभ्यां समर्थित–भूयिष्ठायाः। प्रत्यपादि चैतद् वितत्य विवृतिसमेधिताभिर्दशभिः कारिकाभिः काव्यालङ्कारकारिकायामेवम्–

अलङ्कारोऽपि वाच्यत्वं नैव स्पृशति जात्वपि ।
सौन्दर्यमात्रोल्लापेऽपि स्याच्चमत्कृतिरन्यथा ॥

वाक्यार्थ एवालङ्कारो वाक्यार्थश्च समन्वयः ।
पदार्थानां स संसर्गमर्यादामात्रगोचरः ॥

प्रातिभत्वं च वाक्यार्थे दृश्यते तत्त्वदर्शिभिः ।
वाक्यवाक्यार्थयोर्यस्मात् संकेतो नास्त्यपूर्वयोः ॥

विभक्त्या वृत्तिभास्यो यः सम्बन्धस्तत्र केवलौ ।
प्रकृतिप्रत्ययार्थौ हि प्रतियोग्यनुयोगिनौ ॥

तस्माद् रसादिन्यायेन नालङ्कारेऽपि वाच्यता ।
इवादिशब्दयोगस्तु सादृश्याद्येकतत्परः ॥

तत्परत्वमपीदं नो वाच्यवाचकताभिधम् ।
इवादेः स्पष्टतामात्रं सर्वस्वमुपमादिषु ॥

अत एव च लुप्तात्वमार्थीत्वं चोपमादिषु ।
प्रतीयमानतां चापि मन्वतेऽस्मन्महत्तराः ।।

आरोपो रूपकस्यात्मा वाचकस्तस्य तत्र कः ।
एवं चाध्यवसानस्यातिशयोक्तौ क्व शक्तता ।।

पर्यायोक्तौ समासोक्तौ काव्यलिङ्गे च यः परः ।
अप्रस्तुतप्रशंसावदर्थः कोऽत्रास्य वाचकः ।।

काव्ये सर्वेऽप्यलङ्कारा वाक्यार्थविधया विदाम् ।
संवित्कुटीशुकायन्ते न लभन्ते च वाच्यताम् ।।

(कारिका, ३३—४२)

इयं चाऽत्रोपसंहारवृत्तिः—

स्थितमेवं यद् द्विविधोऽप्ययमलङ्कारपदवाच्योऽलंभावोऽनुभवैकगम्यः, न तु शब्दवाच्य इति। अयं त्वत्र विशेषो यद् रसादौ रसादिशब्द-प्रयोगोऽकिञ्चित्करो दोषभूतो वा, उपमादिषु पुनरिवादिशब्दोऽपि साहायकमेवाचरत्यलङ्कारस्य स्थूलशरीरस्पष्टतायामिति। तदयमत्र संग्रहः—

**सम्बन्धोऽपि पदार्थानां चमत्कृत्येकतत्परः ।**
**अलङ्कारतया काव्ये प्राचीनैरभिलप्स्यते ।।**

**चमत्कारस्तु यस्तेषां स रसो भोग्य एव सः ।**
**वाच्यवृत्तिस्तु तं स्प्रष्टुं भवेत् स्वप्नेऽपि न क्षमा ।। इति।**

एवं ध्वनिसम्प्रदायस्य येयं वाचोयुक्तिर्यदलङ्कारोऽपि वाच्यतां सहत इति, अभिधेय इति, वाचकत्वालिङ्गित इति वा तत्राऽत्र क्षोदक्षमं न ह्येवानुभवामस्तत्त्वम्।

**अथ तृतीयः प्रश्नः**। आनन्दवर्धनः शब्दार्थयुग्मं काव्यशरीरीकृत्वा तत्र रूपकादीनां कटकादितुल्यतां पश्यति 'अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः

कटकादिवदि'ति। संवादी ह्यत्र मम्मटः। तथा हि तस्य काव्यप्रकाशः–

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥ इति।**

अत्र विचारः– प्रातिभं किल तद् वस्तुजातं यत् काव्यात्मना परिणमति। ततश्च प्रातिभासिकमेव तत्, न तत्र परमार्थत्वं नियमेन प्रसरीसिसर्त्ति। एवं स्थिते प्रतिबिम्बकल्पत्वमेव काव्यार्थानाम्। मुकुरगर्भे, वापिकाम्भोभरे, स्फाटिकेषु वा भित्तिस्तम्भादिषु सालङ्कारस्य शरीरस्य या प्रतिच्छाया पश्यन्तुतरां तत्र कीदृशी स्थितिरिति। किं तत्र शरीरस्य प्रतिमूर्च्छना पूर्वं प्रसरति पश्चाच्च हारादीनाम्, उत सहैव। लिपिस्वरादिभिः पुस्तकर्मकण्ठस्थकरणार्पितैः प्राचीनतममपि यत् साम्प्रतिकायमानं बाभाति तत्र काव्ये 'जगतः पितरौ वन्दे' इति किं क्षणद्वयात् परं 'वागर्थाविव संपृक्तावि'ति सादृश्यमुपतिष्ठते। भासेते किमत्र वाक्यार्थयोरनयोः प्रतिकल्पकल्पे तनू कालवैयधिकरण्येन 'इदं पूर्वम् एतच्च पश्चादि'ति प्रथमकक्षायां पदानि ज्ञायन्ते, द्वितीयकक्षायां संकेताः स्मर्यन्ते, तृतीयकक्षायां तेषामर्थाः प्रतिपत्तिमाजिहते, सम्पद्यते चैकार्थीभावश्चतुर्थकक्षायामन्वयात्मा। एष एव हि चरमः परमश्चार्थः। सर्वाकारं बौद्ध एव, सांवित्तिक एव, प्रातिभ एव वा सः। वाक्यस्फोटे हि पदस्फोटा निमज्ज्यैव तिष्ठन्तः प्रत्यवभासन्ते, न विविक्ततयेति प्रात्यक्षिकमेव सर्वस्य। या चेयं कक्षाचतुष्टयी साऽपि सूचीशतपत्र–पत्रशत–वेध–क्षिप्प्रतामनुहरन्ती न ह्येव प्रगल्भते भेदकणिकामपि पौर्वापर्यजनितां कालगतत्वेनोपस्थापयितुम्। संमिश्र एष भावानां यदुत काव्यार्थवाक्यार्थः। यौगपद्येनैव हि तत्रोपतिष्ठेरन्नलङ्कार्या अलङ्कर्मीणाश्चोपमादयो विच्छित्तयः, न तु पौर्वापर्येण प्रतिबिम्बादिष्विव।

यो ह्यलङ्कारान् हारादिवदागन्तुकान् प्रतिजानीते प्रष्टव्यः खलु स एष मतिमतां वरिष्ठः ''वागर्थाविव संपृक्तावि''ति प्रभृतिषु स्थलशतेषु

यत्र हि अलङ्कार एव पूर्वमुपतिष्ठतेऽलङ्कार्य एव च पार्वतीपरमेश्वरादिः पश्चात् तत्र का स्यादन्वयस्य गतिः। तत्र हि अलङ्कार एवाग्रजः, तमेवानुसरेदलङ्कार्यरूपोऽनुजः। एवं हि न काव्यस्यालङ्कारयोगः प्रत्युतालङ्कारस्यैव काव्ययोगः। अथ वक्तव्यं केवलेनोपमेयेन घटिते वाक्यार्थे 'वन्दे पार्वतीपरमेश्वरा'–वित्यत्रापि प्रतिपद्यते किं काव्यत्वम्? वस्तुमात्रं हि तत्। विशेषणवाक्यार्थौ वागर्थाविव संपृक्तौ जगतः पितरौ इत्येवं व्युच्चरन्तौ प्रविहाय कीदृशी नु काव्यता विशेष्यवाक्यार्थस्य पार्वतीपरमेश्वरावित्येतन्मात्रगात्रकस्य। इयमेव गतिः 'उमावृषाङ्कौ शरजन्मना यथा यथा जयन्तेन शचीपुरन्दरौ, तथा नृपः सा च सुतेन मागधी ननन्दतुरि'त्येतस्य वाक्यार्थसार्थस्य मालोपमाकरम्बितविग्रहस्य। यदि नामावक्ष्यत 'शचीपुरन्दरौ जयन्तेन सुतेन नन्दतः उमावृषाङ्कौ शरजन्मना सुतेन नन्दतः, सुदक्षिणादिलीपौ रघुणा सुतेन ननन्दतुरिति प्रविविक्ततया का नाम नाभविष्यद् दुर्गतिः कवितुः सचेतसश्च 'दश दाडिमाः, षडपूपाः' इत्यादीनि वाक्यानि शृण्वतो नु मध्यमवृद्धस्य।

अथ औद्भटीयैर्गुणानामिवालङ्काराणामपि सामवायिकत्वे स्वीक्रियमाणे हारादीन् कटककुण्डलादीन् वोदाहृत्य प्रगल्भमानो ध्वनिवादी ह्येष कथं नु नोदीरयति संबन्धस्य नाम 'संयोग' इति, उपमादयोऽपि काव्ये संयोगिन एव हारादय इव कण्ठादौ लोक इवेति कथं न प्रसरति तस्य वैखरी। वाग्देवतावतारत्वेन संभाव्यमान आचार्य एष कण्ठीरवभाव–मापादितोऽवद्योतते काव्यशास्त्रमहाकान्तारे। मध्यमाविसंवादी ह्यत्रास्य वैखरीसन्तानः। अनुभवं नानुरुणद्धि सः। द्रव्ययोरेव संयोग इष्यते, न तु ज्ञानयोः। भवतश्च काव्यमलङ्कारश्चेत्युभावपि ज्ञानरूपौ। न ततो युज्यतेऽनयोः संयोगः। काव्यं धर्मि, अलङ्कारश्च धर्म इति धर्मधर्मिणोः समवायोऽन्यत्र प्रथितप्रसरोऽत्रापि प्रसरेदिति चेत्, कथं तर्हि औद्भटीये प्रस्थाने विमतिः। वस्तुतस्तु सम्बन्धप्रश्न एवात्रानुत्थानपराहतः प्रतिबिम्बसम्बन्धप्रश्न इव।

प्रतिबिम्बे हि धर्मः धर्मी चेत्युभस्यापि युगपदेव जन्म। अतः अभेद एव तत्रानयोः प्रातीतिकः समवायसम्बन्ध एव हि अभेदः, तत्रापि सम्बन्धिनोः पृथक्स्थितेरदर्शनात्। उक्तमिदं वितत्य काव्यालङ्कारकारिकायामेवम्—

**भूषा लावण्यमङ्गानि देहे स्युः क्रमिकाणि हि ।**
**प्रतिबिम्बे परन्त्वत्र युगपज्जन्मता स्थिरा ॥**

**सामाजिकस्य हृल्लेखां यदा काव्यं वगाहते ।**
**तदौपम्यादयोऽप्यत्र जायन्ते सममेव हि ॥**

**यथा हि सुन्दरे देहे निर्वाच्ये भूषणादिकम् ।**
**अङ्गभावं व्रजत्येव काव्ये साम्यादयस्तथा ॥**

**असुन्दरस्य शब्दार्थद्वन्द्वस्यात्र न केनचित् ।**
**काव्यत्वं मन्यते यस्य मन्यते सुन्दरं हि तत् ॥**

**सुन्दरस्य च सौन्दर्यं विना हेतुं न सम्भवेत् ।**
**हेतुश्च तत्राऽलङ्कारः ॥ इति।** (कारिका १४२—१४६)

इतोऽपि यद् गभीरतरं दर्शनमस्माकं तत् कारिकाणाममूषां वृत्तावववधार्यम्।

**अथ चतुर्थ प्रश्नः।** काव्यालङ्कार इति महासंज्ञात्वेन प्राचीनैः सम्भाविते विरुदे योऽयमलङ्कारशब्दः स खलु यमकोपमादिरूपान् विच्छित्तिविशेषान् यावदेव सीमितसर्वस्व इति यो ध्वनिवादिनामाग्रहस्तत्र विम्रष्टव्यं कस्य नु पक्षो युक्तिसहः, प्राचीनायां दण्डिभामहोद्भटवामनानाम् उतानन्दवर्धनादीनां ध्वनिवादिनाम् इति। तत्र—

'काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते' इति दण्डिनो मते काव्यशोभाजनक—धर्मत्वमलङ्कारत्वम्, 'वक्राभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृति'—रिति भामहस्य मते शब्दार्थोक्तिगतस्य वक्रत्वस्यैवा—

लङ्कारत्वम्, 'सौन्दर्यमलङ्कार' इति वामनस्य मते मुख्यतः सौन्दर्यस्यैवालङ्कारभावः, तदनुषङ्गेण चोपमादीनामपि, काव्यधर्मत्वावच्छिन्नत्वमेवालङ्कारत्वम्, अलङ्कारसारत्वं पुनरुपमादीनामिति काव्यालङ्कारसारकर्त्तुरुद्भटस्य प्रतिपत्तिः। अलङ्क्रियतेऽनेनेति करणव्युत्पत्तिरेवालङ्कारपदस्य सिद्धान्तभूता व्युत्पत्तिरिति मन्वाना आनन्दवर्धनाचार्या उपमादिष्वेवालङ्कारभावं पश्यन्तो वाग्विकल्परूपत्वमेवालङ्कारस्य स्थिरयन्ति, पश्यन्ति च तेषामानन्त्यम्, अबहुमानपात्रत्वं च। तथा च तेषां वचनानि–

१. अलङ्कारो हि बाह्यालङ्कारसाम्यादङ्गिनश्चारुत्वहेतुरुच्यते। वाच्यालङ्कारवर्गश्च रूपकादिर्यावानुक्तो वक्ष्यते च कैश्चित्, अलङ्काराणामनन्तत्वात् स सर्वोऽपि समीक्ष्य विनिवेश्यते। २.१७ वृत्तिः।। इति।

२. वाग्विकल्पानामानन्त्यम् (१.१ ध्व.वृ.) इति, अनन्ता हि वाग्विकल्पास्तत्प्रकारा एव चालङ्काराः।। (३.३६ पृ० ४७३ वृ०)

३. सहस्रशो हि महात्मभिरन्यैरलङ्कारप्रकाराः प्रकाशिताः प्रकाश्यन्ते च (१.१ ध्व० वृ०) इति।

४. विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन।। (२.१८ ध्व०) इति।

५. अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्।। (२.६ ध्व०)

६. अवयवप्रसाधनसाधनानि ह्यलङ्काराः।। (१.४ वृत्ति)।

७. शरीरीकरणं येषां वाच्यत्वे न व्यवस्थितम्।
तेऽलङ्काराः परां छायां यान्ति ध्वन्यङ्गतां गताः।। (२.२८ ध्व०) इति।

८. व्यङ्ग्यांशसंस्पर्शे सति चारुत्वातिशययोगिनो रूपकादयोऽलङ्काराः सर्व एव गुणीभूव्यङ्ग्यस्य मार्गः। गुणीभूतव्यङ्ग्यत्वं च तेषां तथाजातीयानां च सर्वेषामेवोक्तानुक्तानां सामान्यम्। तल्लक्षणे सर्व एवैते सुलक्षिता भवन्ति। एकैकस्य स्वरूपविशेषकथनेन तु सामान्यलक्षणरहितेन प्रतिपदपाठेनैव शब्दा न शक्यन्ते तत्त्वतो निर्ज्ञातुम् आनन्त्यात्।।
(३.३६ वृ० पृ० ४७२–७३)।। इति।

९. शृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धवान् ।
सर्वेष्वेव प्रभेदेषु नानुप्रास: प्रकाशक: ।। (२.१४)

ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम् ।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषत: ।। (२.१५)

रसाक्षिप्ततया यस्य बन्ध: शक्यक्रियो भवेत् ।
अपृथग्यत्ननिर्वर्त्य: सोऽलङ्कारो ध्वनौ मत: ।। (२.१६)

रसवन्ति हि वस्तूनि सालङ्काराणि कानिचित् ।
एकेनैव प्रयत्नेन निर्वर्त्यन्ते महाकवे: ।।

यमकादिनिबन्धे तु पृथग् यत्नोऽस्य जायते ।
शक्तस्यापि रसेऽङ्गत्वं तस्मादेषां न विद्यते ।।

रसाभासाङ्गभावस्तु यमकादेर्न वार्यते ।
ध्वन्यात्मभूते शृङ्गारे त्वङ्गता नोपपद्यत ।। इति।

वचनैरेतैरन्यैश्चैतज्जातीयै: स्पष्टं यद् योऽयं वराकोऽलङ्कारपदस्पृष्टोऽर्थ स हि ध्वनिवादिनां गृहे शाकपाके व्यञ्जनवदुपस्करभावमात्रभाजनं भवति। विस्मृतमत्रैभि: सौन्दर्यमलङ्कार इति, शोभैवालङ्कार इति च। **वामनस्य संप्रदाये वस्तुत: शोभालक्षणं सौन्दर्यमेव काव्यात्मा** 'काव्यं ग्राह्यमलङ्कारात्, सौन्दर्यमलङ्कार' इति। 'रीतिरात्मा काव्यस्ये'—ति यदेतस्यैव वचनान्तरं तद्धि अर्थवादरूपमेव, न तु प्रतिज्ञावचनम्। प्रतिपादितमेतदपि वितत्यास्माभि: काव्यालङ्कारकारिका— परिशेषे। मृग्यन्तेऽन्विष्यन्ते मृगयार्थमिति वन्यपशुमात्रं क्रोडीकुर्वाणाया: हरिणमात्रसीमितत्वं यत् सा खलु दुर्नियतिरेव मृगपरिभाषाया:। वस्तुतस्तु आरण्यका: सर्व एव चतुष्पदा मृगपदवाच्या:। अलङ्कारपरिभाषाऽपि मृगपरिभाषासगन्धैवार्थसंकोचवैशसवज्राभिनिपाते। अलङ्कारत्वं हि सर्वेषामेव काव्यधर्माणामव्यभिचारी धर्म:। तच्चेदमलङ्कारत्वं फलैकानुमेयम्। अलमिति

यदव्ययं तस्य पर्याप्तिरप्यर्थः प्रसिद्ध एव। कारपदमत्र ककारमकारादिष्विव स्वरूपपरतया नेयः। ततश्च पर्याप्तिरेव परितोषः, परा तृप्तिः, विश्रान्तिरिति पर्यायशतमश्नुवानालङ्कारपदस्य प्रवृत्तये निमित्तायेत, क्रोडीकुर्वीत च सर्वानप्यन्यान् काव्यधर्मान् स्वविषयत्वेन। न चासौ कामचारः, भामहादिषु जगन्नाथादिषु च परिभाषाया अस्या अस्मिन्नेवार्थे प्रसिद्धत्वात्। एवं चालंभाव एवात्रालङ्कारः। स एषोऽलंभावश्च सर्वेषामेव काव्यधर्माणामपरिहार्यो विशेषः, एतं विना रसादीनामपि काव्यधर्मत्वाप्रसिद्धेः। उक्तमेवेदं वितत्य काव्यालङ्कारकारिकायामस्माभिः—

**अलंभावो ह्यलङ्कारः स च सौन्दर्यतत्कृतोः ।**
**विभक्तात्मा विभुर्जीवब्रह्मणोश्चिद्घनो यथा ।।**

इति। (कारिका २८)

**अनलो भगवान् मूलभूतौ विश्वचमत्कृतेः ।**
**पुष्पवन्तावभिव्याप्य यथा सम्यग् विराजते ।। (२९)**

**अलङ्कारोऽपि काव्यस्य तथा सौन्दर्यतत्कृतोः ।**
**अभिव्याप्य स्थितस्ताभिस्ताभिर्व्युत्पत्तिभिर्विभुः ।। (३०)**

**वटस्य बीजं वृक्षश्च महाञ्छाखाशतैर्वृतः ।**
**तस्य चित्रं च यत् तत्राप्यलंभावोऽयमीक्ष्यताम् ।। (३१)**

**शैलः शिला तथा मूर्त्तिर्मृत्स्ना पिण्डस्तथा घटः ।**
**एतत्त्रिकेऽप्यलंभावः सुमनोभिरवेक्ष्यताम् ।। (३२)**

इति च।

दर्शनमिदं वृत्त्या विशद्य प्रत्यपादीति नाऽत्र वैशद्याय प्रवर्त्यते। अयमत्र निष्कर्षो यद् ध्वनिसंप्रदायो महाविषयाणामपि पदार्थानामल्पविषयतायां संरब्धः स्वैरवृत्तायते।

**अयञ्चाऽत्र पञ्चमः प्रश्नः।** 'विभावानुभावव्यभिचारिसात्त्विकभाव'—प्रतिपादिका या काव्यार्थसंपत् सा खलु का, अलङ्कारो वा, गुणो वा? तत्कृतः काव्यार्थस्य य उपस्कार आनुभविक एव सः। ततश्च नासौ न काव्यधर्मः। न चासौ वस्तुमात्रत्वेनावहेलयितुं शक्या, तत्रापि चमत्कृतेरनुभवात्। किं कृतो नन्वत्र चमत्कार इति पर्यनुयोगे भवन्त एव पात्रायन्ते, न वयम्, अस्मन्मते तत्र रसोक्तिनाम्नोऽलङ्कारस्य भोजराजादिभिरुद्घाटिताभ्यन्तरचक्षुर्भिः प्रतिपादितचरस्य जागरूकत्वात्। रसः स्वप्नेऽपि वाच्यत्वं न सहत इति यो ग्रन्थिः सतृणाभ्यवहारिता सा, न विमृश्यकारिता। रस—प्रतिपादिका या सामग्री तस्या वाच्यत्वे का नु हानिः? रसप्रतिपादकसामग्र्या उक्तिरेव रसोक्तिः। स्मरणीयोऽत्र भरतः 'रस इति कः पदार्थः? आस्वाद्यत्वात्'—इति षष्ठेऽध्याये प्रतिजानानः। येषां पुनरास्वाद एव रस इति ग्रहस्तेऽप्यास्वादविषय—निर्धारणे कस्मिन्नु कूपे निपत्य लज्जां रक्षेयुर्नाभिवादयेयुर्यदि विभावादिसामग्रीं तत्त्वेन। कलाभिः परिवेषितयाऽनया सचेतसां परिवृते चेत्यधातौ प्ररोहतितरां रत्यादिकन्दलिका गूढं तस्थुषी। तामेवेमां रसात्मतया परिणतामास्वदन्ते मार्मिकाः। न च चर्वणाकाले ततोऽपयान्ति विभावा, अनुभावाः, सात्त्विकाः, सञ्चारिणः, शब्दाः, तद्गता अनुप्रासादयः, अर्थाः, तद्गता उपामादयः, वैदर्भी च। सोऽयमपूर्वः षाडवः। पानक एष रसः। नास्त्यत्र प्रसरः पर्यनुयोगस्य। न ह्येव प्रसहते पर्यनुयोग आनुभविके विषये। सामग्र्या अस्याः स्थानं किम्, काव्यं वा लोको वा? वाङ्मयवीथीप्रविष्टानामेव इदंविचारा धीः। ततो नास्त्यत्र प्रसरः पक्षान्तरस्य लोकरूपस्य। अथ विम्रष्टव्यम्, यदि नाम काव्यस्यैवेष विशेषस्तर्हि भवितव्यमेव तत्रानेन वैशेषिकेण धर्मेण। उच्यते चैष एवाऽत्रालम्भावतयाऽलङ्कारतया च रसोक्तिरिति। अन्वयो व्यतिरेकश्च तामिमां सामग्रीं काव्यनिष्ठामेव समर्थयतः। तत एवोत्थाय सहृदयहृदयदहराकाशमियं व्याप्य परिमूर्च्छति। सामग्र्या अस्या एव कृते हृद्यहृद्या मधुरमधुराश्चोदगारा

वामनाचार्याणाम् (३.१.२ वृत्तौ)—

**युवतेरिव रूपमङ्ग! काव्यं स्वदते शुद्धगुणं तदप्यतीव ।**
**विहितप्रणयं निरन्तराभिः सदलङ्कारविकल्पकल्पनाभिः ॥**

**इति।**

**यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनवन्ध्यमङ्गनायाः ।**
**अपि जनदयितानि दुर्भगत्वं नियतमलङ्करणानि संश्रयन्ते ॥**

**इति च।**

अत्राङ्गनेति यत् पदमेतन्निष्पत्त्यैव क्रोडीकृतं सौन्दर्यम्, 'लोमादि-पामादिपिच्छादिभ्यः शनेलचः' '(५.२.१००) इति सूत्रे पठितेन 'अङ्गात् कल्याणे' इति गणसूत्रेण प्राशस्त्येऽर्थे 'न'—प्रत्ययस्य विधानात्। या वै रूपयौवनाभ्यां प्रशस्ता तस्य निरलङ्कारोऽप्यात्मा सौभगमुद्गिरति, उच्यते च सा 'अङ्गने'—ति। तत्रैव यदि कुङ्कुमपीतिकादीनि स्वस्तिकप्रभृतीनि वाऽनुल्वणतया योज्यन्ते तदीयास्वादमात्रागतमातिशय्यमुपजायते, अन्यथा तु दौर्भाग्यमेव प्रतिफलति। प्रकृते च यावन्तः काव्यार्थास्तेषां विभावाद्यन्यतमत्वं निसर्गसिद्धमेव। तेषामेषां प्राशस्त्येऽयत्नसिद्धः स्पृहणीयभावः काव्यबन्धे स्वयमापतति। अथ यदि रूपकादयो विच्छित्तयोऽपि पदमादधति स्पृहणीयत्वातिशय उपपद्यते। तस्या अस्याः सामग्र्या इतरवैलक्षण्येऽलंभावातिरिक्तं किन्नु कारणायेत। स एवालंभावः शोभापदेनापि प्रतिपाद्यते, सौन्दर्यपदेनेव। अलङ्कारपरिभाषाया नोचितं तर्हि विभावादिसामग्र्या बहिष्करणम्। आस्वादस्य रसत्वे तु समनन्तरोक्तस्य मुनिवचनस्य विरोधः, संग्रहापत्तिश्चालङ्काराणामपि, तेषामास्वादस्यापि शब्दशक्त्या अस्पृष्टत्वात्। एवं च रसोक्तेरलङ्कारभावे तर्कतः प्रसिद्धे निरर्थक एव प्रयासोऽलङ्कारकोटे रसादीनां प्रच्यावनायाः। अतश्च युक्त एव संरम्भः प्राचां काव्यगतां रसवत्तां वीक्ष्य रसवत्त्वनाम्नोऽलङ्कारस्याभ्युपगमे। अथ—

**प्रधानेऽनयत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।**
**काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ।।**

इति या संप्रदायविरुद्धाऽऽनन्दवर्धनस्य प्रतिज्ञा (२.५ ध्व०) तत्रापि ज्ञीप्सामहे रसवदिति पदे मतु स्थाने वतिं प्रतिपादयितुं केनास्यभ्यनुज्ञात इति यदि नाऽत्र स्वैरत्वयोगः अस्ति च संप्रदायः। प्रधानस्यैव रसत्वमिति। ततश्च केयं वाचोयुक्तिर्यदत्र रसादीनामप्यङ्गत्वम्। यदि च तत्र रसपदेन तस्य स्थायिनो भावस्य ग्रहणमिति विवक्षा तर्हि परिणतं विरुद्धमतिकृत्त्वम्। अन्य एव हि स्थायी रसाद् रस इव स्थायिनो भावात्। निरर्थिकैव तर्हि कदर्थना मतुपो वतित्वेन ग्रहणस्य, भावयुक्तत्वस्यैव विवक्षायां भाववदिति प्राचामेव मार्गस्य प्रतिप्रसवात्।

**अथ षष्ठः प्रश्नः**

सर्वेषामप्यलङ्काराणां गुणीभूतव्यङ्ग्यकोटौ गणना चेत् किंवाऽवशिष्यते यदर्थं चित्रमिति तृतीया काव्यविधाङ्गीक्रियते ध्वनिसंप्रदायिना? ननु चित्रत्वेन तत्र प्रातिभासिकत्वमेव काव्यत्वे प्रतिपिपादयिषितम्, यदुक्तं ध्वन्यालोकवृत्तौ 'न तन्मुख्यं काव्यं काव्यानुकारो ह्यसा'विति। (३.४२ ध्व०का० वृत्तिः) ततश्च द्विविधत्वमेवानन्द– वर्धनाचार्यस्याभिमतं काव्य इति चेत् कारिकाग्रन्थस्य तर्हि विरोधः। कारिकायाम्–

**प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते ।**
**काव्ये उभे ततोऽन्यद् यत् तच्चित्रमभिधीयते ।। (३.४१)**

इत्येवं चित्रे काव्यत्वं काव्ये च चित्रत्वं विधेयतयोपस्थाप्य–

**चित्रं शब्दार्थभेदेन द्विविधं च व्यवस्थितम् ।**
**तत्र किञ्चिच्छब्दचित्रं वाच्यचित्रमतः परम् ।। (३.४२)**

इत्येवं तत्र द्वैविध्यमपि विधीयते। प्रत्याख्येयतया विवक्षिते वस्तुनि कीदृशी

ननु लक्षणे भेदे च प्रवृत्तिराचार्यस्य। अत एव मम्मटस्य चित्रे काव्यत्वधीः 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्' इत्येवम् (काव्यप्रकाशस्य प्रथम उल्लासे)। तमेवानुसरति पण्डितराजः। तस्यापि चित्रात्मना तुरीयता काव्यस्याभिमता। अथ विश्वनाथः प्रतिगामीति तन्मतेन चित्रत्वेनाऽकाव्यत्वमेव प्रतितिष्ठेदित्युच्यते, पृच्छामस्तर्हि सोऽयं मतिकलह आनन्दवर्धनोपज्ञ एव कारिकाद्वयेन चित्रे काव्यत्वं प्रतिपाद्य वृत्त्या काव्यानुकारो ह्यसौ न, तन्मुख्यं काव्यमित्येवमकाव्यत्वं प्रतिपादयितुस्तस्यैष स्वविरोध एव कश्चिद् यदि नास्ति भेदः कारिकाकारवृत्तिकारयोः। भेदे तु यथायथमत्र व्यवस्थाप्यम्, चित्रे काव्यत्वमिति कारिकाकारः, अकाव्यत्वमिति च वृत्तिकारः। मम्मटो हि कारिकामतं सिद्धान्तयति, विश्वनाथः पुनर्वृत्तिमतम्। पण्डितराजः पुनः खड्गबन्धादिष्वकाव्यत्वम्, शब्दालङ्कारप्रधानेषु तु काव्यत्वं पश्यन् कलहमिमं प्रशमयति।

त इमे षट् प्रश्नाः। अत्रानुभवं प्रमाणयतां तत्त्वाभिनिवेशिना—मेवाधिकार इति त एव प्रसीदन्तुतमामवधातुमिति निवेद्य ब्रूम ॐ तत्सदिति।।[१]

◈

१. मुद्रित एष लेखो लखनऊस्थिताया उत्तरप्रदेशसंस्कृतअकादमी—संस्थायाः 'परिशीलन'—नाम्न्याः शोधपत्रिकायाः सप्तमेऽङ्के १९९४ ख्रीष्टाब्दीये।

## व्यञ्जनाविषये राजशेखरः[1]

आलङ्कारिकमहत्तरस्तत्रभवानानन्दवर्धनाचार्यो विक्रमसंवत्सरस्य दशमे शतके स्वोपज्ञार्थान्तरप्रत्यायनौपयिकं व्यापारं शब्दगतातिरिक्तव्यापारतया प्रख्याप्य व्यञ्जनानाम्ना प्रत्यस्थापयत[2]। किन्तु तमिमं तच्छतकीया एव साहित्यवेधसो नाभ्यरोचन्त। राजशेखरस्तच्छतकीय एव[3]। स हि ध्वन्यालोककर्तारमानन्दवर्धनं नाम्नोद्धरति, ध्वन्यालोकगतान् विषयांश्च तत्र तत्रोपनिबध्नाति। यथा चैतत् तदधोनिर्दिष्टेभ्यः संदर्भेभ्यः स्पष्टम्। तथा हि—

१. आनन्दवर्धनो व्युत्पत्त्यपेक्षया प्रतिभां प्रगुणां श्रेयसीं च मनुते—

**अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः ।**
**यस्त्वशक्तिकृतस्तस्य स झटित्यवभासते**[4] ।। इति।

तमेतं संदर्भं राजशेखर एवं स्मरति—

**प्रतिभाव्युत्पत्त्योः प्रतिभा श्रेयसी—त्यानन्दः**[5] ।
**सा हि कवेरव्युत्पत्तिकृतं दोषमशेषमाच्छादयति** ।। तदाह—

---

१. लेख एष जबलपुरविश्वविद्यालयसंस्कृतविभागायोजितायां राजशेखरगोष्ठ्यां पठितो विचारितश्च १९७३ फरवरीमासे।

२. वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता ।
व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम् ।। (ध्व० १.१८)।

३. राजशेखराश्रयदाता कान्यकुब्जाधीश्वरः महेन्द्रपालो वि० ९६० वर्षे राज्यमधिरूढः, आनन्दवर्धनाश्रयदाता कश्मीराधिपः अवन्तिवर्मा च ९४१ वर्षे राज्यादवारुरोह। ततश्च पितामहपौत्रवदनयोराचार्ययोर्वयोभेदः।

४. ध्वन्यालोक ३.६ वृत्तिः

५. काव्यमीमांसायाः पञ्चमाध्यायारम्भे। बड़ौदासंस्करणस्य १६ पृष्ठे।

अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः ।
यस्त्वशक्तिकृतस्तस्य झगित्येवावभासत ।। इति

२. आनन्दवर्धनो ध्वन्यालोकस्य चतुर्थ उद्योते कवीनां बुद्धिसंवादं—

संवादास्तु भवन्त्येव बाहुल्येन सुमेधसाम् ।
नैकरूपतया सर्वे ते मन्तव्या विपश्चिता ।। ११ ।।

एवमुदारतया प्रतिष्ठाप्य तद्भेदांश्च—

संवादो ह्यन्यसादृश्यं तत् पुनः प्रतिबिम्बवत् ।
आलेख्याकारवत् तुल्यदेहिवच्च शरीरिणाम् ।। १२ ।।

एवमुपस्थाप्य तेषां हेयोपादेयतामेवमुपश्लोकयति—

तत्र पूर्वमनन्यात्म तुच्छात्म तदनन्तरम् ।
तृतीयं तु प्रसिद्धात्म नान्यसाम्यं त्यजेत् कविः ।। १३ ।।

आत्मनोऽन्यस्य सद्भावे पूर्वस्थित्यनुयाय्यपि ।
वस्तु भातितरां तन्व्याः शशिच्छायमिवाननम् ।। १४ ।।

अक्षरादिरचनेव योज्यते यत्र वस्तुरचना पुरातनी ।
नूतने स्फुरति काव्यवस्तुनि व्यक्तमेव खलु सा न दुष्यति ।।१५।।

अमुमेव संवादवृत्तान्तं राजशेखरोप्येवमुपनिबध्नाति—

अर्थः स एव सर्वो वाक्यान्तरविरचना परं यत्र ।
तदपरमार्थविभेदं काव्यं प्रतिबिम्बकल्पं स्यात् ।।

कियतापि यत्र संस्कारकर्मणा वस्तु भिन्नवद् भाति ।
तत् कथितमर्थचतुरैरालेख्यप्रख्यमिति काव्यम् ।।

विषयस्य यत्र भेदेऽप्यभेदबुद्धिर्नितान्तसादृश्यात् ।
तत् तुल्यदेहितुल्यं काव्यं बध्नन्ति सुधियोऽपि ।।

(काव्यमी० १२ पृ० ६३)

**संवादवृत्तान्त एष संस्कृतकाव्यशास्त्रे ध्वन्यालोकोपक्रान्त एव वैशद्येन वामनेऽस्य सूत्रात्मतामात्रस्यैवोपलम्भात्[१]। भामहदण्डि–भ्यामस्पृष्टत्वात्, काव्यालङ्कारसारेतरस्य उद्भटग्रन्थस्य चानुपलम्भात्।**

३. आनन्दवर्धनः काव्यस्य शरीरं शब्दार्थरूपमुल्लिखति–"शब्दार्थशरीरं तावत् काव्यमि"[२]–ति। राजशेखरोपि काव्यपुरुषस्य शरीरे शब्दार्थरूपतामेव पश्यति ब्रवीति च–"शब्दार्थौ ते शरीरम्" इति।

४. आनन्दवर्धनः काव्यस्यात्मतां "काव्यस्यात्मा ध्वनिरि" ति ध्वनौ पश्यति, ध्वनेरात्मतां च–

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।**
**क्रौचद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ।।** इत्येवं रसे।

राजशेखरोऽपि काव्यपुरुषशरीरे रसस्यैव आत्मतामूरीकुरुते–"रस आत्मा" इति।

५. आनन्दवर्धनः–

(क) कविना काव्यमुपनिबध्नता सर्वात्मना रसपरतन्त्रेण भाव्यम्[३]

(ख) मुख्या व्यापारविषयाः सुकवीनां रसादयः[४]।

(ग) **रसवन्ति हि वस्तूनि सालङ्काराणि कानिचित् ।**
**एकेनैव प्रयत्नेन निर्वर्त्यन्ते महाकवेः**[५]**।।**

(घ) **दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।**
**सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः**[६] **।।**

---

१. अर्थो द्विविधः, अयोनिरन्यच्छायायोनिर्वा (का०सू०वृ० ३.२.७)
२. ध्वन्यालोकारम्भ एव।
३. ध्वन्यालोक ३ पृ० ३३६ चौखं० सं० १९९७
४. ध्वन्यालोक पृ० ३६४
५. ध्वन्यालोक २, पृ० २२२
६. ध्वन्यालोक ४, पृ० ५२८

इत्येवं सर्वत्रैव रसपरिग्रहे संरम्भवानालोक्यते। राजशेखरोऽपि रसवत्तां काव्यजीवातुतया नयति, ब्रवीति च लोल्लटमुखेन–

(क) अस्तु नाम निस्सीमार्थसार्थः, किन्तु रसवत एवोपनिबन्धो युक्तो न नीरसस्य' इत्यापराजितिः।[१] (का०मी०अ० ९ पृ० ४५)

(ख) रसोचितशब्दार्थसूक्तिनिबन्धनः पाकः।
(का०मी०अ० ६ पृ० २०)

(ग) अस्तु वस्तुषु मा वा भूत्, कविवाचि रसः स्थितः।[२]

(घ) **रसः कोऽप्यस्तु काप्यस्तु रीतिः कोऽप्यस्तु वा गुणः ।**
**सर्वं सगर्वं कर्णाटाष्टकारोत्तरपाठिनः ।।**[३]

एवमेव आनन्दवर्धनस्तत्र तत्र 'रचना मार्गः, अलंकारः' इत्येवंविधानन्यानपि काव्यधर्मान् स्मरति। राजशेखरोऽप्येषु सर्वेष्वपि विषयेष्ववधत्ते। तत एव च बहुशः "रचनाकविः, अलंकारकविः, उक्तिकविः, मार्गकविः, शास्त्रार्थकविः"[४] इत्यादिषु वचनसन्दर्भेषु तस्य नितरां संरभ्भः।

वस्तुतो राजशेखर आनन्दवर्धनस्य निविष्टतमोऽध्येता। आनन्द–वर्धनः 'शब्दार्थौ सहितौ काव्यम्' भामहोक्तिमिमामभ्यन्तरीकृत्य–

'अनपेक्षितार्थविशेषा–क्षर–रचनैव बन्धच्छायेति नेदं नेदीयः सहृदयानाम्। एवं हि सति अर्थानपेक्षचतुरमधुर–वचन–रचनायामपि काव्यव्यपदेशः प्रवर्त्तेत। शब्दार्थयोः साहित्येन काव्यत्वे कथं तथाविधे विषये काव्यव्यवस्थेति चेत् परोपनिबद्धार्थविरचने यथा तत्काव्यत्वव्यवहारः तथा तथाविधानां काव्यसन्दर्भाणाम्"[५]–इति

१. अस्माकं ग्रन्थः 'साहित्यसन्दर्भाः'। तत्रापि साहित्यतत्त्वविमर्शनामा द्वितीयो लेखः। प्रकाशकः कालिदाससंस्थानम् २८, महामनापुरी, वाराणसी–५
२. काव्यमी० अ० ९, पृ० ४६
३. काव्यमी० अ० ८, पृ० ३४
४. काव्यमी० अ० ७, पृ० १७
५. ध्वन्यालोकचतुर्थोद्योते पृ० ५३७–८

यदेव साहित्यतत्त्वम् अनवहिततयैव साहित्यशब्दोपन्यासपूर्वमुदगिरत् राजशेखरस्तदेवादाय अलंकारप्रस्थानस्यास्याभिख्यामेवाभिनवामारचयत् 'साहित्यविद्ये'—ति, उज्जगार च प्रथमं वारं कृत्स्नेऽपि साहित्येतिहासे—

'आन्वीक्षिकी—त्रयी—वार्त्ता—दण्डनीतयश्चतस्रो विद्या इति कौटल्यः, पञ्चमी साहित्यविद्येति यायावरीयः सा हि चतसृणामपि विद्यानां निष्यन्दः। ०००। शब्दार्थयोर्यथावत् सहभावेन विद्या साहित्यविद्या।[१]

इत्येवं साहित्यविद्यायाः पृथग्विद्यात्वम्। संवादगाथायामिव साहित्यतत्त्वगाथा—यामप्यस्यामानन्दवर्धनसूत्रमेवासौ व्याचिख्यासति[२], भोज—कुन्तक—साहित्यमीमांसाकृद्भ्यो विचारमार्गं च प्रदिशति बहुविधम्।

आनन्दवर्धनमसौ नितान्तमेवाभ्यास्यदिति तत्तद्वाक्यघटकीभूत—पद—तदभिव्यक्तिप्रकारा—भ्यामपि सुखमुन्नेतुं शक्यते।[३] एवं सत्यपि

राजशेखरः शब्दवृत्तिविषये आनन्दवर्धनस्यानन्दं न वर्धयति। यथा चैतत् तदस्यानुषङ्गपतितायाः शब्दार्थमीमांसायाः स्पष्टम्। तत्र—

१. शब्दः—शब्दविषये आचार्य एष लिखति—

'व्याकरणस्मृतिनिर्णीतः शब्दो निरुक्तनिघण्ट्वादिभिर्निर्दिष्टः' इति।[४]

२. अर्थः— अर्थविषये पुनरसौ विविधानि दर्शनान्युपस्थापयति। तत्र—

मीमांसा, बौद्धदर्शनं चेति द्वयमेव प्रकृतानुरूपम्। तत्र—मैमांसिकीयं मतं—

---

१. काव्यमीमांसा अ० ३, पृ० ४—५

२. अस्माकं गन्थः 'साहित्यसन्दर्भः। तत्रापि साहित्यतत्त्वविमर्शनामा द्वितीयो लेखः।

३. आनन्दवर्धनो वदति— शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते ।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम् ॥ १॥

राजशेखरोऽनुवदति—'शब्दार्थशासनविदः कति नो कवन्ते' इत्यादि
(काव्यामी० अ०—१३, पृ० ७८)।

४. का० मी० अ०—६

'शब्दस्य सामान्यमभिधेयम्, विशेषश्चार्थः। अत्र—

**सामान्यवाचि पदमप्यभिधीयमानं**
**मां [१] प्राप्य जातमभिधेय—विशेषनिष्ठम् ।**
**स्त्री काचिदित्यभिहिते सततं मनो यत् ।**
**तामेव वामनयनां विषयीकरोति ।।**[२] इति,

बौद्धीयं च मतम्—

'विवक्षापूर्वा हि शब्दास्तामेव विवक्षां सूचयेयुः। अत्र—

**भवतु विदितं शब्दा वक्तुर्विवक्षितसूचकाः**
**स्मरयति यतः कान्ते कान्ता बलात् परिचुम्बति ।**
**न न न म म मा मां स्प्राक्षीर्निषेधपरं वचो**
**भवति शिथिले मानग्रन्थौ तदेव विधायकम् ।।**[३] इति

संक्षिपति। अत्रेदं निध्येयं यन्मताभ्यामाभ्याम् अन्विताभिधानम् अभिहितान्वयः, तात्पर्यञ्चेति वादत्रयं क्रोडीक्रियते। नास्ति चात्र कुत्रापि व्यञ्जनायाः स्पर्शोऽपि।

३. व्यापारः—व्यापारमधिकृत्य राजशेखरो यदपि ब्रवीति तत इदमेव केवलमायाति यदसावभिधामेव केवलां शब्दव्यापारतयाभ्युपैति। तथाहि—

(क) पदानामभिधित्सितार्थग्रथनाकरः सन्दर्भो वाक्यम्। स त्रिधा—ऽभिधाव्यापारः वैभक्तः, शाक्तः, शक्तिविभक्तिमयश्चेति[४]।

(ख) शब्दार्थयोश्चाभिधानाभिधेयव्यापारप्रगुणतामवबुध्येत्[५] इति।

---

१. मां मीमांसकमित्यर्थः। 'सामान्यावच्छादितो विशेषरूप एवासौ प्रतिपद्यते' इति मम्मटोपस्थापितोऽन्विताभिधानवादोऽत्र स्पष्टं कृतपदः। अभिहितान्वये सामान्यं जातिः, विशेषश्च व्यक्तिः।

२-३. का० मी० अ०—८, पृ० ३६

४. का० मी० अ०—६, पृ० २२

५. का० मी० अ०—९, पृ० ४८

(ग) व्याकरणस्मृतिनिर्णीतः शब्दः तदभिधेयश्चार्थः[१] इति

(घ) उक्तिगर्भमभिधानम्, सर्वतो रहस्यान्वेषणं च[२] इति,

इति यान्यस्य वचनानि एतेभ्योऽभिधाया एव शब्दवृत्तिता प्रमाणिता भवति, न लक्षणाया नापि च व्यञ्जनायाः।

अत्रेदमवधेयम्—

ध्वन्यालोकं प्रातिपद्येनाधीतवानपि राजशेखरो व्यञ्जनां कण्ठरवेण कथं नोल्लिखति। असौ रसमूरीकुरुते, तद्गतं विप्रलम्भनामानं भेदमुल्लिखति, रसनिबन्धे नीरसत्वपरिहाणौ च ध्यानातिशयं वितरति किन्तु एतत्सर्वप्राणभूतां व्यञ्जनां न स्मरति। किमत्र कारणम्।

अर्थविचारे राजशेखरः अर्थयोनिं नवमे, अर्थव्याप्तिं दशमे, अर्थाहरणोपायांश्च त्रयोदशेऽध्याये काव्यमीमांसायां सविस्तरमुपस्थापयति। तत्र अर्थव्याप्तिप्रस्तावे रसं प्रतिगृह्णन्नपि स व्यञ्जनां, व्यञ्जनाप्रतिपाद्यतां वा अर्थस्य परिहरति। अर्थहरणप्रसंगे आलेख्यप्रख्यस्य अष्टौ, अष्टौ च तुल्यदेहितुल्यस्य अर्थस्य भेदानुल्लिखति, सभेदप्रभेदोपन्यासं च तानुपपादयति, किन्तु तत्रापि प्रतीयमानतामर्थस्य नोल्लिखति। अस्ति चानयोर्भेदयोर्व्यञ्जनाया एव साम्राज्यम् आनन्दवर्धनमतेन।

एतेन स्पष्टं यद् राजशेखरो ध्वन्यालोककारस्य व्यञ्जनाख्यं शब्दव्यापारान्तरं प्रति तथैव विप्रतिपत्तिकषायितो यथा तदव्यवहितोत्तरभवो भोजदेवः, यथा च तदव्यवहितपूर्वभवो जयन्तभट्टः। भोजदेवो हि ध्वनिं तात्पर्यरूपं मनुते,[३] जयन्तभट्टश्च तस्य गाथामपि न स्मरति। स हि वैयाकरणमतोपन्यासभूमिकायां स्फोटविचारे स्फोटस्य ध्वनिव्यङ्ग्यतां यद्यपि

१. का० मी० अ०—६, पृ० २१

२. का० मी० अ०—१०, पृ० ४९

३. एतदर्थं द्रष्टव्योऽस्माकं 'भोजदेवस्य ध्वनिसम्बन्धिनो विचारा' इति लेखः 'साहित्यसन्दर्भा' इति ग्रन्थे प्रकाशितः।

स्मरति तथापि नास्ति तेन ध्वनिकृतोऽभीष्टसिद्धिः। भिन्न एव हि स ध्वनिः, भिन्नैव च सा व्यञ्जना। नास्ति ताभ्यामानन्दवर्धनोपज्ञयोर्ध्वनिव्यञ्जनयोः सम्बन्धः।

सर्वथा व्यञ्जनायां तस्याः शब्दगतातिरिक्तव्यापारतायां च राजशेखरो ध्वनिकारेण नास्त्येव संवादभाक् क्षेमेन्द्र इवाभिनवगुप्तेन साहित्ये स्वगुरुणा। यतो राजशेखरो व्यञ्जनाविषये वाचंयमः, तत एकतरपक्षनिर्णये यद्यपि नह्येव लभामहे विनिगमनां तथापि साधक–बाधकप्रमाणोपन्यास–दृशा क्रियमाणे विचारे तु राजशेखरे साधकप्रमाणसंपन्नतां न वीक्षामहे।।

◈

# भोजदेवस्य ध्वनिविचारः

शृङ्गारप्रकाश—सरस्वतीकण्ठाभरण—नाम्नोः काव्यालङ्काररत्नयोः संघटयिता श्रीभोजः १०५८—१११३ विक्रमाब्देषु मालवमहीं तदा शशास यदा संस्कृतकाव्यशास्त्रे—

**अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः ।**
**वाच्य—प्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥**[१]

इत्येवं प्रतिष्ठापितस्य प्रतीयमानाख्यस्यार्थान्तरस्य प्रतीतये—

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥**[२] इति।

**उक्त्यन्तरेणाशक्यं यत् तच्चारुत्वं प्रकाशयन् ।**
**शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयीभवेत् ॥**[३]

इति च शब्दनिष्ठत्वेनापि स्वीकृतचरस्य व्यञ्जनानाम्नो व्यापारान्तरस्य प्रत्यादेशोऽपि प्रचलति स्म। प्रत्यादेशेऽस्मिन् द्वैविध्यमासीत्। एके तं तात्पर्यवृत्त्या गतार्थयितुमयतिषत, अन्ये चानुमानेन हेत्वाभासाश्रितेन। प्रथमेषु—

**तात्पर्यानतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः ।**
**ध्वनिश्चेत् स्वार्थविश्रान्तं वाक्यमर्थान्तराश्रयम् ॥**

**तत्परत्वं त्वविश्रान्तौ तन्न विश्रात्यसंभवात् ।**
**एतावत्येव विश्रान्तिस्तात्पर्यस्येति किं कृतम् ।**
**यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम् ॥**

---

१-३. ध्वन्यालोकप्रथमोद्योतकारिकाः।

प्रतिपाद्यस्य विश्रान्तिरपेक्षापूरणाद् यदि ।
वक्तुर्विवक्षिताप्राप्तेरविश्रान्तिर्न वा कथम् ।।

पौरुषेयस्य वाक्यस्य विवक्षापरतन्त्रता ।
वक्त्रभिप्रेततात्पर्यमतः काव्यस्य युज्यते ।।[१]

इति न्यायमातिष्ठमानो भोजदेवस्यैव पितृव्यसभारत्नं श्रीधनिकः प्रगल्भते स्म, परेषु च–

"व्यञ्जकत्वं शब्दानां गमकत्वम्, तच्च लिङ्गत्वम्, अतश्च व्यङ्ग्यप्रतीतिः लिङ्गप्रतीतिरेवेति लिङ्ग–लिङ्गि–भाव एव तेषां व्यङ्ग्यव्यञ्जकभावः, नापरः कश्चित्। अतश्चैतदवश्यमेव बोद्धव्यं यस्माद् वक्त्रभिप्रायापेक्षया व्यञ्जकत्वं त्वया प्रतिपादितं वक्त्रभिप्रायश्चानुमेयरूप एव।"[२] इति ध्वनिकृदुपस्थितपूर्वपक्षादेवोन्मीलितप्रतिभः प्रायेण भोजसामयिक एव महिमाचार्यः–

शब्दस्यैकाभिधा शक्तिः अर्थस्यैकैव लिङ्गता ।
न व्यञ्जकत्वमनयोः समस्ति...................... ।।

तस्मात् स्फुटतया यत्र प्राधान्येनान्यथापि वा ।
वाच्यशक्त्यानुमेयोऽर्थो भाति तत् काव्यमुच्यते ।।

वाच्यप्रत्येययोर्नास्ति व्यङ्ग्यव्यञ्जकतार्थयोः ।
तयोः प्रदीपघटवत् साहित्येनाप्रकाशनात् ।।

पक्षधर्मत्व-सम्बन्ध-व्याप्ति-सिद्धि-व्यपेक्षणात् ।
वृक्षत्वाम्रत्वयोर्यद्वद् यद्वच्चानलधूमयोः ।।
अनुमानत्वमेवात्र युक्तं तल्लक्षणान्वयात् ।।[३]

---

१. दशरूपकावलोकस्य प्रकाशः ४।

२. १९९७ वि० सं० चौखंभातः प्रकाशितस्य ध्वन्यालोकस्य ४४८–तमे पृष्ठे, अथवा ३.३३–वृत्तिः।

३. व्यक्तिविवेकस्यास्मदनुवादपुस्तके १११–१२ पृष्ठे।

इति प्रतिपद्यमानः। तदित्थं प्रावर्तिष्ट मतिकलहो मालव–कश्मीरयोः– ध्वनिमाश्रित्य।

कलहस्यास्य मूलं भूमिकाभेद आसीत्। एके शरीरं भूमिकीकृत्य काव्यस्य स्वालक्षण्यं निरदिधारयिषन्, अपरे पुनः कवेरेव हृदयमाश्रित्य काव्यसर्वस्वमुदजिघाटयिषन्। अत्र द्वितीया दिक् स्वयं ध्वनिकृतापि न नाऽभ्युयुपागामि–

**सरस्वती स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम् ।**
**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभा–विशेषम् ।।**[१]

इति कवयता। अयं त्वत्र विशेषो यद् ध्वनिकारः प्रमेयपक्षं बहु मत्वापि प्रमाणपक्षं निराकरणपात्रं नामंस्त। अत एवासावुपजीव्यतया शरीरमेव काव्यस्याधिश्रित्य कविविवक्षितमर्थं परिचेतुमयतिष्ट। तत एवानेन ध्वनेरर्थरूपतां स्वीकृत्यापि शब्दव्यापाररूपतापि स्वीकृता।

भोजदेवः शारदादेश–महाकालधाम्नोः कश्मीर–मालवयोः कलहमिमं शक्ति–शक्तिमतोः कलहमिव शमयिष्यन् कविविवक्षां सार्वभौमीकृत्य 'अनुमानं ध्वनिश्च' इत्युभयत्रापि तां प्रति सामन्तभावं प्रत्यपीपदत्, प्रत्यतिष्ठिपच्च तात्पर्यस्य त्रिरूपत्वम्–अभिधीयमानत्वेन, प्रतीयमानत्वेन, ध्वनित्वेन च। एषु हेतुहेतुमद्भावनिगडितार्थापत्तिविधृतत्वं प्रतीयमानतायाः, निरर्गलप्रसृमरत्वं च ध्वन्यमानतायाः परस्परविभेदकं स्वालक्षण्यम्। उच्यते ह्येतेन शृङ्गारप्रकाशस्य सप्तमे प्रकाशे–"यत्परः शब्दः स शब्दार्थ इति तात्पर्यम्। तच्च वाक्य एवोपपद्यते, पदमात्रेणाभिप्रायस्य प्रकाशयितु–मशक्यत्वात्। तच्च वाक्यप्रतिपाद्यं वस्तु, त्रिरूपं भवति–अभिधीयमानम्,

---

१. ध्वन्यालोकप्रथमोद्योतकारिका षष्ठी।

प्रतीयमानम्, ध्वनिरूपं चेति''[१] इति। स्थिरीक्रियते चैतदुदाहृतिभिस्तत्रैवैवम्—

१. यदुपात्तशब्देषु मुख्य—गौणी—लक्षणाभि: शब्दशक्तिभि: स्वमर्थम—भिधाय उपरतव्यापारेषु 'आकाङ्क्षा—सन्निधि—योग्यतादिभि:' वाक्यार्थमात्रमभिधीयते, तदभिधीयमानम्। यथा गौर्गच्छतीति।[२]

२. वाक्यार्थावगतेरुत्तरकालं वाक्यार्थ उपपद्यमानोऽनुपपद्यमानो वा अर्थप्रकरणौचित्यादिसहकृतो यत् प्रत्याययति, तत् प्रतीयमानम्। यथा—'विषं भुङ्क्ष्व, मा चास्य गृहे भुक्था' इत्युक्ते वरं विषं भक्षितम्, न पुनरस्य गृहे भुक्तमिति प्रतीयते[३] इति।

३. अर्थ—शब्दोपायाद् उपसर्जनीकृत: स्वार्थो वाक्यार्थावगतेरनन्तरम् अनुनादरूपं प्रतिशब्दरूपं वा यद् अभिव्यञ्जयति तद् ध्वनिरूपम्। यथा 'निमिषत्येषेत्युक्ते अक्ष्णोर्निमेषोऽभिधीयते, देवी न भवतीति प्रतीयते, रूपातिशयश्च ध्वनति (ध्वन्यते)।'[४]

'ध्वनिनामासौ तात्पर्यभेद: तात्पर्यस्यैव भेदान्तराभ्यामभिधीयमान—प्रतीयमानाख्याभ्यां समनियत आहो विविक्त:? एवमेव ध्वनेर्यदिदमनुनादरूपत्वं यच्चेदं प्रतिशब्दरूपत्वं तदुभयमप्यन्योन्यनान्तरीयकम्, उत स्वतन्त्रम्' इति प्रश्नद्वयीं समादधतापि मतिमतानेनोच्यते—

'ध्वनिरूपं च न सार्वत्रिकम्। तथाहि यथा निवृत्तेऽभिघाते कस्यचिदेव कांस्यादेर्द्रव्यस्यानुनादो जायते कस्यचिदेव कन्दरादे: प्रतिशब्द:, तथा कस्यचिदेव वाक्यस्य प्रतीयमानाभिधीयमानवाक्यार्थप्रतीतेरनन्तरं ध्वनिरुपलभ्यते।'[५] इति।

ननु 'प्रबन्धेनैतेन तात्पर्यविषयस्यैव त्रैविध्यं साध्यते, न तु

---

१-४. शृङ्गारप्रकाशस्य (शृप्र.) सप्तमप्रकाशस्य ज्योशेरसंस्करणे २४६ पृष्ठे। अत्र 'अर्थशब्दोपायाद्' इत्यस्य 'अभिव्यञ्जयती' त्यत्रान्वय:। डॉ० राघवस्यापि 'भोजाज् शृङ्गारप्रकाश'—ग्रन्थस्य १७३—१८३ पृष्ठेषु शृङ्गारप्रकाशविषय एष उद्धृत:,

५. शृङ्गारप्रकाशस्य ज्योशेरसंस्क० पृ० २४६।

तात्पर्यवृत्तिध्वननव्यापारयोरैक्यम्। ततश्च किं नु ध्वनिसार्वभौमतावादिनां छिन्नम्, ध्वननव्यापारविषयीभूतस्यार्थस्य तैरपि तात्पर्यपदतया पौन:पुन्येन घोषितचरत्वात्। यथा चैतत् तद् ध्वन्यालोकादेव स्पष्टम्। उच्यते तत्र–

**रस–भावादि–तात्पर्यमाश्रित्य विनिवेशनम् ।**
**अलंकृतीनां सर्वासामलङ्कारत्व–साधनम् ।।**[१] इति,

**प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम् ।**
**धत्ते रसादितात्पर्य–पर्यालोचनया पुनः ।।**[२] इति,

**रसादिषु विवक्षा तु स्यात् तात्पर्यवती यदा ।**
**तदा नास्त्येव तत् काव्यम् .................... ।।**[३] इति,

**यस्मिन् रसो वा भावो वा तात्पर्येण प्रकाशते ।**
**संवृत्त्याभिहितौ वस्तु यत्रालङ्कार एव वा ।।**[४] इति च।

उच्यते–तात्पर्यध्वन्यो: सति शब्दवृत्तिताङ्गीकार एवं विप्रतिपाद्येत। न सा स्वीक्रियते भोजेन। तेन अभिधा, गौणी, लक्षणा इति व्यापारत्रयस्यैव शब्दगतत्वेन घोषितत्वात्। यथा चैतत् तदपि शृङ्गारप्रकाशस्य–

"शब्दस्यार्थाभिधायिनी शक्तिरभिधा। तथा स्वरूप इव अभिधेये प्रवर्त्तमान: शब्दो वृत्तित्रयेण वर्तते। ताश्च मुख्या, गौणी, लक्षणेति तिस्र:। तत्र साक्षादव्यवहितार्थाभिधायिका मुख्या, गम्यमानशौर्यादिगुणयोग–व्यवहितार्था गौणी, स्वार्थाविनाभूतार्थान्तरोपलक्षणा तु लक्षणा। तथा हि 'गौ:' इत्ययं शब्दो मुख्यया वृत्त्या सास्नादिमन्तमर्थं प्रतिपादयति, स एव तिष्ठन्मूत्रतादिगुणसंपदमपेक्षमाणो यदा वाहीके वर्तते, तदा गौणी वृत्तिमनुवदति,

---

१. ध्वन्यालोकसंग्रहकारिका, पृ० १९७, चौ० सं० १।

२. ध्वन्यालोक: ३.४०।

३. ध्वन्यालोकसं० का०, पृ० ४९७ चौ० सं० १।

४. ध्वन्यालोक: ३.४२ वृत्ति:।

यदा तु शब्दः स्वार्थतः क्रियासिद्धौ साधनभावं गन्तुमसमर्थः, तदा अभिधेयाविनाभूतमर्थान्तरं लक्षयति, तदा सा लक्षणा वृत्तिः, यथा गङ्गायां घोषः प्रतिवसति। अत्र गङ्गाशब्दो विशिष्टोदकप्रवाहे निरूढाभिधानशक्तिः। स च घोषकर्तृकायाः प्रतिवसनक्रियाया अधिकरणभावं गन्तुमसमर्थः स्वार्थाधिनाभूतं तटं लक्षयति।''[१] इत्येतेन संदर्भेण स्पष्टभूयिष्ठम्।

कथं तर्हि—

'ध्वनिश्च द्विविधः—अर्थध्वनिः, शब्दध्वनिश्च। शब्दध्वनिर्यथा—

कल्याणं वः क्रियासुः किसलयरुचयस्ते करा भास्करस्य। इति।

उष्माणं सन्तताध्वश्रमजमिव भृशं बिभ्रतो ब्रघ्नपादाः। इति।

गावो वः पावनानां परमपरिमितां प्रीतिमुत्पादयन्तु। इति।

अत्र (प्रथमे)—करशब्दशक्तिस्वाभाव्याद् भगवतस्तेजोरूपतां पुरुषरूपतां च ध्वनयति,

(द्वितीये च)—पादशब्दशक्तिस्वाभाव्यात्

(तृतीये)—दीप्तांशोर्गावो रश्मयः स्तूयमानाः शब्दशक्तिस्वाभाव्यात् तुल्यविशेषणयोगाच्च धेनुषु प्रतिशब्दं जनयन्त्यः, तास्वपि विशिष्टं माहात्म्यशेषं प्रतिध्वनन्ति।[२]

इत्येवं लक्षणोदाहरणाभ्यां ध्वनेः शब्दमूलत्वं श्रीभोजेनैव शृङ्गारप्रकाश एव प्रतिपाद्यते। प्रतीयमानार्थप्रतीतौ परिवृत्त्यसहिष्णुत्वसहचरीं शब्दविशेषगतां कुर्वद्रूपतामतिरस्कर्तुमेष वाग्योग इति गृहाण। न ह्येतेनास्य शब्दवृत्तितापि काचन ध्वनिगतत्वेन सिषाधयिषिता। एतेन 'ध्वनिमत्ता तु गाम्भीर्यम्'[३] इति शब्दगते गाम्भीर्यनाम्नि गुणे ध्वनिमत्तामुदीर्य—

---

१. शृप्र. ज्यो० सं०, पृ० २२३।

२. ज्यो० सं०, पृ० २४८—९, 'कल्याणं वः' इत्यादीनां पूर्णानि पद्यानि ७४ पृष्ठे—ऽत्रैव दत्तानि।

३. सरस्वतीकण्ठाभरणे १.७३ कारिका।

**मौलौ धारय पुण्डरीकममितं तन्वात्मनो विक्रमं**
**वक्राङ्कं वह पादयुग्ममवनीं दोष्णा समभ्युद्धर ।**
**लक्ष्मीं भ्रूनिकटे निवेशय भव ज्यायान् दिवौकस्पते–**
**र्विश्वान्तःकरणैकचौर तदपि ज्ञातं हरिः खल्वसि ।।**

अत्र नाभ्या पुण्डरीकधारणं परिमितविक्रमत्वं चक्राङ्कितकरत्वं दंष्ट्रया वसुधोद्धारणम्, वक्षःस्थलनिवेशितलक्ष्मीकत्वम्, इन्द्रावरजत्वं च ध्वनयतीति गाम्भीर्यमिति

यत् तद्वृत्तौ सरस्वतीकण्ठाभरण एतेनोदीरितं तस्यापि ध्वनेः शब्दवृत्तिताभिप्रायकत्वमनुत्थानपराहतम्। अत एवासौ सरस्वतीकण्ठाभरण एव सूक्ष्मान्योन्यव्यतिरेकमीलितापह्नुतितुल्ययोगितालङ्कारेषु गतिभाविकत्व–नाम्नोरर्थगुणयोश्च प्रतीयमानार्थसद्भावमूरीकृत्यापि तत्र तदर्थं ध्वनन–व्यञ्जनाद्यपरनामकं व्यापारान्तरं किञ्चिच्छब्दार्थगततया नोदलिखत्। ततश्च 'ध्वनिमत्तापदम्'–ध्वनिमार्गदिशा व्याकुर्वाणो रत्नेश्वरमिश्रो गतानुगतिक एव न व्याचिकीर्ष्यस्वारस्यस्पृक्।

ननु 'विषयभेदेन व्यापारभेदस्य प्रायेण [१]सर्ववादिसंप्रतिपन्न–त्वादनुक्तेऽपि ध्वनेः शब्दव्यापारत्वे अर्थापत्त्या सिद्ध्येदेवतत् कथमिव भोजो निवारयेत्' इति चेत्, इदं हि तेन वक्तुं शक्येत, येन 'शब्दबुद्धिकर्मणां विरम्यव्यापाराभावः' इत्यसौ सिद्धान्त–निगडः परिधीयते। नास्ति च तादृश एष महाराजः। स हि पार्यन्तिकमप्यर्थं प्राथमिक्यैव शब्दशक्त्या विवृतात्मानं पश्यति। तदर्थमसौ अध्यास–विवर्त्त–विपरिणाम–वादानाश्रयति, अभिधीयमानतः प्रतीयमानं यावत् सर्वविधमर्थं शब्दमूर्त्तिमेव च स्वीकुरुते। यथा चैतत् तत्–

---

१. एतदर्थं द्रष्टव्यमभिनवगुप्तस्य लोचनम्। चौखं० सं० ध्वन्या०, पृ० ६३, ८४, ४२२।

''शब्दात् पृथक् अर्थतत्त्वस्य व्यपदेष्टुम् अनुभवितुं चाशक्यत्वात् शब्दस्यैवायमध्यासो विवर्त्तो विपरिणामो वार्थो नाम, नान्यः कश्चित्। न हि निरूपयन्तोऽपि शब्दाद् विभिन्नमर्थतत्त्वमुपलभामहे।''

अन्येऽपि चैवमाहुः—

**अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।**
**ग्राह्य—ग्राहक—संवित्तिभेदवानिव लक्ष्यते ।।**

**ग्रहीतृ—ग्रहण—ग्राह्य—माया—पथ—परिच्युताम् ।**
**नमामः परमानन्द—ज्योतीरूपां सरस्वतीम् ।।** इति।

तत्र यथा जलादयः कल्लोलादिरूपेण, सवर्णादयः कुण्डलादिरूपेण, नीलादयश्चित्रादिरूपेण विवर्त्तन्ते, तथा शब्दतत्त्वमविद्योपाधेस्तेन तेनार्थरूपेण तथा तथा विवर्त्तते। ननु चाभिधीयमानतेव प्रतीयमानतापि वाक्यार्थधर्मो विद्यते। यथा चोच्यते (ध्वनिकृद्भिः)—

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।**
**यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ।।** इति।

तस्य च वाक्यार्थभावनोत्तरकालमवगतेरध्यासपक्षे विवर्तपक्षे वा कथमिवोपपत्तिर्भवति? उच्यते—विपरिणामाद् भविष्यति। वस्तुनोऽवस्थान्तरगमनं विपरिणामः। तत्र यथा मृदादयो घटादिरूपेण, क्षीरादयो दध्यादिरूपेण, चैत्रादयो युवादिरूपेण विपरिणमन्ते, तथेदं शब्दब्रह्मापि अविद्योपाधेस्तेन तेनार्थरूपेण तथा तथा विपरिणमते। तद् यथा 'योऽहं युवा द्रमिडदेशे द्रमिडकन्याभिः सहावसम्, सोऽहमिदानीं पश्चिमे वयसि गङ्गातीरे तपश्चरामि' इति। अत्र च शब्दार्थयोः पृथगवभासाद् वाक्यार्थस्याभिधीयमानतायां प्रतीयमानतायां वा नानुपपत्तिः, न चैतावता शब्दव्यापारो विरंस्यति। यथा—

**प्राप्तश्रीरेष कस्मात् पुनरपि मयि तं मन्थखेदं विदध्या–**
**न्निद्रामप्यस्य पूर्वामनलसमनसो नैव संभावयामि ।**
**सेतुं बध्नाति कस्मादयमिह सकलद्वीपनाथानुयातस्**
**त्वय्यायाते विकल्पानिति दधत इवाभाति कम्पः पयोधेः ॥**

अत्र वर्णनीयराजविशेषस्य दिग्विजयिनो यथाश्रुतवाच्यार्थोऽभिधीयमानः, त्वयीति पदे विष्ण्वध्यासावतारः समस्तीति प्रतीयमानः, तदवतारान्तराणां निद्रालसत्वादिदोषयोगात् अस्य च तद्व्युदासात् ततो वैशिष्ट्यप्रतिपादनं तात्पर्यम्, यस्य काव्येषु ध्वनिरिति प्रसिद्धिः।[१] इति। संदर्भोत्तमादत्रैव शृङ्गारप्रकाशस्य षष्ठे प्रकाशे वेदितुं सुशकम्। इत्थमस्यान्विताभिधानदिशा दीर्घदीर्घाभिधावाद एव सिद्धान्ततयाभिमतः प्रतीयते। अत एवानेन गौणीलक्षणयोरप्यभिधाङ्गत्वमूरीक्रियते। एवं सति 'श्रुतिलिङ्गवाक्या'–दीनां पूर्वपूर्वबलीयस्त्वसाधकं किमिति चेदाशुविलम्ब्य–प्रतीतिकृत्त्वमेव तत्र तत्, ततश्च नास्ति दोषो दीर्घदीर्घतरत्वेऽपि प्रथमस्यैव व्यापारस्य। ये पुनर्महिमभट्टादिभिरत्र[२] दोषा उद्भावितास्तेषां कः समाधिरिति चेत्, तेऽपि व्यापाराविरामाभ्युपपत्त्यैव दत्तोचितोत्तराः। तदित्थं नास्त्येव ध्वनित्वेन कश्चन शब्दव्यापारो भोजदेवस्याभिमतः।

ननु पूर्वोक्तया दिशा ध्वनिस्तात्पर्य चेत्यनर्थान्तरं चेत्–

**यदभिप्रायसर्वस्वं वक्तुर्वाक्यात् प्रतीयते ।**
**तात्पर्यमर्थधर्मस्तच्छब्दधर्मः पुनर्ध्वनिः ॥**

**सौभाग्यमिव तात्पर्यमान्तरो गुण इष्यते ।**
**वाग्देवताया लावण्यमिव बाह्यस्तयोर्ध्वनिः ॥**[३]

---

१. शृप्र. प्र० ६, ज्यो० सं० पृ० २२१।
२. उत्तुङ्गोदयेन ध्वन्यालोकलोचनकौमुद्यां श्रुत्यादीनां बलीयस्त्वदुर्बलत्वयोर्नियाम–कमिदमेवाभिमतम्। ध्वन्यालोकस्य कुप्पुस्वामिसं०, पृ० १२४।
३. व्यक्तिविवेकस्य प्रथमे विमर्शे।

इति शृङ्गारप्रकाश एव भेदोऽपि कथमनयोः प्रतिपाद्यते इति चेत्, संप्रदायान्तरव्यवहारदिशा हि तथोक्तिः। अस्ति हि मीमांसासु 'भूत–भव्य–समुच्चारणे भूतं भव्यायोपदिश्यते। ततश्चादग्धदहनन्यायेन यावदप्राप्तं तावद् विधीयते, यदेव विधीयते तत्रैव तात्पर्यम्''[१] इति। तात्पर्यस्य विधेयार्थधर्मत्वेन प्रसिद्धिः, शब्दानुशासनेषु च 'प्रतीतपदार्थको लोके ध्वनिः शब्दः' इति शब्दस्य ध्वनित्वेन। ननु शब्दशासने ध्वनेः शब्दत्वेनैव प्रसिद्धिः, न तु शब्दधर्मत्वेन, अत्र पुनः शब्दधर्मत्वं ध्वनेरुच्यते। तच्च ध्वननरूपमेव संभवति। अस्ति च ध्वननं व्यापारमात्रम्– इति सिद्धं ध्वनेः शब्दव्यापारत्वमिति चेत्, दुराशैषा, ध्वननस्य व्यापारत्वं को नु तिरस्कुर्वीत, व्यापारान्तरत्वं तु तिरस्क्रियते। ययाऽभिधया पार्यन्तिकस्यापि भ्रम धार्मिकेत्यादौ निषेधादिरूपस्यार्थस्य स्पर्शो भोजस्याभिमतः, तस्या ध्वननरूपत्वेऽपि तस्य का विचिकित्सा? यदि च शब्द एव ध्वनिः, तर्हि ध्वननरूपो ध्वन्यपरपर्यायो व्यापारात्मा धर्मोऽपि तस्यैव संगच्छते, नान्यस्येति युक्तमेवोच्यते 'शब्दधर्मः पुनर्ध्वनिः' इति[२]। शब्दस्य बाह्यत्वमर्थस्य चान्तरङ्गत्वं वाग्योगविदां न तिरोहितम्, साधनभूतस्य शब्दस्य भूतमर्थं प्रति गुणीभावस्य सुप्रतीतत्वात्। ततश्च ध्वनेर्बाह्यत्वं तात्पर्यस्य स्व–स्वाश्रयीभूत–शब्दार्थ–बाह्यान्तरङ्गत्वापेक्षया नासाधु।

ननु 'ध्वननं ध्वनिः' इति व्युत्पत्तौ ध्वनेः शब्दधर्मत्वं ततश्च तात्पर्यभिन्नत्वं कामं न प्रहीयेत 'ध्वन्यत इति ध्वनिः' इति व्युत्पत्तौ तु कथमस्य क्षेमः? व्युत्पत्तावस्यामर्थस्यैव ध्वनितया व्यपदेशात्, अर्थस्य च साध्यतया शब्दधर्मत्वासंभवात्। यश्चायं ध्वनिरूपः अर्थः, तस्य तात्पर्यविषयीभूतादर्थादभेदस्यैव श्रीमतामभिमतत्वाच्च'' इति चेदिष्टैवास्माक–

१. काव्यप्रकाशस्य पञ्चम उल्लासः।

२. शृप्र. प्र० ६–७, ज्यो० सं० पृ० २२१, २५१–२। डॉ० राघवोऽत्र शङ्कामेवोपस्थापयति।

मियमापत्तिः। वस्तुतो नास्त्येव पारमार्थिको भेदो ध्वनितात्पर्ययोः, औपाधिकस्तु स प्रतिपादित एव शब्दार्थदृशा शास्त्रान्तरमादाय, प्रतिपाद्यते चैवमलङ्कारशास्त्रमादाय काव्यत्वदृशा–

**तात्पर्यमेव वचसि ध्वनिरेव काव्ये सौभाग्यमेव गुणसंपदि वल्लभस्य।**
**लावण्यमेव वपुषि स्वदतेऽङ्गनायाः शृङ्गार एव हृदि मानवतो जनस्य।।**[1]

इति।

अयमर्थः–वक्रता हि काव्यमकाव्यतो व्यवच्छिनत्ति। सा च भगवती सर्वाङ्गसंपूर्णसाहित्यसमेधितत्व–सतत्त्वा। सर्वाङ्गसंपूर्णता च साहित्यस्य नान्या, द्वादशविधसंबन्धस्वरूपस्य तस्य सर्वसम्बन्धयुक्तत्वं विहाय। द्वादश च संबन्धा अमी–

१. अभिधा २. विवक्षा ३. तात्पर्यम् ४. प्रविभागः
५. व्यपेक्षा ६. सामर्थ्यम् ७. अन्वयः ८. एकार्थीभावः
९. दोषहानम् १०. गुणादानम् ११. अलंकारादानम्
१२. रसावियोगश्चेति।[2]

ततश्च सर्वैरेवैभिः समेधितं यदेव वाङ्मयं तदेव दोषहानादिभि–श्चतुर्भिर्विशिष्टं सत् काव्यमि–'त्युच्यते। उच्यते चैतदेतेन–

**यदवक्रं वचः शास्त्रे लोके च वच एव तत् ।**
**वक्रं तदर्थवादादौ तस्य काव्यमिति स्मृतिः ।।**[3] इति।

इत्थं वक्राताविरहिते वाङ्मये यदेव तात्पर्यपदेनोच्यते, तदेव वक्रतासहिते तस्मिन् ध्वनिपदेन। एतेनेदमायातं यत् तात्पर्यं ध्वनिश्चेत्युभयमभिन्नमपि सद् व्याप्यव्यापकत्वरूपं सामान्यविशेषभावं न

---

१. शृप्र. मङ्गलपद्यम्, ज्यो० संस्करणस्य १२१ पृष्ठेऽपि।
२. शृप्र. सप्तमप्रकाशारम्भः।
३. शृप्र. २२१, २५१।

त्यजति। तत्र तात्पर्यं काव्याकाव्यसाधारण्येन व्यापकम्, ध्वनिश्च काव्यैकसीमितत्वेन व्याप्यम्। अस्ति चानयोरदूरविप्रकर्षो वसन्तवैशाखयोरिव। अतश्च द्वयेन द्वयमप्युच्येत। उच्यते चैतदपि श्रीभोजेन–

**अदूरविप्रकर्षात् तु द्वयेन द्वयमुच्यते ।**
**यथा सुरभि–वैशाखौ मधु–माधव–संज्ञया ।।**[१] इति।

ननु 'तात्पर्यवद् ध्वनेरप्युभयसाधारण्यं कथं नाभ्युपेयेत, का तत्र हानिः'' इति चेत्, वाग्योगवेदिनो विदग्धा एवात्र पृच्छ्यन्ताम्। कथमिमे काव्य एव ध्वनिमुपयन्ति नाकाव्ये? ननु भवन्तोऽपि नाविदग्धाः, भवन्तोऽत्र किं प्रतियन्तीति चेदुच्यते–वैशेषिकत्वम् उपनिषद्भूतत्वं वात्र तन्त्रं प्रतीमः। काव्य एव हि ध्वनेर्वैशेषिकत्वमुपनिषद्भूतत्वं वा, नान्यत्र, प्रभुसम्मितमित्रसंमिततया प्रतीतेषु तेषु प्रामाण्याप्रामाण्यपरीक्षाया एव मौलिभूतत्वात्। काव्ये पुनः कान्तासम्मिते सा गड्डुभूता प्रत्युत। प्रेयसोर्लौकिका गुणा अत्र निदर्शनम्। लोके हि परस्परप्रीतिबन्धरूपस्य सौभाग्यस्य प्रसिद्धावयवातिरिक्तस्य लावण्यस्य च सत्यप्युभयनिष्ठत्वे प्रेयसि सौभाग्यमेव बहु मन्यते, प्रेयस्यां च लावण्यमेव। न चैतावता कस्यचिदेकस्य कुत्रचिदन्यत्र हानिः। औपाधिकी चेयं भेदप्रतिभा। एतामुत्तीर्य प्रतिष्ठितमेकमन्यदप्यमुत्तमं तत्त्वमस्ति यदुच्यते ''शृङ्गार एव हृदि मानवतो जनस्य'' इति। दम्पत्योर्हि स्त्री–पुरुषत्वोपाधिकः सौभाग्यलावण्योभयोत्तीर्णोऽस्तमितैतदुभयभेदो भिन्न एवैक आत्मोपारूढो दाम्पत्यरसस्तिष्ठति। काव्ये पुनरर्थो नायकः; वाणी च नायिका। तिष्ठति च तत्रापि शब्दार्थ–तद्धर्म–ध्वनि–तात्पर्य–तद–नतिरिक्त–विभावादि–भावजातोत्तीर्णः कश्चनैकः शृङ्गारादिकः शृङ्गाररूप एव वा रसः, यो हि अमलधर्मविशेषजन्य–जननान्तरानुभवनिर्मितवासनोत्थ–

---

१. शृप्र. २२१, २५१–२।

सर्वात्मसंपदुदयातिशयैकहेतु–मानाभिधेन सत्त्ववतामुत्तमस्य सहृदयस्य हृदि विहितस्थितिना विकारविशेषेणानुभवपथमाजिहीते।[१] तत्र हि सर्वेऽप्येकोन–पञ्चाशद् भावोपाधयो निमज्जितात्मानस्तिष्ठन्ति। तत्र का नाम वार्ता लावण्यसौभाग्ययोरिव ध्वनितात्पर्ययोर्भेदस्य च? तदित्थं पदवाक्य–पदार्थ–वाक्यार्थ–वृत्ति–भेद–शालिनी या मध्यमा वाक्, तस्यां विद्यमानोऽपि ध्वनितात्पर्ययोर्भेदो रसप्रकाशरूपिणी या पश्यन्ती स्थितिः, तस्यां पानकरसतां मयूराण्डरसतामिव वासाद्य सामाजिकसंविदं मनागपि न स्पृशति।

ननु यद्यौपाधिक एव भेदो ध्वनितात्पर्ययोः, तथापि ध्वनेरेव तात्पर्याङ्गता कथमुपपाद्यते? तात्पर्यस्यापि ध्वन्यङ्गतायाः सुवचत्वात्। उक्तं च तथा ध्वनिवादिभिः सहृदयैर्ध्वन्यालोकादिषु संदर्भरत्नेषु। यथा चैतत् तत् प्रागुद्धृताभिर्ध्वनिकारिकाभिर्न न स्पष्टम्। उच्यते– अनुग्रह एष उदाराशयस्यास्य महाराजस्य यदसौ ध्वनिमुल्लिखति, सभाजयति चोचितेन स्थानदानेन। वस्तुतस्तूच्छेद एवास्य योग्यः, अस्य व्याकरणभक्तिमात्रमूलत्वात्, दर्शनान्तरेषु चानुल्लेखनिराकृतत्वात्। तिरस्कृतश्च भोजेनापि शब्दवृत्तितामस्य तिरस्कृत्य। ध्वनिशब्दादानं पुनर्विदग्धजनव्याहारास्पदस्य भाषामात्रस्य सत्कारः। अस्ति च तात्पर्यं महाविषयं सर्ववादिसंप्रतिपन्नं च। ततश्च निर्झरस्यैव नदीप्रवाहेऽन्तर्भाव उचितः, न तु नदीप्रवाहस्य निर्झरे।

ननु या खल्वेका तात्पर्यनाम्नी वृत्तिरपि–

**अभिधात्री मता शक्तिः पदानां स्वार्थनिष्ठता ।**
**तेषां तात्पर्यशक्तिस्तु संसर्गावगमावधि ।।**[२]

इत्येवमुल्लिख्यते भोजेन, तस्याः क्वान्तर्भावः? अनन्तर्भावे पुनर्व्यञ्जनयापि किमपराद्धम्? शब्दशक्त्यन्तरत्वेन तस्या अप्यङ्गीकारे का हानिरिति चेत्,

१. 'सत्त्वात्मनामित्यग्रे ७७–पृष्ठे उद्धरिष्यमाणं शृप्र. मङ्गलपद्यम्।
२. शृप्र. व० ८, ज्योशेरसंस्कारणस्य, पृष्ठम् २९६।

पदानां संहत्यकारितायाः सिद्धान्ते हि कारिकाया अस्यास्तात्पर्यम्, न पुनस्तात्पर्यस्य वृत्तितायाः स्थापने। यथा चैतत् तदपि—

अन्यथैव प्रवर्तन्ते प्रत्यक्षाद्युद्भवा धियः ।
अर्थं पूर्वमपूर्वं वा दर्शयन्त्याः पुरः स्थितम् ।।

अन्यथैव मतिश्शाब्दी विषयेषु विजृम्भते ।
प्रतिपत्तुरनाकाङ्क्ष—प्रत्ययोत्पादनावधिः ।।

अत एव पदं लोके केवलं न प्रयुज्यते ।
न हि तेन निराकाङ्क्षा श्रोतुराधीयते मतिः ।।

निरपेक्षप्रयोगे या सकला कल्पना भवेत् ।
तदन्विताभिधाने तु पदान्तरमनर्थकम् ।।

संहत्यकारिपक्षे तु दोषो नैकोऽपि युज्यते ।
तेनायमुपगन्तव्यो मार्गो विगत—कण्टकः ।।

अभिधात्री मता शक्तिः पदानां स्वार्थनिष्ठता ।
तेषां तात्पर्यशक्तिस्तु संसर्गावगमावधिः ।।

तेनान्विताभिधानं हि नास्माभिरिह मृश्यते ।
अन्वितप्रतिपत्तिस्तु बाढमभ्युपगम्यते ।।[१]

(इति न्यायमञ्जरीकारिकाभिः)

तस्यैव प्रबनधे स्पष्टम्। ततश्चानुवादमात्रमत्र क्रियते पराभिमतायास्तात्पर्यशक्तेः,

---

१. क, तदेव। अत्र संहत्यकारित्वं नाम ''अन्वितमर्थं पदानि संहत्य संपादयन्ति, न त्वन्वितमभिदधति'' इति भोजेनैव स्वयं स्पष्टीकृतम्। शृप्र. प्र०—८, ज्यो० सं०, पृ० २९५।

ख, न्यायमञ्जर्यां तु 'निरपेक्षप्रयोगेऽयःशलाकाकल्पने'ति पाठः। न्यायम० ३७१—७२, चौखम्भा संस्करणे।

न तु स्वमतत्वेन सा स्थाप्यते। ततश्च ध्वनिवदेव तात्पर्यस्यापि शक्तित्वं भोजानभिमतमेव।

एवं च स्थितमेतद् यद् भोजमते—१. तात्पर्यं हि कम्बु, तत्राभ्यन्तरतममावर्त्तमात्रं ध्वनिः।

२. अत्र यो रसध्वानस्तत्राऽभिधैवैका दीर्घदीर्घा कविनिश्वासपूर्त्तिः।

३. ततश्चाभिधैवैकः काव्यशब्दव्यापारः, न तात्पर्यम्, न वा ध्वनिः।

अत्र या प्रथमतया स्थापना, तत्र शारदातनयो भृशं श्रद्धत्ते ब्रूते च—

वाक्यार्थं प्रति शेषत्वं यत् स्यादुच्चारणस्य तु ।
तत् तात्पर्यं त्रिधा तत् स्याद् वाक्यार्थत्रिविधत्वतः ॥

स चाभिधेयः प्रत्याय्यो ध्वनिरूप इति त्रिधा ।
कारकादिविशिष्टो यः सोऽभिधेयः क्रियादिकः ॥

यथाभिधीयमानार्थादन्यथानुपपत्तितः ।
प्रतीयमानो वाक्यार्थो यः स प्रत्याय्य ईरितः ॥

विषं भुङ्क्ष्वेति वाक्यादावेष तादृक् प्रतीयते ।
ध्वनिर्द्विधा स चैकः स्यादर्थतः शब्दतोऽपरः ॥

ध्वनि—तात्पर्ययोर्भेदो ब्राह्मण—ब्रह्मचारिवत् ।
तदवान्तरभेदो हि प्रायेण पृथगुच्यते ॥

अतो ध्वन्यर्थ—तात्पर्य—गम्यमानत्वतः स्वतः ।
काव्ये रसालङ्कारादिवाक्यार्थो भवति ध्रुवम् ॥

**एवं त्रिरूपं तात्पर्यं तत्तत्तात्पर्यवेदिभिः ।**
**वक्तृद्वारा वाक्यधर्म एवेति परिकीर्त्यते ।।**[१] इति।

प्रतापरुद्रयशोभूषणकारो विद्यानाथः, तट्टीकिता च मल्लिनाथसूनुः कुमारस्वामी पुनरत्र विप्रतिपद्येते ब्रुवाते च—"तात्पर्यार्थोऽपि व्यङ्ग्यार्थ एव न पुनः पृथग्भूतः।"[२] इति।
तस्माद् व्यञ्जनापरपर्यायमेव तात्पर्यं कविभिरङ्गीकृतम्, नान्यदिति सिद्धम्"[३] इति च।

साहित्यमीमांसाकारो भोजदेवस्य तृतीयां स्थापनामन्यथयते प्रतिपादयते च तात्पर्यस्य वृत्तित्वमेवैवम्—

**तत्तत्कक्ष्याविभेदेऽपि बहुधा प्रसृता सती ।**
**तात्पर्यवृत्तिरुद्देश्यं यावन्न प्रतिहन्यते ।।**

**एतावतैव विश्रान्तिस्तात्पर्यस्येति किं कृतम् ।**
**यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम् ।।**[४] इति।

वस्तुतस्त्वन्यथाभावनमिदमस्येन्द्रजालमात्रम्, पर्यवसितौ भोजोपन— तस्यैव सिद्धान्तस्यैवमूरीकृतेः—

**तत्तकक्ष्यानिवेशेन वाक्यतात्पर्यकन्दली ।**
**यथारुच्यभिधा वस्तुध्वनिर्वा वृत्तिरेव वा ।।**

**कविश्च रसमुद्दिश्य सूक्तिमुद्राः करोति हि ।**
**सामाजिकानां हृदयं रसयेयमहं कथम् ।।**

---

१. भावप्रकाशनस्य बड़ौदासंस्करणीयानि १४७—१५० पृष्ठानि।

२-३. प्रतापरुद्रयशोभूषणस्य १.५ वृत्तौ।

४. साहित्यमीमांसा ६.१७ तात्पर्यार्थं साहित्यमीमांसाया रसप्रकरणमवश्यमीक्षणीयम्, ईक्षणीयं चास्मदीयं सारस्वतीसुषमायाः २४.३ अङ्के प्रकाशितं 'साहित्यसंप्रदाये तात्पर्यस्वरूपम्', सागरिकाया ८.४ अंङ्के प्रकाशितं साहित्यदर्शने तात्पर्यरूपम्' वा।

**इति प्रवर्त्तते काव्ये कविस्तत्परमानस: ।**
**विशिष्टै: शब्दसंदर्भैर्ज्ञापयेयं रसं यत: ।**
**इति प्रवृत्ते सुकवौ तेषामुत्पद्यते रस: ।।**[१] इति।

एतेनेदं स्पष्टं यदेक: कथयति 'यो नील: स घट:' इति, अपरश्च कथयति 'यो घट: स नील:' इति। संहत्य च तदुभयमेकमेवाद्वितीयमर्थं प्रतिपादयति। एकावलीकारो विद्यानाथस्तु भोजमतं जानन्नपि मम्मटमतमेवा–नुधावति। यथा चैतत् तत् तस्य मल्लिनाथोपज्ञ–तरलसमेधितया 'एकावल्या' स्पष्टमेव। इमे हि भोजस्य ध्वनिसामान्यसम्बन्धिनो विचारा:। अथ तद्विशेषविवेकमुपस्थापयाम:। तत्र–

**१. ध्वनेर्भेदा:**

ध्वनिकारेण व्यङ्ग्यकृतस्य चमत्कारस्य तरतमभावमाश्रित्य–

**यत्रार्थ: शब्दो वा......काव्यविशेष: स ध्वनि:''**[२] इति,
**प्रकारोऽन्यो गुणीभूतव्यङ्ग्यकाव्यस्य दृश्यते ।**
**यत्र व्यङ्ग्यान्वये वाच्यचारुत्वं स्यात् प्रकर्षवत् ।।**[३] इति च।

ध्वनिगुणीभूतव्यङ्ग्यनामानौ यौ द्वौ काव्यभेदावुपस्थापितौ, यश्चैको व्यङ्ग्यचमत्कारशून्यतया–

**प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते ।**
**काव्ये उभे ततोऽन्यद् यत् तच्चित्रमभिधीयते ।।**[४]

इति चित्रनामा काव्यभेद उपस्थापित: श्रीभोजस्तच्चर्चां न कुरुते। स हि दृश्यश्रव्यतयैव भामहाद्यनुमोदितया काव्यं विभजते, विभजते, तयो: प्रत्येकं

---

१. साहित्यमीमांसाप्रकरणम्–६

२. कारिकेयमस्य लेखस्यारम्भे पूर्णमुद्धृतपूर्वा।

३–४. ध्वन्यालोककारिका ३–३४, ४१।

२४, २४ भेदांश्च।[१] ध्वन्यादिवर्त्मना काव्यमविभजन्नपि ध्वन्यादिगततया तदाचार्यैर्ये संलक्ष्यासंलक्ष्यक्रमत्वे प्रदर्शिते तत्रासाववधानमाबध्नाति, तथैव ध्वनिस्थलं विभजन् पूर्वोक्तया दिशा 'अनुनादरूपत्वं प्रतिशब्दरूपत्वम्' च तस्य प्रस्तवीति? एतयोरनुनादरूपत्वं तत्र पश्यति, यत्र 'शिखरिणी क्व नु नाम'—इत्यादिषु स्थलेषु यथाश्रुत एवार्थो वीचीतरङ्गन्यायेनार्थान्तरशतसन्ततिं संजनयति। उच्यते हि तेन—

"तत्र योऽभिधीयमान—वाक्यार्थानुस्यूतमेव कांस्यानुनादरूपमर्थान्तरं ध्वनति, सोऽनुनादरूपः।" यथा—

**शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत् तपः ।**
**सुमुखि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः ।।**

अत्र यथाश्रुतवाक्यार्थोऽभिधीयमानो बिम्बफलारुणाधर इत्युपलक्षणेन रागातिशयं प्रत्याययन् नाल्पुण्यस्त्वदधरप्रतिनिधिमपि चुम्बतीति चाटुना वर्णनीयायाः स्वानुरागप्रकाशनं ध्वनति। एतच्च कांस्यध्वनिवदविच्छिन्नमेव ध्वनन्ननुनादरूपं प्रतीयते इति अनुनादध्वनिः।[२]

प्रतिशब्दतुल्यत्वं च तत्र निभालयति, यत्र शाब्दाः पदार्थाः शुष्का इव वेणवः परस्परमर्जितसंघर्षा अग्निमिव प्रतीयमानमर्थमभिप्रसूय धूम—प्रकाशविस्फुलिङ्गादीनिवानेकविधानर्थान् 'भ्रम धार्मिक' इत्यादिषु स्थलेषु विभावयति। उच्यते हि तेन—

"यः पुनरभिधीयमानवाक्यार्थात् पृथग्भूत इव गुहादिप्रतिशब्दानु—रूपमर्थान्तरं च प्रत्याययन् प्रतिध्वनति, स प्रतिशब्दध्वनिः।" यथा—

**लावण्यसिन्धुरपरैव हि केयमत्र यत्रोत्पलानि शशिना सह संप्लवन्ते।**
**उन्मज्जति द्विरदकुम्भतटी च यत्र यत्रापरे कदलि—काण्ड—मृणालदण्डाः।।**

---

१. शृप्र. प्र० ११, ज्यो० सं०, पृ० ४६१।

२. शृप्र., ज्यो० सं०, पृ० २४८—२५०।

गुहायां पौरुषादिशब्दानां प्रतिशब्दा जायन्ते, ते च ध्वनिं जनयन्त उपलभ्यन्ते। एवं 'लावण्यसिन्धुः' इत्येतस्मिन् पद्यार्थे उत्पलादिशब्दानां यथास्वं स्वोपमेयलोचनाद्यर्थप्रतिशब्दा जायन्ते, ते चार्थान्तरध्वनिं जनयन्त उपलभ्यन्ते। तत्रेह श्रूयमाणानामुत्पलादीनामर्थोऽभिधीयमानस्तस्य लोचनाद्यर्थैः सह सादृश्यं प्रत्याययन् वर्णनीयायाश्चारुत्वोत्कर्षं प्रतिध्वनति। सा च प्रतीतिस्ततः पृथगिवोपलभ्यमाना प्रतिशब्दध्वनिः[१]। इति।

अमू हि अर्थध्वनेः भेदौ। शब्दध्वनेरपि पूर्वोद्धृतस्यैतावेतन्मते भवतः। साधितं ह्येतेन पूर्वचर्चितैर्मयूरशतकपद्यैः साधर्म्यवैधर्म्याभ्यां सप्तमे प्रकाशे।[२] तत्र सः—

**भक्तिप्रह्वाय दातुं मुकुलपुटकुटीकोटरक्रीडलीनां**
**लक्ष्मीमाक्रष्ट—कामा इव कमलवनोद्घाटनं कुर्वते ये।**
**लालाकारान्धकाराननपतित—जगत्साध्वस—ध्वंस—कल्याः**
**कल्याणं वः क्रियासुः किसलयरुचयस्ते करा भास्करस्य॥**

इत्यत्र साधर्म्येण,

**गर्भेष्वम्भोरुहाणां शिखरिषु च शिताग्रेषु तुल्यं पतन्तः**
**प्रारम्भे वासरस्य व्युपरतिसमये चैकरूपास्तथैव।**
**निष्पर्यायं प्रवृत्तास्त्रिभुवन—भवनप्राङ्गणे पान्तु युष्मा—**
**नूष्माणं सन्तताध्वश्रमजमिव भृशं बिभ्रतो ब्रध्नपादाः॥**

इत्यत्र वैधर्म्येण चानुनादरूपत्वम्,

**दत्तानन्दाः प्रजानां समुचितसमयाकृष्टसृष्टैः पयोभिः**
**पूर्वाह्णे विप्रकीर्णा दिशि दिशि विरमत्यह्नि संहारभाजः।**
**दीप्तांशोर्दीर्घदुःखप्रभव—भव—भयोदन्वदुत्तारनावो**
**गावो वः पावनानां परमपरिमितां प्रीतिमुत्पादयन्तु॥**

---

१. शृप्र., ज्यो० सं०, पृ० २४८—२५०।

२. ज्योशेरसंस्करणीयस्य शृङ्गारप्रकाशस्य २५१ पृ०।

इत्यत्र च प्रतिशब्दरूपत्वं साधयति। अर्थध्वनेरत्र शब्दापरिवृत्तिसहत्वमात्रं विशेषः। अनुनाद–प्रतिशब्दत्वे पुनरनन्यादृशे। अनयोर्यः प्रथमः स ध्वनिकृतामनुरणनात्मा संलक्ष्यक्रमो ध्वनिरेव।

असंलक्ष्यक्रमत्वे तु ध्वनेर्भोजो विप्रतिपन्नः। स हि संलक्ष्यक्रमत्वमेव पश्यति रसानामपि। गत्यन्तराभाव एवात्र प्रमाणम्। भोजो हि–

**आभावनोदयमनन्यधिया जनेन यो भाव्यते मनसि भानया स भावः।**
**यो भावनापथमतीत्व विवर्त्तमानः साहङ्कृतौ हृदि परं स्वदते रसोऽसौ।।**[१]

इत्येवं भाव–रसयोर्मध्ये भावनानाम्नीमेकां वृत्तिमभ्युपेति। ततश्च भावो, भावभावना, ततः परं रस इति। भावना–व्यवधानमिदं न सम्भवति गत्यन्तरेण सेद्धुम्, ऋते क्रमोपगमम्। ततश्च स्थित एव तन्मते रसास्वादेऽपि क्रमः।[२]

ध्वनिवादिभिर्ध्वनेर्ये पञ्चत्रिंशद् भेदाः[३] प्रतिपाद्यन्ते, तत्र भोजः प्रपञ्चं न नारचयति, किन्तु न तथा यथा ध्वनिवादिनः। एतद्धि स्वतन्त्रमेकं निबन्धमपेक्षते।

## २. रसः

यदुक्तं रसः स्वदत इति तत्र पृच्छ्यते कोऽयं रसः, कीदृशश्चास्य स्वाद इति। अत्र भोजमतं प्रस्तूयते। तत्र पूर्वं रसस्वरूपम्–

ध्वनिवादिनः "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्ति" इति भरतनाट्यशास्त्रे दशमशताब्दीतः पूर्वं केनचित् योजितं सूत्रमुपजीव्य विभावादिसंवलितस्य स्थायिन एव रसत्वमूरीचक्रुः, किन्तु तत्रात्मतत्त्वस्य

१. शृङ्गारप्रकाशस्य मङ्गलपद्यम्।

२. आनन्दवर्धनाभिनवगुप्त–जगन्नाथा अपि क्रममप्युपयन्ति रसास्वादे। मम्मट एव तत्र अलक्ष्यक्रमतैकवादी।

३. भोजपूर्ववर्त्तिना आनन्दवर्धनेन एतावन्त एव भेदा ध्वनेः प्रतिपादिता इति लोचनात् स्पष्टम्। एतदर्थं द्रष्टव्यं ध्वन्यालोकस्य २.३१–लोचनम्। मम्मटः पुनः ध्वनेः ५१–भेदानाम्नाय तेषां १०४५५–संख्याकत्वं सङ्करसंसृष्टिभ्यामानति।

किं स्थानमिति ते वक्तुं नापारयन्। भोजः पुनः—

**अप्रातिकूलिकतया मनसो मुदादेर्यः संविदोऽनुभवहेतुरिहाभिमानः।**
**ज्ञेयो रसः स रसनीयतयात्मशक्ते रत्यादिभूमनि पुनर्वितथा रसोक्तिः॥[1]**

इति।

अप्रातिकूलिकतान्यथानुपपत्तिसाध्यो मुदाद्यनुभवहेतुः संविन्निष्ठोऽभिमान एव रस इति मत्वा अभिमानस्यास्य रसपदव्यपदेशमूल— मन्वाचक्षाणस्तत्र रसनीयतां पश्यति, पश्यति च रसनीयतायामस्यामात्मशक्तेस्तन्त्रत्वम्। यदेवात्मतत्त्वं सैव भगवती संविद्। ततश्च 'सुखाद्यनुभूतिजनक आत्मनिष्ठ आत्मरसनीयोऽभिमान एव रसनीयतया रसः' इति स्वमतनिष्कर्षे स्थायिनां रसत्वस्य का नु स्थितिरिति प्रश्ने भोजेनोच्यते—'रत्यादिभूमनि पुनर्वितथा रसोक्तिः'इति। सोऽयं स्पष्ट एव स्थायिनां रसत्वमुपेयुषां ध्वनिवादिनां प्रत्यादेशः। प्रत्यादेशमिमं महाराज एष तर्केणापि पोषयन् वक्ति—

**रत्यादयो यदि रसाः स्युरतिप्रकर्षे हर्षादिभिः किमपराद्धमतद्विभिन्नैः।**
**अस्थायिनस्त इति चेद् भय-हास-शोक-क्रोधादयो वद कियच्चिरमुल्लसन्ति॥[2]**

इति।

**स्थायित्वमत्र विषयातिशयान्मतं चेच्चिन्तादयः कुत उत प्रकृतेर्वशेन।**
**तुल्यैव सात्मनि भवेदथ वासनायाः संदीपनात् तदुभयत्र समानमेव॥[3]**

इति च।

एतेन रसस्य रत्यादिमूलकत्वमूरीकृत्य यदि नवविधत्वमूरीक्रियते, तर्हि निर्वेदादिमूलकत्वमप्यूरीकृत्य ४१ विधत्वमूरीकर्तव्यमिति पर्यनुयोगाद् रत्यादीनां स्थायित्ववादमपि त्याजिता ध्वनिवादिनः। स्पष्टं चैतदेतस्यैव

---

१-२. शृङ्गारप्रकाशस्य मङ्गलपद्यानि।

३. शृप्र. मङ्गलपद्यम्।

निम्नोद्धृतेन संदर्भेण—

"तत्र केचिदाचक्षते रतिप्रभवः शृङ्गार इति। वयं तु मन्यामहे रत्यादीनामयमेव प्रभव इति। शृङ्गारिणो हि रत्यादयो जायन्ते, नाशृङ्गारिणः। शृङ्गारिणो हि रमन्ते, स्मयन्ते, उत्सहन्ते, स्निह्यन्तीति। ते तु भाव्यमानत्वाद् भावा एव न रसाः। यावत्संभवं हि भावनया भाव्यमानो भाव्य एवोच्यते, भावनापथमतीतस्तु रस इति। मनोऽनुकूलेषु हि दुःखादिष्वपि सुखानुभवाभिमानो रसः। स तु पारम्पर्येण सुखहेतुत्वाद् रत्यादिभूमसूपचारेण व्यवह्रियते। अतो न रत्यादीनां रसत्वम्, अपि तु भावनाविषयत्वाद् भावत्वमेव। यदप्युक्तं 'परप्रकर्षगामी रत्यादिभावो रसः' इति, तदप्यसारम्, ग्लान्यादिष्वपि तदुपपत्तेः। ग्लान्यादयोऽपि हि श्रमादिभिः परं प्रकर्षमधिरोप्यन्ते। न ते स्थायिन इति चेत् स्थायित्वमेषामुत्पन्नतीव्रसंस्कारात्, संस्कारोत्पत्तिश्च विषयातिशयान्नायकप्रकृतेश्च। नायकप्रकृतिश्च त्रिधा—सात्त्विकी, राजसी, तामसी च। तदन्वयाच्च तथाविधानुभवभावनोत्पत्तिः। ततश्चैषां स्थायित्वव्यपदेश इति। ००० । अवस्थाविशेषात् सर्वेऽप्यमी व्यभिचारिणः, सर्वेऽपि च स्थायिनः, सात्त्विका अपि सर्व एव, मनःप्रभवत्वात्। अनुपहतं हि मनः सत्त्वमित्युच्यते।

यच्चोक्तं विभावानुभावव्यभिचारिसंयोगात् स्थायिनो रसत्वमिति, तदपि न, हर्षादिष्वपि विभावानुभावव्यभिचारिसंयोगस्य विद्यमानत्वात्। ततो रत्यादयः सर्व एवैते भावाः, शृङ्गार एवैको रस इति। तैश्च स्वविभावानुभावैः प्रकाशमानः शृङ्गारो विशेषतः स्वदते।"[१] इति।

भावरसयोः सम्बन्धमपि स्पष्टयन्नसौ वक्ति—

**रत्यादयोऽर्धशतमेकविवर्जिता ये भावाः पृथग्विधविभावभुवो भवन्ति।**
**शृङ्गारतत्त्वमभितः परिवारयन्तः सप्तार्च्चिषं द्युतिचया इव वर्धयन्ति।।**[२]

---

१. संविदोऽनुभवहेतुरिति पद्यस्यार्थ इहैवानुपदमेव? तमसंदर्भतयोद्धृते शृङ्गारप्रकाशस्थले स्पष्टः।

२. शृङ्गारप्रकाशस्य ११ प्रकाशः। ज्योशेरसंस्करणस्य ४३०—१ पृष्ठे।

ननु "संदर्भेणैतेन शृङ्गारेण सह भावानामङ्गाङ्गिभाव उक्त:, न तु रससामान्येन। ततो रससामान्येन सह भावानां सम्बन्ध: कीदृश" इति चेत्, शृङ्गारत्वमत्र करुणत्वादिसजातीय: स धर्मो न भवति, येन रसत्वव्याप्यता अवच्छेद्यते, अपि तु स: यो हि करुणत्वादि–सजातीय–शृङ्गारत्व–निष्ठ–व्याप्यता–निरूपितां व्यापकतामवच्छिनत्ति। ततस्तद्युक्त: शृङ्गारो रससामान्यमेव। उच्यते चैतद् भोजेन–

**रसोऽभिमानोऽहंकार: शृङ्गार इति गीयते।**[१] इति,

**आत्मस्थितं गुणविशेषमहंकृतस्य शृङ्गारमाहुरिह जीवितमात्मयोने:।**
**तस्यात्मशक्तिरसनीयतया रसत्वं युक्तस्य येन रसिकोऽयमिति प्रवाद:।।**[२]
इति,

**सत्त्वात्मनाममलधर्मविशेषजन्मा जन्मान्तरानुभवनिर्मित–वासनोत्थ: ।**
**सर्वात्मसंपदुदयातिशयैकहेतुर्जागर्ति कोऽपि हृदि मानमयो विकार: ।।**[३]
इति,

**विशिष्टादृष्टजन्मायं जन्मिनामन्तरात्मसु ।**
**आत्मसंपद्गुणोद्भूतेरेको हेतु: प्रकाशते ।।**[४] इति च।

विशदीक्रियते चैतदेवमेतेनैव–

शृङ्गारो हि नाम विशिष्टेष्ट–दृष्ट–चेष्टाभिव्यञ्जकनाम् आत्मसंपदा–मुत्कर्षबीजं वृद्धि–सुख–दु:खेच्छा–द्वेष–प्रयत्न–संस्काराद्यतिशयहेतु–रात्मनोऽहङ्कारगुणविशेष: सचेतसा रस्यमानो रस इत्युच्यत।।[५] इति।
(एवं चात्मसंपदादिपरिभाषाणां कामन्दकाद्यभिमतार्थपरतया व्याचिख्यासा

---

१. सरस्वतीकण्ठाभरणस्य ५.१ कारिका।

२-३. शृङ्गारप्रकाशमङ्गलम्।

४. सरस्वतीकण्ठाभरणस्य ५.१।

५. शृङ्गारप्रकाशस्य ज्योशेरसंस्कारणे ४२९ पृ०।

प्रौढिवादमात्रमेव पण्डितराज—राजेश्वरशास्त्रिद्रविडपादानाम्)

युक्तं चैतत्, शृङ्गारपदस्य तथैव व्युत्पादनात्। ननु कास्य व्युत्पत्तिरिति चेदियम्—

१. शृङ्गम् उद्रिक्तां कामरूपाम् आत्मसंपदम् आ अतिशयम् आरयति।

२. शृङ्गं तथाभूताया आत्मसंपदः सातिशयमुद्रेकम् आ समन्ताद् ऋच्छतीति।

ननु किमस्या मूलमिति चेत् ''आत्मसंपदुदयातिशयैकहेतु''—पदं तत्तया गृहाण, गृहाण च—

**शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।**
**उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते ।।**

विश्वनाथमहापात्रप्रयुक्तं मन्मथोद्भेदपदं तत्तया। अत एव राधाकान्तदेवोऽपि कल्पद्रुमे—''शृङ्गं प्राधान्यं कामोद्रेकं वा ऋच्छति''इति शृङ्गारपदं व्युत्पादयन् युक्तवागेव। ननु कथं तर्हि शारदातनयः—

**भावानामुत्तमं यत् तु तच्छृङ्गं श्रेष्ठमुच्यते ।**
**इयन्ति शृङ्गं यस्मात् तु तस्माच्छृङ्गार ईरितः ।।**[१]

इति शृङ्गारस्य भावत्वमुदीरयति'। शृङ्गारप्रकाशप्रतिस्पर्धितया [२]भावप्रकाश'—माबध्नन्नसौ किं वान्यदुदीरयतु। भावानामेव हि प्रकाशने तस्य संरम्भः। एवं स्थितमेतद् यद् भोजः शृङ्गारं रसं चानन्यार्थकं मनुते। एवं गते शृङ्गार एष—

''मुख्यभूतान्महारसात् स्फोटदृशीवासत्यानि वा अन्विता—भिधानदृशीवोपायात्मकानि सत्यानि वा, अभिहितान्वयदृशीव

---

१. भावप्रकाशनस्य २.१९ कारिका शृङ्गारशब्दव्युत्पत्तयेऽभिनवभारत्यपि द्रष्टव्या यत्रारकन्प्रत्ययः प्रत्यादिश्यते। द्र०—नाट्यशास्त्रस्य बड़ौदासं०, पृ० ३०१।

२. भोजेन शृङ्गारस्य, मम्मटेन काव्यस्य, शारदातनयेन च भावस्य प्रकाश आबद्धः। नूनमत्राभिप्रायविशेषदिग्धत्वं नाम्नामुत्प्रेक्ष्यम्।

तत्समुदायरूपाणि वा रसान्तराणि भागाभिनिवेशदृष्टानि रूप्यन्ते''[१] इत्युक्तया अभिनवगुप्तदिशा मुख्यरस इति महारस इति च वक्तुं शक्यते।

ननु 'यदि शृङ्गार एतावानादरो यदिमं रससामान्यपदवीमधिरोपयन्ते भवन्तः, तर्हि वीरादीनां रसान्तराणां का गतिः? शृङ्गारबीभत्सरौद्राणां परस्परं प्रातिकूल्यात् तेषामेतदङ्गताया अशक्यत्वात्। शक्यत्वे पुनर्वैपरीत्यस्यापि सुवचत्वात्' इति चेदुच्यते भोजेन 'शृङ्गार एवैको रसः वीरादयः पुनः प्रसिद्धिमात्रतो रसाः वटयक्षवत्। न पुनरिमे शृङ्गार–विनाभावेनापि लब्धसत्ताकाः।' यथा चैतत् तदस्यैवैतेन ग्रन्थेन विस्पष्टम्–

**वीराद्भुतादिषु च येह रसप्रसिद्धिः सिद्धा कुतोऽपि वटयक्षवदाविभाति।**
**लोके गतानुगतिकत्ववशादुपेतामेतां निवारयितुमेष परिश्रमो नः।।**[२]

इति,

विस्पष्टं चैतदेतेनास्यैव पद्यस्यावतरणिकाबन्धेन–

''सर्व एव रत्यादयो विभावानुभावव्यभिचारिसंयोगादुत्पद्य भूमानमापन्ना रसीभवन्ति। तथा हि 'रसनाद् रसत्वमेषां मधुरादीना–मिवोक्तमाचार्यैः। निर्वेदादिष्वपि तत् प्रकाममस्तीति तेऽपि रसाः।

एवं सर्वेषां तुल्ये रसत्वे रत्यादीनामेव परप्रकर्षगामिनां शृङ्गारवीरादिव्यपदेश इति न घटते। तथात्वे वा नाममात्रं भिद्यते।''[३] इति।

एष एव च सिद्धान्तः परेणापि प्रबन्धजातेनाचार्य एष साधयते। तथा हि–

१. शृङ्गारी हि रमते, उत्सहते, हसति, विस्मयते, जुगुप्सते, शोचति, बिभेति, शाम्यति, स्निह्यति, गर्वायते, अभिमन्यते।[४] इति।

---

१. अभिनवभारत्या बड़ौदासंस्कारणम्, २६७ पृष्ठम्।

२-३. ६१–६२, शृप्र., प्र० प्र०–११, ज्यो० सं० पृ० ४४२।

४. शृप्र. ज्यो०, पृ० ४४३।

२. 'ऊर्जस्विन्यपकर्ताहम्, यत् ते चेतसि भयम्, न मे खड्गः पराङ्मुखेषु प्रहर्तुमुत्सहते, मयि धृतायुधे किम् आयुधान्तरैः' इति सर्वत्रैवाहङ्कारः प्रतीयते"[१] इति।

३. न हि बहवो रसाः, अपि तु एक एव शृङ्गारो रसः।।[२]

भरतनाम्ना प्रसाधितं रससूत्रम् अनुगृह्णन्नप्यसौ दृश्यते, यदुच्यत एतेन—

"कथं पुनर्विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः? उच्यते, यथा इन्दुसन्निधेश्चन्द्रकान्तः स्यन्दते, यथा अर्कसन्निधेः सूर्यकान्तो ज्वलति, यथा कर्पूरसन्निधेः स्फटिको विलीयते, तथा तेभ्यस्तेभ्य आलम्बन—विभावेभ्यस्तदाकारपरिणतेन्द्रियबुद्ध्युपाधियोगिनोऽभिमानिमनसस्ते ते रतिशोकादयो भावाः समुत्पद्यन्ते।।"[३] इति।

श्रीभोजस्य शृङ्गाररससिद्धान्तो भोजस्यैव छन्दोबन्धेनैवं निगमयितुं शक्यते—

**शृङ्गार-वीर-करुणाद्भुतरौद्र-हास-बीभत्स-वत्सल-भयानक-शान्त-नाम्नः।**
**आम्नासिषुर्दश रसान् कवयो वयं तु शृङ्गारमेव रसनाद् रसमामनामः।।**[४]

इति।

शक्यते च निगमयितुमेतेन व्याख्याबन्धेन—

सिद्धमेतद् रत्यादयः शृङ्गारप्रभवा एव एकोनपञ्चाशद् भावाः, वीरादयो मिथ्यारसप्रवादाः, शृङ्गार एवैकश्चतुर्वर्गैककारणं रस इति।।"[५] इति।

अग्निपुराण[६] एषैव सर्वा प्रक्रिया निर्विशेष—सविशेष—भेदेन रसद्वैविध्यमङ्गीकृत्यैवं सङ्गमय्यते—

---

१. शृप्र. ज्यो०, पृ० ४४४।
२. तत्रैव, पृ० ४४२।
३. तत्रैव, पृ० ४४४।
४. शृप्र. मङ्गलम्।
५. तत्रैव, पृ० २।
६. अग्निपु० ३३०—३१ अध्यायौ।

निर्विशेषो रसः—

अक्षरं परमं ब्रह्म सनातनमलं[१] विभुम् ।
वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम् ।।
आनन्दः सहजस्तस्य व्यज्यते स कदाचन ।
व्यक्तिः सा तस्य चैतन्यचमत्कारसमाह्वया ।।

सविशेषो रसः—

आद्यस्तस्य विकारो यः सोऽहङ्कार इति स्मृतः ।
ततोऽभिमानस्तत्रेदं समाप्तं भुवनत्रयम् ।।
अभिमानाद् रतिः सा च परिपोषमुपेयुषी ।
व्यभिचार्यादिसामान्याच्छृङ्गार इति गीयते ।।
तद्भेदाः काममितरे हास्याद्या अप्यनेकशः ।
स्व-स्व-स्थायिविशेषोत्थ-परिपोष-स्वलक्षणाः ।।
सत्त्वादिगुणसन्ताना जायन्ते परमात्मनः ।।[२] इति।

### ३. रसाश्रयः

ननु 'भवतु नामैकस्य शृङ्गारस्यैव रसत्वम्, रसिकत्वं तु कस्येति जिज्ञासामहे' इति चेदत्र श्रीभोजो नितान्तमेव वैज्ञानिकः। स लोकदृष्टान्तेन रचितसोपानः काव्यरसभूमिकामारोहति, सामाजिकं च तत्राधिकरोति। यथा चैतत् तदपि तस्यैव—

''एते रत्यादयः स्वेभ्यः आलम्बनेभ्य उत्पद्यमानाः सर्वस्यैवोत्पद्यन्ते, उत कस्यचिदेव? यदि तावत् सर्वस्य, तदा सर्वं जगद् रसिकं स्यात्। न चैतदस्ति। यतः कश्चिद् रसिकः, कश्चित् तु नीरसो दृश्यते। न च दृष्टविपरीतं

१. 'अलमि'—ति साहित्यदर्पणस्य १९३६ यीशुवर्षीयस्य निर्णयसागरसंस्करणस्य परिशेषे दत्तेऽग्निपुराणे पाठः। अन्यत्र सर्वत्र 'अजम्' इत्येव पाठः।

२. करपात्रस्वामिपादाः स्वकीये भक्तिरसार्णवे विषयमिमं सप्रपञ्चमुपस्थापयन्ति।

शक्यमनुज्ञातुम्। अतो न सर्वस्य रत्यादयो जायन्ते। अथ कस्यचित्, तस्य निमित्तमभिधानीयम्। तद् दृष्टमदृष्टं वा स्यात्? न तावद् दृष्टम्, अनुपलभ्यमानत्वात्, अदृष्टं तु साधारणम्, असाधारणं वा। साधारणे पूर्वोक्त एव दोषः सर्वं जगद् रसिकं स्यादिति। असाधारणं तु नान्तरेण प्रत्यगात्मगतानादिवासनानुबन्धि धर्मकार्य भवितुमर्हति। तं त्वात्मनोऽहङ्कारगुणविशेषं ब्रूमः। स शृङ्गारः सोऽभिमानः, स रसः।''[1] इति।

अत एवोच्यते—''पुण्यवन्तःप्रमिण्वन्ति योगिवद् रससन्ततिम्'' इति। न च भोजवचनमिदं लौकिकमेव रसं लक्ष्यीकरोति, ततश्च अनुकार्यगततयैवात्र रसो निरूप्यते, न सामाजिकगततया, अनुकार्यस्यापि रसवत्त्वेन रसिकत्वस्याक्षुण्णत्वात्''इति वाच्यम्, लोके हि रत्यादयो भावास्तिष्टन्त्येव जन्मानुबन्धितया निर्व्यभीचारम्। अत एव—

**शृङ्गार एव मधुरः परः प्रह्लादनो रसः ।**
**तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ।।**[2]

इति ध्वनिकारिकाया लोचनेऽभिनवगुप्तोऽपि वक्ति—

१.''मधुर इत्यत्र हेतुमाह—परः प्रह्लादन इति। रतौ हि समस्त—देव—तिर्यङ्नरादिजातिष्वविच्छिन्नैव वासनास्ते इति न कश्चित् तत्र तादृग् यो न हृदयसंवादमयः, यतेरपि हि तच्चमत्कारोऽस्त्येव। अत एव मधुर इत्युक्तम्। मधुरो हि शर्करादिरसो विवेकिनोऽविवेकिनो वा, स्वस्थस्यातुरस्य वा झटिति रसनानिपतितस्तावदभिलषणीय एव भवति।'' इति।

२.''नहि वीतरागोऽपि विपर्यस्तान् भावान् पश्यति, नह्यस्य वीणाक्वणितं काकरटितकल्पं प्रतिभाति''[3] इति च।

---

१. शृङ्गारप्रकाशस्य ११ प्रकाशे ज्यो० पृ० ४३०—३१।

२. ध्वन्यालोककारिका २.७।

३. लोचनम्, चौखम्बासंस्क०, पृ० ४८८।

तत् कथमुच्यते रस उत्पद्यत इत्यत्रैव संदर्भे श्रीभोजेन। न ह्युत्पत्तिरियं काव्ये नाट्ये वा संभवति, लोक एव तत्संभवात्? युक्तमुच्यते। काव्यविचारे हि पूर्वं भूमिकात्मना लोक एव दृष्टान्तीक्रियते। अत एवाभिव्यक्तिवादी अपि ''लोके प्रमदादिभि: स्थाय्यनुमानेऽभ्यासपाटववतां सामाजिकानां वासनात्मतया स्थित: स्थायी रत्यादिक: शृङ्गारादिको रस:''[1] इत्येवमादौ लोकमेव भूमिकीकुरुते। तत: सामाजिकान्तरङ्गं स्पृशति। पदवाक्यज्ञा अपि प्रथममन्विताभिधानमेवाभ्यन्तरीकुर्वन्ति, पश्चादभिहितान्वयम्। वादयोरनयो: को नु सचेता: संशयीत? यदनयोराद्यो लोकगतामर्थप्रतियोगिकां शब्दानुयोगिकां च दिशमाश्रयते, परश्च तद्विपरीताम्। ततश्च को न्वत्र संदिहीत? यदाद्यो वादो व्यवहारौपयिक:, परश्च वाङ्मयकलोपजीव्य:। रससंविदोऽपि वस्तुत इयमेव गति:। ततश्च सत्यपि रसोत्पत्तिशब्दप्रयोगे, सत्स्वपि च तथाविधेष्वन्येष्वपि व्यवहारेषु न ह्येव व्यामुह्यन्ति वाग्योगविद: प्रेक्षावन्त: शास्त्रार्थविचारे। शृङ्गारस्य स्थानेऽभिमानशब्दस्योपादानमपि तथ्यमिदं प्रमाणयते। 'इदं मम, अहमत्राधिकृत:'' इति या चेतोवृत्तिरियमेव प्रायेणाभिमानपदेनोच्यते। आत्माधिकारभाव एष काव्य एव सहते, न लोके। तत्र ह्यनधिकृता अपि व्यापिपुरति कन्याहरणादिषु, परराष्ट्रास्कन्दनादिषु च। काव्ये पुन: शिष्टा एव सामाजिका अधिकारिण:। ते सीतादिकं प्रति कथं नु प्रवर्त्तेरन्, अगम्यात्वबुद्धेस्तत्र बाधकत्वात्? न च संभवति प्रवृत्तिं विना काव्यरसास्वाद:। भवति च सा, जायते च तेषु स:। किं तत्र तन्त्रमिति विचारणे साधारण्यमेव विभावादिगतमत्र तन्त्रतां केचिन्नयन्ति। तेन हि ''संबन्धविशेष–स्वीकारपरिहारनियमानध्यवसाय''–रूपेण ''इदं मम नास्तीति न'' इति मतिं लम्भित: सामाजिकस्तत्र प्रवर्त्तते, रसं च स्वदते। अस्मिंश्च साधारण्ये य एष ममकार:, सोऽभिमानाहङ्कारादिपदवाच्य एव पदार्थ:।

१. काव्यप्रकाशस्य ४ उल्लासे–अभिनवगुप्तरसमतम्।

ततश्चाभिमानमत्राभ्यन्तरीकुर्वता आचार्येण वस्तुतः सामाजिक एव लक्ष्यीकृतः, न लोकः, लोके प्रागुक्तया रीत्या तदनुपयोगात्। किञ्च,

**रसः स एव स्वाद्यत्वाद् रसिकस्यैव वर्त्तनात्।**
**नानुकार्यस्य वृत्तत्वात् काव्यस्यातत्परत्वतः॥[१]**

इति च स्वगृह एव जायमानं रसिकशब्दव्यवहारमसौ कथं नामान्यथयेत्, उपहासास्पदतां वासादयेत्? ततो 'रसिक'पदं प्रयुञ्जानस्य भोजस्य लोकरसप्रतिपादकताप्रवादस्तथैवोपहासास्पदम्, यथा 'प्रिया'पदं प्रयुञ्जानस्य कस्यचित् शूर्पणखाप्रतिपादकताप्रवादः। अन्या हि शूर्पणखा, अन्या च प्रिया। न हि कश्चित् स्त्रीत्वमात्रदर्शनादत्र मुह्यति। अन्यो हि काव्यरसः, अन्यश्च लोकरसः। को नामैतं तेन व्यामिश्रयेत्, रसत्वमात्रदर्शनात्? ततश्च को नामोत्सहेत, काव्यरसभोक्तुः कृते प्रयुक्तस्य रसिकपदस्य लोकरसस्वादयितुः कृते प्रयोगमूरीकर्तुम्, भोक्तृत्वमात्रसाम्यात्। एवं स्थितमेतद् यद् भोजः सामाजिकगतत्वमेव रसस्य प्रतिपद्यते, नानुकार्यगतत्वम्, न वानुकर्तृगतत्वम्।

### ४. रसास्वादः

अथ, को नामास्य रसस्य स्वादो यः—"साहङ्कृतौ हृदि परं स्वदते रसः" इति सबहुमानमुपनिबद्धः, व्यापाररूपो वा फलरूपो वा? उभयथापि किमस्य स्वालक्षण्यम् "भावकत्वं वा, भोजकत्वं वा, व्यक्तत्वं वा"। उक्तमेव श्रीभोजेन "मुदाद्यभिमानानुभवः" इति। एष च भावन—भोजनाभ्यामभिन्नो व्यापारदृशा, भाव—भोगाभ्यां चाभिन्नः फलदृशा। एवं च य एवानुभवः, स एव स्वादः, य एव स्वादः, स एव रसः, य एव च रसः, स एव शृङ्गारः। साङ्ख्यदृशा, शैवदृशा वा व्यक्तिरप्यस्योभयरूपा स्वीकर्त्तुं शक्यते, चिदावरणभङ्गतया व्यापाररूपा, भग्नावरणचित्तया च फलरूपा। ननु फलव्यापारयोरैक्यं विज्ञानविरुद्धमिति कथमिदं स्वीकर्त्तुं

१. दशरूपककारिका ४.३८।

शक्येतेति चेत्, एवं हि—

**आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।**
**आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ।।**[१]

इत्यादिकमपि विज्ञानविरुद्धमेवोरीक्रियेत।

ननु "इयं हि कैवल्यभूमिः, अत्र किं नाम विज्ञानम्, का नाम यास्य विपरीतता" इति चेत्, भोजो रसे द्वैतमूरीकुरुत इति केनोक्तम्? ननु "मुदादयो विषयाः, अभिमानो विषयी, अनुभवश्च व्यापारः" इति कीदृशस्तस्य रसास्वादे कैवल्योपगमः इति चेत्, 'शुक्तिकाशकले रजतखण्डप्रतिभासे' भवन्तः किं प्रतिपद्यन्ते, द्वैतमद्वैतं वा विषयविषयिणोः? ननु प्रतिभासमात्रविषयस्तत्र द्वैतम्, अद्वैतं तु वास्तवमिति नास्ति तत्र दोष इति चेत्, रसास्वादेऽपि सैव स्थितिः। अनुभव एष द्वैतं विषयीकरोति, न तु स्वयमपि द्वैततामासादयति। ततश्च स्वादु, स्वादः, स्वदनं चेति त्रितयमप्यत्रैकरूपमेव संविद्भट्टारिकासौराजयभूमनि। तत्र को नामाद्वैताद् भेदो द्वैतकलायाः? भोजो भोगमेव यद्यपि बहुमन्येत, तथापि नास्त्यस्य भावने विमानना, रससीम्नि भावनाया एव भोगरूपत्वात्। ननु भावनापथातीतत्वं रसस्य भोजेन प्रतिपादितम्—"यो भावनापथमतीत्य विवर्त्तमानः" इत्यादिना संदर्भेणेति कथमुच्यते, रसभावना तेन मन्यत इति चेत् सत्यम्, भावनेयं रसरूपैव भवति, न तु रसविषयिणी। ततो नास्ति दोषः, भोजेन भावना—रसयोर्विषयविषयिीावमात्रस्यैव प्रत्यादिष्टत्वात्। किञ्च, रसस्यापि भावरूपता भोजस्य न नाभिमता। यथा चैतत् तदस्य—

"स शृङ्गारः, सोऽभिमानः, स रसः। तत एते रत्यादयो जायन्ते। तैश्चायं प्रकर्षप्राप्तैः सप्तार्चिरर्चिश्चयैरिव प्रकाशमानः शृङ्गारिणामेव स्वदते। तदुपाधिश्चायमुपजायमानो रसस्त्रिधा विख्यायते—प्रकृष्टः, भावरूपः,

१. कुमारसम्भवस्य २.१०।

आभासश्च। तत्रायं कथाशरीरव्यापिन उत्तमनायकस्य तथाविध एव विषये जायते स प्रकृष्टः, मध्यमस्य य उपजातो न प्रकर्षमासादयति स भावरूपः, यश्च तिरश्चां प्रतिनायकादीनां चोपजायते स शृङ्गाराभासः।[१] इति

इति संदर्भेण प्रमाणितमेव। सर्वथा भावना अनुभवश्च भोजेन रसस्य यथाकथञ्चित् कण्ठरवेणोल्लिख्येते, न व्यक्तिरिति ध्वनिवादिनोऽस्य रसविषये दूरमज्ञातेयत्वम्।

ननु रसस्य विभावानुभावव्यभिचारिभी रत्यादिभिः स्थायिभिः, भावरसतदाभासादिभिः कः संबन्ध इति चेत्? अत्र भोजस्यैव कानिचिद् वाक्यानि प्रस्तूयन्ते, येन प्राप्तसमाधयः श्रीमन्तः स्युः। तत्र—

आलम्बनविभावो रत्यादीनुत्पाद्य रसमुपकुरुते। यथोक्तमेतेन—

*"यथेन्दुसन्निधेश्चन्द्रकान्तः स्यन्दते, यथार्कसन्निधेः सूर्यकान्तो ज्वलति, यथा कर्पूरसन्निधेः स्फटिको विलीयते, तथा तेभ्यस्तेभ्य आलम्बन–विभावेभ्यस्तदाकारपरिणतेन्द्रियबुद्ध्युपाधियोगिनोऽभिमानिमनसस्ते ते रतिक्रोधशोकादयो भावाः समुत्पद्यन्ते।"*[२] इति।

उद्दीपनविभावः पुनरुत्पन्नानेतान् विकारान्तरसञ्जननादुपचाययते। यदुच्यत एतेन—

*"यथेन्दूदये समुद्रः क्षुभ्यति, यथा अपथ्यसेवनया व्याधिरभि–वर्धते, यथानार्यसन्निधेः साधुः सुतरां दुःखाकरोति, तथा तेभ्यस्तेभ्य उद्दीपनविभावेभ्यस्तत्तदनुभवसंस्कारयोगिनो मनसस्तत्तद्भावाभिवृद्धये ते ते विकारा उपजायन्ते।"*[३] इति।

अनुभाव—व्यभिचारिण एतस्मादासादितोत्पत्तय एतदनुभूतयुपोद्–बलयितारो भवन्ति। यथोच्यत एतेन—

१. शृङ्गारप्रकाशस्य ११ प्रकाशे, ज्यो० सं०, पृ० ३३१।
२. शृङ्गारप्रकाशस्य ११ प्रकाशस्य ज्यो० सं०, पृ० ४४४।
३. शृङ्गारप्रकाशस्य ११ प्रकाशस्य ज्योशेरसंस्करणे ४४४—४४८।

*"यथैकस्यापि भूरुहादे: काण्ड—स्कन्ध—शाखा—विटपादय: प्रकारा:, पल्लव—पत्र—पुष्प—फल—संपदादयो विकारा:, एकस्याप्यम्भस: प्रवाहावर्त्त—बुद्बुदतरङ्गादयो विवर्त्ता:, मुक्ता—फल—फेन—लवण—करकादयो विपरिणामा:, एकस्यापि ध्वने: तार—मध्य—मन्द—क्रुष्टादयो भेदा:, वर्ण—पद—वाक्य—कूजितादयोऽवच्छेदा:, एकस्यापि वायो: प्रवहावहपरिवहादय: स्कन्धा:, प्राणापानव्यानादयोऽनुबन्धास्तेभ्यस्तेभ्य उपाधिभ्यो जायन्ते, तथैकस्यापि रति—क्रोध शोकादेस्तेभ्यस्तेभ्य उपाधिभ्यस्ते ते ऽनुभावा व्यभिचारिण—श्चाभ्यन्तरा बाह्याश्चोपप्लवन्ते।'*[१] इति।

एते च संभूय रसं निष्पादयन्ति। यदुच्यत एतेन—

*"यथेक्षुभ्यो रस:, सर्षपेभ्यस्तैलम्, धातुभ्यो हिरण्यम्, अश्मभ्यो लोहम्, दध्नो नवनीतम्, काष्ठतोऽग्नि:, तेभ्यस्तेभ्यो यन्त्रादिमन्थसंयोगेभ्यो निष्पतति, तथा स्वेभ्य: स्वेभ्यो विभावानुभाव—व्यभिचारिसंयोगेभ्यो रतिक्रोधशोकादिभ्यस्ते ते रसा निष्पद्यन्ते।"* इति।

निष्पद्यमान एष रस: स्वनिष्पादकानेतान् सात्मीकुरुते। यथोच्यते।" एतेन—

*"यथा लवणरसादय: स्वसंयोगिनो मृद्वीकादीनप्यात्मरूपतां नयन्त उपचीयन्ते, तथा रत्यादिजन्मानो रसा रत्यादीनिव विभावादीनप्यात्मरूपतां नयन्त उपचीयन्ते।'*[२] इति।

रसो वस्तुतो भिन्न:, तथापि विभावादीनामियं या रसता तामप्यभ्यन्तरीकरोति। यदुक्तमेतेन—

*"यथा सर्पिर्जतु—मधूच्छिष्टादीनां पार्थिवानाम्, घन—तुहिन—करकादीनाम् आप्यानाम्, त्रपु—स्त्रीस—रजतादीनां तैजसामानामग्निसंयोगाद् रसता रसेनैव सामान्यं भवति।'*[३] इति।

रसा एते रसान्तराणां प्रभवा भवन्ति। यदुच्यत एतेन—

---

१—३. शृङ्गारप्रकाशस्य ११ प्रकाशस्य ज्योशेरसंस्करणे ४४४—४४८।

*"यथा इक्षुरसेभ्यो मधुनिष्पत्तिः, यथा मधुरादिभ्यः षाडवोत्पत्तिः, यथा गुडादिभ्य आसवोत्पत्तिः तथा तेभ्यस्तेभ्यो रससामान्येभ्यो रसविशेषाभिनिर्वृतिर्भवति।"*[१] इति।

रसानामेषां जातिः, अर्थक्रिया, अवस्था चापि परस्परं भिद्यन्ते। यदुच्यत एतेन–

*"यथैकस्याप्यग्नेर्भौमदिव्यौदर्यादयो जातिभेदाः, दाहालोक–पाकादयोऽर्थक्रियाः, धूमार्चिरङ्गारादयोऽवस्थः संदृश्यन्ते, तथैकस्यापि रसस्य भाव–रस–तदाभासादयो जातिभेदाः, उत्कण्ठाभिषङ्गनिर्वृत्यादयोऽर्थक्रियाः, उत्पादाभिवृद्धिस्थैर्यादयोऽवस्थाः समुपलभ्यन्ते।"*[२] इति।

रस एष सामाजिकगतः, न काव्यगतः। काव्ये विभावादियोजनैव केवलं संभवति। सा स्वभावोक्तिन्यायेनालङ्काररूपैवेति काव्यशरीरदृशा रसा अप्यलङ्कारा एव। ततश्च गुणा अपि न गुणाः, अपि त्वलङ्कारा एव। तेन यथा अलङ्काराणां सङ्करो भवति, तथा गुणरसयोरपि स संभवतीति महाराजस्यास्याद्भुतोपस्थापना। यथा चैतत् तदप्यधोलिखितेन संदर्भेण स्पष्टमेव–

*"रसा हि सुखदुःखावस्थारूपाः। ते च शरीरिणामेव चैतन्यवताम्, न काव्यस्य, तस्य शब्दार्थरूपतया अचेतनत्वेन"*[३]।

"त्रिविधः खल्वलङ्कारवर्गः—वक्रोक्तिः, स्वभावोक्तिः, रसोक्तिरिति। तत्रोपमाद्यलङ्कारप्राधान्ये वक्रोक्तिः, श्लेषादिगुणप्राधान्ये स्वभावोक्तिः,

१. शृङ्गारप्रकाशस्य ११ प्रकाशस्य ज्योशेरसंस्करणे ४४४–४४८।

२. तदेव।

३. शृप्र. ज्योशेरसंस्करणे, पृ० ४३७। रसो हि शब्दार्थशरीरकत्वोज्जडे काव्ये स्थातुं नार्हतीत्यस्माभिरपि प्रत्यपादि "रसस्य शाब्दत्वम्" इति स्वकीये आदित्यनाथझा–भिनन्दनग्रन्थ–सागरिका–७.२–अङ्क–प्रकाशिते संदर्भे।

विभावानुभावव्यभिचारिसंयोगात् तु रसनिष्पत्तौ रसोक्तिः''[१] इति।

एवमवस्थापिते गुणरस—तदाभास—भावानामलङ्कारत्वे षट्प्रकारो—ऽलङ्कारसङ्कुरः संभवति, गुणसङ्करः, रससङ्करः, अलङ्कारसङ्करः, गुणरससङ्करः, गुणालङ्कारसङ्करः, रसालङ्कारसङ्कर इति।''[२] इति।

शृङ्गारमात्रं रसतया प्रतिष्ठाप्य अनेकसाधनीयं साङ्कर्यमपि तत्र प्रतिपादयन्नसौ नास्ति प्रमत्तः। स तत्रापि अवधत्ते ब्रूते च सपूर्वोत्तरपक्षमेवम्—

*''कथमिवैकः शृङ्गारोऽनेकसाध्यं सङ्करव्यवहारं वर्तयति? उच्यते—यद्यपि शृङ्गार एवैको रसः, तथापि तत्प्रभवा ये रत्यादयः, तेऽप्युद्दीपनविभावैरुद्दीप्यमानास्तदनुप्रवेशादेव सञ्चारिणामनुभावानां च निमित्तभावमुपयन्तो रसव्यपदेशं लभन्ते। यथा ह्यभिमानो रत्यादीनां निमित्तं चेतसा रस्यमानो रसः, तथा रत्यादयोऽपि धृतिचिन्तौत्सुक्यादीनां मनोवाक्कायबुद्धिशरीरारम्भाणां च निमित्तम्, अभिमानानुप्रवेशेनैव चेतसा रस्यमाना रसा इत्युच्यन्ते। युगपदभिधाने च सङ्करव्यवहारं कल्पयन्ति। ते तूत्पत्तौ भावाः, प्रकर्षे रसाः, विपर्यये रसाभासाः, प्रविलये तत्प्रशमा इति प्रभिद्यमानाः संकीर्यन्ते। तत् षोढा सङ्करः—'भावसङ्करः, रससङ्करः, भावाभाससङ्करः, रसाभाससङ्करः, भावप्रशमसङ्करः, रसप्रशमसङ्कर इति।[३] इति।*

---

१. शृप्र. ज्यो० सं०, पृ० ४३८। उक्तित्रयमिदं सरस्वतीकण्ठाभरणेऽपि महाराजेनानेनैवं स्मर्यते—

वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम् ।
सर्वासु ग्राहिणीं तासु रसोक्तिं प्रतिजानते ।। ५.८।।

२. शृप्र. ज्यो० सं०, पृ० ४४८। एवमेव सरस्वतीकण्ठाभरणस्य निर्णयसागरीये संस्करणे, पृ० ७०६।

३. शृप्र. ज्यो० सं०, पृ० ४५०। एवमेव सरस्वती कण्ठा० नि० सा० सं०, पृ० ७२९, तत्र साङ्कर्यमिदं तिलतण्डुलवत्, क्षीरनीरवत्, छायादर्शवत्, नरसिंहवत्, पांसूदकवत्, चित्रवर्णप्रकारवदिति षोढा भवति। सरस्वतीक०, पृ० ७१६—१।

एतेनेदमपि स्पष्टं यदसौ रसस्य प्रशममपि स्वीकरोति ध्वनिमतविरुद्धम्।

ननु "रसवद् रसपेशलम्' इति प्राचामुक्तिं तिरस्कृत्य मतुपः स्थाने तुल्यार्थिकां वतिं चाभिषिच्य 'रसवदि'–ति व्यवहरतां ध्वनिवादिनां भोजेन किं क्रियते? आदरः, अनादरो वा? उभयमपि। यदुच्यत एतेन–

(क) *रसवदित्यत्र किं मत्वर्थीयः, उत वतिः? यदि मत्वर्थीयः, मत्वर्थानुपपत्तेस्तदभावः, रसा हि सुखदुःखावस्थारूपाः। ते च शरीरिणां चैतन्यवताम्, न काव्यस्य, तस्य शब्दार्थरूपतया अचेतनत्वेन भूमनिन्दादीनामभावात्। अथ वतिः, वत्यर्थानुपपत्तेस्तदभावात्। न च रसैस्तुल्यं वर्त्तत इति। तेन तुल्यं क्रिया चेद् वतिरिति वतौ रसवत्, नापि रसस्येव इति तत्र तस्येवेति वतौ रसवत्। न हि रसस्येवास्य किञ्चिदस्तीति।*

(ख) *यथेच्छसि तथास्तु। अस्तु तावन्मत्वर्थीयः। ननु चोक्तं मत्वर्थाभावात् तदनुपपत्तिरिति, रसवतो रामादेर्यद् वचनम्, तद् रसमूलत्वाद् रसवत्, अभेदसामर्थ्यारोपाच्च कविना अनुक्रियमाणस्य तस्यानुकरणमपि रसवत्। अथवा पुनरस्तु वतिः। ननु चोक्तं वत्यर्थानुपपत्तेर्न वतिर्भवतीत्यत्रापि नानुपपत्तिः। तदर्हम्[1] इति वचनाद् वतिर्भविष्यति रसान् प्रतिपादयितुं यदर्हति, तद् रसवत्। अर्हति रसवद् रामादिवचनमनुक्रियमाणम्, अभेदसमध्यारोपाद् रसान् प्रतिपादयितुमिति रसवद् भवतीति।[2]*

ननु 'इयं हि अलक्ष्यक्रमव्यङ्ग्यस्य गाथा, लक्ष्यक्रमव्यङ्ग्यविषये भोजः किं प्रतिपद्यते' इति चेत्, तत्र यत् प्रतिपद्यते तदुक्तमेव तेन तात्पर्यं

१. पाणिनीयम् (५.१.११७) सूत्रम्। मम्मटेन, पण्डितराजेन वा सूत्रमिदं नोल्लिख्यते।

२. शृप्र. ज्यो० सं० पृ० ४३७। सरस्वतीकण्ठाभरणे पुनर्मत्वर्थीयत्वमेव वतेः प्रतिपाद्यते। तथा हि–"ऊर्जस्वि–रसवतोः अलङ्कारत्वविवक्षायाम्, अतिशायने, भूम्नि वा मत्वर्थीयः, गुणत्वविवक्षायां तु प्रशंसा नित्ययोगयोरिति द्रष्टव्यम्।" इति, पृ० ७०५–६।

प्रतिपादयता। भरत इवासावपि शृङ्गारस्य धर्मार्थकाममोक्षप्रधानत्वेन चातुर्विध्यं पश्यति। एतच्च शृङ्गारप्रकाशस्यैव १७—२१ प्रकाशैः स्पष्टम्। एषु धर्मादीनां लक्षणानि तद्भेदाश्चावश्यं विद्वदादरपात्रम्। एषु या धीरोदात्तादीनां नायकानामवस्था व्यवस्था च तत्रापि भोजो नितरामेव स्तुतिपात्रम्। तत्र धर्मार्थकामशृङ्गारस्य साध्यत्वमितरेषां च साधनत्वमुत्प्रेक्ष्यासौ ब्रवीति—

''द्वितीयाश्रमवासिभिश्चतुर्भिरपि वर्णैर्ब्राह्मणादिभिरुभयलोकसिद्धये सेव्यमानो धर्मार्थकामलक्षणस्त्रिवर्गः पुरुषार्थः। तत्रापि धर्मार्थशृङ्गारयोर्हेतुभूतत्वात् कामशृङ्गार एव फलभूतत्वात् प्रधानम्।''[१] इति।

इत्थं भोजः (१) ध्वनिं तात्पर्यानतिरिक्तं न मनुते, न च मनुते तद्गतम्, (२) शब्दवृत्तित्वम्, (३) तदाश्रितं गुणीभूतव्यङ्ग्यत्वम्, (४) तन्निष्ठमलक्ष्यक्रमव्यङ्ग्यत्वम्, (५) स्थायिनां स्थायित्वम्, (६) व्यभिचारिणां व्यभिचारित्वम्, (७) शृङ्गारातिरिक्तानां वीरादीनां रसत्वम्, (८) रसस्य विभावादिनिष्पाद्यत्वम्, (९) स्थायिन एव रसत्वेन परिणामं च। स हि ध्वनिमतस्वातन्त्र्येण (१) दीर्घदीर्घामेकामभिधामेव पार्यवसानिकार्थप्रसवित्रीं मनुते, मनुते च (२) ध्वनेरनुनादप्रतिशब्दरूपतां शब्दार्थोभयगतत्वेन, (३) रत्यादीनामपि व्यभिचारित्वम्, (४) निर्वेदादीनामपि स्थायित्वम्, (५) रसस्य भावोत्तीर्णत्वम्, (६) भावानां भावनामात्रसीमितत्वम्, (७) रसभावयोः प्रभापुञ्ज—रविबिम्बन्यायेन, अवयवावयविभावम्, (८) अग्रहस्ते हस्तशब्दप्रयोगमिव रत्यादीनामपि विषये रसप्रयोगम्, (९) ततश्च तद्गतत्वेन रससाङ्कर्यम्, (१०) रसप्रशमम्, (११) अभिमानरूपस्यैव शृङ्गारस्य रसताम्, (१२) धर्मार्थकाममोक्षकृतां शृङ्गारचतुष्टयीं च।

---

१. शृङ्गारप्रकाशस्य २२—प्रकाशस्यावतरणिका।

**अत्र कतिपये प्रश्नाः—**

१. यदिदमभिमानस्य रसत्वमूरीक्रियते, तत्राभिमान एषोऽभिमानसामान्यरूप एव, उत अभिमानविशेषरूपः? अत्र कैश्चिदुच्यते—विशिष्ट एवासावभिमानः, न सामान्यभूतः। अत एवास्य सत्त्वात्ममात्र–वृत्तित्वमभिख्याप्यते, अमलधर्मविशेषजन्मत्वम्, आत्मसंपदुदयाति–शयैकहेतुत्वं चोदीर्यते। अभिमानसामान्यं पुनरसत्त्वात्मनामपि सुलभम्, न च धर्मगतममलत्वमेव नियमेनापेक्षते स्वनिष्पत्तये, निष्पन्नञ्च न नियमेनात्मसंपदमुदयातिशयं लम्भयते। वयं त्वेवमीक्षामहे—सामान्यभूत एवासावभिमानः। अमलधर्मविशेषः, आत्मगतं सत्त्वं च रसत्वलाभायास्य परिकरः, आत्मसंपदुदयातिशयश्चास्य परिणामः। परिकर एष कविकर्म—रूपकप्रयोगादि—शिल्पमात्रेण अभिमानायास्मा उपच्छन्द्यत इति शिल्पस्यासौ विशेषो यदेतदभिमानसामान्ये वैशिष्ट्यमुपपादयतीति। ध्वनिसंप्रदायेऽपि एकस्या एव रतेः शिष्टेष्टनायकगतत्वेन रसत्वम्, अशिष्टानिष्टप्रतिनायकगतत्वेन तिर्यग्गतत्वेन वा रसाभासत्वम्, इतराङ्गतया रसवत्त्वं च स्वीक्रियते। न चावस्थामेदेनैतेन रतिरियं वैशिष्ट्यमासाद्य प्रत्येकं भिद्यमानाभिमन्यते। ततश्च अभिमानसामान्यमत्र भोजस्याभिमानपदेनाभिमतम्, यद्धि रसरूपतालाभाय स्थितिभेदेन वैशिष्ट्यमश्नुते।

२. ननु साधारण्यं विना प्रवृत्तेरेवाभावात् किं नाम एतेनाभिमानेन क्रियेत? न च भोजेन साधारण्यमिदमुपगम्यते। तत् कथं तस्य क्षेम इति? अत्रोच्यते, काव्यनाट्यादिगतानां सीतादीनामसत्यत्वभावनैव प्रवृत्तिविघातमपहस्तयते, नास्ति तत्र साधारण्यनाम्न एकस्य मध्यवर्त्तिनां मनोव्यापारस्यावश्यकत्वम्। न च शिल्पेऽपि मातरं प्रति रत्यादीनां नास्त्येवोत्पत्तिरिति वाच्यम्, ये हि शृङ्गाररस्वादमीप्सन्ते, ते न ह्येवातिषजन्ते

सीतारामादिरूपकप्रयोगे। शकुन्तलादीन् प्रति कन्यकात्वमभिविन्दन्त इमे दुष्यन्ततुल्यमेवातिषङ्गमभिवृण्वते। ततश्च अभिमानमात्रोदयस्यात्रा–पेक्षणीयता सार्वभौमायते, न साधारण्यस्य, न वा असाधारण्यस्य अन्यथाख्यात्यादिविधृतस्य। अत एव तूष्णीं तिष्ठति भोज: साधारण्यविषये।

३. यदि चित्तधर्मविशेषरूपस्याभिमानस्य रसत्वमङ्गीक्रियते, तर्हि कथं तु निवार्येत श्रुतिविरोध:? कीदृश एष विरोध इति चेत् श्रुतिर्हि भगवती 'रसो वै स:' इति आत्मतत्त्वस्यैव रसत्वमूरीकुरुते, न चित्तवृत्ते:। किमत्रोत्तरमिति चेत्, एवमत्र चिन्त्यम्–'योऽयमत्र ममकारोऽभिमान–रूपस्याहङ्कारस्य जीवातु:, तत्र न न परिहीयत आत्मतत्त्वस्यापि स्पर्श:। तदादाय च सुकरसमाधिरेष श्रुतिविरोध:'।

४. ननु यथा शैवशास्त्रे 'अहमिदम्' 'इदमहम्' इति प्रत्यवमर्शशालिनी चिति: सदाशिवत्वम् ईश्वरत्वं च क्रमेण भजते, सती च कञ्चुकैराच्छन्ना मितिमापद्यते, आपन्नमितभावा च लोकान् प्रकाशयते, तथैवात्राप्यभिमान एषोऽमितत्व–मितत्वाभ्यां प्राप्तोपष्टम्भ: क्रमेण परमात्मानं जीवात्मानं च विषयीकुर्वीत। तत्र रसस्य जीवात्मधर्मत्वादभिमानस्य मितत्वमात्रमूरीक्रियेत, नामितत्वम्। एवंगते को नु लाभ एतस्य एकत्वसिद्धौ? प्रत्युपाधि भिद्यमानतैव प्रत्युतास्योचिता, अन्यथा न ह्येवाभ्युपेयेतानुभूतिभिदा गुडमरिचादिषु, चुक्रशर्करादिषु च, चैतन्यस्य सर्वोपाधिसमानत्वात्। नाभ्युपेयेत च सूर्याचन्द्रमसोरातपवैलक्षण्यम्, प्रकाशत्वाविशेषात्। एवं च स्वीक्रियमाण आत्मतत्त्वे कीदृशो न्वभिमानोऽभिमानस्य रसत्वसिद्धौ? अत एव विद्याधरो भोजस्य शृङ्गारैकरसतावादं मल्लिनाथभाषया भरतादिशास्त्रविरोधादतिदुर्बल–त्वाच्चोपेक्षयैव प्रतिचिक्षेप। अत्रोच्यते–आत्मतत्त्वमत्रानुभवितृमात्रम्, न त्वनुभवविषय:, स हि सर्वेष्वपि रसेषु केवलोऽभिमान एव। अत एव

स्त्रीकर्तृके स्तनावमर्दे नानुभवति स्त्री सुखम्, पुरुषकर्तृके पुनस्तस्मिन्ननु- भवतितरामियं तत्। तत् किमत्र प्रतिबन्धकम्? आत्मतत्त्वस्योभयत्रापि अविशेषेणैव विद्यमानत्वात्। नूनमत्र अभिमानाभाव एव प्रतिबन्धक इति नास्ति भोजो दुर्लभः। एवमन्येऽपि प्रश्ना उपस्थापयितुं शक्यन्ते, नितान्तमेवाभिमानमावहति विषयेऽस्मिन्, शक्यन्ते च समाधातुं स्वस्थतमेन स्वचिन्तनेन[१]।

योऽयमहङ्कारोऽभिमानरूपस्तत्र कारपदं स्वरूपमात्रपरं भवति 'ओङ्कार'—पद इव। यथा हि 'ओम्' इत्येव 'ओङ्कार'—स्तथैव 'अहमि'—त्येवाहङ्कारः। ततोऽनुभवितुः प्रमातृचैतन्यमेवाऽहङ्कारपदेन गृह्येत। युक्तं च तत्, जीवितस्यैव रसभोगो दृश्यते, न मृतस्येति कृत्वा। 'अलङ्कार'—पदेऽपि 'अलमि'—त्येवार्थो गृह्येत। अलम् ब्रह्मेति च रसास्वाद आत्मरूपब्रह्मास्वादो गृह्येत, उपमाद्यास्वादे च।।

---

१. निबन्ध एष डॉ० राघवस्य 'Bhoja's Śṛṅgāraprakāśa' इति ग्रन्थमप्यनुवीक्ष्य निबद्धः, एतस्यैव च महानुभावस्य साभापत्ये उज्जयिनीगतेन विक्रमविश्वविद्यालयेनायोजितायां भोजगोष्ठ्यां १९७०—मार्चे श्रावितोशयः।

# नैषधस्य २२.१५१ पद्यम्

नैषधीयचरितकाव्यमिति नाममात्रमपि सुमहती बिभीषिका ख़ण्डनखण्डखाद्यमिति वत्। अत्रान्तिमे सर्गे काव्यस्यास्य समर्थः कविस्तत्रभवान् श्रीहर्षः स्वयमेव वक्ति—

**ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया**
**प्राज्ञंमन्यमना हठेन पठिती मास्मिन् खलः खेलतु ।**
**श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादय-**
**त्वेतत्काव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः ८।।**

२२.१५२

इति। कस्तावदत्र खल इति जिज्ञासायां कविरेवोत्तरति यस्तावत् प्राज्ञंमन्यमनाः, यो हि अनाराद्धगुरुः ततश्च अश्लथीकृतदृढग्रन्थिः, अश्रद्धश्चे ति। भूयांस्येवात्रोदाहरणानि। अलमेतेन नारायणपण्डितायितमर्जित्वा। एतत्तु काव्येऽत्रातीव खेदास्पदं यदन्यथापाठः। तत्रैकमाददाव—

**दिशि दिशि गिरिग्रावाणः स्वां वमन्तु सरस्वतीं**
**तुलयतु मिथस्तामापातस्फुरद्ध्वनिडम्बराम् ।**
**स परमपरः क्षीरोदन्वान् यदीयमुदीयते**
**मथितुरमृतं खेदच्छेदि प्रमोदनमोदनम् ।।'**

इति हि मुद्रितो मूलपाठो द्वाविंशस्यान्तिमस्य सर्गस्य १५१—तमस्य श्लोके। अत्र द्वितीयस्य चरणस्य यत् क्रियापदं तुलयत्विति तत्र कस्य वा कर्त्तृत्वमिति प्रमुख एव प्रश्नः। 'जन' इत्याक्षेपलभ्यस्यार्थस्य तत्राभिषेकः प्रकाशे। सा हि क्लिष्टा कल्पना, अस्वाभाविकत्वात्। अत्रैव प्रकाशे 'आपात' इत्यस्य

स्थाने 'आपात:' इत्येतस्य विसर्गान्तस्य पाठस्य कल्पना। किञ्च सरस्वत्यां गिरिग्रावसम्बन्धित्वमेव 'स्व'–त्वं स्वपदलभ्यम्। तत्रैकवचनान्तत्वं नाधिकमुचितम्, यावन्तो ग्रावाणस्तावत्य एव तेषां सरस्वत्य इति तु सुकरमत्र कल्पितुम्। 'सरस्वती: ०डम्बरा:' इति तत: स्यादत्र परिवर्त्तनम्। मिथ:पदेनात्र योऽर्थो विवक्षितस्तमपि न शक्नुमो निर्धारयितुम्। परस्परार्थपरमेव भवति मिथ:पदम्। स एषोऽर्थोऽत्र नाधिकमुपकारी। सरस्वत्या एकत्वे कीदृशी नु तुलना, प्रतियोगिनोऽभावात्। वस्तुतस्तु निर्णयसागरीय एव हि संस्करणे 'आपात–स्फु० इति मुद्रणा। वेङ्कटेश्वरमुद्रणालयसंस्करणे तु आपात: स्फु०' इत्येवं सविसर्ग एव पात–शब्द:। स्वाभाविकं च तत्। आपातो नाम हिमगिरे: शिखरेभ्यो गङ्गादीनां विपुलाभोगानां स्रोतसामध: प्रपात:। स हि सध्वनिर्भवति। तस्य यत्र भूभागे संपर्कस्तत्र जायतेतरां महीयान् गर्त्त:। सुलभमिदं शोणभद्रजलप्रवाहस्य प्रपाते, आम्रकूटस्य सानुमत: परिसरे। इयं या तुलना सा हि विडिम्बनारूपैव 'तुलयति भाग्यदशे'–ति प्रयोगेष्विव। यत्र पुनरा समन्तात् पातो भवति तत्र ध्वनिडम्बरोऽपि सुलभ एव भवति। उम्बरपदेन तस्यास्य प्रपातध्वनेर्बाहुविध्यमाक्षिप्यते। सरस्वतीपक्षे ध्वनिडम्बरपदेनान्दवर्धनादिप्रचारित–स्यापातमात्रसुभगस्य प्रतीयमानार्थप्रसरस्य परिग्रह:। डम्बरपदेन तुच्छत्वमाक्षिप्यतेऽत्र। एवं च ये ध्वनिवादिनस्तेषामुपरि मनोरथकविरिव प्रहरतितरां श्रीश्रीहर्षोऽपि गूढं गाढं च। तथा चानन्दवर्धन एवोदाजहार मनोरथस्य कवेर्वचनमिदमेवम्–

**यस्मिन्नस्ति न वस्तु किञ्चन मन:प्रह्लादि सालङ्कृति**
**व्युत्पन्नै रचितं च नैव वचनैर्वक्रोक्तिशून्यं च यत्।**
**काव्यं तद् ध्वनिना समन्वितमिति प्रीत्या प्रशंसञ्जडो**
**नो विद्मोऽभिदधाति किं सुमतिना पृष्ट: स्वरूपं ध्वनेरि'–ति ॥**

सुमतिपदेनाऽत्र शास्त्रवासनापरिपक्वबुद्धित्वमभिप्रेयते। तच्च स्पष्टमेव

जयन्तभट्टादिषु। न च तेऽपि समादरिणो ध्वनिवादे। नास्ति च सन्देहस्तेषामेषां सर्वज्ञकल्पानां महात्मनां सुमतित्वे। श्लोकरचनायामप्येषां सुमहानेवाभ्यासः। यथा चैतत्तदेषां न्यायमञ्जरी—कारिका—श्लोकेभ्यः प्रमाणितभूयिष्ठमेव। ततोऽपि सहस्रगुणोधिकोऽभ्यासः शब्दार्थविरचनासु नैषधीयचरितवेधसो महाकवेः श्रीश्रीहर्षस्येति प्रमाणिततममेव तैस्तैरुक्तिशतैः—

**उन्मीलल्लीलनीलोत्पलदलदलनामोदमेदस्विपूर—**
**क्रोड—क्रीडद्—द्विजाली—गरुदुदितमरुत्स्फालवाचालवीचिः ।**
**एतेनाऽखानि शाखानिवहनवहरित्पर्ण—पूर्ण—द्रुमाली—**
**व्यालीढोपान्तशान्तव्यथपथिकदृशां दत्तरागस्तडागः ॥**
**१२.१०१**

इत्येवंविधशब्दपरिपाकमेदुरैः। एवं हि मनोरथकवेः सुमतिष्वापतत्वेव गणना श्रीश्रीहर्षस्यापि। एवं च श्रीश्रीहर्षमतौ ध्वनिडम्बर आपातस्यैव विषयः। वादिनो वैफल्यमेव तत्र नियतम्। कथेयं तेषां ये किल गिरिग्रावप्रख्याः कवयः। गिरयो हि बहिरेवोदयन्ते शिखरविसरैः, न भवति तेषु गभीरता। सा हि प्रसिद्धा समुद्रादिष्वेव। ग्रावाणोऽपि भवन्त्येकान्तनीरसाः। तेभ्यः सरसानां सरस्वतीनां प्रभव एव प्रथमं दुर्घटः, घटितोऽप्यसौ ग्रावतुल्यकुल्य एव जायेत, न पुनः पिञ्छिल—मसृण—मधुरामोदिरसायनसोदरः। एवंविधा विलसन्तितरां भूयांसः कवयो दिक्षु। वमन्तितरां च ते स्वकीयानुद्गारान् वान्ति—पदार्थजुगुप्सितान्, निपातधिक्कारैकपात्रीकृतसमुदया ह्येते विडम्बनमात्रमेकमर्जयितुं क्षमेरन्। क्व नामैतेषां भाग्ये विचक्षणजनयशः—सौरभस्य संभारः। प्रविरला एवैवंविधाः सुकवयः। ते हि उदन्वन्त एवाऽऽर्द्रान्तःकरणाः, माधुर्यमप्येषां सांसिद्धिकं यतः क्षीरनिर्मिता इमे। क्षीरोदन्वन्त इमे। एतेषामेव रसायनस्यामृतमिति शोभनं संज्ञानम्। खेदानिदमेवैकं छिनत्ति। ये हि मन्थानदण्डधुरीणाः प्रेक्षणाचतुराश्चामत्कारिकबन्ध—प्रत्यभिज्ञाननिपुणशेमुषीकाः सामाजिकास्तेषामिहैवैकस्मिन् संप्रवृत्तिः, न

स्पृशन्त्यमी गिरिग्राव्णां कथामपि। न च कल्पतेऽसौ परिणामेऽपि वैरस्याय। मोदमात्रमसौ सूते। मोदोऽपि तथा मांसलो यथा सुरभिशाल्योदन—विसरः। घ्राणतर्पणा हि शालयो दूरादप्याहरेयुरेव सरसान् सामाजिकान्। येषु हि प्रतीयमानार्थसंपत्परिस्पन्दस्तेषां काव्यबन्धानां प्रविरला एव प्रसवितारः सुकवयः'।

पद्येऽस्मिन् योऽयमापातशब्दो, न चेदसौ विसर्गान्तः कस्य स्यादत्र तोलनक्रियायां कर्त्तृत्वम्? अध्याहारसुलभो 'जनः' स्यादत्र कर्त्तृपदेऽभिषिक्त इति तु प्रकाशकृन्नारायणभट्टः। मिथः पदार्थोऽप्यत्र तामेतामुद्वहेदेव धुरमिति तु परेषामुत्प्रेक्षा। मिथ एकान्ते संवादिनः परस्परं तामिमां सरस्वतीं तुलयेयुः कियानस्यां भारः कियन्तं नु कुक्षिमस्माकमियं संप्लावयेदिति परस्परमिमौ निर्णयेताम्। वस्तुतस्तु विसर्गस्यानङ्कनं लेखकस्यैव भ्रमः, सुलभः खलु स प्राचीनेषु। अध्येतुः खलु कर्त्तव्यमिदं यदसौ लेखगतं लिपिगतं वा भ्रमं प्रत्यभिजानातु।

प्रस्तुते पद्ये यो हि व्यतिरेक उपनिबन्धुमिष्टः स एवंविधः—

**गिरि ग्रावाणः भूयांसः क्षीरोदन्वान् एक एव ।**
**ग्रावसरस्वती ग्रावतुल्यैव। अमृतम् प्रमोदनम्—।**

ग्रावसरस्वती स्वयमेव पातखेदमनुबोभोति, किन्नूद्धरिष्यत्येषाऽन्यान् खिन्नखिन्नानातुरान्। खेदपीडया सरस्वती स्वयमपि हाहा—करोति प्रतिध्वनिमिषात्। यो हि स्वयमातुरः स कथं नु साहायकमाचरेदन्यस्यातुरीं निराकर्त्तुम्। अथायमेवार्थः पदान्तरैरप्येवमुपस्थापयितुमर्हः—

**दिशि दिशि गिरिग्रावाणः स्वा वमन्तु सरस्वतीस्**
**तुलयतु पुनस्ता आपातः स्फुरद्ध्वनिऽम्बराः ।**
**स परमपरः क्षीरोदन्वान् यतः समुदीयते**
**मधुरमधुरं खेदच्छेदि स्वतोऽमृतमुज्ज्वलम् ।।**

अत्र 'प्रमोदनमोदनमिति नाद्रियते, तस्यानतिप्रयोजनकत्वात्।।

## लक्षणायाः षड्विधत्वं हेत्वलङ्कारश्च

मम्मटाचार्यः—

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणाऽऽरोपिता क्रिया ॥

इत्येवं काव्यप्रकाशे

"[१]तद्बाधे रूढितोऽर्थाद् वा लक्षणीयस्तदन्वितः"।

इत्येवं च शब्दव्यापारविचारे—

लक्षणासामान्यं लक्षयित्वा द्वयोरप्यनयोर्ग्रन्थयोस्तद्भेदांश्च—

स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥"
सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा ।
विषय्यन्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ॥
भेदाविमौ च सादृश्यात् संबन्धान्तरतस्तथा ।
गौणौ शुद्धौ च विज्ञेयौ ॥" इत्येवं प्रतिपाद्य

"लक्षणा तेन षड्विधा" इत्यस्याः षड्विधत्वं निगमयति। अत्र के नु ते षड् भेदा इति प्रश्ने काव्यप्रकाशटीकितारो नैकधा प्रतिष्ठन्ते। तेषु—

**१. चण्डीदासादयः**—शुद्धगौणयोरारोपाध्यवसानयोरुपादानलक्षणाभ्यां भिद्यमानतामङ्गीकृत्याष्टविधत्वमस्या आमनन्ति।[२] मम्मटोक्ते षड्विधत्वे च

---

१. "जातिः क्रिया गुणः संज्ञा वाच्योऽर्थः समितध्वनि"—रित्यस्य पूर्वार्द्धम्। ततस्तत्पदेनात्र वाच्योऽर्थः परामृश्यते।

२. काव्यप्रदीपप्रभायाः काव्यमालासंस्करणे पृ० ३६।

(१) रूढिः, (२) प्रयोजनम्, (३) उपादानम्, (४) लक्षणम्, (५) आरोपः, (६) अध्यवसानं चेत्येषां भेदकानां[१] षड्विधत्वौपयिकतां दर्शयन्ति। काव्यप्रकाशदर्पणकृद् विश्वनाथः साहित्यदर्पणेऽमुमेव क्रममनुसरति। रूढिप्रयोजनाभ्यां द्वैविध्यं चोत्प्रेक्ष्येमानेव भेदान् षोडशसंख्याकतां नयति।

२. काव्यप्रदीपकारादयः क्रममिमं—

**''रूढिप्रयोजनाभ्यां भेदे संभवत्यपि न ते विभाजकत्वेनोक्ते, किन्तु हेतुत्वेनेति न तत्कृतो भेदो गणितः। अत एव च पश्चाद् ''व्यङ्ग्येन रहिता रूढा''—वित्यादिना तत्कृतं भेदं दर्शयिष्यति, अन्यथा पुनरुक्तिप्रसंगात्। एवं च यथोक्तव्याख्यानेन षड्विधत्वे निर्व्यूढे यत् 'षड्विधेति रूढिप्रयोजनोपादानलक्षणारोपाध्यवसानरूपैः षड्भिरुपाधिभिः कल्पिता षड्विधाः प्रकारा यस्यामिति षड्विधेतिचण्डीदासव्याख्यानं तत् ''शुद्धैव सा द्विधा, सारोपान्या तु'' इति ''एव, तु'' शब्दयोरनालोचन—विजृम्भितत्वादनादेयम्'' इत्येवम्'** असहमानाः शुद्धाभेदचतुष्टयस्य स्वातन्त्र्यम् अमत्वा आरोपाध्यवसानभूतयोर्भेदयोरुपादानलक्षणभूत—भेदघटकतामुद्भाव्य—

**''लक्षणा तावद् द्विविधा—(१) शुद्धा, (२) गौणी च। तत्राद्या द्विविधा (१) उपादानलक्षणा (२) लक्षणलक्षणा च। ते अपि प्रत्येकं (१) सारोपा (२) साध्यवसाना चेति द्विविधे इति शुद्धाभेदाश्चत्वारः। गौणी तु द्वेधा (१) सारोपा (२) साध्यवसाना चेति षड्विधत्वं लक्षणायाः—**[२] इत्येवं षड्विधत्वमस्या आपादयन्ति। सुधासागरकारो भीमसेनदीक्षितः[३],

---

१. उपर्युद्धृतः काव्यप्रदीपः, तत्प्रभा च।

२. ''स्वसिद्धय—''इति का० प्र० कारिकायाः प्रदीपेऽवतरणिका।

३. सुधासागरे काव्यप्रदीपस्यैवोपर्युद्धृता ''लक्षणा......तावद् षड्विधत्वं लक्षणाया'' इमा एव पंक्तयो लभ्यन्ते। प्रक्षिप्ता अपीमाः संभवन्ति।

म०म० दुर्गाप्रसादद्विवेदी[१], कथाभट्टः श्रीनन्दकिशोरशास्त्री[२], डॉ० सत्यव्रतसिंहः[३], श्रीनिवासशास्त्री[४] चैतमेव क्रममनुधावन्ति।

**३. म० म० गोकुलनाथोपाध्यायप्रभृतयः**[५] पुनः प्रागुक्तयोर्भेदक्रमयोः अरुचिमदर्शयन्तोऽपि भिन्नेनैवाध्वना प्रवर्तन्ते। ते हि 'आरोपाध्यवसान'मूलयोः शुद्धाभेदयोः 'उपादान—लक्षण''मूलाभ्यां ताभ्यां विविक्ततामेव गणयन्ति। (१) शुद्धा सोपादाना (२) शुद्धा सलक्षणा, (३) शुद्धा सारोपा, (४) शुद्धा साध्यवासाना, (५) गौणी सारोपा, (६) गौणी साध्यवसाना चेति षोढात्वं तत्र सिद्धान्तयन्ति। जयदेवः[६] अप्यय्यदीक्षितः,[७] पण्डितराजो जगन्नाथः,[८] श्रीविद्याचक्रवर्ती,[९] हरिशंकरः,[१०] विश्वेश्वर[११]श्चैतेन क्रमेण संन्तुष्यन्ति अन्ये चापि। मम्मटस्योपजीव्यतमो भट्टमुकुलोपि लक्षणाभेदगणनायाममुमेव क्रममाद्रियते।[१२] सोऽयमुपस्थितो मतिकलहः।

---

१. साहित्यदर्पणस्य निर्णयसागरीये संस्करणे पृ० ५६।

२. चन्द्रालोकपौर्णमासी मयू० ९ का० १३।

३. चौखंभाविद्याभवनतः प्रकाशितः काव्यप्रकाशस्य हिन्दीभाषानुवादः।

४. मेरठतः प्रकाशितः काव्यप्रकाशहिन्दीभाषानुवादः। अत्रानुवादको मम्मटस्य लक्षणाभेदान—वैज्ञानिकानपि कथयति।

५. वाराणसेय—संस्कृतविश्वविद्यालयतः प्रकाशिते म०म०गो०ना० कृते काव्यप्रकाशविवरणे।

६. चन्द्रलोकस्य ९.१०—१३—कारिकासु।

७. वृत्तिवार्तिके। अत्रासावेकां जहदजहल्लक्षणानाम्नीं ''ग्रामो दग्ध'' इत्यादिषु ग्रामैकदेशाद्यर्थे प्रयुक्तेषु ग्रामादिशब्देषु सप्तमीमपि लक्षणां मनुते सा च ''अग्रहस्ते हस्त'' इत्यादिभिरुदाहरणैः मम्मटेनोपदर्शितायाम् अवयवावयविभावमूलायां लक्षणायाम् अन्तर्भवतीति न ततो भीः।

८. रसगङ्गाधरस्य लक्षणाप्रकरणारम्भे।

९. काव्यप्रकाशस्य संजीविनीनाम्न्यां टीकायाम्।

१०. नागेश्वरीटीकायाम्।

११. काव्यप्रकाशस्य हिन्दीभाषानुवादे।

१२. ''शुद्धोपचारमिश्रत्वाल्लक्षणा द्विविधा मता। उपादानाल्लक्षणाच्च शुद्धा सा द्विविधोदिता। आरोपाध्यवसानाभ्यां शुद्धगौणोपचारयोः। प्रत्येकं भिद्यमानत्वादुपचार—

वयमत्र तृतीयमेव मतं मम्मटाभिमतं प्रतिपद्यामहे, प्रतिपद्यामहे च त्रयमत्र प्रमाणम् (१) काव्यप्रकाश—शब्दव्यापारविचारयोर्लक्षणायाः प्रतिपादनक्रमः, (२) तत्रैव प्रस्तुतानि लक्षणाभेदानामेषामुदाहरणानि, (३) उपयोगित्वं चेति। तत्र—

१. प्रतिपादनक्रमः पूर्वोद्धृताभिः ''स्वसिद्धये पराक्षेप' इत्येताभिः लक्षणाभेद—कारिकाभिस्तु स्पष्ट एव, काव्यप्रकाश—शब्दव्यापारविचारयोस्तदीयेन वृत्तिग्रन्थेनापि स स्पष्टभूयिष्ठः। तत्र काव्यप्रकाशे ग्रन्थकृत् ''कुन्ताः प्रविशन्ति......उपादानेनेयं लक्षणा'' इत्यत आरभ्य ''गङ्गायां घोष इत्यत्र तटस्य.....लक्षणेनैषा लक्षणा''—इति यावद् उपादान—लक्षण—नाम्नोः भेदयोः निरुक्ति—निदर्शने प्रदर्श्य, ''उभयरूपा चेयं शुद्धा, उपचारेणामिश्रिततत्वात्'' इत्येवं तयोः शुद्धात्वं च निगमय्य प्रकरणमिदं समापयितुकामः अनयोः लक्ष्यलक्षकयोः भेदाभेदगाथामपि ''अनयोर्लक्ष्यस्य लक्षकस्य च गङ्गातटे .... लक्षणायाः को भेद'' इत्यनेन वृत्तिग्रन्थेनोपस्थापयति। तदेवं प्रकरणमिदं ''शुद्धैवे''ति कारिकालभ्येन ''एव''कारसाचिव्येन व्यवच्छेद्य प्रकरणान्तराय ''सारोपान्या तु'' इत्येवं कारिकोपलभ्ये व्यवच्छेदमात्रपरे 'अन्या तु''—पदे अवदधानो वृत्तिकृत् स्वातन्त्र्येणैव प्रक्रमते। चातुर्विध्यं प्रतिपाद्य च पूर्वोक्तयोः उपादानलक्षणयोः काव्यप्रकाश इव शब्दव्यापारविचारेऽपि संकलनाय ''लक्षणा तेन षड्विधे'' तिवाक्योत्तरम् ''आद्यभेदाभ्यां सहे''ति ब्रूते। इत्थं यथा ''एव—तु'' शब्दसाचिव्येन प्रदीपकारः

---

श्चतुर्विधः।।'' (''—अभिधावृत्तिमातृका०—२—५) ''एषा च लक्षणा त्रिस्कन्धा शुद्धत्वात्, अध्यारोपाद्, अध्यवसानाच्च। तत्र शुद्धस्कन्धस्य द्वैविध्यम् उपादानलक्षणाभ्यामुक्तम्, आरोपाध्यवसानस्कन्धयोरपि प्रत्येकं द्विप्रभेदता शुद्धगौणोपचारमिश्रत्वात्'' इति, इतः अव्यवहितपूर्ववर्त्तिना ''एतेन चतुर्विधेनोपचारेण सह पूर्वोक्तौ द्वौ लक्षणाभेदौ संकलय्य षट्प्रकारा लक्षणा वक्तव्या'' इत्यनेन च वृत्तिग्रन्थेनाभिधावृत्तिमाकायां तथ्यमिदं स्पष्टमेव।

चण्डीदासमतं प्रत्यादेष्टि तथैव ''अन्य'' शब्दसचिवाभ्यां ताभ्यां प्रदीपकारमतमपि प्रत्यादेष्टुं शक्यते।

२. काव्यप्रकाश—शब्दव्यापारविचारयोर्मम्मटेन लक्षणाया यान्युदाहरणान्युप—स्थापितानि, ये च तेषु तस्या भेदाः संभवन्ति तदुभयमप्यधोदत्तया तालिकया स्पष्टम्—

| **उदाहरणनि** | **लक्षणाभेदाः** |
|---|---|
| १. कुन्ताः प्रविशन्ति | उपादानलक्षणा |
| २. गङ्गायां घोषः | लक्षणलक्षणा |
| ३. गौर्वाहीकः | सारोपा गौणी |
| ४. गौरयम् | साध्यवसाना गौणी |
| ५. आयुर्घृतम् | सारोपा शुद्धा |
| ६. आयुरिदम् | साध्यवसाना शुद्धा |

प्रकारान्तराभ्युपजिगमिषायां पुनः ''कुन्ता पुरुषाः प्रविशन्ती''ति ''गङ्गायां तटे घोष'' इति अन्यानि चैवंविधानि साहित्यदर्पणकृत्प्रभृतिभिः प्रतिपादितानि स्थलान्यसौ समग्रहीष्यत्। न चासौ संगृह्णाति। एतच्चात्र विस्मयावहं यत् प्रदीपेऽपि स्थलानीमानि न लभ्यन्ते, काव्यप्रकाशकृदुदाहृतानामेवैषामुक्तानामेव स्थलानां तत्रोपलम्भात्।

३. येषु काव्येषु लक्षणाया उपयोगो दृश्यते तेषामप्यनुशीलनेन तथ्यमिदं द्रढिमानमश्नुते यदुपर्युक्ता एव षड् भेदा व्यवहारोपयोगिनो भवन्ति नान्ये। एतदपि च निम्नप्रदत्तया तालिकया स्पष्टम्—

| **लक्षणाभेदः** | **काव्यभेदः** | **उदाहरणम्** |
|---|---|---|
| १. उपादानलक्षणा | अर्थान्तरसंक्रमितवाच्यध्वनिः | त्वामस्मि० कदली कदली०[1] |
| २. लक्षणलक्षणा | अत्यन्ततिरस्कृतवाच्यध्वनिः | उपकृतं बहु तत्रे[2] |

---

१. काव्यप्र० उदा०—२३, साहित्यदर्पणे ४.३ उदा०।

२. काव्यप्र० उदा० २४।

| लक्षणाभेदः | काव्यभेदः | उदाहरणम् |
|---|---|---|
| ३. सारोपा गौणी | रूपकपरिणामापह्नुतयः | रात्रिकापालिकी''[१] |
| ४. साध्यवसाना गौणी | निगीर्याध्यवसानातिशयोक्तिः | कमलमनम्भसि[२] |
| ५. सारोपा शुद्धा | | आयुर्घृतम् |
| ६. साध्यवसाना शुद्धा[३] | | आयुः |

---

१. काव्यप्र० उदा० ४२१।

२. काव्यप्र० उदा० ४४१।

३. निम्नलिखिताष्टीकितारोपि तालिकामिमामनुमोदयन्ते—

१. सुधासागरकरो भीमसेनदीक्षितः। यदुक्तं तेन—''अत्रोपादानलक्षणाभ्याम् अर्थान्तरसंक्रमितात्यन्ततिरस्कृतवाच्यौ ......, गौणीभ्यां सारोपसाध्यवसानाभ्यां रूपकातिशयोक्ती...... निरूपयिष्यतीति।

२. म०म० गोकुलनाथशर्मा। यदुच्यते तेन—''प्रयोजनवती तु यद्युपादानं यदि वा लक्षणम्। उभयथापि ध्वनिविशेषौ व्यञ्जयति, ''गङ्गायां घोष'' इत्यत्र तटे लक्षणलक्षणया गङ्गाताद्रूप्यस्य तेन च पावनत्वरूपस्य अत्यन्ततिरस्कृत—वाच्यध्वनेरभिव्यञ्जनात्। ''कुन्ताः प्रविशन्ती''त्यत्र कुन्तधरेषूपादानलक्ष्येषु कुन्तताद्रूप्यद्वारा निर्दयप्रहर्तृत्वादेरर्थान्तरसंक्रमितवाच्यस्य ध्वननात् ...... सादृश्यमूला लक्षणा। गौर्वाहीक इत्यत्र रूपकम्, ''गामिमां वारये''त्यत्रातिशयोक्तिम्, 'जडेन वाहीकगवेन दण्डमादाय गुप्ता धनिकस्य गाव'' इत्यत्र परिणामम्, गौरयं न तु वाहीक'' इत्यत्रापह्नुतिम् उत्थापयति।''

३. नरसिंहमनीषाकारः। यदुच्यते तेन—''उपादानलक्षणार्थान्तरसंक्रमित—वाच्यध्वन्युपयोगिनी, लक्षण—लक्षणा चात्यन्ततिरस्कृतवाच्यध्वन्युपयोगिनी, गौणसारोपा रूपकालङ्कारोपयोगिनी गौणसाध्यवसाना च प्रथमातिशयोक्ति—प्रयोजिका। इति। द्र० वामनस्य बालबोधिनी।

साहित्यकौमुदीकारो विद्याभूषणोऽपि ''इहोपादानलक्षणादिषु भेदेषु आद्याभ्यामर्थान्तरसंक्रमितवाच्यात्यन्ततिरस्कृतवाच्यौ, मध्यमाभ्यां रूपकप्रथमातिशयोक्ती.....निरूपयिष्येते''—इत्येवं ''लक्षणा तेन षड्विधे''ति वाक्यविवरणं लक्षणोपयोगस्य दिशमिमामुक्तेनैव पथा द्योतयति।

यद्यप्यत्रान्तिमयोः काव्यभेदयोर्नामनी नोल्लिख्येते तथापि येषां तत्पूर्ववर्त्तिनां तानि लिख्यन्ते तत इदं स्पष्टं यद् गोकुलनाथादिभिः प्रतिपादित एव लक्षणाभेदक्रमः काव्योपयोगी मम्मटाभिमतश्च सिद्ध्यति, नान्यः, उक्तेषु काव्यस्थलेषु प्रकारान्तरोपजनितस्य लक्षणाभेदस्यानुपलम्भात्। लक्षणाया अशीतिप्रकारतामभिमन्यमानः साहित्यदर्पणकारोपि कल्पितैर्वाक्यखण्डैरेव "गङ्गायां तटे घोष" इत्यादिभिस्तान् उदाहरति, न तु काव्यस्थलैः। यत्र चासौ काव्यभेदान् गणयितुं काव्यस्थलान्युपस्थापयति तत्रासावपीमानेव काव्यप्रकाशकृदभिमतान् षडेव भेदानुपयोजयति, नान्यान्। स हि लक्षणोपादानोपजीविनः अविवक्षितवाचकस्य ध्वनेः पदगताय अर्थान्तरसंक्रमणाय "नयने तस्यैव नयने चे" ति, वाक्यगताय च तस्मै काव्यप्रकाशकृदुदाहृतम् "त्वामस्मि वच्मि विदुषामि"– त्यादि वाक्यमेव निदर्शनतया प्रस्तवीति, प्रस्तवीति चैवमेव पदगताय अत्यन्ततिरस्काराय ध्वनिकृदुदाहृतं "निश्श्वासान्ध इवादर्श" इति पद्यम्, वाक्यगताय चास्मै काव्यप्रकाशनिदर्शितमेव "उपकृतं बहु तत्रे" त्यादि विपरीतलक्षणोदाहरणमेव। न चैतेषु स्थलेषु लभ्यमानासु लक्षणासु उपादान–लक्षणयोः आरोपादिशबलितत्वं दृश्यते। रूपकपरिणामादीनामपि विदुषानेन यानि निदर्शनस्थलान्युपस्थापितानि तेष्वपि आरोपाध्यवसानाभ्यामितरः कश्चनापि लक्षणाप्रकारो नानुभूयते। एतेन स्पष्टं यल्लक्षणाय भेदान्तराणि काव्यानुपयोगीन्येव। न केवलं काव्ये, काव्यात्मके वेदेपि यावत् तानि

---

साहित्यसारकारः अच्युतरायोपि च तामेव दिशमनुसरित–"जहती लक्षणार्पणसंज्ञिका, गङ्गायां घोष इत्यत्रात्यन्तं वाच्यस्तिरस्कृतः अजहत्यप्युपादाननाम्नी श्वेतोभिधावति, अनयार्थान्तरे संक्रमितवाच्योत्र सूच्यते, गौणी प्रयोजनवती सारोपा चन्द्र आननम्, गौर्वाहीक इति ज्ञेया रूपकालंकृतौ हिता, सैव साध्यवसाना तु गौरेवायमिति स्फुटा चन्द्र एवेदमित्यादौ रूपकातिशयोक्तिकृत्' इति। (साहित्यसारे २.७१–७८)।

नोपयुज्यन्ते। गुणवादात्मकमर्थवादं प्रयुञ्जाना वैदिका ऋषयोपि ''यजमानः प्रस्तरः'', 'आदित्यो यूप'' इत्यादिषु स्थलेषु व्यावहारिकीमेव लक्षणामुपजीवन्ति[१], न काल्पनिकीम्। दार्शनिका[२] अपि तामेव मतिसृतिमनुसरन्ति। ततश्च[३] काव्यप्रकाशं विधित्सुर्मम्मटोऽपि काव्यानुपयोगीनि लक्षणान्तराणि तितिक्षत्येव। ततश्च तृतीयमेव लक्षणाभेदगणनाक्रममसौ सिद्धान्ततयोररीकरोति नान्यम्।

## हेत्वलङ्कारः

ननु—''यदि काव्योपयोगिन एव लक्षणाभेदा अत्र प्रतिपिपादयिषितास्तर्हि प्रथमतमाश्चत्वार एव भेदा अत्र प्रतिपादनीयाः, तेषामेवोपयोगस्य मम्मटोदाहृतेषु काव्येषूपलभ्यत्वात्, ततश्च ''लक्षणा तच्चतुर्विधे''त्येव निगमनीयम्, न तु लक्षणा तेन षड्विधे''ति। अन्त्यौ शुद्धारोपाध्यवससानमूलौ तु भेदौ परिहर्तव्यावेव मम्मटेन, तदुपयोगभाजः, काव्यस्थलस्य तेनादर्शितत्वात् न परिहृतौ चेत् काव्यस्थलान्यपि तेन तदुपयोगभाञ्जि दर्शनीयानि। न च तानि दर्शितानीति प्रसक्तमत्र ग्रन्थरत्ने अवाच्यवचनम् वाच्यावचनं[४] वा। यद्युच्यते—''घृतमायुः, आयुरेवे''— त्यादीन्येव प्रयोजनं व्यञ्जयन्ति स्थलान्यत्रोदाहरणतयाभिमतानीति नास्ति तादृशदोषद्वयभीतिरिति तर्ह्युच्यताम्'' अस्त्यत्र वैचित्र्यं न वा, नास्ति चेत् कथमिदं काव्यत्वेन गण्यते, अस्ति

---

१. द्र० मीमांसादर्शनस्य १.४.१२—सूत्रे शाबरं भाष्यं तन्त्रवार्त्तिकं च। मीमांसादर्शनस्य ३.१.६—सूत्राण्यपि द्र०।

२. द्र० न्यायदर्शनसूत्रम्—२२.६४, व्याकरणमहाभाष्यम् ४.१.४८—सूत्रे, वाक्यपदीयस्य द्वितीयं काण्डं च।

३. शब्दव्यापारविचारेऽपि मम्मटो व्यवहारोपयोगिनीमेव लक्षणां मीमांसते ''इह हेयोपादेयानां हानोपादाने प्रमाणादेव, तच्च निश्चयात्मना प्रामाण्यं भजते, निश्चयश्च शब्दसाहित्येनार्थं विषयीकरोती''ति तेन तथैव प्रक्रांतत्वात्। मुकुलभट्टोऽपि व्यवहारोपयोगिनीमेव लक्षणाममुख्ययाभिधासंज्ञया लक्षयति।

४. दोषाभ्यामाभ्यां द्र० व्यक्तिविवेकः अस्मत्संस्करणे पृ० ३८७ ४३६,।

चेत् कथमिदं गौणोपचारवदलङ्कारकोटौ न निवेश्यते, कथं च निवेशितमपि वक्ष्यमाणहेत्वलंकारकोटौ परैः, "हेत्वलंकारो न लक्षितः, आयुर्घृतमित्यादिरूपो ह्येष न भूषणतां कदाचिदर्हति, वैचित्र्याभावादि[1] 'त्येवमेतन्निराक्रियते। यद्युच्यते—"परिकरालंकारं यावदेव काव्यप्रकाशं निर्माय व्युपरते मम्मटाचार्ये शेषपूरणस्यालकभट्टस्यै[2]ष दोषः, परिकरादूर्ध्वमेव कारणामालाप्रकरणेऽस्य वैचित्र्याभावं प्रतिपादयतो वृत्तिग्रन्थस्योपलम्भादि"—ति, तर्हि चतुर्थ उल्लासे कस्य दोषः, यत्र काव्यलिंगस्य कृते हेत्वलंकार[3] इति काव्यहेतुरिति[4] च व्यपदेशः क्रियते, कस्य च दोषो दशम उल्लास एव परिकरात् पूर्वं काव्यलिंगमुपनिबध्नतोऽपि हेत्वलंकारं विस्मरतः। एतेन "परिकरात् परमपि मम्मटभट्ट एव निरमास्यच्चेद् वैचित्र्यस्यात्यन्ताभावप्रतियोगित्वमत्र नोदभावयिष्यते"त्यपि श्रद्धा लूनमूला। यद्युच्यते—अस्ति "आयुर्घृतमि"त्यादौ वैचित्र्यम्, तथापि नैतदलंकारतां स्पृशति, वैचित्र्यलेशमात्रस्यालंकार—त्वजनकतानभ्युपगमाद्, तथा सति "गतोऽस्तमर्क"[5] इत्यादावपि अलंकारत्वमभ्युपेयेत, वैचित्र्यलेशस्यात्रापि सत्वात्।[6] काव्योपयोगित्वं चैषां व्यङ्ग्यार्थप्रत्यायनमात्रत एव चरितार्थमि"ति, तर्हि "गौर्वाहीकः गौरेवे"त्यादावप्यूरीक्रियतामलंकारत्वाभावः, न्यायसाम्यात्। न च

१. काव्यप्रकाशे कारणमालालंकारवृत्तिः।

२. द्र० वामनाचार्यस्य काव्यप्रकाशभूमिका पृ० ८, म० म० डा० काणेकृतः संस्कृतसाहित्य—शास्त्रेतिहासश्च।

३. काव्यप्रकाशे उदा०—७१ महिलासह०, उदा० ९० पविसन्ती०।

४. काव्यप्रकाशे उदा० ६५ केसेसु बलामोडिय०।

५. भामहोऽत्र काव्यत्वाभावमेव मनुते—"गतोऽस्मर्को भातीन्दुर्यान्ति वासाय पक्षिणः। इत्येवमादि किं काव्यं वार्त्तामेनां प्रचक्षते।।—२.८७।।

६. अत एव स्वयं काव्यप्रकाशकृतैव वाच्यव्यङ्ग्ययोः बोद्धृसंख्या—भेदा—वनेनैव वाक्येन प्रतिपाद्येते। द्र० पञ्चम उल्लासः। अत एव च पण्डितराजोपि रसगङ्गाधरकाव्यलक्षण—निर्धारणप्रस्तावेऽत्र काव्यत्वं शपथयति।

''विच्छित्तेरतिभूमिरत्रानुभूयते इति नास्त्यत्र न्यायसाम्यमि''ति वाच्यम्, पक्षान्तरेपि विच्छत्तिविशेषस्य स्वीकर्तुं शक्यत्वात्। स्वीक्रियते चापि ''आयुर्घृतमि''त्यादौ शुद्धारोपभूतो यो हेतुहेतुमतोरभेदोऽनुभूयते तमेवैकमाश्रित्य निर्मितेषु—''अविरलकमलविकासः''[१] ''उल्लासः फुल्लपङ्केरुहपटलपतन्मत्त—पुष्पंधयानाम्'',[२] ''तारुण्यस्य विलास''[३] इत्यादिषु स्थलेषु रुद्रट—जगन्नाथ—विश्वनाथै—र्विच्छित्तिः। विद्याभूषणाच्युतरायाप्पय्यदीक्षितैरपि च समर्थ्यत एवात्र विच्छित्तेः सत्त्वम्। न केवलमेभिरेव, काव्यप्रकाशटीकितृषु सुधासागरकृद् भीमसेनः, विवरणकृद् गोकुलनाथश्च स्थलेष्वेषु विच्छित्तिविशेषमनुमोदेते[४] साधयेते च ततः शुद्धारोपाध्यवसानयोः सार्थकताम्। अस्ति च हेत्वलंकारस्य द्वैरूप्यं प्राचामभिमतम् (१) अर्थावसेयहेतुत्वकेन हेतुना सह हेतुमतो यद् वर्णनम् तद्रूपमेकम् (२) एकं च हेतुमता हेतोरभिन्नतया यद् वर्णनं तद्रूपम्। अनयोर्यत् प्रथमं तत्र काव्यादर्शकारो दण्डी—''हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणमि''ति भूषणोत्तमतां पश्यति, प्रस्तौति च तत्प्रपञ्चाय सार्धचतुर्विंशतिं कारिकोदाहृतीः[५]। भामहाचार्यश्च तत्र—

**हेतुश्च सूक्ष्मो लेशश्च नालंकारतया मतः ।**
**समुदायाभिधानस्य वक्रोक्त्यभिनधानतः ।।**[६]

---

१. रुद्रटकाव्यालं० ७.८३, काव्यप्रकाशकारणमालावृत्तिः।

२. रसगङ्गाधरे अवरकाव्यनिरूपणप्रस्तावे।

३. साहित्यदर्पणे हेत्वलङ्कारनिरूपणप्रस्तावे।

४. तथाहि सुधासागरलक्षणाप्रकरणे—''शुद्धाभ्यां ताभ्यां हेत्वलङ्कारं निरूपयिष्यती''ति भीमसेनः, विवरणे च—''हेतुत्वादिसंबन्धस्य हेत्वलङ्कारस्वरूपत्वेन तन्मूला लक्षणा ''आयुर्दानमहोत्सवस्य.... कलिंगेश्वर'' इत्यादौ रूपकस्य प्रकारान्तरम् अथवा ''हेतुमता सह हेतोरभिधानमभेदतो हेतु''रिति मतेन हेत्वलङ्कारमुत्थापयति'' इति म० म० गोकुलनाथः।

५. काव्यादर्शस्य २.२३५—५९।

६. काव्यालङ्कारे २.८६, अत्र समर्थनाय चात्र २६६ पृष्ठे प्रथमपाददटिप्पनदत्तां ''गतोस्तमर्क'' इत्यादिकारिकां प्रस्तौति। समुदायाभिधानं—वाक्यार्थप्रतिपादनम्।

इत्येवमनलंकारतां पश्यति, वामनोद्भटरुद्रटाश्च तद्दर्शनं तथैवानुमोदयन्ते, हेतुमिममलंकारपङ्क्तौ च न मेलयन्ति।[१] यद्यपि भामहस्य दर्शनमिदं सूक्ष्मलेशयोः कृते रुद्रटस्य[२] मतिं न विमुखयति, पश्यत्येव स तत्रालंकारभावम्, अथापि हेतोः कृते दण्डिनः पदवीं भामहखिलीकारादसौ मोचयितुं न प्रभवति तदर्थमसौ–

**हेतुमता सह हेतोरभिधानमभेदकृद् भवेद् यत्र ।**
**सोऽलङ्कारो हेतुः स्यादन्येभ्यः पृथग्भूतः ।।[३]**

इत्येवं भिन्नमेव पन्थानमुन्मीलय्य ''अविरलकमलविकासः ....काल'' इत्यादिना निदर्शयति, लभतेतमां चानुमोदनमुपर्युक्तायाः। अनयोः प्रथमं काव्यलिङ्गनाम्ना जीवयित्वापि विशदीकृतपरवर्तिकतिपयाचार्यपदवीकोपि[४] मम्मटः पतित एव प्रेक्षाजुषामुपालम्भगोचरे। तच्च जयरथस्यालङ्कारविमर्शिन्याः काव्यलिङ्गालंकारप्रकरणतः ख्यातचरमेव, यत्रासौ महता संरम्भेणोक्ति–प्रकारस्यास्यालंकारभावं प्रत्यादेष्टि[५]। एतत्प्रत्यादेशपञ्जरस्था रसगङ्गाधरकर्तुः पण्डितराजस्यापि प्रतिभा–

---

१. वामनोद्भटरुद्रटानां काव्यालङ्कारेषु हेतुभेदस्यानुपलम्भादित्थमुक्तिः।

२. रुद्रटः सूक्ष्मलेशौ लक्षयति, पार्थक्येन चानयोरलङ्कारत्वमाकलयति। द्र० काव्यालं० ७.९८–१०२। सूक्ष्मे काव्यप्रकाशकृदपि अलङ्कारभावं पश्यति, दशम उल्लासे ''कुतोपि लक्षितः'' इत्यादिना लक्षणोपन्यासेन तमुदाहरत्यपि।

३. रुद्रटकाव्या० ७.८२। काव्यप्रकाशे कारणमालाप्रकरणे ''हेतुमता सहे''त्यादिवाक्यमस्यैव संक्षेपः, बालबोधिनीकारो वामनाचार्यः पुनरत्र उद्भटीयत्वं रारटति।

४. परवर्त्तिष्वलङ्कारसर्वस्व–साहित्यदर्पण–कुवलयानन्द–कृत्प्रभृतयः काव्यलिङ्गं मन्वते। नूनमसौ मम्मटस्यैव प्रभावः। यद्यपि काव्यलिङ्गपदम् इदंप्रथमतया उद्भट एव प्रयुङ्क्ते, किन्तु न हेत्वर्थम्, अपि त्वनुमानार्थम्। मम्मटोऽप्यनुमानार्थं काव्यलिङ्गमेव पदं प्रयुञ्जीत, प्रयुञ्जीत च काव्यलिङ्गार्थं काव्यहेतुपदमेव दशम उल्लासेऽपि चतुर्थ उल्लास इव चेदुचिततरं स्यात्।

५. अलंकारसर्वस्वे जयरथकृतालङ्कारविमर्शिनी पृ० १८१–८२, निर्णयसागरसं०–२।

**काव्यलिङ्गं नालङ्कारः, वैचित्र्यात्मनो विच्छित्तिविशेषस्याभावाद्, हेतुहेतुमद्भावस्य वस्तुसिद्धत्वेन कविप्रतिभानिर्वर्त्यत्वायोगात्''**[१]

इत्येवमनुवदत्येव काव्यलिङ्गापरपर्यायस्य हेतोः भामहोपज्ञमिमं खिलीकारम्, उद्भावयत्येव च तत्र निहेर्तुत्वरूपदोषाभावान्तर्भूतताम्[२] अञ्चति चैतत् तथ्यताप्रत्यासत्तिम्। तथाहि—हेतुहेतुमद्भावस्य आर्थत्वमेवात्र चमत्कृतिं प्रसूते। अत एव ''भयानकत्वात् परिवर्जनीयो दयाश्रिततत्वादसि देव सेव्य''[३] इत्यत्र काव्यलिङ्गत्वं प्रत्याचक्षाणः पण्डितराजो रत्नाकरकार इवैव 'गम्यमानहेतुत्वकस्यैव हेतोः सुन्दरत्वेन काव्यलिङ्गते''—[४]ति हेतुमुपन्यस्यति। अस्ति चैतत् काव्यप्रकाशोदाहृतेषु ''वपुःप्रादुर्भावाद्'' इत्यादिषु काव्यलिङ्गस्थलेषु। तत्रापराधद्वयाऽऽनमनादीनां हेतुहेतुमद्भावस्य शब्दतोऽकथित्वात्। न चार्थत्वमात्रेण कुत्रचिदलङ्कारत्वमापद्यते, कविप्रतिभाप्रसूतत्वस्यैव तन्निष्पादकत्वात्। यदि चापद्यते, तर्हि हेतुहेतुमद्भावोक्त्यापि तदापद्यतान्तराम्, तत्र कविप्रतिभाया जागरूकत्वस्यानुभविकत्वात्। किं च यो हि ''महौजसो मानधना धनार्चिता'' इत्यत्र भारविपद्ये धनुर्भृद्रूपैकव्यक्तिगतत्वेन बहूनां विशेषणानामुपन्यासे परिकरविच्छित्तिमभिमनुते—

**यद्यप्यपुष्टार्थस्य दोषताभिधानात् तन्निराकरणेन पुष्टार्थस्वीकारः कृतः तथापि एकनिष्ठत्वेन बहूनां विशेषणानामेवमुपन्यासे वैचित्र्यमित्यलङ्कार-मध्ये गणितः''**।[५]

---

१-२. रसगङ्गाधरे काव्यलिङ्गालङ्कारप्रकरणान्ते।

३. रसगङ्गाधरे काव्यलिङ्गप्रकरणारम्भे। अतश्च भामहस्य ''हेतुश्लिष्ट'' नाम्नोऽलङ्कार-स्योदाहरणेऽपि नातिव्याप्तिः।

४. रसगङ्गाधरकाव्यलिङ्गप्रकरणारम्भे। रत्नाकरे शोभाकरमित्रोऽपि पदार्थहेतुके काव्यलिङ्गे हेतुत्वस्यार्थत्वमेव चमत्कृतिकारणं मनुते।

५. परिकरालङ्कारप्रकरणे काव्यप्रकाशवृत्तिः।

इत्येवं च तां दोषाभावान्तर्भावविपत्तेरुत्तार्य अलंकारत्वरूपं गजस्कन्धमधिरोपयते तस्य ''आयुर्घृतमि''त्यादिषु एकाकिहेतुहेतुमद्भावस्थलेषु मा भूदलंकारत्वधीः

**आयुर्घृतं यशस्त्यागो भयं चौरः सुखं प्रिया ।**
**वैरं द्यूतं गुरुर्ज्ञानं श्रेयो ब्राह्मणपूजनम् ।।**[१]

इत्यादिषु, ''अविरलकमले''त्यादिषु, उल्लास'' ''इत्यादिषु च तादृशानेकहेतुहेतुमदभेदभाक्षु काव्यरत्नेषु तु सा कथं न जायत इति यत्सत्यं विस्मयावहमेव। एवं प्रथमं हेतुभेदमलङ्कारतयाङ्गीकृत्य परत्र प्रत्यवतिष्ठमानः श्रीमम्मटः ज्योतिरिंगणे बद्धश्रद्धश्चन्द्रमसं क्षिपति, मशकप्रमाणं काचं बहुमन्यमानः स्फटिकं जुगुप्सते, कलहायमानयोश्च वालि–सुग्रीवयोः सुग्रीवमेव हिनस्ति, वालिनमेव रक्षति। किमत्र तन्त्रमिति चेदिदम्–

हेतुहेतुमतोरभेदेन जायमाना विच्छित्तिरभेदमेवोपजीवति, न हेतुत्वम्। ततश्च तस्या हेतुनाम्ना व्यपदेशोऽनुचितः, विच्छित्तिजनकनाम्नैवालङ्काराणां व्यपदेशस्य निर्धारणात्। अत एव सत्यामपि सामग्र्याम् अनन्वय उपमापदेन न व्यपदिश्यते, तत्र विच्छित्तेः द्वितीयसदृशव्यवच्छेदजनितत्वात्, एवमेव उपमेयोपमापि, तस्याः तृतीयसदृशव्यवच्छेदाश्रित्वात्। एवं यदि विच्छित्तिनिदानम् अभेदमुत्सृज्य अभेदानुयोगिनो हेतोर्नाम्ना व्यपदेशः क्रियते तर्हि तत्प्रतियोगिना हेतुमता किमपराद्धं, तन्नाम्नैव व्यपदेशः कथमत्र न क्रियते हेतुमानिति भ्रान्तिमानितिवत्। नास्ति चात्र अभेदोपि विच्छित्तिकारणम्, हेतौ हेतुमत आरोपस्यैव तत्कारणतयानुभूयमानत्वात्। अस्ति चाभेदारो–

---

१. रुद्रटकाव्यालं० ७.८२–कारिकायां नमिसाधोर्विवृतिः। अत्र विषयिवद् विषयाणामप्यनेकत्वात्, तेषु च प्रकृताप्रकृतोभयात्मताकल्पनायाः संभवाद् दीपक–तुल्ययोगितान्यतरसांकर्यप्रसंगो हेतुकैवल्यं विघटयतीति एकनिष्ठतया अनेकेषामभेदं प्रस्तुवन्ति ''अविरलकमलविकास'' इत्यादीन्येवोदाहरणानि समीचीनतराणि।

पयोर्भेदः। अभेदे ह्यभेद एवाभिद्यमाननिष्ठधर्मावच्छिन्नप्रतियोगितानिरूपिताया अनुयोगितायाः शरण्य, आरोपे च विषयः। ततश्च तत्प्रतियोगितापि विषयितावच्छदकेनैवाच्छेद्यते। अत एव चारोपे विषय—विषयिणोर्मध्य उद्देश्यविधेयभावोऽनुभूयते, अभेदे न। अस्ति च "घृतमायुः, महःसंघातः, विनिद्रकमलनिपातिभ्रमरोल्लास" इत्यादिषु विधीयमानानां हेतुमतामायुरादीनामुद्देश्यभूतेषु हेतुष्वारोपः। अत एव च शुद्धसारोपलक्षणापि प्रेक्षावद्भिरभ्युपेयते। अनयैव विप्रतिपत्त्या विचलित आचार्यो "हेतु"रिति नाम्ने रुचिं न दधे। आरोपे च निहितमतिरप्यसौ निर्वाहदिशं न लेभे, काव्यलिङ्गे तस्याभावात्, रूपके च सतोपि तस्य सादृश्यैकनिगडितत्वात्।[१] "वाग्विकल्पानामानन्त्यमु"[२]—पदिष्टवतो वर्त्मानुवर्त्तमानेन, अत एव च स्वयमपि काव्यलक्षणे "अनलङ्कृती पुनः क्वापी"—त्यलकाराणां स्फुटतायां वैकल्पिकत्वमाधाय तान् प्रति दर्शितौदासीन्येन तत्रभवता सहृदयशिरोमणिना निर्वाहाय प्रयत्नोपि न कृतः।

वस्तुतो हेतुहेतुमतोरभेदविच्छित्तेरारोपमूले रूपके, अतिशयमूले—ऽतिशयोक्तिप्रथमभेदे वा संग्रहः कर्तुमुचितः। क्रियते च परवर्त्तिभि

---

१. भामहः— उपमानेन यत् तत्त्वमुपमेयस्य रूप्यते ।
गुणानां समतां दृष्ट्वा रूपकं नाम तद् विदुः ।। काव्या० २.२१ ।।

दण्डी— उपमैव तिरोभूतभेदा रूपकमिष्यते। काव्यादर्शस्य २.६६ ।।

उद्भटः— श्रुत्या सम्बन्धविरहाद् यत् पदेन पदान्तरम् ।
गुणावृत्तिप्रधानेन युज्यते रूपकं तु तत् ।।—काव्या० १.११ ।।
अत्र यद्यपि सादृश्यं नास्ति तथापि उदाहरणेऽस्य तदस्त्येव ज्योत्स्नाम्बुनेत्यत्र।

रुद्रटः— यत्र गुणानां साम्ये सत्युपमानोपमेययोरभिदा ।
अविवक्षितसामान्या कल्प्यत इति रूपकं प्रथमम् ।।
काव्या० ८.३८—३९ ।।

२. ध्वन्यालोकप्रथमोद्योतारम्भे।

अलङ्काररत्नाकरविधातृप्रमुखैरालङ्कारिकैः। अलङ्काररत्नाकरकारो हि सादृश्यसबन्धमूलकम् आरोपमिव सबन्धान्तरमूलकमप्यारोपं रूपकविच्छित्तौ हेतुं प्रतिपद्यते। वक्ति हि सः—

**(सूत्रम्—) आरोपो रूपकम् ।। २६।।**

**(वृत्तिः—) तद्धर्मत्वादिप्रतिपत्त्यर्थः सामानाधिकरण्यनिर्देश आरोपः।**

इत्येवमारोपमात्रस्य रूपकत्वम्, उदाहरति च सादृश्यमूलकाय तस्मै "तृणं कान्ता विरक्तस्ये"त्यादि, तदितरसंबन्धमूलकाय च तस्मै

**उल्लासो लतिकानामकालमूर्च्छा वियोगिवर्गस्य ।**
**प्रभवति दक्षिणवायुर्बहुजयो मदनमल्लस्य ।।** इत्येतत् पद्यरत्नम्।

निराकरोति च सादृश्यैकमूल आरोपे रूपकत्वमाबघ्नतः जरत्तरानेवम्—

**इहान्ये सादृश्यनिमित्त एवारोपो रूपकं न सबन्धान्तरनिमित्तकोऽपि, तेन संबन्धान्तरपूर्वक आरोपो वैचित्र्यमात्रम्, न त्वलंकारः कश्चिदिति" मन्यन्ते, पठन्ति च "उपमैव तिरोभूतभेदा रूपकमिष्यत" इत्यादि। तन्न निपुणहृदयावर्जकम्। तथा हि इह तावद् द्विविधा लक्षणा, प्रयोजनरहिता रूढा, तद्युता च कार्या। तत्र रूढायां प्रयोजन—व्यङ्ग्यार्थाभावाद—भिधावद् वैचित्र्य—चारुताविरहान्न रसपरिपोषकत्वमिति नालङ्कारता। कार्या पुनस्तद्वैलक्षण्येन काव्यजीवितायमाना सर्वथा कविभिरादरणीयेति सर्वेषां ध्वनिकारादीनामविप्रतिपत्तिः। न च तस्याः सादृश्ये संबन्धान्तरे वा कश्चिद् विशेषो, येनैकत्रालङ्कारता, परत्र तदभाव इति स्यात्। न च संबन्धान्तरनिमित्त आरोपोऽलङ्कारतया लक्षितः, नापि तद् युज्यते, रूपकसाजात्येन तदन्तर्भावस्यैवोचितत्वात्। अत एव 'आरोपो रूपकमि'ति सामान्येनैव सूत्रितम्, न च सादृश्यमित्यनुषक्तम्।**[1]

---

१. अलङ्काररत्नाकरस्य पूनासंस्करणे पृ० ३२—३३।।

संगृह्णाति चामुं सर्वमेवाभिप्रायमनया कारिकया—

**सादृश्यसंबन्धनिबन्धनाया अलङ्कृतित्वं यदि लक्षणायाः ।**
**साम्येऽपि सर्वस्य परस्य हेतोः संबन्धभेदेपि तथैव युक्ता ।।**

अलंकारविमर्शिनीकारो राजानकश्रीजयरथोपि रत्नाकरमिमं प्रगुणयन्नलङ्कार–भाष्यालङ्कारानुसारिणीकृतोः शुद्धारोपप्रसूतस्याप्यारोपस्य रूपकालङ्कृति–त्वायानुगुणं मतमिदमेवमुपस्थापयति—

**''केषांचित् संबन्धान्तरहेतुरप्यारोपो रूपकाङ्गमेवेति मतम्। यदाहालंकारभाष्यकारः—''लक्षणापरमार्थं यावता रूपकम्'' इत्युपक्रम्य ''सारोपान्या च सादृश्याद् वा संबन्धान्तराद् वा'' इत्यादि। स तु यथा—**

**अमृतकवलः शोभाराशिः प्रमोदरसप्रपा,**
**सितिमशकटं ज्योत्स्नावाही तुषारघरट्टिका ।**
**मनसिजवृसी शृङ्गारश्रीविमानमहो नु भो**
**निरवधिसुखश्रद्धा दृष्टेः कृती मृगकेतनः ।।**

**अत्र इन्दुरूपे कारणे कार्यरूपायाः श्रद्धाया आरोपः। ग्रन्थकृता (अलंकारसर्वस्वकृता) ऽप्यलंकारानुसारिण्या[१] मत्र ''श्रद्धाहेतुत्वात् श्रद्धे ''त्यभिदधता अयमेव पक्षः कटाक्षितः[२]।।''**

सन्ति चालंकारसर्वस्व—तद्विमर्शिनीकारादयो मम्मटभट्टस्य प्रायेणानुगन्तार एव। अथापि यदिम एवंवादिनो दृश्यन्ते तत्रापि हेतुः स्वयं मम्मट एव। काव्यप्रकाश एव सोपि सादृश्यमिव संबन्धान्तरमपि ''अभिन्न—चमत्कार'' जनकतयाऽऽद्रियते। अत एवासौ ''हृदयमधिष्ठितमादा''[३]वित्यादिषु, ''राजन्

---

१. काश्मीरक—महाकवि—जह्लण—प्रणीत—सोमपालविलास—काव्यस्य तन्नाम्न्यां तत्कृतायां टीकायाम्।

२. अलंकारसर्वस्वविमर्शनीरूपकप्रकरणम्। निर्णयसा० सं०—२ पृ० ४४।

३. काव्यप्रकाशे कार्यकारणपौर्वापर्यविपर्ययरूपातिशयोक्त्युदाहरणम्।

राजसुता न पाठयति मामि''[१]त्यादिषु चातिशयोक्त्यप्रस्तुतप्रशंसास्थलेषु कार्यकारणभावमपि ''कमलमनम्भसी''[२]त्यादाविव, ''येनास्यभ्युदितेने''[३]—त्यादाविव वा सादृश्यमिवैवाभिन्नाया एवातिशयाप्रस्तुतोक्तिरूपाया विच्छित्तेर्निष्पादकमूरीकुरुते। अन्यत्रापि च [३]''उदात्तं वस्तुनः संपन्महतां चोपलक्षणम्''—इति, ''एकं क्रमेणानेकस्मिन् पर्यायोऽन्यस्ततोऽन्यथे[४]''ति निदर्शना, ''अभवन् वस्तुसंबन्ध उपमापरिकल्पकः, स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च सापरे''[५]ति च भिन्नभिन्ना अपि विच्छित्तीरसावेकत्रैवालंकारे संगृह्णानो दृश्यते। असौ हि संबन्धान्तरमूलकमप्यारोपं सादृश्यमूलकेन तेनैव सह रूपकविच्छित्तौ संगृह्णीयाच्चेत् कोऽन्वमुना विगृह्णीयात्। अत एव च तट्टीकाकारो गोकुलनाथशर्मोपाध्यायो रूपकत्वमेव ''आयुर्दान—महोत्सवस्ये''त्यादिनि प्रागुपस्थापिते पद्यरत्ने पूर्वं रूपकस्य[६] प्रकारान्तरमेवोद्भावयति, पण्डितराजोपि च ''उल्लास'' इत्यादिनि[७] पद्ये। अत एव च रत्नाकरकारो हेत्वलङ्काराय काव्यलिङ्गात्मक प्रथममेव हेतुभेदं लक्षयति, काव्यलिङ्गमिति नाम विहाय च ''हेतु''—शब्देनैव तं [८]व्यपदिशति। द्वितीयं चाभेदभूतं हेतुभेदं रूपक एव प्रागुक्तेन क्रमेण गतार्थयति। एवमेव

---

१. कारणे प्रस्तुते कार्योक्तितो निष्पन्नाया अप्रस्तुतप्रशंसायाः काव्यप्रकाश उदाहरणम्।

२. काव्यप्रकाशे निगीर्याध्यवसानातिशयोक्त्युदाहरणम्।

३. काव्यप्रकाशे सादृश्यमूलाया अप्रस्तुतप्रशंसाया उदाहरणम्।

४-५. काव्यप्रकाशस्य दशम उल्लासे।

६. द्र० २६६ पृष्ठे ६ संख्याकमत्रतयमेव पादटिप्पनम्।

७. ''उल्लास'' इत्यादेः श्लोकस्य विवरणे ''अत्र वृत्त्यनुप्रास—प्राचुर्यादोजोगुणप्रकाशकत्वाच्च शब्दस्य, प्रसादगुणयोगादनन्तरमेवाधिगतस्य रूपकस्य हेत्वलङ्कारस्य वा वाच्यस्य चमत्कृत्योस्तुल्यस्कन्धत्वात् सममेव प्राधान्यमिति रसगङ्गाधरे काव्यस्याधमभेदनिरूपणान्ते पण्डितराजो रूपकत्वमत्र प्रतिपद्यते।

८. ''परप्रत्यायकं लिङ्गं हेतुः।'' (सू० ७९ अलं० रत्ना०)। ''लिङ्गेन परप्रत्यायनं परार्थानुमानरूपं काव्यलिङ्गपर्यायो हेतुः'' इति (वृत्तिस्तत्रैव)।

चातिशयोक्तिप्रथमभेदेपि ''आयुरेवे''त्यादिकं संकलयितुं तल्लक्षणे सादृश्येतरमपि संबन्धमुपादद्यात्। यदि च ''आयुर्घृतम्'' इत्यादावारोपापेक्षया-ऽतिशये चमत्काराधिक्यमनुभूयेत तर्हि ''कार्यकारणयोः पौर्वापर्यविपर्ययतो'' जायमानायामतिशयोक्तौ भेदममुं संकलयेत, तदर्थं च तल्लक्षणं ''कार्यकारणयोर्भेदक्रमयोर्यो विपर्यय'' इत्येवं संशोधयेत। अस्ति चात्र हेतुहेतुमद्भावाश्रित एवातिशयः, अत एव दण्डिना हेतुनाम्नैव व्यपदिश्यते भेद एषोतिशयोक्तेः काव्यादर्शे[१]। अत एव च काव्यप्रकाशे नरसिंहमनीषां रचितवान् नरसिंहठक्कुरोपि शुद्धासारोपाया अतिशयोक्तेरस्मिन् भेदे चारितार्थ्यं[२] पश्यति, यद्यपि पूर्वोक्तेन क्रमेण लक्षणमशोधयित्वा तेन स्वयं तत्र चारितार्थ्यं न लभ्येत, पौर्वापर्यविपर्ययमात्रेण कार्यकारणयोर– भेदारोपयोः प्रतिषेद्धुमशक्यत्वात्।

ननु–''शक्यतेतरां शुद्धस्य आरोपस्य रूपके, अतिशयोक्तेश्चतुर्थे भेदे वा संग्रहः कर्तुम्, तद्विशिष्टानाम् ''अविरल–कमलविकास'' इत्यादीनां काव्यानामुपलभ्यमानत्वात्, शुद्धाध्यवसानस्य तु का गतिः, तद्घटितस्य काव्यस्योदाहरणतया अनुपस्थापितत्वादि''ति चेद्, अस्ति तस्यापि तादृशमेव भवतः पुर एव स्फूर्जमानमुदाहरणम्। किं तदिति चेदिदम्–

**आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा**
**सिद्ध–द्वन्द्वै–र्जलकणभयाद् वीणिभिर्मुक्तमार्गः ।**
**व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्[३]**
**स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ।।**

---

१. काव्यादर्शस्य २.२५३, २५७।

२. नरसिंहमनीषाया बालबोधिन्यामुद्धृता इयं पङ्क्तिः–''शुद्धसारोपा तु चतुर्थाति–शयोक्तिलक्षिके''ति। द्र० बालबोधिनी ''लक्षणातेन षड्विधे''ति प्रकरणान्ते।

३. मेघदूते ४५–तमं पद्यम्।

अत्र हि कीर्तिहेतुभूतायाश्चर्मण्वत्याः कीर्तिशब्दादेवोल्लेखात् कीर्तित्वेनैव प्रतीयमानत्वादस्त्येव कार्यद्वारा कारणस्याध्यवसानम्। एवमेव "स्वागतमविलम्बिनो मनोरथस्येति"[१] शाकुन्तलवाक्येऽपि कार्यभूतेन मनोरथेन कारणभूतस्य दुष्यन्तस्याध्यवसानात्। सैव स्थितिः, विषयिणं प्रति विषयस्य तादात्म्येन कारणतायाः प्रसिद्धचरत्वात्। अस्ति च स्वविषयभूताय दुष्यन्ताय मनोरथो विषयी। नास्ति च कीर्ति–चर्मण्वत्योः मनोरथदुष्यन्तयोश्चात्र किंचिदपि साम्यं येनात्राध्यवसानस्य गौणता कल्पयितुं शक्येत।

ननु–"कार्यकारणभावस्य सिद्धेऽपि विच्छित्तिमूलतयालङ्कृति–प्रयोजकत्वे, सादृश्येतराणां संबन्धान्तराणां तु वेतालस्तत्रैवावलम्बित काव्यस्थलेषु तदुदाहरणानामनुपदर्शितत्वात्[२] तेष्वलंकारप्रयोजकतायाः साधयितुं दुष्करत्वादि"ति चेत् तत्रापि स्यादेव कार्यकारणभाव इवैव तादृशी प्रयोजकता, यत्रैषां रूढप्रायता न स्यात्। अस्ति हि रूढप्रायता तात्कर्म्यादिभिः जायमानयोरारोपाध्यावसानयोः "ब्राह्मणस्तक्षा" "तक्षा"इत्यादिषु। तत्रापि दृश्यते चेत् चमत्कारः, स्वीक्रियतान्तमामलंकृतिप्रयोजकत्वम्, गवेष्यन्तान्तमां च तदुदाहरणान्यप्यतिमहति सारस्वते जगति।

एवं स्थितमेतद् यद् गोकुलनाथादिभिरुपगत एव लक्षणाभेदगणनाक्रमो मम्मटस्याभिमतः, स्थितं चैतद् यत् तत्र शुद्धयोरारोपाध्यवसानयोरुपयोगाय स्वीकर्त्तव्यमेव तद्पठितेषु वाक्येषु काव्यत्वम्, तदर्थं चमत्कृतिमत्त्वम्, तदर्थं तज्जनकेष्वलंकारत्वम्, तदर्थे च हेतु–रूपकातिशयोक्त्यन्यतमत्वम्।।[३]

---

१. शाकुन्तलस्य तृतीयेऽङ्के "तपति तनुगात्रि मदनस्त्वाम्" इति पद्यानन्तरीयं सखीवाक्यम्।

२. गोकुलनाथादिभिः यैरपि टीकाकृद्भिर्हेत्वलंकार उदाहृतः, जगन्नाथादिभिरन्यैश्च महात्मभिराचार्यैस्तैः शुद्धारोपस्यैवोदाहरणानि दत्तानि, न शुद्धाध्यवसानस्यापि। तदुदाहरणद्वयमस्माभिरेवात्रोत्प्रेक्ष्यते पूर्वोक्तम्। कार्यकारणभावातिरिक्त–संबन्धमूलक–शुद्धारोपाध्यवसानयोस्तूदाहरणानि प्रायेण सर्वैरेव त्यक्तानीति इयमुक्तिः।

३. सागरिकाया ९.२ अङ्के प्रकाशित एष लेखः।

# अलङ्कारसर्वस्वे संशोधनम्[१]

अलङ्कारसर्वस्वं हि रसगङ्गाधरस्याप्युपजीव्यभूतो ग्रन्थः। तेनासौ संस्कृतकाव्यशास्त्रेऽप्रतिमं स्थानं बिभर्ति। अस्मिन् शब्दार्थालङ्कारा एव सूत्रवृत्तिभ्यां निरूप्यन्त उदाहरणपद्यैश्च ते प्रमाण्यन्ते। पद्यानि चैतानि ग्रन्थकृता स्वयमपि रचितानि सन्ति।

अलङ्कारेषु शब्दालङ्काराः पञ्चैवात्र निरूपिताः। तेषु प्रथमे चत्वारः पौनरुक्त्याश्रिताः। तन्नामानि—(१) पुनरुक्तवदाभासम् (सः), (२) अनुप्रासः, (३) यमकम्, (४) लाटानुप्रासश्चेति। अन्तिमश्चैको वर्णविन्यासाश्रितः, चित्रनामा। एतेषां मध्ये य इमे पौनरुक्त्याश्रिताश्चत्वारः, तेषां कृते निर्मितेषु लक्षणसूत्रेषु सर्वैरपि संस्कर्तृभिरेकं सूत्रं वृत्तिरूपेण गणितमिति तत्र विचारः प्रस्तूयते।

साम्प्रतं हि अलङ्कारसर्वस्वस्य पञ्च संस्करणानि लभ्यन्ते। तेषु त्रीणि प्राचीनानि सन्ति द्वे च वर्षद्वयवयस्के एव। इमानि हि तानि—

१. निर्णयसागरीयम्, १९३९—ख्रीष्टाब्दे प्रकाशितम्, श्रीगिरिजा—प्रसादद्विवेदसम्पादितं जयरथकृतविमर्शिनीसहितं द्वितीयं संस्करणम्।
२. त्रिवेन्द्रमनगरस्थानन्तशयनग्रन्थमालायां १९२८ ख्रीष्टाब्दे समुद्रबन्धकृतविवरणेन द्वितीयं वारं प्रकाशितं संस्करणम्।
३. काशीतः शारदाग्रन्थमालायां श्रीगौरीनाथपाठकेन स्वोपज्ञ—टिप्पणीसहितं १९२६ ख्रीष्टाब्दे प्रकाशितं संस्करणम्।
४. डॉ० राघवन्महोदयैः संशोध्य कुमारीजानकीसंपादितया

१. लेखान्तगतं 'याश्च दिल्ली' त्यमुमंशं यावल्लेख एष सागरिकाया ६.१ अङ्के प्रकाशितः।

श्रीविद्याचक्रवर्त्तिविरचितया संजीविनीटीकया सह १९६५–ख्रीष्टाब्दे दिल्लीस्थमेहरचन्दलक्ष्मणदास–प्रकाशसंस्थानतः प्रकाशितम्।

५. डॉ० रामचन्द्रद्विवेदिना स्वयं कश्मीरदेशीय–पाण्डुप्रतित्रय–समीक्षणसंशोधनाभ्यां संपाद्य हिन्दीभाषयाऽनूद्य संजीविन्यैव सह १९६५ ख्रीष्टाब्द एव दिल्लीस्थादेव मोतीलालबनारसीदास–प्रकाशनसंस्थानतः प्रकाशितम्।

एषु सर्वेष्वपि संस्करणेषु वृत्तितः सूत्राणां पार्थक्यं तत्तत्संस्कर्तृ–भिर्यथास्वं विहितम्, कुत्रचित् पङ्क्तिपार्थक्येन कुत्रचिच्च तेनैव सार्धं मुद्रणगतेनाक्षराकारभेदेन। तत्र सर्वेष्वप्युपर्युद्धृतेषु संस्करणेषु, शब्दालङ्कार–लक्षणाय प्रवृत्तेन ग्रन्थकृता रचितानि सूत्राणि निम्नाङ्कितेन क्रमेण मुद्रितानि–

१. इहार्थपौनरुक्त्यं शब्दपौनरुक्त्यं शब्दार्थपौनरुक्त्यं चेति त्रयः पौनरुक्त्यप्रकाराः।। १।।
२. तत्रार्थपौनरुक्त्यं प्ररूढं दोषः।। २।।
३. आमुखावभासनं पुनरुक्तवदाभासम्।। ३।।
४. संख्यानियमे पूर्वं छेकानुप्रासः।। ४।।
५. अन्यथा तु वृत्त्यनुप्रासः।। ५।।
६. स्वरव्यञ्जनसमुदायपौनरुक्त्यं यमकम्।। ६।।
७. शब्दार्थपौनरुक्त्यं प्ररूढं दोषः।। ७।।
८. तात्पर्यभेदवत्तु लाटानुप्रासः।। ८।।
९. तदेवं पौनरुक्त्ये पञ्चालङ्काराः।। ९।।

एतेषामनुशीलनेन स्पष्टं भवति यत् प्रथमे सूत्रे पौनरुक्त्यभेदा दर्शिताः, शेषेषु च सूत्रेषु तेषामेव भेदानामेकैकशो दोषालङ्कारत्वे यथायथं दर्शिते। तत्र द्वितीये सूत्रे अर्थपौनरुक्त्यस्य, सप्तमे च सूत्रे शब्दार्थ–द्वयपौनरुक्त्यस्य अनुसमुद्देशो दृश्यते, द्वितीयस्य शब्दपौनरुक्त्यस्य तु स, न क्वापि।

तदिदमेकमत्रासामञ्जस्यम्। एतेषु नवसु सूत्रेषु यानि त्रीणि प्रथमानि, तेषु अर्थपौनरुक्त्यस्य विचारो दृश्यते अन्तिमेषु च त्रिषु शब्दार्थोभयपौनरुक्त्यस्य। तदित्थं यान्यत्र त्रीणि मध्यवर्त्तीनि चतुर्थपञ्चमषष्ठानि सूत्राणि सन्ति, तानि पारिशेष्याच्छब्दपौनरुक्त्यविषयकाण्येव सिद्ध्यन्ति। एवं स्थिते चतुर्थे सूत्रे यत् 'पूर्वम्' इति पदं दृश्यते तत्परामर्शविषयः क इति विज्ञातुं न लभ्यते। यत्र हि एकाधिकाः पदार्थाः पूर्वमुद्दिश्यन्ते तत्र परवर्तिषु सूत्रेषु, प्रथमः पदार्थः पूर्वपदेनानुदिश्यते। नास्ति चात्र किंचनापि शब्दपौनरुक्त्यविभागविषयकं तादृशं किञ्चित् सूत्रम्। सोऽयमपरो दोषः। अस्ति च ग्रन्थकृतः शब्दपौनरुक्त्यस्य भेदद्वयमभिमतम्। यथा चैतत् तत् 'संख्यानियम' इति सूत्रस्य वृत्तिग्रन्थतः, षष्ठात् सूत्राच्च स्पष्टम्। 'संख्यानियम'—सूत्रस्य वृत्तौ 'पूर्वम्' इति पदमेवं विव्रियते— 'पूर्वं व्यञ्जनसमुदायाश्रितम्' इति। एतेन शब्दपौनरुक्त्यं प्रथमतः केवलव्यञ्जनमात्रपौनरुक्त्यरूपं भवतीति व्यज्यते। यमकसूत्रे पुनः स्वरव्यञ्जनसमुदायपौनरुक्त्यं कण्ठरवेणैव ग्रन्थकृतोदीरितम्। तदिदमपरं शब्दपौनरुक्त्यम्। तदित्थं व्यञ्जनमात्रपौनरुक्त्यमेकम्, स्वरव्यञ्जनसमुदायपौनरुक्त्यं चापरमिति शब्दपौनरुक्त्यस्य द्वौ प्रकारौ चतुर्थस्य सूत्रस्य वृत्त्या, षष्ठाच्च स्वयं सूत्रादुन्मील्येते। नास्ति चानयोः शब्दपौनरुक्त्यप्रस्तावीयेषु सूत्रेषु स्पष्टरूपेण पृथगुल्लेखः। अनावश्यक—मेतदिति वक्तुं न क्षमम्, प्रथमे सूत्रेऽपि पौनरुक्त्यविभागस्य तथा वक्तुं शक्यत्वात्।

वयमत्रैवं पश्यामः—अत्र यत् तृतीयं सूत्रं तस्य 'जगन्त्यपि तथा पायादव्याच्चेतोहरः शिव'—इत्यस्मादुदाहरणात् परं यौ—

१. 'शब्दपौनरुक्त्यं व्यञ्जनपौनरुक्त्यं स्वरव्यञ्जनसमुदायपौनरुक्त्यं च।

२. अलङ्कारप्रस्तावे केवलं स्वरपौनरुक्त्यमचारुत्वान्न गण्यत इति द्वैविध्यमेव।'

—इमौ द्वौ ग्रन्थांशौ सर्वत्र वृत्तिरूपेणैव प्रकाशितौ। अनयोः प्रथमः सूत्ररूपो वर्त्तते, द्वितीयश्च तद्विवृतिरूपः। एवं मते पूर्वोक्तं दोषजातं परिह्रियते। ततश्च—

१. इहार्थ—पौनरुक्त्यं......... त्रयः पौनरुक्त्यप्रकाराः।। १।।

२. तत्रार्थपौनरुक्त्यं प्ररूढं दोषः।। २।।

३. आमुखावभासनं पुनरुक्तवदाभासम्।। ३।।

४. शब्दपौनरुक्त्यं व्यञ्जनपौनरुक्त्यं स्वरव्यञ्जनसमुदाय—पौनरुक्त्यं च।। ४।।

५. संख्यानियमे पूर्वं छेकानुप्रासः।। ५।।

इत्येवं सूत्रक्रमे संपन्ने पञ्चमसूत्रस्थस्य 'पूर्व'पदस्य वृत्तिनिरूपितो व्यञ्जनपौनरुक्त्यरूपः परामर्शविषयः सूत्रसमुद्देशेनापि प्रमाणीक्रियते। सति च परामर्शविषयस्य समुद्दिष्टपूर्वत्वे सर्वनामपदस्याप्यकुतोमुखीनत्वं परिह्रियते।

संजीविनीकारः श्रीश्रीविद्याचक्रवर्त्यपि वृत्तिरूपेण मुद्रितामिमां पङ्क्तिं सूत्रमेव मनुते। स हि प्रत्येकमलङ्कारस्य लक्षणसूत्रं पूर्णतया निर्दिशति। तथाहि—

'अथ सूत्रम्—'इहार्थपौनरुक्त्य..........प्रकाराः।। १।।'' इति।

'अथैषु पौनरुक्त्येषु हेयांशं विभङ्क्तुं सूत्रम्—'तत्रार्थपौनरुक्त्यं प्ररूढं दोषः।।'२।। इति।

'तत्र व्यञ्जनमात्रमधिकृत्य सूत्रम्— 'संख्यानियमे पूर्वं छेकानुप्रासः।। ३।।' अस्मदुत्प्रेक्षिताय सूत्रायाप्यसौ लिखति—

'अथ शब्दपौनरुक्त्यप्रस्तावाय सूत्रम्— 'शब्दपौनरुक्त्यं व्यञ्जनपौनरुक्त्यं स्वरव्यञ्जनसमुदायपौनरुक्त्यं च।। इति।

विवृणोति चैतदेवम्—

'अत्राद्यं पदमुद्देश्यम्, चरमं तु द्वयं विधेयम्, शब्दपौनरुक्त्यं व्यञ्जनमात्रनिष्ठतया स्वरव्यञ्जनसमुदायनिष्ठतया च द्विप्रकारमित्यर्थः।

दिल्लीसंस्करणयोः संजीविन्यां सूत्रत्वेन प्रख्यापितस्यापि, मूले

यद् वृत्तित्वेनैव ग्रन्थांशस्यास्य मुद्रणम्, तत्र भूमिकायाम्, पादटिप्पणे, परिशिष्टेऽपि वा किंचिदपि स्पष्टीकरणं न लभ्यते। काशीसंस्करणे पुनरिदं वैचित्र्यं यत् परिशिष्टतया सर्वेषामेव सूत्राणां पृथक् मुद्रणे सूत्रं त्विदं सर्वथा विच्यावितमेव, तदर्थसंगतये पुनः प्रथमात् सूत्रात् 'शब्दपौनरुक्त्यम्' इत्यपि पदं विच्यावितम्। तत्र परिशिष्टे हि प्रथमं सूत्रम् 'इहार्थपौनरुक्त्यं शब्दार्थपौनरुक्त्यं शब्दपौनरुक्त्यं शब्दार्थपौनरुक्त्यं चेत्येवमेव संस्करणान्तरवदेव। अत्रैतदाश्चर्यपदं यच्छब्दपौनरुक्त्योल्लेखमसंगतं मन्वानेन संपादकेन 'त्रय' इत्यनेन पदेनोपस्थापितस्य पौनरुक्त्यगतस्य त्रित्वस्यान्वयाय विचारो न कृतः।

इत्थमिह पूर्वपरिचायितेषु संस्करणेषु पुनरुक्तवदाभाससूत्रवृत्तितया, छेकानुप्राससूत्रावतारतया वा यदयं–'शब्दपौनरुक्त्यं व्यञ्जनमात्रपौनरुक्त्यं स्वरव्यञ्जनसमुदायपौनरुक्त्यं चे'ति ग्रन्थोऽसूत्रत्वेन प्रकाशितः तस्य सूत्रत्वे निश्चायिते, तस्यैव च चतुर्थत्वसिद्धौ, परवर्त्तिषु सूत्रेषु ग्रन्थपूर्त्ति यावद्, ये नाम ४, ५, ६ इत्येवमादयः संख्याङ्काः स्थापिताः, तेषु सर्वेष्वप्येकोनत्वमाकलयद्भिरेकाङ्कसंकलनेन ५, ६, ७ इत्येवमादय एकाधिका अंकाः स्थापनीयाः।

अलंकारसर्वस्वस्य पूर्वोक्तेषु संस्करणेषु पाठशोधनमन्यत्रापि बहुत्रापेक्ष्यते स्म। यत्र संजीविनीप्रभृतयो विवृतयोऽपि साहाय्यं न विदधते। तच्चास्माभिरस्माकं संस्करणे विहितमेव। याश्च दिल्लीविश्वविद्यालयस्थेन ज्योतिर्विदा विदुषामाकं संस्करणे यत्र तत्रानुपपत्तय उपस्थापिताः तासु विमर्शकाः प्रमाणम्। उपर्युक्ते सूत्रसमुद्धारे तु तस्य नास्मासु प्रातिकूल्यमिति संतोषावहम्।

जयरथस्य महति भाष्ये पूर्वपक्षाणामन्वेषणे 'रत्नाकरमन्थनेऽस्माकं या सिद्धिस्तस्यै पुनर्भगवती पराम्बैव प्रणम्या। संशोधनरतैरहंयुभिस्तु केवलं न भाव्यमिति यो विनयपक्षः सोऽभ्यर्हितत्वेन पालनीय एवेत्यपरोऽस्माकं प्रणयः। अहंयुभावश्चाशिष्टता च पर्यायावेव।।

# जगन्नाथकाव्यलक्षणे दंशः

रसगङ्गाधरशिल्पी पण्डितराजो जगन्नाथो दण्ड्युपज्ञं विश्वनाथो–पलालितं च शब्दैककाव्यत्ववादमादाय प्रत्याचिख्यासाञ्चकार विलक्षणः शब्दः, तस्यार्थश्चेति द्वयोरपि समशीर्षिकयेव काव्यत्वं स्वीचिकीर्षून् भामह–वामनाऽऽनन्दवर्धन–कुन्तक–रुद्रटा–ऽभिनवगुप्त–क्षेमेन्द्र–भोजराज–महिमभट्ट[१]–मम्मट–वाग्भट–हेमचन्द्रान्। तथाहि 'काव्यं श्रुतम्, अर्थो न ज्ञात' इति व्यवहारं प्रमाणीकृत्य स्व–कल्पितं 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति काव्यलक्षणं स तद्घटकानि पदानि व्याख्यायैवं परिचस्कार–

**स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासंसर्गेण**
**चमत्कारत्ववत्त्वमेव काव्यत्वम्' इति ।**

अस्यार्थः–

स्वं चमत्कारत्वम्, तद्विशिष्टः[२] चमत्कारः, तन्नि–(ष्ठजन्यतानि) रूपिता या जनकता साऽर्थभावनायाम्, तस्या अवच्छेदकस्तादृशभावनायां विषयित्व–सम्बन्धेन विद्यमानोऽर्थः, तत्प्रतिपादकता शब्दविशेषे, ततस्तस्यापि चमत्कारत्ववत्त्वम्, इति तस्यैव काव्यत्वमि'–ति। अत्राङ्कुरपरिजिहीर्षा न्यायविदाममुं चमत्कारं विहाय चमत्कारत्वं यावदुपधावयतीति तत्राकाशपतनशङ्कयोर्ध्वपादं शयानं टिट्टिभं स्मरन्तस्तूष्णीमास्महे। इदन्त्वत्र विचारयामहे–

---

१. उच्यत इति व्युत्पत्त्याऽर्थस्यापि शक्यसंग्रहत्वे 'विशिष्टाया वाचः काव्यत्वं ब्रुवाणो जयदेवः सन्दिग्धवागिति नात्र गणितः।

२. वैशिष्ट्यमिदं जनकतायामपि धित्सूनां चमत्कारो नान्तरीयक एवेत्यस्माकमियमेव गुरुपारम्परी।

'परिष्कारेऽस्मिन् कथं नामाऽनवद्यता, तादृशीं प्रतिपादकतामपि संसर्गीकृत्य जायमानायामपि प्रवृत्तौ कथं नामात्र क्षेम' इति। तथाहि प्रसक्तसर्वस्वमिदं लक्षणं चित्र–प्रतिमयोरपि। तद्यथा–'स्वं चमत्कारत्वं, तद्विशिष्टश्चमत्कारः, तज्जनकताऽवच्छेदकत्वं तादृशसम्बन्धेन स्वभावनानिष्ठे शकुन्तलाद्यर्थे, तत्प्रतिपादकत्वं शब्द इव शकुन्तलादीनां चित्रे प्रतिमायां च, तद्वत्त्वं च शब्द इव चित्रे प्रतिमायामपी'–ति तत्रापि स्फुटैवास्य काव्यलक्षणस्य प्रसक्तिः।

ननु 'प्रतिपादकताऽत्र वृत्तिनिरूपिता, वृत्तिश्च शक्ति–भक्ति–व्यक्त्यन्यतम–नामा शाब्दो व्यापारः। ततश्च नातिप्रसङ्गप्रसक्तिः, चित्रादीनां शब्दभिन्नत्वादि'–ति चेत् साधु, प्रतिपादकत्वस्यास्य सावित्रीसोदरमुपांशुत्वं कथङ्कारं विज्ञस्येवाज्ञस्यापि मतितटीमुपश्लिष्येत्, ऋते शब्दप्रयोगम्। नास्ति चात्र स इति कीदृश एष उदारतायामपि कार्पण्योपरागः। परिष्कार एषः, न सूत्रम्। परिष्कारेऽप्यपरिष्कृतिमुल्लिखन्तः कथं नाम न दूयेरन्नभिज्ञाः। किञ्च

यदिदं शक्ति–भक्ति–व्यक्त्यन्यतम–प्रतिपादकत्वं तदप्यतिप्रसक्तं नाट्यप्रयोगे। वाचिके ह्यभिनये या भारती वृत्तिर्यच्च वाकोवाक्यं तत्र समासामपि वृत्तीनाममूषां विद्यमानत्वात्। न च तावतो नाट्यांशस्य काव्यत्वमेवे'–ति वाच्यम्, नाट्यसंवादेषु सर्वेष्वपि काव्यत्वप्रसक्तेः। न च 'नासौ दोषः, समेषामेवैषां काव्यत्वेन संजिघृक्षितत्वादि'–त्युच्येत, तथा सति लोकवाक्यानामपि संग्रहस्य प्रसक्तेः न्यायसाम्यात्। किं च 'उदितं मण्डलं विधोः' इत्यादिषु 'गतोऽस्तमर्क' इत्यादिषु च[१] भामहादिभिः प्रत्याख्यात–काव्यभावेष्वपि प्रथम–काव्यत्वमुदाजिहीर्षुभिर्भवद्भिः पण्डितराजैरपि केन वा परिजिहीर्ष्येत पांसुलपादस्य हालिकस्यापि परुषाक्षरायां

१. एवंविधवाक्यसमुदाये साधु–काव्यत्वमुपपादयन् दण्डी 'इत्येवमादि किं काव्यम्' इति ब्रुवाणेन भामहेन धिक्क्रियते। मम्मटस्तत्र मौनमवलम्बते। पण्डितराजः पुनरत्रोत्तमोत्तमकाव्यत्वमुपपादयति काव्यलक्षणाद् गुणालङ्कारयोर्निष्कासनस्यावसरे।

वैखर्यां काव्यत्वम्। ननु 'नास्ति तत्र रमणीयता लोकोत्तराह्लादजनक–ज्ञान–गोचरत्वसतत्त्वे–ति कीदृशी तत्र काव्यत्वप्रसक्तिरि'–ति चेद् 'उदितं मण्डलं विधोरि'–त्यत्रापि रमणीयतामनुभवद्भिरार्यैरितरत्रापि गुणालङ्कारशून्ये वचसि कथमिवासौ नानुभूयेत स्वैरतामात्मनोऽपहस्तयद्भिः। असति हि काव्यनिष्ठत्वेनानुभूयमाने विनिगमके स्वात्मसमवेतामेव चमत्कृतिं प्रमाणीकृत्य चिकीर्षिताऽपि व्यवस्था न ह्येवाटीकेताऽविवादसौभगीम्, न च स्यादलं वैतण्डिकस्य मुखभङ्गाय। अस्ति हि 'पश्य देवस्य काव्यमि'–ति भगवती श्रुतिरेव प्रमाणं सर्वस्याप्यस्य जगल्लक्षणस्य पार्पञ्चिकस्य वस्तुजातस्य, तदङ्गभूतस्य च कृत्स्नस्याप्यस्यापामरं प्रतिष्ठितस्य काव्यत्वे वाग्विसर्गस्य। कथं नाम प्रमाणोत्तम एष उल्लङ्घ्येत बद्धवेदानुशासनश्रद्धैरत्रभवद्भिर्वृद्धैः। ननु 'पश्ये'त्यादौ श्रुतिवाक्ये यत् काव्यमिति पदं तदर्थान्तरपरम्, न तु रघुवंशादिलक्ष्यदृष्टकाव्यत्वावच्छिन्नवस्तुविशेषनिष्ठमि'– ति चेत् 'काव्यं श्रुतम्, अर्थो न ज्ञात' इत्यत्रापि तन्न तथेति कथमिवोपपाद्येतार्यैः। ननु 'आनुभविकमिदमि'–ति चेद् 'गङ्गायां घोष' इत्यत्र 'हस्ते[1] लीला–कमलमि'–त्यत्र चानुभव एव जागर्त्ति न वा? जागर्त्तीति चेद् 'मूले महीरुहः[2] प्लवङ्गमसंयोगी न शाखायामि'–त्येवंविधस्याव्याप्यवृत्ति–कस्यानुभवस्येव 'काव्यं श्रुतमि'–त्यादिकस्याप्यनुभवस्यैकदेश– मात्रपरतायां सुलभायां कीदृश एषोऽसदृशो ग्रहः अर्थस्याकाव्यत्वप्रतिष्ठापनायै। श्रवणक्रियाकर्मत्वं च 'आत्मा वा अरे श्रोतव्य' इत्यादिषु श्रुतिवचनेष्विव 'काव्यं श्रुतमि'– त्यादिष्वप्यर्थगत्वेन न नास्ति शक्यस्वीकारम्। ननु 'अर्थो न ज्ञात' इति परिहृतिवचनमत्र प्रतिबन्धकमिति नात्र दार्ष्टान्तिकेन दृष्टान्तस्य संवाद इति चेत् कुशकाशावलम्बनमात्रमिदम्, अव्यक्तवचसः

१. मेघदूते २.२ अस्माकं कालिदासग्रन्थावल्याः ३६ पृष्ठे। अत्राग्रहस्तार्थे हस्तशब्दप्रयोगः।
२. रसगङ्गाधरे विहङ्गम इति पाठः।

काव्यपाठे 'शब्दो न ज्ञात' इति व्यवहारे यथा शब्दस्य जानातिकर्मतायां न काव्यत्यच्युतिः, तथैवार्थस्यापि तत्तायां न सा। एकैकदेशमात्रनिष्ठो ह्येष व्याहारो यदुत 'काव्यं श्रुतम्, अर्थो न ज्ञात' इति। अस्ति च लोकेऽपि '[1]अश्रुतपूर्वः श्रुतपूर्वो वैष वृत्तान्तोऽस्माभिरि'–ति प्रतीतिः कर्णेजपादिप्रस्तावेषु। ततश्च श्रवणकर्मतायाः शब्दमात्रगतत्वमीक्षमाणैरुपेक्षमाणैश्चास्या अर्थगतत्वम्, अनुरोध इव प्रतिरोधोऽपि क्रियत एव भवद्भिः स्वोपजीव्यस्य परमेष्ठिनः प्रमाणस्य।

नंनु 'अर्थस्य श्रवणविषयत्वव्याहारस्तत्प्रतिपादकशब्दैकविषय–तयौपचारिक इति नास्ति प्रतिरोधकथाया लेशोऽपी'–ति चेत् 'काव्यं ज्ञातमि'–ति व्याहृतावर्थमात्रविषयत्वस्य व्यवस्थितेः शब्दस्य काव्यत्वे भूयोऽपि व्यवहार एव प्रतिबन्धक इति न तथापि गतिः। ननु 'जानातिकर्मत्वं शब्देऽपि न न लब्धप्रसरमिति मुधैवैतद् विजल्पनमि'–ति चेत्, नहि स्वरूपतो ज्ञातस्य शब्दस्य काव्ये शब्दतया व्यवहारः, प्रत्युत अर्थवत्तयैव ज्ञातस्येति पारिशेष्यादर्थस्यैव जानातिकर्मत्वम्, अर्थवदितिप्रकृतिघटकी–भूतस्यार्थस्यैव तला विवक्षितत्वात्। प्रमेयत्वस्य केवलान्वयित्वाच्च किमेतेनोक्तेनानुक्तेन वा यद् 'अमुकं ज्ञातमज्ञातं वे'–ति। विशेषपरत्वेनैव हि तत्र नैरर्थक्यस्य परीहारः। विशेषश्च तथाविधार्थमात्रप्रतिपादनेन। ततश्चार्थ एवासौ यत्र जानातिकर्मत्वस्य पर्यवसितिः।

अपि च, यदिदं रमणीयत्वं तद् यदुपादानकं तत् किमिति वेदितव्येऽगृहीतगुणालङ्कारादिविशेषणस्य भवतः केन वा समाधिः। न हि शरीरमात्रस्य वरत्वम्, अपितु विवाहोचिताकल्पसश्रीकस्येति यथा वरे लक्षयितव्ये शरीरस्येवालङ्कारादेरपि लक्षणे निवेशः, तथैव सुन्दरे शब्दार्थयुग्मे लक्षयितव्ये सौन्दर्याधायकानां गुणालङ्कारादीनामप्यशक्यपरिहार एव तत्र

१. शाकुन्तले कञ्चुकिनं प्रति परिचारिकावचनम् 'अश्रुतपूर्वं आवाभ्यामेव वृत्तान्त' इति। अस्माकं कालिदासग्रन्थावल्याः ५१८ तमे पृष्ठे षष्ठाङ्कारम्भके मिश्रविष्कम्भके।

निवेशः। शुद्धयोस्तु शब्दार्थयोः काव्यत्वे स्वालक्षण्यहानिरेव काव्यस्येति काव्यमकाव्यं चेति सर्वमप्येकीकृतकलेवरकम्। एवं चाभ्यर्हितत्वमेवार्थस्य काव्यत्वमिव तत्तद्विशेषणप्रतिपाद्यानां शब्दार्थयोर्विशेषाणामपि काव्यलक्षणे।

यच्चोच्यते 'गुणत्वालङ्कारत्वयोरननुगतत्वमि'–ति तदपि लक्षण–करणाशालीनशेमुषीकाणामयशस्करमेव भवतां वचः। 'द्रुत्यादिजनकता–ऽवच्छेदकतयाऽनुमीयमानस्याऽऽनुभविकस्य च माधुर्यादेरनुगमस्य सर्वजनीनत्वे का नु कथाऽननुगतेः। ननु 'मधुर–मधुरतर–मधुरतमादिषु नास्ति क्षेमः केवलेन माधुर्यादिनेति मधुरत्वम् मधुरतरत्वम्, मधुरतमत्वमिति प्रतिस्वमेकैकस्यावच्छेदकस्य कल्पने गौरवमिति शृङ्गारत्वादेव तादृशजनकताऽवच्छेदकत्वं लाघवादुचितमिति नास्ति तद्विलक्षणो माधुर्यादिर्गुण' इति चेद् 'अनङ्गरङ्गप्रतिमं तदङ्गमि'–त्यादिषु कोमलानुप्रासगम्येषु शृङ्गारादिषु या काचन श्रुतिविलक्षणता सा किंस्वरूपा? शृङ्गारत्वैकरूपा भिन्ना वा? ननु 'भिन्नैव, किन्तु शब्दगता सा, न तु रसगता, दाहकत्वादुष्णत्वस्याग्नाविव द्रुत्यादेर्माधुर्यस्य शृङ्गारादिषु पार्थक्येनाननु–भवादि'–ति चेन्न, उष्णत्वस्याप्यग्नित्वस– तत्त्वताङ्गीकृतिरूपप्रतिवन्द्या जागरूकत्वात्। एवं च प्रसक्ताऽत्र क्रियासमानाधिकरणगुणमात्र–प्रविलोपभीतिः। अपि च शब्दस्य काव्यत्वमुपेयिवद्भिर्यैरकामेनाप्यूक्रियेतैव तथाविधानुप्रासादिमण्डिते शब्दाडम्बरे तदितरभेदकतया कश्चनापि विशेषः। स च नानुप्रासैकरूपः 'अकुण्ठोत्कण्ठया तूर्णमाकण्ठं कलकण्ठि माम्, कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्त्तिमुद्धरे'–त्यादेः–'अनङ्गरङ्गे'–त्यादीनामनुभवसाक्षिकवैलक्षण्यकगुणविशेषवत्त्वस्य मीमांसकेनाप्य–पलपितुमशक्यत्वात्। एवं च पराहतं वचो यदननुगतं माधुर्यादिकमिति। लक्षणं चैतेषां निमित्तकारणादीनामिवापोहविधया शक्यक्रियमेव 'दोषाभावा–

लङ्कारभिन्नत्वे सति काव्ये [१]स्वरूपसम्बन्धेन चमत्कृतिजनकत्ववत्त्वमेव गुणत्वमि'–त्येवंविधं किञ्चन, यदि नास्ति श्रद्धा प्रतीतचरेषु [२]भरतवामनानन्द–वर्धन–मम्मटादिवचस्सु।

यच्चालङ्कारत्वं तदपि सुप्रतीतानुगतिकमेव 'रसादिभिन्नत्वे सति शब्दार्थान्यतरनिष्ठा या विषयित्वसम्बन्धावच्छिन्ना शब्दार्थान्यतरनिष्ठा चमत्कृतिजनकतावच्छेदकता स्वरूपसम्बन्धेन तदवच्छेदकत्वस्य' अलङ्कारतया सुखेन स्वीकर्त्तुं शक्यत्वात्। तथाहि वक्रोक्त्याद्युपमा–दिमच्छब्दार्थयोरुभयत्रान्यतरत्र वा विषयित्वसंबन्धेन स्व–स्व–भावनायां विद्यमानयोः या चमत्कृतिजनकतावच्छेदकता तदवच्छेदकत्वं वक्रोक्त्यादिषूपमादिषु वा तद्विशेषणीभूतेषु, परिहृताश्चालक्ष्यक्रम–व्यङ्ग्यविशेषाः, व्यङ्ग्यालङ्कारव्यतिरिक्ता गुणादयो धर्माश्च। यश्च रसादिभिन्नत्वस्येव व्यङ्ग्यभिन्नत्वस्यापि लक्षणे निवेशः, स संप्रदायविरुद्धः, व्यङ्ग्यत्वालङ्कारत्वयोः परस्परमविप्रतिषिद्धत्वाद् भवद्भिरेवाम्रेडितचरात्[३]।

---

१. माधुर्यादीनां ह्यग्न्यादीनामिव स्वरूपतः दाहकत्वादाविव चमत्कृतौ जनकत्वम्, न तु ज्ञानद्वारा।

२. दोषभावात्मानो गुणा इति भरतः, 'काव्यशोभायाः कर्त्तारो धर्मा गुणा' इति 'गुणाभावात्मानो दोषा' इति च वामनः। आनन्दवर्धनश्च 'तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः।।' इति २.६ ध्वन्यालोके।।

मम्मटश्च ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ।। इति

३. रसगङ्गाधरेऽविप्रतिषेध एषोऽसकृदुदलेखि पण्डितराजेन। व्यङ्ग्यभिन्नता पुनर्विश्वनाथ–विद्यानाथा–द्युल्लासिता चन्द्रिकाकृदुपज्ञा च। देवीशङ्करश्चालङ्कारमञ्जूषायाम्–

रसादिभिन्नव्यङ्ग्यान्यच्छब्दार्थयोश्च या पृथक् ।
चमत्कारकता तस्या अवच्छेदकमलङ्क्रिया ।। इति १३३–कारिकया तामनुवदति (मूले 'चमत्कारप्रभवता तदव०' इतिपाठः), अनुवदति च

तामेव काव्यप्रकाशटीकाकारो वामनझलकीकरः।

एवं च पारिशेष्यविधयाऽलङ्कारलक्षणस्यापि सम्भवे कीदृशी तत्राननुगति–विगीतिः। किञ्च 'विभावाद्यभिव्यज्यमानहर्षाद्यन्यतमत्वमि'[1]–ति सञ्चारिभावलक्षणेऽन्यतमत्वनिवेशेन संतोषमभिव्यञ्जयतामार्याणां तेनैवोपक्रमेण गुणालङ्कारलक्षणगवेषणायां कीदृशो न्वसदृशो विरागः। तदित्थं रिक्तैव वराकी गुणालङ्कारत्वयोरननुगतत्वोक्तिः।

यश्चात्र दोषाभावः स हि रञ्जनात् पूर्वं वाससः शोध इव प्रागभावात्मना स्थितः प्रामुख्येण निबन्धुरेव बुद्धेः शोधः। अत एवोक्तं भोजराजेन 'दोषान् हेयतया वेत्ति स काव्यं कर्त्तुमर्हती'–ति। परिणतेऽपि काव्यबन्धे यः कश्चन निहतार्थत्वादिको दोषः, नास्ति ततः काव्यत्वक्षतिरिति, 'दुष्टं काव्यमि'–ति व्यवहारं प्रमाणयतां भवतामपि, प्रतिपित्सितमेवेति कैमुतिकसिद्धिकत्वं स्थितमेव तादृश–दोषाभावस्यापि काव्यलक्षणे।

इत्थं हि 'काव्यं ज्ञातमि'–त्यादिषु व्यवहारेषु ज्ञानविषयतया प्रसिद्धे काव्येऽर्थस्यापि संग्रहे जाते सुन्दरस्य जनस्य लक्षणे नेपथ्यादीनामिव सुन्दरशब्दार्थरूपकाव्यस्य लक्षणेऽपि 'नागृहीतविशेषणा धीर्विशेष्यमवगाहत' इति न्यायादभ्यर्हित एवोपमादीनामलङ्काराणां माधुर्यादीनां गुणानां च सन्निवेशोऽदोषत्वकिर्मीरितः।

अथ, योऽयं काव्यत्वेनाभीष्टः शब्दः स किंस्वरूपः?, पदस्वरूपो वाक्यस्वरूपो वा? ननु 'वाक्यार्थनिष्पत्तौ जातायां पदार्थ इव वाक्यसंवित्तौ संपन्नायां पदमपि न पृथक्प्रतिपत्तिपदमिति शब्दशब्दः पारिशेष्याद् वाक्य एव पुण्यशब्दः, ततः परमार्थदृष्ट्या वाक्यमेव विज्ञैराद्रियेते'–ति चेद् आर्ष एष पन्थाः, न व्यावहारिकः, व्यवहारं तु पृच्छामः, यत्र हि सत्यपि वाक्यशब्दे न निरुद्धः शब्द– पदादिव्यक्ति–व्याहारः, नास्ति च यत्र पौनरुक्त्यम्, सत्यामपि मनुष्यत्वजातौ तद्व्याप्यब्राह्मणत्वादिजातिव्याहार

१. रसगङ्गाधरे भावस्य सिद्धान्तलक्षणम्।

इव। एवं हि सुमेधोभिरार्यैः, साहित्यदर्पणकृद्भिरिव वाक्य—शब्द एवाद्रियेत, न चागृह्येत शब्दशब्दप्रयोगे। ननु 'शब्दार्थौ काव्यमिति या पूर्वपक्षीया बुद्धिधारा तामेवानुवदद्भिः शब्दशब्द एवास्माभिराद्रियेत प्रतिनिर्देश—स्योद्देश्यानुहारित्व एव विदुषां संरम्भादि'—ति चेद् एवं हि शब्दे शिथिलाग्रहैः कुशाग्रीयधिषणैश्च श्रीमद्भिः शब्दस्य विशेषणान्यपि लक्ष्येतरव्यावर्त्तकानीति न ह्येव व्यावर्त्तनीयानि। ननु 'रमणीयार्थप्रतिपादकः शब्दः काव्यमिति रमणीयार्थ— प्रतिपादकत्वमत्रोपात्तमेवेति नास्ति दंशावकाश' इति चेद् यादृशो भवानदंदशूकः सोऽस्माभिर्दृष्टचर एव प्राचां लक्षणानां परीक्षणक्षणे। अथ स्वकृते परिष्कारे भवतां पण्डित नरेन्द्रतेयं क्व नु प्रभ्रष्टा येन निर्विषो वा, अनवकाश एव वा प्रसिद्ध्येदपरेषां दंशः।

अपि च 'दश दाडिमाः, षडपूपा' इत्यादीनामपस्परसङ्गतार्थानां वाक्यानां प्रबन्धप्रयोजकत्वानौपयिकत्वमुपेयिवद्भिः, उपेयिवद्भिश्च प्रबन्धत्वस्यापि काव्यत्वव्याप्यत्वम् अकामेनापि संजिघृक्षितव्यमेव तदवच्छिन्नमपि, एवं च न शक्यं संतोष्टुं वाक्यशब्दप्रयोगेणापि। परस्परसङ्गतार्थको वाक्यसमुदायो हि प्रबन्धः, न तु केवलं किञ्चन वाक्यम्। एवं हि वाक्यमप्यप्रयुज्य वाक्यत्वावच्छिन्नमत्र प्रयोक्तव्यम्। न च 'शब्द—शब्देनैव वाक्यं प्रबन्धश्चेति सर्वमपि संगृहीतमि'—ति वााच्यम्, न ह्यगृहीतार्थो वाक्यशब्दः, शब्दशब्दो भाषाशब्दो वा स्पृशतितरां पुराणत्वादिकमपि, किं पुनः काव्यत्वम्। ततश्चौत्सर्गिकमर्थमुत्सृज्य 'रमणीयः शब्दः, रमणीया भाषा, रमणीया वागि'—त्येव वा केवलं वक्तुमलम्, अलं च रमणीयत्वे पारिभाषिकत्वं निवेश्यात्मानमतिप्रसङ्गाद् रक्षितुम्। एवं च निरर्थक एव लक्षणवाक्येऽर्थ—परिग्रहः।

किं च 'काव्यं ज्ञातमि'—ति व्यवहारात्, 'कथमप्युन्नमितं न चुम्बितं तु' इत्यादिषु, 'मन्दमाक्षिपति' इत्यादिषु च 'काव्येऽत्रायं शब्दो बिभ्रदर्थान्तरप्रत्यय— कुर्वद्रूपताक' इति काव्यतच्छब्दयोर्भेदावगमाच्च

विप्रतीपमेव कथं न लक्ष्येत 'शब्दविशेषप्रतिपादितः कमनीयोऽर्थः काव्यमि'—ति। कमनीयत्वं च चमत्कृतिजनकतावच्छेदकत्वम्, तच्च विषयित्वेन स्वभावनानिष्ठतयेति सर्वं सुस्थम्। तत्र चित्रादि—व्यावृत्तये प्रथमम्, कोषादिव्यवच्छित्तये चापरं विशेषणम्। यच्चाङ्कुरभयं तदाकाशपतनभयसोदरमित्यलमूर्ध्वपादं सुप्त्वा। न हि गोत्वं प्रयत्नशतेनापि गां विजह्यात्, व्याजिहीत च तद्भिन्नम्। यद्धि चमत्कारत्वं तच्चमत्कारैकनिष्ठतया विदितम्। कथमिदं शब्देऽर्थे वा व्यभिचरेत्। ननु 'गङ्गायां घोष[१] इत्यादिषु गङ्गात्वादिकं तटादिष्विव शब्दमहिम्ना' इति चेत् किमेतेनालङ्कारिकाणां कृतेऽतिचोद्येनोद्यमेन। ननु 'सर्वंसहं किल अलङ्कारतन्त्रमिति न्यायविदोऽपि संतोषयितव्या इति चेद् ये हि स्वयमसंतुष्टास्तान् प्रजापतिरपि नालं संतोषयितुमिति नेयं साहितीजगतीनेदीयसी कथा। ननु 'प्रकृते वाग्व्यवहारस्योभयत्रापि साम्ये शब्दप्रधानक एव काव्यलक्षणे कीदृशः पयर्नुयोग इति चेदनुभूतिविरोधोऽत्र भवत्सु पर्यनुयोजयते। कीदृशः स इति चेदानन्दवर्धनान् पृच्छन्तु '[२]अर्थः सहृदयश्लाघ्य' इति ब्रुवाणान्। ननु 'अकाव्यार्थापेक्षया काव्यार्थस्य विशेषं प्रतिपिपादयिषुभिरिदं तैरुच्यत इति किमेतेन प्रकृते प्रयोजनमि'—ति चेत् सर्व एव हि काव्यात्मानः—'शब्दः, अर्थः, अर्थान्तरं' चेत्यलमतिप्रसङ्गेन।।

◈

---

१. नरेन्द्रो विषवैद्योऽपि।

२. ध्वन्यालोके १.२ कारिका

# रसगङ्गाधरे सन्दर्भशुद्धिः

पण्डितराजो जगन्नाथो रसगङ्गाधरे प्राचीनसमुद्धरणे निम्नलिखितयोः सन्दर्भयोरन्यथावागलक्ष्यत–

१. पण्डितराजो ह्यसावानन्दाभिनवपारम्परीमनुरुन्धानो मम्मटस्याग्रहं शिथिलयन् रसभावतदाभासभावशान्त्यादीनामपि संलक्ष्यक्रमव्यङ्ग्यत्वं प्रतिजानीते, ददाति चोद्धरणं महाकवेः कालिदासकृतस्य कुमारसंभवस्य–

**एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।**
**लीलाकमलपत्राणि गणयामास पार्वती** ।।'ति षष्ठ–

सर्गीयं नितान्तमेव समीक्षकाचार्यप्रियं पद्यम्। अत्रावहित्थानामको भावसंगोपनात्मा भावो व्यज्यत एव, किन्तु पञ्चमसर्गवर्णितं घटनाचक्रं स्मृत्वा किञ्चिद् विलम्बेन। ततश्चासौ संलक्ष्यक्रमत्वदिग्ध इति पण्डितराजस्य पक्षः। तस्यास्य मम्मटानभिमतस्य पक्षस्य समर्थनाय पण्डितराज एष मम्मटस्योपजीव्ययोरानन्दवर्धनाभिनवगुप्तयोर्वचनानि समुद्धरति।

एतत् सर्वं स्वीकार्यकोटिमेव प्रविशति, किन्तु **देवर्षि**पदव्याकृतौ पण्डितराजः स्खलद्गतिक आलक्ष्यते। स हि देवर्षिपदं नारदपरममंस्त। अस्ति चेदमाङ्गिरसस्य महर्षेः कृते प्रयुक्तम्। तथाहि सप्तर्षिमण्डलं यदा हिमवतो नगरमोषधिप्रस्थं प्राप्तं तदा पर्वतराजेन कृतातिथ्यं तत् प्रयोजनं पृष्टमुदाहरणवस्तुष्वग्रण्यमाङ्गिरसमेकमुत्तरायाधिचक्रे, स च महीधरमुद्दिश्य भगवते शिवाय पार्वतीं यायाचे। याचनायामस्यां क्रियमाणायां पार्वती लज्जते, लज्जयाधोमुखी सा स्वकीयं भावं गूहयति, तदर्थं लीलाकमलपत्राणि गणयति। तदेवोपनिबद्धं सुकविना 'एवंवादिनी'–ति। यथैतत् तदर्थं कुमारसंभवस्यैव वचनानि–

**अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनः ।**
**सुतासम्बन्धविधिना भव विश्वगुरोर्गुरुः** ।। कु. ६.८३

**एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।**
**लीलाकमलपत्राणि गणयामास पार्वती** ।। कु. ६.८४

एवञ्चाऽस्मिन् स्थले देवर्षिपदेनाङ्गिरस एव प्रकरणसमर्थितः, पण्डितराजस्तु 'इत्यत्र कुमारीस्वाभाव्यादप्यधोमुखत्वविशिष्टस्य लीलाकमलपत्रगणनस्योपपत्त्या मनाग्विलम्बेन **नारद**कृतविवाहादिप्रसङ्ग–विज्ञानोत्तरं व्रीडायाश्चमत्करणाल्लक्ष्यक्रमोऽयं ध्वनि'–रिति प्राहुरानन्द–वर्धनाचार्याः' (ध्वन्यालोके २.२२ वृत्तौ)–इत्येवं नारदं गृह्णाति।[१]

२. अनन्वयालङ्कार–प्रकरणे

**गन्धेन सिन्धुरधुरन्धरवक्त्र! मैत्री–**
**मैरावणप्रभृतयोऽपि न शिक्षितास्ते ।**
**तत्त्वं कचत्त्रिनयनाऽचलरत्नभित्ति–**
**स्वीयप्रतिच्छविषु यूथपतित्वमेषि ।।**

इति पद्ये रत्नाकरप्रतिपादितमनन्वयत्वं निराकृत्य 'विमर्शिनीकृता यदुक्तम् अनन्वयध्वनित्वमत्र भविष्यती'–ति (रसगङ्गाधरे पृ० २७५ नि.सा.सं० १९४७) –अत्रापि पण्डितराजो विमर्शिन्याः स्थानेऽलङ्कारसर्वस्वमभिषिञ्चति– 'यदपि चालङ्कारसर्वस्वकृता अनन्वयध्वनित्वमत्र भविष्यती'–ति, तदप्यन्यथात्वकवलितसन्दर्भकमेव।

अयञ्चाऽत्र विस्मयकरो वृत्तान्तो यदस्माभिः कलिकाताया एशियाटिकसोसायटीग्रन्थागारस्य रसगङ्गाधरहस्तलेखोऽपि दृष्टः, तत्रापि लेखः

---

१. 'रसभावादिरर्थो ध्वन्यमान एव, न वाच्यः, तथापि न सर्वोऽलक्ष्यक्रमस्य विषयः' (ध्वन्यालोक २.२२ लोचने) इति चाभिनवगुप्तपादाचार्याः' (रसगङ्गाधरे पृ० १३०–१३१, १९४७ नि.सा.)।

स एव यो हि मुद्रित:। नाकारि संपादकेनाऽपि तत्र टिप्पनीक्लेश:।

सन्दर्भ एषोऽस्माकं सविमर्शिनीकस्यालङ्कारसर्वस्वस्यानन्वयप्रकरणेन स्पष्ट:। तत्र मूले नास्त्यसौ विषय:। यत्र चास्ति सा हि महामाहेश्वरस्य राजानकजयरथस्य विमर्शिन्येव। (अलङ्कारसर्वस्वविमर्शिनी चौ०सं० १९७१ ई०, पृ० १००)। रसगङ्गाधरस्य संस्करणान्तरेष्वपि सन्दर्भदोष एष एवमेव स्थित:। एतदर्थं द्रष्टव्यं संपूर्णानन्दसंस्कृतविश्वविद्यालयत: प्रकाशितं पं० पारसनाथ द्विवेदिनो रसगङ्गाधरमूलम्।

एतैष्टीकाकृद्भिराचार्याणां पौर्वापर्य्यमपि नाध्यायि। तथाहि मम्मटस्य काव्यप्रकाशमलङ्कारसर्वस्वकारो लिलङ्घिषति, अलङ्कारसर्वस्वकारं लिलङ्घिषति 'अलङ्काररत्नाकरकार'स्तत्रभवान् शोभाकर:, तमिमं महामतिं विमर्द्य समर्थयितुमुदयुङ्क्तेऽलङ्कारसर्वस्वं विमर्शिनीकार:। तेनाऽनेनालङ्काररत्नाकरस्य भूयांसि स्थलानि विमर्शिन्यामनामग्राहमुद्धृत्य प्रत्यादिष्टानि। 'गन्धेने'ति पद्यं च विमर्शिन्यामेवास्ति समुद्धृतम्, न त्वलङ्कारसर्वस्वे। रत्नाकरस्य विरोधाय चास्य विचारो विमर्शिन्यामेव लभ्यते। टीकाकृद्भिरसौ पारस्परिको मतिसंघर्षोऽत्र नावालोकि। वस्तुतस्तु दोष एष स्वयं रसगङ्गाधरकर्त्तुरेव। आविष्टस्वभावा इमे किं नु हस्तलेखान् गवेषयेयु:!

काव्यप्रदीपकारोऽप्यनेकशो भट्टं प्रभाकरयति, प्रभाकरं च भट्टयति। तमिमं गुरुशिष्यविपर्ययमपश्यन्तोऽध्येतार: प्रदीपश्रद्धया विनायकं वानरीकुर्युरेव विनायकं वा वानरम्।

**सन्दर्भाऽशुद्धिरिव विषयाऽशुद्धिरपि** रसगङ्गाधरे सुलभा। तथाहि तस्य रचयिता महामति: पण्डितराजो रसनिष्पत्तिप्रक्रियाया इतिहासं विपर्य्यस्य प्रस्तौति। तत्र रसलक्षणेतिहासे १. चिदेव रस इत्येक: पक्ष:, सोऽयं ब्रह्मरसतो विषयरसं यावद् रससामान्यं विसिनोति, २. भावसंवलिता चिदेव रस इति द्वितीय: पक्ष:, यत्र भावपदेन विभावानुभावव्यभिचारिसात्त्विकस्थायिपदोल्लाप्या: सर्व एव भावा गृह्येरन्निति, ३. यदिदं विभावानुभाव–

व्यभिचारिसंयोगाद् रसनिष्पत्तिरिति रससूत्रत्वेन प्रसिद्धेन भरतसूत्रेणोपस्थापित: पक्षस्तस्य तृतीयत्वं फलति। विचार एष रसगङ्गाधरे त्यक्त:, लभ्यते च भरतस्य नाट्यशास्त्रस्य रसाध्यायपर्यवसितौ। अपरञ्चेदमपि निध्येयं यत् तत्र भवान् अभिनवगुप्त: शैवागमी। तस्य चागमस्य रसनिष्पत्ती रागकलादिभि: परिभाषाभिरेवोपस्थाप्यते भावप्रकाशनादिषु सन्दर्भेषु, न तु ब्रह्माद्वैतिनां परिभाषाभि: साक्षिभाष्यादिभि:। उक्तं किल शारदातनयेन भावप्रकाशनामनि शृङ्गारप्रकाशानुजे सन्दर्भरत्ने–

**कलोत्कलितचैतन्यो विद्यादर्शितगोचर: ।**
**रागेशारञ्जितश्चायं बुद्ध्यादिकरणैर्युत: ।।**

**मायाद्यवनिपर्यन्तं तत्त्वभूतात्मनि स्थितम् ।**
**भुङ्क्ते तत्र स्थितो भोगान् भोगैकरसिक: पुमान्** ।। इति

(द्वितीयेऽधिकरणे २७२–२७३)

अयमत्राभिप्राय:–

**रागो** नाम दु:खादि–कलुषे भोग्ये सुखाभिमान:। **विद्या** च ज्ञानाभिव्यञ्जिका रागस्योपादानकारणम्। **कला** तावत् मल–संरुद्धस्य चैतन्यस्याऽभिज्वलन हेतुस्तत्त्वविशेष:। एवं च रागो विद्या चेतिद्वे बाह्ये कला चान्तरो गुण:। तत्राद्येन करुणादिषु विषयेषु सुखाभिमानस्तन्मूला प्रवृत्तिश्च तेषु। विद्या चैषां समेषां विषयाणी ज्ञानम्। ज्ञातेषु च विषयेषु कलया चैतन्यमलाऽपसरणम्। अपसृते च मले सच्चिदानन्दमयेन भोगेन तेषां विषयाणां स्वाद:। स एव रस:।

इयञ्च रसनिष्पत्तिप्रक्रिया शारदातनयाऽभिमता–

**काव्याद्यर्पितेन प्रमदाद्यनुभावितेन वासित: साधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमान: सच्चिदानन्दमयेन भोगेन भुज्यमानश्च सहृदयस्य ह्लादात्मा स्वाद एव रस'** इति। यदुच्यत एतेन–

तादात्विकेन प्रमदाद्यनुभावेन वासितः ।
स्वादः सहृदयानां यो ह्लादात्मा हृदयङ्गमः ।।

स भावाभिनयात् साधारणीकरणरूपया ।
भावकत्वव्याप्रियया भाव्यमानः स्वभाववत् ।।
भोगेन संविदानन्दमयेनैवोपभुज्यते ।। २.२६४।।

भोक्तृभोग्यार्थ संबन्धप्रकारश्चाभिधीयते ।
रागविद्याकलासंज्ञैः पुंसस्तत्त्वैस्त्रिभिः स्वतः ।
प्रवृत्तिर्गोचरोत्पन्ना बुद्ध्यादिकरणै रसः ।। २६६ इति।

भोगं निष्पाद्य निष्पाद्य वासनात्मैव तिष्ठति ।
दुःखमोहादिकक्लेशमपि भोग्यं प्रतीयते ।
यत् सुखत्वाभिमानेन स राग इति कथ्यते ।। २६७

विद्या नामेति तत्त्वं यद् रागोपादानमुच्यते ।
तयाऽभिव्यज्यते ज्ञानं पुरुषस्य विपश्चितः ।। २६८।।

चैतन्यस्य मलेनैव संरुद्धस्य स्वभावतः ।
अभिज्वलनहेतुर्या सा कलेत्यभिधीयते ।। २६९।।

सुखदुःखात्मिका बुद्धेर्वृत्तिर्गोचर उच्यते ।। २७०।।

एवं परम्पराप्राप्तैर्भावैर्विषयतां गतैः ।
बुद्ध्यादिकरणैर्भोगाननुभुङ्क्ते रसात्मना ।। २७१।।

शिवागमज्ञैरर्थोऽयमेवमुक्तः पुरातनैः ।
कलोत्कलितचैतन्यो विद्यादर्शितगोचरः ।। २७२।।

रागेण रञ्जितश्चायं बुद्ध्यादिकरणैर्युतः ।
मायाद्यवनिपर्यन्तं तत्त्वभूतात्मनि स्थितम् ।। २७३।।

**भुङ्क्ते तत्र स्थितो भोगान् भोगैकरसिकः पुमान् ॥**
**प्रेरकत्वेन बुद्ध्यादिकरणानां पुनः पुनः ।**
**उपकुर्वन्ति सत्त्वादिगुणास्ते तत्र तत्र तु ॥** २७५॥ इति च

एवं किलेदमवसातुं शक्यते—

**शैव आगमे शिव एवैकं तत्त्वम्। स एव भावान् यदा चित्रात्मतामात्मन्याधित्सति तदा तत्तच्छक्तिरूपान् विभावानुभावसञ्चारिस्थायिसात्त्विकान् स्पन्दानाविष्करोति। एतेषां संयोगस्पन्द एव शृङ्गारादिरूपान् धत्ते। सर्वे चैते स्पन्दाः शान्तरसरूपा एव। स्पन्द एष व्यञ्जनात्मैव। सोऽयं शिवस्य स्वरूपाभास एव यो रस इत्युच्यते। न भवत्यत्र कश्चनापि प्रत्यवाय इति साधारण्यमात्रसाम्राज्यमत्र जागर्त्ति। अत्र हि रङ्गपीठोऽपि शिवरूप एव भवति। रसेऽस्मिन् वैचित्र्यमाधीयते शक्तिगताद् वैचित्र्यादेव।** उक्तमिदं स्वयमभिनवेनैव गुप्तेन—'यस्तन्मयानि'त्यभिनवभारत्यारम्भमङ्गले। सोऽयं साक्षात्कारविचारे परवर्त्ती पक्षः। तस्यास्य पूर्ववर्त्तिनोऽभिनवगुप्तस्योपरि निपातनं प्रौढिवाद एव।

किञ्च रसनिष्पत्तिप्रक्रियासु स्वयमभिनवेन 'उत्पत्तिवादः' प्रथमत्वेनोपस्थापितः, द्वितीयत्वेन अनुमितिवादः, तृतीयंत्वेन च भुक्तिवादः। स्वमतत्वेन च प्रतिप्रसावित आनन्दवर्धनस्य रसव्यक्तिवादः, मम्मटेनान्दवर्धनस्त्यक्तः, नासीदानन्दवर्धनो नाट्यशास्त्रटीकाकृदिति, समुत्प्लावितश्च क्रमः, किन्तु ईषत्स्पृष्टिकयैव। रसगङ्गाधरकृता तु समग्र एव क्रम एष विपर्यासितः। एतन्मतेन प्रथमोऽभिनवगुप्तः, द्वितीयश्च भट्टनायकः। कथमिदं निगीर्येत सन्दर्भविद्भिः। रसनिष्पत्तिप्रक्रियाश्चानेका (ध्व. २.४) लोचने स्वयमभिनवेनैवोपस्थापिताः। तास्वपि पण्डितराजस्य वर्त्तत एव दृष्टिः, किन्तु पण्डितेन्द्र एषोऽभिनवगुप्तं न स्मरति तत्र। अद्यापि, तथैव नैकोऽपि टीकिता॥

◈

## पण्डितराजकृता उत्प्रेक्षाभेदाः

पण्डितराजो नगन्नाथः स्वकीये रसगङ्गाधरनाम्नि सन्दर्भरत्ने—
'तद्भिन्नत्वेन तदभाववत्त्वेन वा प्रमितस्य पदार्थस्य रमणीय—
तद्वृत्ति—तत्समाना—धिकरणान्यतरतद्धर्मसम्बन्धनिमित्तकं तत्त्वेन
तद्वत्त्वेन वा सम्भावनमुत्प्रेक्षा'

इत्येवमुत्प्रेक्षां लक्षयित्वा—

'अत्र तादात्म्येन संसर्गेण धर्म्युत्प्रेक्षायाः, संसर्गान्तरेण धर्मोत्प्रेक्षायाश्च संग्रहायैकयोक्त्या लक्षणद्वयं विवक्षितम्'—

इति च तस्य— (१) धर्म्युत्प्रेक्षा

(२) धर्मोत्प्रेक्षा

इत्येवमुत्प्रेक्षाद्वयप्रतिपादकत्वमुपपाद्य इमां द्विविधामप्युत्प्रेक्षाम्—

'सा चोत्प्रेक्षा द्विविधा—(१) वाच्या (२) प्रतीयमाना चे' ति वाच्य—प्रतीयमानत्वेन द्वैविध्यमापय्य, पुनः 'सापि प्रत्येकं त्रिविधा—

(१) स्वरूपोत्प्रेक्षा

(२) हेतूत्प्रेक्षा

(३) फलोत्प्रेक्षा चेती'—


ति भेदयति।

को न्वस्य भेदप्रकारस्याभिप्राय इति जिज्ञासायां रसगङ्गाधर—गुरुमर्मप्रकाशे नागेशः फूत्करोति—

'एवं द्वादश भेदाः सम्पन्ना इति भाव' इति।

फूत्कारेणानेन मूर्च्छतितरां समीक्षकशेमुषीसहकारसुन्दरी। कथमिति चेदित्थम्—

महामतेरस्य वैयाकरणमतङ्गजस्य उक्ताया उक्तेः—




एषक एवाभिप्रायवृक्षः। अत्र प्रश्नः— हेतुफलोत्प्रेक्षयोर्धर्म्युत्प्रेक्षात्व—संसिषाधयिषया विषयविषयिणोस्तादात्म्यमेव विषयित्वावच्छिन्नप्रतियोगिताकं संसर्गतयाऽध्यवसेयम्। तदत्र कथं स्यादर्जितात्मलाभम्? नहि हेतुहेतुमतोः फलफलिनोर्वा तादात्म्यमत्र शक्यसम्भवम्। नास्ति च पण्डितराजस्यापि तदभिमतम्। किमत्र प्रमाणमिति चेद् उदाहृतानि हेतुफलोत्प्रेक्षोदाहरणानि तत्। एतानि च तानि—

हेतूत्प्रेक्षायाः

**त्वत्प्रतापमहाद्वीपशिखाविपुलकज्जलैः ।**
**नूनं नभस्तले नित्यं नीलिमा नूतनायते** । इति

**महागुरु—कलिन्द—महीधरोदर—विदारणाविर्भवन्महापात—कावलिवेल्लनादिव श्यामलिता।'** इति च,

फलोत्प्रेक्षायाश्च

**दिवानिशं वारिणि कण्ठदघ्ने दिवाकराराधनमाचरन्ती ।**
**वक्षोजतायै किमु पक्ष्मलाक्ष्यास्तपश्चरत्यम्बुजपङ्क्तिरेषा** ।। इति,

**वियोगवह्निकुण्डेऽस्मिन् हृदये ते वियोगिनि ।**
**प्रियसङ्गसुखायेव मुक्ताहारस्तपस्यति ।।** इति च।

एतेषु प्रथमे नित्यं नूतनायमानो नीलिमा विषयी, नभस्तलं विषयः, नीलिमसमानाधिकरणानि कज्जलानि च तत्र हेतुः। अस्ति च कज्जलानां भिन्नत्वमेवातादात्म्यसतत्त्वं तदितरैरत्राभिमतम्। उपनिबद्धमपि तत्सर्वमत्र तथैव। द्वितीये वेल्लनं हेतुः। तस्यापि भिन्नत्वेनैवोपनिवेशः प्रत्यक्षः। फलतया विवक्षितयोर्वक्षोजता—प्रियसङ्गसुखयोरपि च सैव स्थितिस्तृतीय—चतुर्थयोः। तदेवमसति तादात्म्य—निचोले कीदृशं धर्म्युत्प्रेक्षात्वमत्र। न च 'तादात्म्यमत्र हेतुफलत्वावच्छिन्नप्रतियोगिताकमभूत्वा, विषयित्वावच्छिन्नप्रतियोगिताकमात्रं भवति। हेतुफले तत्र साधनतामात्रमश्नुवाते। अश्नुवाते च व्यपदेशप्रयोजकत्वं चमत्काराधिक्य—जनकत्वार्जितप्रधानभावेनेति नास्ति भीति'—रिति वाच्यम्, निर्विषयैवं वराकी धर्मोत्प्रेक्षा, निर्विषयाश्चानेकेऽलङ्कृतिभेदाः सादृश्य—विरोधशृङ्खलाद्येकहेतुकत्वेन प्रसिद्धाः, तत्रापि हेतुतया स्थितानामेव तत्त्वानां चमत्कारप्रयोजकतामूरीकृत्य व्यपदेशप्रयोजकताया अप्यूरीकर्त्तुं शक्यत्वात्। न च—'यत्रानुभूतिसिद्धं चमत्कृतिप्रयोजकत्वं तत्रैव व्यपदेशप्रयोजकत्वमादरणीयं, न तु कल्पिते विषय' इति वाच्यम्, अनुभूतिवारवध्वाः कान्दिशीकत्वकुतोमुखीनत्वनिगडाविषयत्वात्। किं च—

(१) अत्र नीलिमसामान्याधिकरण्येनोत्प्रेक्षितस्य हेतुत्वेनोत्प्रेक्षा—इति

(२) अत्र तपश्चरणक्रियायाः साहजिकजलावस्थानाभिन्नतयाऽध्यवसिताया फलत्वेनोत्प्रेक्ष्यते' इति च—

केयमुक्तिः पण्डितराजस्य, यदि हेतुफलयोरुत्प्रेक्षाविषयित्वं नाभ्युपेयते, अभ्युपेयते च तदितरस्यान्यस्य कस्यचिद् वस्तुनः। अन्यस्यैव वा विषयित्व उत्प्रेक्षाया हेतुफलगतत्वं निर्मूलम्। आरोपाध्यवसानसम्भावनेषु हि यदेव आहार्यमारोप्यमाण—मध्यवसीयमानं सम्भाव्यमानं च भवति तदेव

विषयिपदवाच्यतां प्रतिपद्यते। अत्र हि हेतुफलायोरेव संभाव्यमानता। ततश्च तयोरेव विषयित्वमूरीक्रियेत।

ननु कथं तर्हि 'नीलिमा विषयीति'—पूर्वमुक्तम्, सत्यम्, तत्र हि विषयिद्वयं कृतपदम्। तत्र, एकं नीलिमरूपम्, अपरं च कज्जलहेतुकत्वरूपं कज्जलरूपमेव वा। नभस्तलं विषयीकृत्य द्वयं तत्रोत्प्रेक्ष्यते कज्जल—जनितविकारत्वं नीलिमा च। अतएव तत्समानाधिकरणे'—ति लक्षणवाक्यघटकीभूतं 'तत्'—पदमत्र संगतार्थकं जायेत। विषयिमात्रं हि तत्र तदः परामर्शविषयः। कज्जलं हि नीलिमसमानाधिकरणतयैवात्र प्रयुक्तम्, नीलिम्नो विषयित्वाभावे कज्जलस्य 'तत्समानाधिकरणधर्म'—ता किमिव संजाघटीतु। यदि वा स्वाभाविके नीलिमनि कज्जलहेतुकत्वरूपस्य धर्मस्योत्प्रेक्ष्यमाणताकल्पनेन गवेषणीयोऽत्र निर्वाहः।

ततश्च सिद्धमत्र हेतुफलयोरेवोत्प्रेक्ष्यमाणत्वं, सिद्धं च तयोरेव विषयित्वम्। नास्ति चानयोर्विषयाभ्यामैकात्म्यरूपः संसर्गः, ततो न ह्येव सम्भवत्युत्प्रेक्षाया अस्या धर्म्युत्प्रेक्षात्वम्।

यद्युच्येत—यत्र हेतूत्प्रेक्षा फलोत्प्रेक्षा च मन्यते तत्र उत्प्रेक्षान्तरमपि तिष्ठति, तत्र हि तादात्म्यं तदितरं च संसर्गजातं गवेषणीयम्। ततश्च तादात्म्यजनिते धर्म्युत्प्रेक्षात्वसौधे हेतुफलोत्प्रेक्षावैजयन्तीराविभाव्य विषयैक्येण धर्म्युत्प्रेक्षाहेतुफलोत्प्रेक्षोभयत्वमाविकल्प्य परिह्रियेत विरोधः संसाध्येत च समन्वय' इति।

एतदप्यपेशलम्, उदाहरणविरोधात्। पण्डितराजो हि पूर्वं (धर्मि—) स्वरूपोत्प्रेक्षां भावाभावाभ्यामुदाहरति। तदनन्तरं हेतूत्प्रेक्षां ततः फलोत्प्रेक्षां तदुत्तरं च धर्मस्वरूपोत्प्रेक्षाम्। क्रमस्यास्य का नु संगतिः, यदि हेतुफलान्यतरोत्प्रेक्षयोर्धर्मिधर्मोभयगतत्वमूरीक्रियते। तथा सति तेन वाच्यत्व—गम्यत्व—भावाभावैश्चातुर्विध्यमापन्नानि स्वरूप—हेतु—फलानि धर्मि—धर्म—गतत्वेन वर्गद्वये संविभज्य प्रतिवर्ग द्वादश भेदाः क्रमेणैकैकशो निरूपणीयाः। न च ते तेन तथा निरूपिताः। नापि च तत्पूर्ववंश्यैरप्यय—

दीक्षितसर्वस्वकारादिभिरपि। कुवलयानन्देऽप्पयदीक्षितः षोढात्वमेवोत्प्रेक्षाया एवमुपकल्पयति—

'अन्यधर्मसम्बन्धनिमित्तेनान्यस्यान्यतादात्म्यम् उत्प्रेक्षा। सा च वस्तुहेतु—फलात्मतागोचरत्वेन त्रिविधा। अहेतोर्हेतुभावेन, अफलस्य फलत्वेनोत्प्रेक्षा हेतूत्प्रेक्षा फलोत्प्रेक्षा चोच्यते। तत्र आद्या (वस्तूत्प्रेक्षा) स्वरूपोत्प्रेक्षा उक्तविषयाऽनुक्तविषया चेति द्विविधा, परे हेतुफलोत्प्रेक्षे सिद्धविषयाऽसिद्धविषया चेति प्रत्येकं द्विविधे।' इति।

यत्राप्यसौ मतान्तरमुपस्थापयति तत्रापि धर्मधर्म्युत्प्रेक्षात्वं स्वरूपोत्प्रेक्षागतत्वेनैव। यथा चेदं तत् तस्यैव—

केचित्तु—(लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभ' इत्यत्र) तमोनभसोर्विषय— योस्तत्कर्तृलेपनवर्षणस्वरूपधर्मोत्प्रेक्षेत्याहुः। तन्मते स्वरूपोत्प्रेक्षायां धर्म्युत्प्रेक्षा धर्मोत्प्रेक्षा चेति द्वैविध्यं द्रष्टव्यम्।'

इत्यमुना वाक्सन्दर्भेण स्पष्टम्। दत्तानि च तेन सर्वेषामेतेषां भेदानां तथैवोदाहरणानि। सर्वस्वे ९६ भेदाः प्रतिपाद्यन्ते। तथापि नास्ति तत्र धर्म्युत्प्रेक्षाया हेतुफलगतत्वेन विभागः। ९६ भेदेषु स्वयं ग्रन्थकृतैव कल्पनामात्रप्रसूतस्य— 'असावुत्प्रेक्षायाः कक्ष्याविभागः प्रचुरतया स्थितोऽपि लक्ष्ये दुरवधारत्वादिह न प्रपञ्चितः'— इत्येवं स्वकण्ठेनैवाररीकृतत्वात्।


तदित्थं सुदुर्लभमेव धर्म्युत्प्रेक्षात्वसामानाधिकरण्येन हेतुफलो—त्प्रेक्षात्वगवेषणम्।

वस्तुतस्तु प्राचामाचार्याणां भेदनामकरणवर्त्तनीमुपजीव्यात्र विचारणीयम्। ते हि विशिष्टाय नामविशेषं दत्त्वा सामान्येभ्यः 'शुद्धाऽऽ'दिपदानि प्रयुञ्जते। तथाहि रूपक—लक्षणादिभेदेषु तेषां प्रवृत्तिः। रूपके हि मालाश्लिष्टत्वेन भेदान् गणयित्वा पश्चात् शुद्धत्वेन भेदान् गणयति। लक्षणायामपि मम्मटाचार्यः—


**स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।**
**उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥**

**सारोपान्या नु यत्रोक्तौ विषयी विषयस्तथा ।**
**विषय्यन्तकृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ।।**
**भेदाविमौ च सादृश्यात् सम्बन्धान्तरतस्तथा ।**
**गौणौ शुद्धौ च विज्ञेयौ लक्षणा तेन षड्विधा ।।**

एवं गौणीत्वं पृथगुद्दिश्यावशिष्टेभ्यः शुद्धेति संज्ञानमुपहरति। एवमेव प्रकृतेऽपि पण्डितराजः हेतुफलत्वेन धर्मोत्प्रेक्षां पृथग् गणयित्वा तद्भिन्नत्वेन स्थिराणां भेदानां 'स्वरूप'—संज्ञापदत्वमाकलयति। अस्ति च तदप्ययदीक्षित—स्याप्यभिभतम्। यथा—चैतत् तत् पूर्वोक्तेन तद्वाक्यांशेन प्रमाणितमेव। ततश्च पण्डितराजमतेन—




इत्येवम्,




इत्येवं वोत्प्रेक्षां चतुष्ट्वमापाद्य वाच्यप्रतीयमानत्वेन द्वैविध्यं चापय्याष्ट—विधामेव केवलां मन्यामहे। नागेशोपन्यस्तं द्वादशविधत्वं तु केवलमलङ्कार—सर्वस्वानुकरणभ्रंशमूलमुत्प्रेक्षामहे।।

◈

## भारतीया व्याख्यापद्धतिः

(अनुमान—विधिना)

व्याख्याया मुख्यो निकषः क इति प्रश्ने सर्वपथीनमुत्तरमेकमेव 'संवाद' इति। संवादो नाम हृदयसंवादः। अनुभूतेः सादृश्यं तत्र स्वरसः। कोऽर्थः? अयम् यत् यदभिप्रेत्य प्रवर्त्तिता भगवती वाक् वक्त्रा तस्य वाचि प्रतिच्छन्दनम्, वाचा प्रतिफलितस्य चास्य सहृदये तथैव प्रतिबिम्बनम्। भूयानेव विचारः संवादे तेषां तेषामभियुक्तानाम्। तथा चानन्दवर्धनः—
संवादो ह्यन्यसादृश्यं तत् पुनः प्रतिबिम्बवत्।
आलेख्याकारवत्
तुल्यदेहिवच्च शरीरिणाम्"[1] इति।

**तत्र पूर्वमनन्यात्म तुच्छात्म तदनन्तरम् ।**
**तृतीयं तु प्रसिद्धात्म स्वं काव्यं न त्यजेत् कविः ।।[2] इति,**

**आत्मनोऽन्यस्य सद्भावे पूर्वस्थित्यनुयाय्यपि ।**
**वस्तु भातितरां तन्व्याः शशिच्छायमिवाननम् ।।[3] इति च।**

राजशेखरोऽमुमेवार्थं काव्यमीमांसाया द्वादशेऽध्याय एवमुपनिबबन्ध—

त्रिपथमर्थमध्यगीष्महि यदुतान्ययोनिर्निह्नुतयोनिरयोनिश्च। तत्रान्ययो—निर्द्विधा प्रतिबिम्बकल्प आलेख्यप्रख्यश्च। निह्नुतयोनिरपि द्विधा तुल्यदेहितुल्यः परपुरप्रवेशसदृशश्च। अयोनिः पुनरेक एव। तत्र—

१. ध्वन्यालोके ४.१२

२. मुद्रितस्तु पाठः—'नान्यसाम्यं त्यजेत् कवि'—रिति। ध्वन्यालोके ४.१३

३. ध्वन्यालोके ४.१४

**अर्थः स एव सर्वो वाक्यान्तरविरचना परं यत्र ।**
**तदपरमार्थविभेदं काव्यं प्रतिबिम्बकल्पं स्यात् ॥**

**कियतापि यत्र संस्कारकर्मणा वस्तु भिन्नवद् भाति ।**
**तत् कथितमर्थचतुरैरालेख्यप्रख्यमिति काव्यम् ॥**

**विषयस्य यत्र भेदेऽप्यभेदबुद्धिर्नितान्तसादृश्यात् ।**
**तत् तुल्यदेहितुल्यं काव्यं बध्ननिन्त सुधियोऽपि ॥**

**मूलैक्यं यत्र भवेत् परिकरबन्धस्तु दूरतोऽनेकः ।**
**तत् परपुरप्रवेशप्रतिमं काव्यं सुकविभाव्यम् ॥**[१]

एवं हि वक्ता, वचनं, प्रतिपत्ता चेति यत् त्रितयमेतदेव क्रीडास्थलं संवादस्य। अत्र प्रश्नाः—यस्य वचनस्य वक्ता न ज्ञायते तत्र कथंकारमुपपद्येत वक्तृ—वचन—योः संवादः। वेदसंहिता हि अपौरुषेय्यः, न श्रूयते तत्र मन्त्राणां वक्ता। योऽपि श्रूयते तस्यापि तत्राऽनुपस्थितावेव सचेतसां दृष्टपरावराणां च सुमेधसां बहुमानः। एवं च सति वेदमन्त्राध्येतॄणां हृदयस्य संवादः केन वा स्वीक्रियेत। यदि च मन्त्रशब्दैरेव निष्ठूता येऽर्थास्तेषामेषां सहृदयानां हृदयानां हृदि यथावदवभासनमेवाऽत्र संवादरूपेण गृह्येत, तर्हि कीदृशो नु क्षेमस्तेषां मन्त्राणां येषां नास्ति निश्चितार्थता, यथा, 'सृण्येव जर्फरी तुर्फरी तु' इत्येतस्य मन्त्रस्य। ये च निगममन्त्रा यथा 'चत्वारि शृङ्गा' इत्यादयस्तेषामनिश्चितार्थकत्वे केन वार्थेन निर्धार्येत संवादः?

ये च प्रतिपत्तारस्तेषामपि भवति बहुविधत्वम्। उपनिषत्सु नैका उपलभ्यन्ते गाथा यत्रैकस्यैवाक्षरस्य श्रोतृभेदेन भिन्नार्थता दृश्यते। तथाहि 'हृदय'—मिति यत् पदमस्यैकस्यापि ते तेऽर्थाः। तथाहि 'हृ' इत्यस्याक्षरस्यैकोऽर्थः, 'द' इत्यस्याक्षरस्य तथैव कश्चिदेक एवार्थो

---

१. काव्यमीमांसा—१२

निर्धार्यते, एक एवार्थश्च 'यम्' इत्येतस्यांशस्य। एवमर्थत्रयात्मकत्वं भवति वर्णसमुदायविशेषस्य। ततश्चापद्यतेतरामनिश्चितार्थत्वमेषां व्याहाराणाम्। उपनिषत्स्वेव 'द' इत्येतस्यैकस्याप्यक्षरस्य 'दानम्, दया' चेति भिन्नभिन्ना अर्थाः। तत्रापि व्याख्यातुरपि विकल्पकवलितत्वमीक्ष्यते येनासौ 'यद्वे'—ति पक्षान्तरमप्युपस्थापयति। भगवत्पादे शङ्कराचार्य इव तान्त्रिकशिरोमणा—वभिनवगुप्ते, सायणादिषु च सोऽयं विकल्पग्रहः स्पष्टतर एव।

यस्य मूलमनिश्चितं तस्यांशस्य पुनः संपादनमावश्यकं भवति। रघुवंशस्यैव 'अव्याहतः स्वैरगतेः' इत्यस्य पाठस्य स्थाने प्रकाशितमस्ति 'अव्याहतैःस्वैरगतैरि'ति पाठः। ब्राह्मीलिपावेकारौकारमात्रयोरुकाराकारमात्रयोश्च लेखे साम्यमेव लभ्यते, तथैव ञकारचकारयोरिव शकारवकारयोर्लिपावपि। ततश्च 'शौर्यं चापदचेष्टितमि'—ति यो भावस्तस्यास्य 'शौर्यं श्वापदचेष्टितमि'—ति रूपेण जायते परिणामः, जायते च परिणामः 'त्यजति गुरुनितम्बा निम्नमध्यावशा ना' इत्यस्य 'त्यजति गुरुनितम्बा निम्नमध्यावसाना' इति। वामनस्य काव्यालङ्कारसूत्रे 'ओजःप्रसादयोः संप्लवे' गुणत्वमीक्ष्यते। तत्र सूत्रपाठः—'गाढबन्धत्वमोजः (३.१.५), शैथिल्यं प्रसादः (३.१.६) गुणः संप्लवात् (३.१.७)' इति। इतः परं मुद्रितेषु पुस्तकेषु सूत्रपाठेऽपि भेदः। तथाहि 'अग्रिमं सूत्रं क्वचित् 'न शुद्ध' इति, क्वचित् पुनः 'सत्वनुभवसिद्ध' इति (३.१.८)। समाधिसूत्रेऽपि स्थितिरीदृश्येव। तत्र सूत्राणि आरोहावरोहक्रमः समाधिः (३.१.१२),

न पृथक् आरोहावरोहयोरोजःप्रसादरूपत्वात् (३.१.१३), न, असंपृक्तत्वात् (३.१.१४)

अत्र असंपृक्तत्वादित्यस्य स्थाने विपरीतार्थक एव पाठः—'संपृक्तत्वादि'—ति। अत्र कामधेनुः संपृक्तत्वादित्येव पाठमाद्रियते। निर्णयसागरीये संस्करणे पुनः 'असंपृक्तत्वादि'—त्येव पाठः। किमत्र प्रतिपत्तव्यम्?

अथ यत्र प्रतिपाद्यस्यार्थस्य प्रहेलिकाप्रायत्वं तत्र कुतः संवादसंभवः?

बृहत्यारण्यके हि 'अश्वमेधो' व्याख्यायते। तथाहि 'उषा वा अश्वस्य मेध्यस्य शिरः, सूर्यश्चक्षुः, वातः प्राणः, व्यात्तमग्निर्वैश्वानरः, संवत्सर आत्माश्वस्य मेध्यस्य। द्यौः पृष्ठम्, अन्तरिक्षमुदरम्, पृथिवी पाजस्यम्, दिशः पार्श्वे, अवान्तरदिशः पर्शवः, ऋतवोऽङ्गानि, मासाश्चाऽर्धमासाश्च पर्वाणि, अहोरात्राणि प्रतिष्ठा, नक्षत्राण्यस्थीनि, नभो मांसानि। ऊवध्यं सिकताः, सिन्धवो गुदा, यकृच्च क्लोमानश्च पर्वताः, ओषधयश्च वनस्पतयश्च लोमानि, उद्यन् पूर्वार्धः, निम्लोचञ्जघनार्धः, यद् विजृम्भते तद् विद्योतते, यद् विधूनुते तत् स्तनयति, यन्मेहति तद्वर्षति, वागेवास्य वाक्।।' इत्येवमत्राश्वो निरूप्यते। अयमश्वः प्रजापतिरूपः। तत्राऽत्र दृष्टान्तः 'प्रतिमायां विष्णुत्वमिवे'–ति। अस्य व्याख्याने भगवान् शङ्कराचार्यः 'व्यात्तम् विवृतं मुखम्, पाजस्यं पादस्यं, पाजस्यमिति वर्णव्यत्ययेन पादासनस्थानमित्यर्थः, पर्शवः पार्श्वास्थीनि, नभो नभःस्था मेघाः। ऊवध्यम् उदरस्थमर्धजीर्णमन्नम्, विजृम्भते गात्राणि विनामयति, मेहति मूत्रति, वर्षति सिञ्चती'–ति निपुणं व्यापिपर्त्ति। काव्यशास्त्रे वाक्यानामेषां रूपकालङ्कारवाक्यत्वेन क्रियतेतरामादरः। रूपकं च सादृश्यं साधर्म्यं वाऽऽरोपाय साधनीकरोति। दर्शयन्त्याचार्या इमे तदुभयमपि– द्यौः पृष्ठमूर्ध्वत्वसामान्यात्, अन्तरिक्षमुदरं सुषिरत्वसामान्यात्, अङ्गानि अङ्गसाधर्म्यात्। सन्धयः संधिसामान्यात्, अस्थीनि शुक्लत्वसामान्यात्, सिन्धवः स्यन्दनसामान्यात्, पर्वताः काठिन्यादुच्छ्रितत्वाच्चे'–ति।

याऽस्माकं वार्त्तानाम्नी विद्या तस्याः कृते क्रियन्तेतरां भूयांसि यजनानि। ब्रह्मवादे तेषामेषामापाद्यते निरर्थकत्वमिति समुत्पद्यते शाश्वतिको विरोधो दृष्टेनादृष्टस्य। बृहदारण्यकारम्भे स एष विरोधो विस्तरेणोपस्थापितो भगवत्पादैः–'ग्रामकामो यजेत, पशुकामो यजेत, स्वर्गकामो यजेते–'ति यानि ब्रह्मव्यतिरिक्तफलानि निगमवचनानि तेषां 'ब्रह्म सत्यं जगन्मिथ्ये'–ति जगन्मिथ्यात्वप्रतिपादकैर्निगमवचनैः सहोपस्थितो विरोधः परिजिहीर्षितो

भगवत्पादैर्बंहीयसा भाष्यवितस्तरेण बृहदारण्यक एव।

विचित्रमेवेदं यद् भगवत्पादा अपि बृहदारण्यकभाष्ये भाष्यान्त–राण्युद्धृत्य प्रत्यादिशन्ति। तथाहि द्वितीयारण्यकारम्भ एवोच्यत एतैः—'औपनिषदंमन्या अपि केचित् प्रक्रियां रचयन्ति तत्र च तार्किकैः सह सन्धिं कुर्वन्ति, ततस्त्रस्यन्तः सांख्यमाश्रयन्ति, वैशेषिकं च ततः। सर्वमेतत् कल्पनामात्ररमणीयमुपनिषद्विरुद्धं चे—'ति प्रस्तुवन्ति च ससंरम्भमेतेषां प्रत्याख्यानम्। तत्रैतेषां तर्काणां निष्कर्षः—'श्रुत्यर्थकल्पनाकुशला सर्व एवौपनिषदमर्थमन्यथा कुर्वन्ति' इति। (पृ० १३५ बृहदा०) स्पष्टमेतेन यद् व्याख्याया अप्रामाणिका अपि प्रकारा भारतीयायां मनीषायामस्तित्वं बिभराम्बभूवुः। तेष्वप्यनुदासीना अतिष्ठन् विचारका इत्यप्यत एवोपन्यासात् स्पष्टमेव। अयमत्रापरः संज्ञानविषयो यत् सिद्धान्तत्वेन निर्धार्ये विषये परम्परायाः प्रथमं स्थानमिति। स्वैरत्वं स्वत एव कल्पनाजालविस्तारयितृत्वं यदत्र संप्रदायविदुषां सुदूरमेवाविषह्यम्। इदं त्वत्र स्पष्टमेव कल्पनामार्गोऽपि क्षुण्णचर एव व्याख्यातॄणाम्। अतएव नैषधादीनां टीकास्वपि विकल्पजातप्राचुर्यमालक्ष्यते—।

**सानन्तानाप्यतेजःसखनिखिलमरुत्पार्थिवान् दिष्टभाज–**
**श्चित्तेनाशाजुषस्तान् सममसमगुणान् मुञ्चती गूढभावा ।**
**पारेवाग्वर्त्तिरूपं पुरुषमनुचिदम्भोधिमेकं शुभाङ्गी**
**निश्शेषानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः ।।'**

इत्यादिषु तद्धि विकल्पजातं प्रतीतचरमेव। श्रीभागवतादीनां या वेदस्तुतय–स्तासामपि गूढभावत्वमस्त्येव सुतरां प्रसिद्धम्। रासपञ्चाध्याय्यां 'जगौ कलं वामदृशां मनोहरम्' इत्यत्र क्लींबीजं कल्पयन्ति, कल्पयन्ति च

**सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् ।**
**अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ।।**

इति रघुवंशपद्येऽपि तदेव ह्रींबीजम् उदारदृशो यद्धि सुगूढमुपक्षिप्तं श्रीश्रीहर्षेणैव—

**अवामावामार्धे सकलमुभयाकारघटनाद्**
**द्विधाभूतं रूपं भगवदभिधेयं भवति यत् ।**
**तदन्तर्मन्त्रं मे स्मरहरमयं सेन्दुममलं**
**निराकारं शश्वज्जप नरपते! सिध्यतु स ते ॥१४.८८॥**

इत्यस्मिन् तान्त्रिके रहस्यदिग्धे पद्यराजे। एवंविधस्यार्थस्य निश्चये व्याकरणकोषाद्यपेक्षया पारम्पर्यस्यैव भवति प्रधानत्वम्, शब्दतः अर्थस्य कल्पनायां क्रियमाणायां भवेदत्र सिन्धुलिपिसदृशीकदर्थना। न च भवत्यत्राऽप्रतीतत्वं दोषः, कवितुः प्रतिभायास्तत्रैव संरम्भात्। अतएवोपनिषदां रहस्य—लेखानामभ्यनुमोदनम्, तत्र 'पश्यकस्य कश्यपत्वेन परिवर्त्तना प्रतीतचरैव, प्रतीतचरैव च प्रतिज्ञा वैदिकानां 'परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष' इति। वक्तृप्रतिपत्त्रोरत्र दुर्घट एव मतिसंवादः। अथ विधेर्वाच्यत्वे प्रतीयमानस्य निषेधादेः कथं न्वनुभवः। ततश्च कीदृशी नन्वनुभूति—'भ्रम धार्मिके'—त्यादिषु प्राथमिकस्य पार्यन्तिकस्य च पदार्थसार्थस्य। ध्वनिवादिनस्तत्रातिरिक्तं व्यञ्जनाख्यं शब्दव्यापारमुपयन्ति, अपरे पुनरनुमितिम्। अपरेषु प्रमुखो व्यक्तिविवेकविधाता महामतिर्महिमाचार्यः। स हि प्रतिपद्यते—'भम धम्मिअ' अत्र हि द्वावर्थौ वाच्यप्रतीयमानौ विधि—निषेधात्मकौ क्रमेण प्रतीतिपथमवतरतः, तयोर्धूमाग्न्योरिव साध्य—साधनभावेनाऽवस्थानात्। तत्राद्यस्तावदविवेकसिद्ध एव भ्रमणविधिलक्षणस्य साध्यस्य तत्परिपन्थि—क्रूर—कुक्कुर—मारणात्मनः साधनस्य चोपादानात्। द्वितीयस्त्वत एव हेतोः पर्यालोचितणिजर्थस्य विवेकिनः प्रतिपत्तुः प्रयोजकस्वरूपनिरूपणेन सामर्थ्यात् प्रतीतिपथमवतरति। तच्च सामर्थ्यं मृतेऽपि कौलेयके क्रूरतरस्य सत्त्वान्तरस्य तत्र सद्भावावेदनं नाम नापरम्।

तदेव च साधनम्। तयोश्च साध्यसाधनयोरविनाभावनियमो विरोधमूलः। स चानयोर्लोकप्रमाणसिद्धः।' इति, 'बाध्यबाधकभावाऽवसायकृत एवाऽत्रोत्तरार्थ–विश्रान्तिनियमः। तत्र 'मम धम्मिअ वीसद्धो' इति वाक्यार्थरूपो भ्रमण–विधिर्वाच्यः, तस्य 'सो सुणओ अज्ज मारिदो देण' इत्यादिना कुक्कुरमारणं दृप्तसिंहविहितं वाक्यार्थरूपमेवार्थो हेतुः। तत्प्रतिषेधस्त्वनुमेय एव, न वाच्यः तस्य केवलेनाक्षेपेणैव लाभात्। अत्र 'गोलाणईकच्छकुडङ्ग—वासिणा' इति गोदावरीकच्छकुहरस्य पक्षत्वनिर्देशः, 'दरिअसीहेणे'—ति दृप्तसिंहसद्भावस्य हेतुभावः। कुडङ्गवासिणे—ति तद्विशेषणेन तस्य धर्मिणि सद्भावोपादानम्। तस्यास्य हेतोः साध्यस्य च सहानवस्थानलक्षणो विरोधः प्रसिद्ध एव। एवमेकस्य सद्भावावेदनेनाऽपरस्य स्वभावविरुद्धोपलब्ध्या प्रतिषेधो विज्ञायमानोऽनुमेय एव न व्यङ्ग्य इतयवसेयं यथा नाऽत्र शीतस्पर्शो वह्नेरित्यतः शीतस्पर्शः। यदि वा प्रेक्षावतां प्रवृत्तिरनर्थसंशयाभावनिश्चयेन व्याप्ता, तद्विरुद्धश्चानर्थसंशयोऽस्माद् विधिवाक्याण्णिजर्थपर्यालोचन–याऽवसीयत इति व्यापकविरुद्धोपलब्ध्या, यथा नाऽत्र तुषारस्पर्शो वह्नेरित्यतस्तुषारस्पर्शस्ये–'ति (व्यक्तिविवेकस्य तृतीये विमर्शे पृ० ४६३–४६६) तात्पर्यवादिनां पुनरत्राप्रतिहत एव तात्पर्यशक्तेः प्रसरः।

प्रतीयमानपदे या प्रतीतिस्तस्या अस्या द्विविधेष्वर्थेषु प्रसरः, ज्ञानविषयमात्रेषु समास्वाद्यमानेषु च। उच्यतेहि 'प्रतीयते धातुरिवेहितं फलैरिति। अत्र प्रतीतिर्ज्ञप्तिमात्ररूपैव। रत्यादिषु पुनर्भावेषु सैषा स्वादरूपा। अत्र 'रतिः प्रतीयते' इत्युक्तौ स्वाद एव प्रतीतिः। अयमत्र विशेषो यदनयोर्द्वयोप्येकत्र संप्लवः, विभावादिसामग्र्या ज्ञायमानाया रतेरेव पश्चात् साक्षिभास्यता प्रसिद्धैव रसगङ्गाधरादिषु। अत्र रतेरास्वादस्यापि संग्रहः। इयमेव भाट्टनायकानां भुक्तिः। इमं रत्यादिभावानामास्वादं यावदनुभूतेर्या परिव्याप्तिरसौ प्रतीयमानकोटिमेवाऽवगाहते, भवति च विषयोऽनुमितेः। अन्येष्वप्युक्तिशतेष्वियमेव स्थितिः प्रतीयमानस्यार्थान्तरस्य। सर्वत्रैवैक–

स्याऽनुमानस्यैव प्रसरः।

इदमत्राऽवधानेन प्रतिपत्तव्यं यद् यस्यानुमानस्याऽत्र चर्चा तद्धि तादृशमेव यादृशं खलु स्वीकृतचरं 'पर्वतो धूमवान् वह्नेः' इत्यादिषु स्थलेषु। हेत्वाभासस्यैव तत्र साम्राज्यम्। तथापि प्रयोगस्याऽनुमानविषयत्वमेव। अयमर्थो—'यन्न भवति प्रमाणरूपमेवैकमनु— मानमनुमानपदवाच्यम्, यद्धि हेत्वाभासाश्रितं तदप्यनुमानत्वव्याप्यजातिमत्त्वेनाद्रियतेतरां सांप्रदायिकैः। तदेव तु महिमभट्टादीनामनुमानत्वेनार्थान्तरप्रतीत्यर्थमभिप्रेतं साधनत्वेन। ततश्च व्याहतं वचो यद् 'भीरुरपि गुरोः प्रभोर्वा निदेशेन भयकारणाधिकरणे भ्रमिमान् संभवती'ति। विषयान्तरेऽपीयमेव स्थितिः, इयमेव पदार्थयोजना, इयमेव चानुमितिपरिणतिः। या च प्रतीती रसादीनां स्वादशबलितायां तस्यामनुमानं प्रत्यक्षं चेति प्रमाणद्वयस्य मूलत्वम्। तत्र रतिज्ञानं यावदनुमितिः, ततः परं तु साक्षात्कारभोगाद्यपरपदप्रत्येय आस्वाद एव प्रत्यक्षरूपः। सोऽयं सोपानरूपः प्रतीतिद्वयसंप्लवः।

तिष्ठति हि जागरूका कवेः प्रज्ञा तर्केष्वपि। अत एव काव्यलिङ्गादीनामलङ्कारत्वं निर्हेतुत्वादीनां च दोषत्वम्। एवं हि यदुच्यते 'सर्व एव हि शाब्दो व्यवहारः साध्यसाधनभावगर्भतया प्रायेणानुमान— रूपोऽभ्युपगन्तव्यः, तस्य परप्रवृत्तिनिवृत्तिनिबन्धनत्वादि'—ति (व्यक्तिविवेकारम्भे २६—२७ पृष्ठयोः) तदक्षरशः परिशुद्धमेव।

विस्तरं विसृज्याऽत्रेदमेव पर्याप्तं वक्तुं यद् भारतीयायां व्याख्यापद्धतौ वक्तृप्रतिपत्तृसंवादः प्रथमः परमश्च तात्पर्यार्थलाभ इति। अत्रैव वक्तृतद्वचन— व्यापारयोरन्विताभिधानम्, वचनप्रतिपत्रोश्चाभिहितान्वयः पदं लभ्येते।

क्रमेऽस्मिन् गुणाः, दोषाः, अलङ्काराः, रीतिवृत्तिप्रभृतयश्च निपुणं निरूप्यन्ते, निरूप्यन्ते च शय्या पाकादयो बन्धगता विशेषाः। व्याख्यातारो हि दर्शयन्तितरामात्मनो वैविध्यम्। तथा च कथंभूतिनः, अकथंभूतिनः,

मितवाचः, उच्छलद्गतिकसरस्वतीका इति। तेष्वेवैके संमर्शिनोऽलूक्षाश्च। तेषामेषां पारस्परिको भेदः स्फुटतर एव। तत्राऽत्र सर्वत्र यद्यपि न लभामहे कुन्तकतुल्यां विदग्धतां, मल्लिनाथतुल्यां अनपेक्षितार्थपरित्यागसमेधिताम–पेक्षितार्थोक्तिम् अभिनवगुप्त–सदृशीं शेमुषीमसृणतां, शङ्करभगवत्पादतुल्यां च प्रामाणिकतां तथापि नास्ति तत्र न समृद्धिः बलात्कारा अप्यासु विभाव्यन्ते तेषां समाधयश्चापि। सर्वथा

व्याख्याविधासु भरतावनिलालितासु
लालित्यमस्ति निबिडं निभृतं च तासाम्–
को नाम कात्स्न्र्यमुपवर्णयितुं क्षमेत
यो नास्ति भारवहने धरणेः समर्थः ।।

◈

## भरतनाट्यशास्त्रादिसम्पादनविधिः पाठसमीक्षा च

नाट्यमिति पदं ण्यति नटेर्निष्पद्यते। नटिश्चात्र अवस्पन्दनम्, अनुकरणम्, नर्त्तनमित्येतदर्थत्रितयमपि क्रोडीकरोति। वस्तुतस्तु अवस्पन्दनमेवास्य मुख्योऽर्थः। अनुकरण—नर्तनयोस्तद्व्याप्यजाति—कत्वेनानुभूयमानत्वात्। अवस्पन्दनं चात्र किञ्चिच्चलनरूपमिति धनिकः, नाट्यरूपमेवेत्यन्ये। तत्र प्रलयप्रकृतौ क्षोभ इव परमस्वतन्त्रे भगवति परमशिवे सिसृक्षादिस्वरूपो यः कश्चित् प्रपञ्च—बीजोच्छूनताभूतः स्पन्दः स एव वस्तुभूतः स्पन्दः। स एव चावस्पन्दः। वाक्यार्थ इव पदार्थानां, स्फोट इव वर्णपदानां, सरस्वानिव ऊर्मीणां स एव हि मूलकन्दः। समेषामपि गमनादिस्पन्दानाम्। एवं च यदेव अनुकरणं यदेव च नर्त्तनं तदेव हि अवस्पन्दम्। सामान्य—विशेषयोर्भेदस्य प्रातिभत्वमात्रमिति सर्वैरपि वादिभिः संप्रतिपन्नत्वात्।

ततश्च यदेवावस्पन्दनं चित्रात्मनाऽऽलेख्ये चित्ररूपतां प्रतिपद्यते, यदेवोत्कीर्णनात्मना मूर्त्तितां, यदेव संनिवेशात्मना भवनतां, यदेव च रागालापादिना संगीततां, तदेवानुकरणात्मना नाट्यात्मतामेति। अयं पुनरत्र विशेषो यद् अनुकरणे सर्वविधोऽपि अवस्पन्दो विलीयते। ततश्च चित्र—मूर्त्ति—भवन—संगीतानामपि विश्वप्रपञ्चस्येव नाट्य—विषयत्वमुपपद्यते। एवं च यदिदं नाट्यं नाम स खलु समाहारः सर्वासामपि कलानां, प्रत्याहारश्च कृत्स्नस्यापि विश्वप्रपञ्चस्य। तदिदं नाट्यमाश्रित्य भरतमुनिना यन्नाट्यशास्त्रं निर्मित्सितं तद्धि न केवलमनुकरणरूपमेवावस्पन्दनमधिकरोति विषयत्वेन, प्रत्युत सर्वा अपि नृत्यादिकाः कलाः। तस्यैव हि क्षेत्रं प्रतिमालक्षणं, तस्यैव हि विषयश्चित्रसूत्रम्, तस्यैव चाधिकरणं स्थापत्यम्।

लोकस्वभावस्तु प्राणभूत एवास्य। यावन्ति च शास्त्राणि तान्यपि स्वाङ्गत्वेनात्मसात् करोत्येतत्। अत एवास्य वेद इत्यपरं नाम नाट्यवेद इति। एवं नासावेको ग्रन्थ:, अपितु संहितारूपो ग्रन्थानामाकर:। एवं च नासावेक: संकाय:, किन्तु संपूर्ण एवैको विश्वविद्यालय:। अस्य नायमभिप्रायो यन्नाट्यशास्त्रं संग्रहग्रन्थमात्रमिति, अपितु इदं शास्त्रं महान् न्यग्रोधपादप:, यतो निस्सृता वरोहा: स्वातन्त्र्येणापि वृक्षायितुं क्षमन्ते, नास्ति येषामन्त:। मेघा इव तानि तानि लक्षणग्रन्थरत्नानि तमिमम्भोनिधिमिवोपाजीवन् भारतस्य संपूर्णायामपि प्रवितातायां स्थलवेद्याम्। आसीदस्य कश्मीरानादाय दक्षिणाब्धिं यावन् महीयानेव प्रचार:। अभिनवगुप्तस्तस्मिन्नस्मिन् महापोतमिव सर्वंसहविमर्शमभिनवभारतीनामकं महाभाष्यं निरमात्। तत: पूर्वमपि आनन्दवर्धनप्रभृतयो महामतयो भरतनाट्यशास्त्रमिदं प्रधानं लक्षणग्रन्थ इत्याद्रियन्त।

प्रचुरप्रचारस्यास्य नाट्यशास्त्रस्य महाविषयतया तं तमेकं विषयमादाय भूयसो ग्रन्थानुपनिबबन्धुर्भोजराजप्रभृतय: सुमेधस:। त इमे लक्षणकृतोऽभिनवभारतीमपि प्राकाम्येनानुसस्रु:। एवं च नितान्त: प्राचीन एष महाग्रन्थ: महान्तमेव प्रथिमानमापद् गच्छता कालेन। पाठोऽप्यस्य पाठान्तरैरिव परिवर्त्तनशतैर्न्यगीर्यत। न केवलं पदान्येव, वाक्यानि, अध्याया अपि अस्य पर्यवर्त्तन्त। नूतना अध्याया अत्रायोज्यन्त, नूतनानि लक्षणवाक्यानि चात्र संन्यवेश्यन्त। एतेन नूतन–योगेन पुरातन–परिवर्त्तनपारम्पर्येण च शास्त्रस्यास्य रूपं भगवतो विष्णो रूपमिवान–वधारणीयत्वमापेदे। साम्प्रतं खलु महीयानेष विवादविषय:। तत्रात्र विचार: कथं वासौ भूय: संस्क्रियेतेति। तत्र संपादनं द्विविधं भूयोलेखसमादृते पाठे मूलत्वबुद्धिपरायणमेकम्, अर्थसंगतिप्रमाणकं चापरम्। अत्र प्रथमे पाश्चात्त्या: सबहुमाना:, अपरस्मिन् पुनर्भारतीया:। तत्र भरतनाट्यशास्त्रस्य तदीयाया अभिनवभारत्याश्च कतर: स्यात् संपादनविधिरिति ह्यत्र प्रमुख:

प्रश्नः। अत्र विचारयामः।

पाश्चात्त्ये संपादनविधौ बहुसंख्याक–हस्तलेखसमादृतत्वमेव मूलत्वस्यानुमापकम्। कालिदाससाहित्यसंपादनप्रसङ्गे असकृदनुभूतं यत् सोऽयं विधिः न समग्रभरसहः। 'तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो'–रित्यस्य मेघदूतपद्यस्य कौतुकपदं बहुसंख्याकेषु समुद्धरणेषु 'केतक'–पदतया प्रसिद्धम्। तत्र हि 'तस्य स्थित्वा कथमपि पुरः केतकाधनहेतो'–रिति पाठे नास्ति प्रसङ्गसंगतिः। तथा हि मेघस्य विरहिजनदुर्निरीक्ष्यत्वमत्र मुख्यं प्रतिपाद्यम्। तदेव हि 'कथमपि'–ति पदाभ्यां व्यञ्जितम्। 'यक्षो विरही। अतः तस्य मेघस्य पुरः स काठिन्येन तस्थिवान्' इति ह्यत्र विवक्षितोऽर्थः। अत्र जिज्ञासा को नु दोषो मेघे येनासौ विरहिजनेषु दुर्निरीक्ष्य' इति। अत्र 'मेघो हि केतकाधानहेतुः, अतो दुर्निरीक्ष्य' इति वोत्तरमधिकं सङ्गतम् 'कौतुकाधानहेतुः' इति वा? नियतमेव पर एवात्र पक्षो ज्यायान्। अर्थसंगतिसमादरे बहुमतपक्षोऽत्र पराहन्यते। अस्ति चात्र रहस्यम्। तच्च लिपिभेदरूपम्। कालिदास–समये ब्राह्मीलिपिरेवासीद् अधिकृता लिपिः। तस्यामस्यां ब्राह्म्यां लिपौ 'ओकार–ऐकारयो' रेखाविन्यासो दूरमेकरूपः। अस्ति च केतकं वर्षा–पुष्पम्। ततो नास्ति नास्य संगतिः। अतः केतक–पद–घटितोऽपि पाठः परम्परया स्वीकृत एव। अर्थसंगतेश्चतुरस्रत्वं पुनः 'कौतुकपदघटित एव पाठे' दृश्यत इति स एवात्र मूलत्वेन स्वीक्रियेत। भरतनाट्यशास्त्रं खलु कालिदासादपि प्राचीनम्। तस्यारम्भकाले खरोष्ट्री लिपिरपि प्राप्तप्रचारा श्रूयते, का वार्त्ता ब्राह्मीलिपेः। अतो मूलनिर्धारणे ब्राह्मीलिपिपरिज्ञानमपि अभ्यर्हितमेव नाट्यशास्त्र–संपादनसमये। अन्या लिपयोप्यत्र ब्राह्मीवदेव दृढमभ्यस्याः। नेवारी–शारदा–वङ्ग–कर्णाट–लिपिषु अक्षररेखाविन्यासो न नास्ति भ्रामकः। तास्वप्येतासु लिखिता नाट्यशास्त्र–पाण्डुग्रन्थास्तत्र तत्र लभ्यन्ते। अर्थसंगतिमाधारीकृत्यैव समाधातुं शक्यन्ते लिपिभेदप्रश्नाः।

नाट्यशास्त्रसंपादने हि भारतीया पद्धतिरेव भृशमादरणीया। तामनुसृत्य पूर्वमर्थसंगतये यतनीयम्। तदर्थमारम्भतः समाप्तिं यावच्छास्त्रस्यास्य ते ते विषया दृढं निदिध्यासितव्याः। एतेन परिचीयेरन् भरतस्य प्रमेयाणि, तत्प्रतिपादकानि वाक्यानि च। ततश्च तान्याधारीकृत्य पाठा अपि शक्यमूलोत्प्रेक्षाः। इयमेव हि पद्धतिरभिनवभारत्या अपि संपादनाय भृशमुपकर्त्री। इयमपि भारती प्रविरलपाण्डुग्रन्था, अनवस्थितलेखा च दृश्यते। अस्या अपि उपक्रमादुपसंहारं यावद् अजस्रम् आवृत्तिरध्ययनाध्यापने च परममावश्यकानि।

अनया पद्धत्या नाट्यशास्त्रस्य ये ये खिलाध्यायास्तेऽपि तितउन्यायेन लब्धविवेका अमूलव्यवच्छेदपूर्वकं मूलं निर्धारयितुं क्षमेरन्। ये च केचन भिन्न—भिन्नतम—लक्षणवाक्यान्याश्रित्य प्रवर्त्तमाना अध्यायास्तेषां केषां खलु खिलत्वमिति प्रश्नोऽपि तितउन्यायेन प्रवृत्ते स्वाध्याये स्यादेव लब्धप्रशमः। असति समाधौ तु 'यत्रोभयोः समो दोष' इति शिष्टानामाचारमनु—पालयद्भिरुभयत्रापि मूलबुद्धिः क्रियेत, उत्प्रेक्ष्येत च भिन्नकर्त्तृकत्वमपि तेषाम्, तद्विषयत्वन्यायेन दर्शनस्य विषयस्य चाभेदे त्यज्यत एव कर्त्तृभेदो ग्रन्थभेदेऽपि। अत एव समेषामपि पुराणानामेक एव भगवान् व्यासो रचयिता, सर्वेषां महाभारतपर्वणामपि स एव निर्माता, अस्ति चाद्यापि जीवितः, व्यासपीठाद् भाषमाणानां कथावाचकानामद्यापि व्यासत्वेन प्रसिद्धेः।

नाट्यशास्त्रस्य ये विषयाः प्रमेयत्वेनाधिकृतास्तेषु साहित्यशास्त्रं संगीतशास्त्रं चेति शास्त्रद्वयं प्रमुखम्। मन्य आद्य एवासौ लक्षणग्रन्थो विषययोरनयोः। तत्र काव्यशास्त्रे शब्दः, अर्थः, वाक्यम्, प्रकरणं, प्रबन्ध इति पञ्चस्कन्धः, तत्रापि वाक्यात् प्रबन्धं यावद् भूयांसो धर्मा येषां काव्यलक्षणत्वेन प्रतीतिः। तथा च रसाः, भावाः, अलङ्काराः, गुणाः, लक्षणाख्यानि भूषणानि, रीतिवृत्तिप्रवृत्तयः, छन्दोविचितिभेदा इति भूयान् विस्तरः काव्यभाषागतानां तत्त्वानाम्। पाठ्यसमये नाट्यग्रन्थानामपि

काव्यत्वमेव। ततश्च दशरूपलक्षणान्यपि काव्यशास्त्रेणैवाधिक्रियन्ते। तदित्थं दृश्यश्रव्यत्वाभ्यां काव्यनाट्ययोः काव्यशास्त्रविषयत्वेन संग्रहे प्रविशालायते साहित्यशास्त्रीयं परीक्षा—क्षेत्रम्। तत्रापि स्वयमभिनवगुप्तस्यैवोद्गारो यद् दशरूपकलक्षणं नाम महाप्रपञ्चो विषयः। एतस्य सर्वस्यापि अङ्गोपाङ्गसाहित्येन सम्यगनुशीलनं प्रतिव्यक्ति दुष्करम्।

एवमेव संगीतशास्त्रमपि द्विस्कन्धं, गीतातोद्याभ्याम्। आतोद्यानि चतुर्विधानि, घनसुषिरततावनद्धत्वजातिभिः। तेष्वपि प्रतिजाति भूयांसः प्रभेदाः। गीतेष्वपि राग—स्वर—श्रुति—ग्राम—मूर्च्छनानां प्रत्येकं लोष्टसंचारन्यायेन प्रस्तारशश्च ध्वनिवदेव असंख्येया भेदाः। नृत्यस्यापि संगीतस्कन्धतया गणने पुनस्त्रिस्कन्धत्वमस्य। नृत्ये नाट्यस्यापि परिग्रहः समनन्तरोक्तेन क्रमेण। नाट्ये च चतुर्विधस्याभिनयस्य शिक्षा। वाचिके काकुविधानस्य, आङ्गिके चारीसहितानामङ्गहारकरणरेचकानां सूक्ष्मेक्षिकया निरूपणम्। तदित्थं संगीतशास्त्रमपि महाविषयमत्र। नाट्याय रङ्गपीठमावश्यकम्। ततश्च तस्यापि विधानं संगीत—साहित्यशास्त्रयोरेवाधिकरणम्। तदर्थं च प्रमाण—परिमाण—प्रविभाग—कुतप—प्रयोग—प्रेक्षा—नेपथ्यादीनां प्रवेशनिर्गमाभ्यां सह सुश्लिष्टं समायोजनमिति तस्यापि महाविषयत्वमेव। तत्रापि पूर्वरङ्गः, तिरस्करिणी, चित्रशुद्धौ प्रयोगविधी चेति महीयानेवाङ्गविस्तरः। एवमेव स्तम्भविधिः, भित्तिसंनिवेशः, द्वारप्रतिष्ठा, दीपिकायोगश्च तस्यास्य स्थापत्ये नदीष्णतामपेक्षन्ते। तदित्थं स्थापत्यशास्त्रम्, धर्मशास्त्रम्, ज्योतिषशास्त्रं चेति सर्वमत्र संगृहीतम्।

सन्ति च नाट्यशास्त्रे सर्वेषामेषां विषयाणां षट्त्रिंशता अध्यायैर्निरूपणम्। संपादनकाले यः सर्वज्ञो न भवति व्यामुह्यति स नियतमेव प्रमेयशुद्धौ। ततश्च प्रविभागेणात्र प्रवर्त्तितव्यं विद्वद्भिः। इतिहासशुद्ध्या परम्पराशुद्धिं साधयद्भिर्विद्वद्भिरेकैको विषयः संपादना—याधिकर्त्तव्यः। समये समये च गोष्ठीभिः परस्परं परामृश्य परिष्करणीयः

स्वकीयो भागः शास्त्रान्तरविद्वज्जनाधिगतार्थसंवादेन। एवं हि नाट्यशास्त्रमिदं विश्वकोषभूतत्वेन तत्तच्छास्त्रविशेषज्ञानां विदुषां समवायं संपादकत्वेनापेक्षते रामायणमहाभारतयोरिव। इयमेव कथाऽभिनवभारत्याः।

अत्रापि यत् काठिन्यं तत्र धर्मशास्त्रमिव नाट्यशास्त्रमपि 'आत्मनस्तुष्टिमपि' प्रमाणीकरोति। ततश्च उपलब्धां सामग्रीं समालोच्यापि सहृदयैः स्वात्मापि नियतमेव निपुणमेव च प्रमाणीकरणीयः। तथा च– छन्दोविधाननाम्नि चतुर्दशेऽध्याये 'विभक्त्यन्तं पदं ज्ञेयमि–'ति पदं लक्षयित्वा 'निबद्धं चूर्णमेव' चेति द्विधा विभज्य चूर्णलक्षणे प्रक्रान्त उच्यते–'अनिबद्धपदं छन्दस्तथा चानियताक्षरम्, अर्थापेक्ष्यक्षरस्यूतं ज्ञेयं चूर्णपदं बुधैरि'–ति[१]। अत्रानिबद्धपदत्वं छन्दस्त्वं च विरुद्धम्। 'निबद्धं वृत्तमिष्यत'[२] इति भरतोक्त्यैव छन्दसो निबद्धत्वेन प्रसिद्धेः। अत्राभिनवभारती न लभ्यते। सेयं बड़ौदासंस्करणस्य स्थितिः। अत्र निर्णयसागरीये संस्करणे भिन्न एव पाठः। तत्र–

**अनिबद्धं पदवृन्दं तथा चानियताक्षरम् ।**
**अर्थापेक्षाक्षरयुतं ज्ञेयं चूर्णपदं बुधैः ।।**

इति पाठः। अयमेव पाठः १९२९ ख्रीष्टाब्दे चौखंभासंस्कृत– ग्रन्थमालातः प्रकाशिते नाट्यशास्त्रसंस्करणेऽपि लभ्यते। अत्र छन्दःपदं नास्ति, अस्ति च पदवृन्दमिति दुःश्रवत्वजनकं पदम्। अनेन पाठेनार्थसंगतिः संजायते। पदानां यद् वृत्तभावमप्राप्तं वृन्दं तदेवाक्षरनियतिराहित्ये अर्थापेक्षाक्षर– मधुराविद्धाक्षरसापेक्षत्वे च चूर्णपदमिति परिभाष्यते इति। एवं चापाततो निर्णयसागरीयस्यैवास्य पाठस्य संगतत्वमुत्प्रेक्ष्यते। किन्तु वामनोऽत्र विसंवदति। काव्यालङ्कारसूत्रे गद्यस्य 'वृत्तगन्धित्वेन, चूर्णत्वेनो– त्कलिकाप्रायत्वेन' च

१. नाट्यशास्त्रम्–१४.४०
२. तदेव– १४.४०

त्रैविध्यमेतेन प्रतिपाद्यते। अत्र केनापि भवितव्यमेव मूलेन। न च लभ्यते विषय एष एवंरूपो दण्डिनः काव्यादर्शे न वा भामहस्य काव्यालङ्कारे। तावेव हि भरतवामनमध्यवर्त्तिनौ काव्यलक्षणग्रन्थौ। मन्ये भरत एव मूलं वामनस्य गद्यविचारे। मानाधीना मेयसिद्धिरिति नयेन वामनमतपोषक एव पाठोऽत्र मूलतया नेयः। ततश्च वृत्तगन्धित्वस्य कृते भरतसूत्रे छन्दसोऽपि समावेश आवश्यकः। निर्णयसागरीये संस्करणे तत्समावेशो न संभवति। बड़ौदासंस्करणे विद्यमानमपि छन्दःपदं नोपकारि, तस्य दशदाडिमाः षडपूपा इत्यादि वाक्यप्रायत्वेनोपश्लेषात्। पाठान्तराणि चात्र नोपकारकाणि। एवंगते कथं वा संपाद्यं नाट्यशास्त्रस्य मूलमिति प्रश्नो व्यादाय तिष्ठति मुखविवरम्। अस्माकं तु प्रतिपत्तिः—'आ निबद्धपदच्छन्दः' इति ह्यत्र मूलम्—इति। आङ् अत्रेषत्त्वार्थकम्। इदं च संशोधनं कोष्ठकैर्मूले योजयितुं शक्यते यदवधि हस्तलेखैर्न प्रसाध्यते।

अभिनवभारतीमात्रमाश्रित्य नाट्यशास्त्रस्य मूलं निर्धार्यते चेद् व्याहन्येत नवीनानां लाभानां संभावना। अभिनवगुप्तो हि निजं दर्शनमनुसृत्य प्रवर्त्तते नाट्यशास्त्रस्य व्याख्याने शङ्कराचार्य इवोपनिषदाम्। न खलु भगवान् शङ्कराचार्य एवाद्रियते वेदान्तविचारे, अन्येषामपि महतामाचार्याणां प्रस्थानानां साम्प्रतं यावद् विद्यमानत्वात्। एवमेवाभिनवगुप्तोऽपि नाट्यशास्त्रव्याख्याने। अभिनवगुप्तो हि बहुत्र मूलं विपर्यासयति। भट्टनायकस्य भुक्तिसिद्धान्तस्तत्र प्रमाणम्। असौ हि खण्डितत्वेनैव गुप्तपादैरुपस्थापितम्। न च रक्षितो भट्टनायकस्य हृदयदर्पणस्तेन। अत एव नामुं महिमाचार्यो द्रष्टुमशकत्। एवं हि पूर्वपक्षं प्रति नास्ति अभिनवगुप्त उदाराशयः। अत एवानन्दवर्धनस्य ध्वन्यालोकं व्याचक्षाणेनानेन ध्वनिसिद्धान्तस्य यन्मूलभूतं रूपं तत् परिवर्त्तितम्, किन्तु निभृतम्। यो हि

आसन्नतमस्य पूर्ववर्त्तिन आचार्यस्यानन्दवर्धनस्य मतानि मूलभूतेन रूपेणोपस्थापयितुं नाशकत् स एवाभिनवः सहस्रवर्षपूर्ववर्त्तिनो भरतस्य नाट्यप्रस्थानं विशुद्धतयोपस्थापयेदिति न शक्यते श्रद्धातुम्। अयमपरो विषयो यद् अभिनवभारती नाट्यशास्त्रप्रमेयोन्मीलने कामधेनुवदत्यन्त–मुपकर्त्रीति। भरतस्य रससूत्रे रसनिष्पत्तिपदं रसत्वनिष्पत्तिपरम्। किन्तु सामाजिकानुभवमाधारीकृत्य प्रवर्त्तितरसविचारोऽभिनवोऽन्यथैव तद् व्याचष्टे।

स्वयमभिनवगुप्तस्यापि मूलभूताः सिद्धान्ताः संप्रति विपर्यस्य प्रस्तूयन्ते। तत्र कारणं मूलस्यान्यथा प्रकाशनम् 'स्थायि (वि) लक्षणो रस' इति हि बड़ौदासंस्करणे मुद्रा। तत्र स्थायिभिन्नत्वं रसे पर्यवस्यति। एतदेव च हिन्दी–मराठी–प्रभृतिषु साहित्यविचारक्षेत्रेषु विद्वद्भिः स्वीकृतम्। अस्ति चेदं संप्रदायविरुद्धम्, भरतेनेव सर्वैरपि मम्मटादिभिः स्थायिन एव रसत्वेनाङ्गीकारात्। अतोऽभिनवभारत्यपि परवर्त्तिनः संप्रदायानुपजीव्यैव संपादनीया।

तदित्थं नाट्यशास्त्राभिनवभारतीसंपादनविधौ निम्नलिखितानि नः सूत्राणि–

१. ब्राह्मीप्रभृतीनां लिपीनां परिज्ञानम्।

२. ग्रन्थावृत्त्या पूर्वं प्रमेयाणां समवधारणं तत्पश्चात् पदवाक्यप्रकरणानाम्।

३. विषयसंगतिरर्थशुद्धिश्चेति द्वयमेव मूलनिर्धारणे प्रमाणीकरणीयम्, न तु हस्तलेखबाहुल्यादिकम्।

४. मूलं स्वातन्त्र्येणावगन्तव्यं, न तु टीकामात्रमाश्रित्य, येन स्वतन्त्रा उन्मेषा अपि अवकाशं लभेरन्।

५. यः खलु बहूपकारकः स एव समग्रभरसह इति न श्रद्धेयम्, तत्रापि दोषसंभवात्। अतो यदभिनवगुप्तेन व्याख्यातं तदेव नाट्यशास्त्रं भरतस्य सर्वस्वमिति त्याज्य एव आग्रहः।

६. भरतस्य दर्शनं मीमांसापद्धत्या निर्धारणीयं, कर्मकाण्डं च तदाश्रित्य देशकालाभ्यां व्यवच्छिद्य स्वीकार्यम्।

७. भरतस्य नाट्यशास्त्रं संस्कृतनाट्यं च वस्तुतो भारतीयं कलादर्शनं भारतीयं च प्रयोगविज्ञानम्। तत्र भाषायाः स्थानं गौणम्, भारतीयं जीवनं लोककलाजातं च तत्र मुख्यम्। तत् सर्वमनुध्यायैवाराधनीयं भरतनाट्यशास्त्रं संस्कृतनाट्यं च।[१]

(०३.०३.२००४)

लोकश्च प्रमुखत्वेन स्वीकृतो भरतमुनिना तेषु तेषु सन्दर्भेषु। तथा हि तस्य प्रतिज्ञा—

'लोको वेदस्तथाध्यात्मं प्रमाणं त्रिविधं स्मृतम्'

(नाट्यशास्त्रे २५.१०९, १२० ब.सं.)।

अत्राभिनभारती—

'लोकसिद्धानि प्रत्यक्षानुमानागमप्रमाणानि लोकशब्देनोच्यन्ते' इति। तत्रैव भरतमुनेरग्रिमं वचनम्—

'लोकसिद्धं भवेत् सिद्धं नाट्यं लोकात्मकं यतः।' इति, अन्ते च तस्यैव निगमनम्—

लोकः प्रमाणं हि विज्ञेयं नाट्ययोक्तृभिः।।

—ना.शा. २५.१२३ ब.सं.

◈

१. लेख एष उज्जयिन्याः कालिदासाकादम्यां पठितो बहुभ्यो वर्षेभ्यः पूर्वम् ऐषमः सम्पादितोऽनूदितश्च नाट्यशास्त्रस्य १–३, ६, ७, १३–२७, ३५, ३६ अध्यायात्मको भागः।

## कालिदासरूपकेषु वस्तुविभागः

वस्तुत्वमत्र कथानकत्वसतत्त्वम्। [1]सूच्यत्वं दृश्यत्वं चेति रूपकेषु तस्य द्वे व्याप्ये जाती। एतयोराद्यं पञ्चविधैरर्थोपक्षेपकैः सूच्यते इति नाट्यवेदविदः।[2] विष्कम्भ–चूलिकाऽङ्कास्याऽङ्कावतार–प्रवेशकत्वैश्च कथारूपस्य 'अर्थस्य' उपक्षेपकाणामपि पञ्चविधत्वम्। तत्रापि विष्कम्भकप्रवेशकयोरेव प्रामुख्यम्। अनयोरपि विष्कम्भकस्य द्वैविध्यम् (१) शुद्धत्वेन[3] (२) मिश्रत्वेन च।

कालिदासरूपकेषु अष्टौ प्रवेशकाः, त्रयश्च विष्कम्भकाः प्रतीताः,[4] ऋतेऽस्माकं[5] कालिदासग्रन्थावल्याः पाठम्। प्रवेशकेषु शाकुन्तल–सप्तमाङ्कारम्भकस्य प्रवेशकस्य साहित्याकादमीप्रकाशिते कश्मीर–पाठ एव लाभः। अन्यत्र सर्वेषामपि संस्कर्तॄणां सम्पादकानां चाविसंवादः। विष्कम्भकेषु पुनः मिश्रविष्कम्भकस्य स्थाने केवलमपि 'विष्कम्भक'–पदं क्वचन लभ्यते।

अत्र विचारः

(१)

**(क) सूच्यत्व–व्याप्तिनिश्चयः**

अस्माकं संस्करणं विहाय सर्वेष्वपि संस्करणेषु कालिदासरूपकाणां वस्तुनः सूच्यत्वस्याऽसमाप्तावपि प्रवेशकादिः समाप्यते। तथा हि–

---

१-३. दशरूपकस्य १.५६–६२ कारिकाः, तासाम् अवलोकश्च।

४. प्रवेशकाः–मालविका० ३, ५; विक्रमो० २, ४, ५; शाकु० ४, ६, ७। विष्कम्भकाः–मालवि० १; विक्रमो० ३; शाकुन्त० ३,

५. प्रकाशकः काशीहिन्दूविश्वविद्यालयः, १९७६, १९८६।

१. विक्रमोर्वशीयस्य तृतीयाङ्कारम्भकेऽर्थोपक्षेपके भरतशिष्ययोः पेलव–गालवयोर्निष्क्रमणं यावदेव मिश्रविष्कम्भकं मन्वानास्ततः परं कञ्चुकिप्रवेशमारभ्य अङ्कम् अवतारयन्ति, प्रवदन्ति च पेलवोक्तेः प्राकृतमयत्वेऽपि [1]विष्कम्भकत्वमेवार्थोपक्षेपकस्य। वस्तुतस्तु, तत्र कञ्चुकिनोऽप्युक्तिः सूचनात्मिकैव–'अये! इत एव प्रस्थितो देवः, परिजनवनिता०, यावदेनमवलोकनमार्गे स्थितः प्रतिपालयामि'–इत्येवम् एवं च सूच्यत्वस्य कञ्चुक्युक्त्यवधिकत्वमेव स्वीकर्त्तव्यं, स्वीकर्त्तव्यं चार्थोपक्षेपकस्यास्य मिश्रजातीयत्वम्।

२. शाकुन्तलस्य चतुर्थेऽङ्के वेलोपलक्षणाय प्रविष्टस्य कण्वशिष्यस्य प्रवेशात् पूर्वं यावद् शकुन्तलासख्योः दुर्वासःशाप–शबलितं संवादं यावदेवार्थोपक्षेपको निर्दिश्यते, उद्दिश्यते चासौ मिश्रविष्कम्भक इति नेपथ्यगतत्वेऽपि शापवाक्यस्य। वस्तुतस्तु सख्योः यः पुनः प्रवेशस्ततः परं नायिकाप्रवेशात् पूर्वं यावच्च सूच्यत्वमेव कथार्थस्य। ततश्च तस्यापि वस्तुनः सूच्यत्व–व्याप्य–जाति–कत्वमेवाभ्युपेयम्।

३. शाकुन्तलस्यैव षष्ठेऽप्यङ्के तदारम्भकस्यार्थोपक्षेपकस्य धीवरवृत्तान्ता–वधिकत्वमेवाभिमन्वते सर्वेऽपि। सूच्यत्वं पुनस्ततः परमपि सानुमती–पारिचारिका–कञ्चुकिनां वक्तव्यं यावद् दृश्यप्रसरम्।

४. मालविकाग्निमित्रस्य पञ्चमाङ्कारम्भकस्याप्यर्थोपक्षेपकस्य समाहितिका–मधुकरिकावधिकत्वमेवोपजिगमिषन्ति विद्वांसः, सूच्यत्वं च तत्रापि वैतालिकोक्तिं यावत् स्थितम्।

एवं कालिदासरूपकेषु सूच्यत्वस्याखण्डितत्वेऽपि, अनारम्भेऽपि च दृश्यत्वस्य याविमावर्थोपक्षेपकविराम–अङ्कारम्भौ तावतर्कसहौ।

---

१. निर्णयसागरस्य १९१४ खीष्टाब्दीये रङ्गनाथटीकोपेते संस्करणे।

**(ख) नामनिश्चय:**

कालिदासो भरतमेवोद्दिशति तेषु तेषु सन्दर्भेषु[१]। ततश्च भरतस्य नाट्यशास्त्रमेव संभवेन्नाट्य–सिद्धान्तनिर्णये तस्यादर्श:। कालिदाससमयं यावदन्यस्य नाट्यशास्त्रीयस्य ग्रन्थस्याप्रसिद्धिरत्र साधकं प्रमाणान्तरम्। भरतस्य नाट्यशास्त्रे पुन: प्रवेशकमेव भूम्ना[२] लभामहे, न विष्कम्भकम्। विष्कम्भकस्य निवेश: प्रकरणनाम्नो रूपकस्य प्रकरणे दृश्यते षड्भिरनुष्टुप्पादै:।[३] नास्ति च कालिदासस्य रूपकेषु कस्यचनापि प्रकरणत्वम्। एवं च सूच्यस्य वस्तुन: प्रवेशकत्वमात्रं कालिदासरूपकेषूपनिबन्धनीयम्, न तु विष्कम्भकत्वम्। ततश्च कालिदासनाटकेषु योऽयं विष्कम्भकस्य मिश्रविष्कम्भकस्य वा योग: सोऽपि गवेषणीयसङ्गतिक:।

कालिदासपूर्ववर्त्तिनि भासरूपकजातेऽपि प्रवेशकानां[४] न्यूनत्वाभावात्, सूच्यासूच्यवस्तु–विभागाय क्वचन प्रवेशकादि–शब्द–रूप–विभाजका–भावाच्च कालिदासे भासानुहरणमप्यशक्योत्प्रेक्षम्।

**(ग) शीर्षकस्थाननिश्चय:**

तृतीयं चात्रेदं विचार्यं यत् सूच्य–दृश्ययोर्वस्तुनोर्विभाजकानि शीर्षकाणि कुत्र देयानि, कथं वा देयानि। सर् मानियरविलियम्समहोदयं विहाय सर्वैरपि कालिदासरूपकसम्पादकै: सूच्यस्य वस्तुन: पूर्वमेव 'अमुक: अङ्क' इति अङ्कशीर्षकमेव दीयते, प्रस्तूयते च सूच्यमपि वस्तु तत: परम्। विजातीयत्वमनुभवन्त: सहृदया: पुनरर्थोपक्षेपकत्वेनाङ्कस्य अङ्कत्वेनार्थो–

---

१. विक्रमो० २.१७, ३–अङ्कारम्भकार्थोपक्षेपके, भरतवाक्येषु च।

२. नाट्यशास्त्रस्य बड़ौदासंस्करणे १८.२८–५६ कारिकासु।

३. नाट्यशास्त्रस्य बड़ौदासंस्करणे १८.५४–५५। तत्रापि प्रवेशक: प्रकृतिभूत:, विष्कम्भक: पुनस्तद्विकृति:। १९.१०९–११७ मध्ये पञ्चानामप्यर्थोपक्षेपकाणां लक्षणानि प्रक्षिप्तानि, तत्राभिनवभारत्या अभावात् अप्रस्तुतप्रायत्वात्, १८ अध्यायेऽलाभाच्च।

४. भासे प्रवेशका: ११, मिश्रविष्कम्भका: ४, शुद्धविष्कम्भकाश्च ७ = आहत्य २२।

पक्षेपकस्यानुवेधं न सहेरन्।

ता एतास्तिस्रो विप्रतिपत्तयः प्रेक्षावदनुवीक्षासापेक्षाः।

( २ )

**अत्र समाधिमुत्पश्यतां स्युरिमाः प्रतिपत्तयः—**

(क) १. अर्थोपक्षेपकपात्राणां निष्क्रान्तिः अङ्कमारम्भयतीति—

(अ) मालविकाग्निमित्रे प्रथम—तृतीय—पञ्चमानाम्

(ब) विक्रमोर्वशीये चतुर्थस्य

(स) शाकुन्तले च तृतीयस्य

अङ्कस्य अर्थोपक्षेपकेभ्यः प्रतीतचरम्। एवं गते 'सत्यपि सूच्यत्वस्या—परिसमापने सूचकानां पात्राणां यत्र दृश्ये वस्तुनि निर्व्यवधि प्रवेशस्तत्र दृश्यत्वमेवाभ्युपेयमि'ति। यदि वा,

२. अभिनयाभावो हि सूच्यतावच्छेदकः। विप्रतिपत्तिस्थलेषु स्थलेषु पुनः शाकुन्तलस्य चतुर्थेऽङ्के नायिकासख्योः, षष्ठेऽङ्के च चेट्यादीनां सर्वेषां पात्राणामभिनय एव कविनोपनिबध्यते न तु तदभाव इत्यवच्छेद—कस्याभावात् सूच्यताया अपि तत्राभावः। यत्राभिनयस्तत्र दृश्यत्वमिति कीदृशी तत्र सूच्यता? अथवा,

३. पाण्डुग्रन्थानां बाहुल्ये यादृशी योजना सैव परिपालनीया। तत्तत्संस्करण—कर्त्तृभिर्दृष्टचरेषु हस्तलेखेषु यादृशो वस्तुविभागस्तादृश एव स तैस्तेषु तेषु संस्करणेषूपनिबद्ध इति नास्ति पर्यनुयोगावसरः। किं वा,

४. निरङ्कुशाः कवयः इति न ह्येव ते निगडनीया लक्षणैकचक्षुष्कतया। भास इव कालिदासोऽपि सूच्येऽपि दृश्यत्वं दृश्येऽपि च सूच्यत्वं स्वैरमुपनिबध्नीयादित्यालङ्कारिकैरेव तत्र लक्ष्यैकचक्षुष्कैर्भाव्यं शाब्दिकैरिव। इति

( ३ )

अत्र ब्रूमः—([1]चूलिकान्यायेन)—

१. कवेर्निरङ्कुशत्वकल्पनायां जोषमास्महे। कविश्चेदनङ्कुशः स्वैरवृत्तिश्च तर्हि विमर्शका एव कथं न मन्दाः, अलब्धवैकटिकभावाश्च सारासारविवेके शिल्परत्नानाम्? नीरसस्य वस्तुनः परित्यागे परिवर्त्तने वा स्यान्नाम कविः स्वतन्त्रः, न तु तस्य सरसे वस्तुनि निरवधानं व्यामिश्रणे। सूच्यं हि नीरसप्रायमेव। सरसं च दृश्यम्। ततो नीरसस्य, ततश्चार्थोपक्षेप—कैकविषयस्य अङ्कमात्रविषये सरसे वस्तुनि संमिश्रणं कालिदास—सदृशमहाकविव्यामोहौपयिकमिति नास्ति विदग्धजननेदीयान् पक्षः।

२. पाण्डुग्रन्थानां बाहुल्ये प्रामाण्यबुद्धिः पुनर्विवाहविडाल—न्याय—विडम्बनम्। गुरुणा उपद्रवन्तं विडालं विवाहे यदृच्छयैव प्रतिबद्धं वीक्ष्य 'समुदाचार एष यद् विवाहे विडालस्य प्रतिबन्ध' इति जातग्रहाणां शिष्याणां प्रतिविवाहमनुपद्रवतोऽपि विडालस्य सान्वेषणं प्रतिबन्धनमिव गड्डरिकाप्रवाह एष निमीलित—तर्क—नेत्राणां प्राकृतानाम्। अपि च कालिदासहस्तलेखाः कालिदासहस्तलिखिता एवालप्स्यन्त चेदभविष्यदपि कथञ्चित् समाधिः। नास्ति चैषा स्थितिः। सन्ति च निदर्शनानि सूच्यदृश्ययोर्वस्तुनोर्निर्विभागं[2] लेखस्यापीति विभागानामेषां लिपिकृन्मात्र—शेमुषीकल्पितत्वमेव निश्चितम्। ततश्चासति नाट्यशास्त्रविरोधे तत्र साम्प्रतिकमपि परिवर्त्तनं न ह्येव नोचितम्। लभ्यन्ते च हस्तलेखेष्वपि महान्तोऽवकाशा विप्रलम्भस्य। तत्र मूलशुद्धेरेकमेव शरणम्, स च संवादकस्य मतिविभवः, विवेकापरपर्यायः। एवं च परिदुर्बलमेव

१. चूलिका = चूडी, ता हि येन क्रमेण धार्यन्ते ततो विपरीतेनैव क्रमेणावतार्यन्ते। सोऽयं उद्देशप्रतिनिर्देशयोः क्रमव्यत्यास एव चूलिकान्यायः शास्त्रेषु प्रसिद्धः।

२. भासस्य बालचरिते प्रथमाङ्कारम्भकस्य विष्कम्भकस्य नास्ति शीर्षबन्धः, नास्ति च समाप्तिपुष्पिका (द्र० B. O. B. A-1951)

पाण्डुग्रन्थानामपि प्रामाण्यम्।

३. अभिनयोऽपि सूच्य–दृश्यत्वविभागेऽकिञ्चित्करः। भारतीवृत्तिरूपस्याभिनयस्य सर्वत्राव्यभिचारात्, तदितरस्याङ्गिकादेरप्यभिनयस्य शाकुन्तल–चतुर्थ–षष्ठाङ्कारम्भकयोरर्थोपक्षेपकयोर्विद्यमानत्वात्। चतुर्थेऽङ्के सख्यौ कुसुमावचयं नाटयत एव, षष्ठेऽङ्के पुनर्धीवरवृत्तान्तस्याभिनयः स्वतन्त्रमेकमङ्कमेव प्रयोजयति। एवं चाभिनयाभावस्य सूच्यतावच्छेदत्वकल्पनं मानाभावकलुषितम् अव्याप्तिप्रसक्तिप्रत्युपस्थापकं चेति न ह्येव क्षमेत विनिगमने।

४. पात्राणां निष्क्रमणेऽपि न युज्यते विनिगमकत्वम्। अस्ति तत्रापि प्रतिपक्षः। विक्रमोर्वशीयस्य पञ्चमाङ्कारम्भकोऽर्थोपक्षेपकविशेषश्चात्र प्रमाणम्। तत्र पण्डितमहाशयस्य संस्करणे प्रवेशसमाप्तावपि विदूषको मञ्च एव तिष्ठति प्रतिपालयति च सपरिजनस्य नायकस्य पार्श्वपरिवृत्तयेऽवसरम्। संस्करणान्तरेष्वतथाभावेऽपि तर्कः पण्डितैकपक्षपाती। अत्र हि नायकः सपरिजनः। ततस्तस्य मञ्चप्रवेशे एकाकित्वपरिहारोऽत्राऽलब्धप्रसरः। एवं चास्य प्रवेशो मञ्चस्थितेनापि विदूषकेण शक्यप्रतिपालः। नास्ति च तस्य मञ्चस्थितावनौचिती, अस्ति चौचिती, मञ्चशून्यतायाः परिहारात्। नास्ति चौचिती निर्गम एव, तस्य व्यर्थत्वात्। अस्ति च निर्गमः सार्थकः विक्रमोर्वशीयस्यैव द्वितीयेऽङ्के। तत्र नायकस्य मञ्चप्रवेशावसरे एकाकित्वमेव। मा भूदस्य निष्परिजनस्य प्रवेश इति विदूषकस्य मञ्चतः पलायनमुचितमेव। यद्यपि तत्रापि मञ्चत एव प्रवेशद्वारं यावत् पलाय्यापि विदूषकेण नायकस्य सपरिजनत्वं शक्यसम्पादम्। एवं चार्थोपक्षेपकपात्राणां मञ्चत्यागस्यैकान्तिकत्वे त्रयो दोषाः—

१. प्रमाणाभावः

२. सत्प्रतिपक्षता

३. तर्कविरोधश्चेति।

अस्ति चात्र प्रतिवन्द्यपि। तथाहि यदि विक्रमोर्वशीयस्य पञ्चमेऽङ्के मञ्चस्थितोऽपि विदूषको राजानं प्रपिपालयन्नर्थोपक्षेपकपात्रमेव तर्हि मालविकाग्निमित्रस्य पञ्चमेऽङ्के नायकप्रवेशात् पूर्वं मञ्च एव स्तम्भान्तरितायाः प्रतीहार्या अपि कथं नार्थोपक्षेपकपात्रत्वमेव, कथं च तत्र स्यात् सर्वसम्पादकसंमत–मङ्कपात्रत्वमेवास्मद्विप्रलम्भकम्।[१]

किमुच्येत च शाकुन्तलस्य चतुर्थेऽङ्के यत्रार्थोपक्षेपकपात्राण्येव भूयोऽप्यङ्कारम्भे मुख्यपात्रत्वेन प्रविशन्ति, प्रविशति च शिखामज्जिता शकुन्तला बहोः कालात् परम्। तत्र ह्यखण्डितमेव सूच्यत्वं वस्तुनः शकुन्तलायाः प्रवेशात् पूर्वं यावदव्यवधानेन। ननु वेलोपलक्षणार्थं प्रविष्टः कण्वशिष्यस्तत्र व्यवधानमिति नास्ति दोष इति चेत् कण्वशिष्यस्यापि कथं न्वङ्कपात्रत्वम्, तस्यापि सूचनामात्रप्रयोजनकत्वात्। एवं च शकुन्तलायाः प्रवेशात् पूर्वं यावद् अर्थोपक्षेपकत्वमेव नाट्यवस्तुनः। कण्वशिष्यस्याङ्कपात्रत्वे पुनरयमपरो दोषो यद् अनसूयायाः कण्वशिष्यवाक्यशेष एवापटीक्षेपेण प्रियंवदोचितोऽनवसरः प्रवेशः। कण्वशिष्यो हि 'यावदुपस्थितां होमवेलां गुरवे निवेदयामी'–ति केवलं न व्याजहार प्रविवेश चानसूया। प्रवष्टिमात्रैव सा सुदीर्घमालपति। ततः परमेवावसरो दीयते वाक्यशेषाय वराकाय। असम्बद्धयोर्द्वयोर्यौगपद्येन प्रस्तुते वाग्व्यवहारे रससमाहितायाः प्रेक्षकबुद्धे–र्दोलाधिरोहविडम्बनस्यापरिहारोऽपि महान् रसदोषः।[२]

एवं सर्वेषामर्थोपक्षेपकपात्राणां मञ्चतो निष्क्रमणं नास्ति नियतम्

---

१. अस्माभिरन्यत्र विहितपरिवर्त्तनैरप्यत्रापराद्धमेव कालिदासग्रन्थावल्याः १९७६ वर्षीये प्रथमे संस्करणे १९८६ वर्षीये द्वितीये संस्करणे तु सावधाना आस्म तथाऽनाचरन्तः।

२. अस्माभिस्त्वत्र शकुन्तलाप्रवेशात् पूर्वं यावदर्थोपक्षेपकत्वमेव दर्शितं स्वकीयायां कालिदासग्रन्थावल्याम्। अत्र अहमदावादगते ला.द. संस्थानस्य शाकुन्तलहस्तलेखे शीर्षकं **'द्वितीयः प्रवेशकः ततः प्रविशति शिष्य'** इत्यतः पूर्वम्। दृश्यमस्य चित्रं कालिदासग्रन्थावल्या द्वितीयसंस्करणभूमिकायाम्।

अङ्कारम्भाय। ततश्च नास्ति सूच्यदृश्यत्वयोर्विभागेऽर्थोपक्षेपकपात्रनिष्क्रान्तिरपि विनिगमिका।

एवं सति मुख्यानां पात्राणां प्रवेशेभ्यः पूर्वं यावत्, यदवधि वस्तुनः सूच्यत्वं तदवधि तस्यार्थोपक्षेपकत्वमेवाभ्युपेयम्, सत्यपि सूच्यवस्तुपात्रस्य दृश्ये वस्तुनि निरर्गलं प्रवेशे, सत्यप्यभिनये, सत्यपि च तत्समर्थके पाण्डुग्रन्थबाहुल्ये। सेयं व्यवस्था तर्कशुद्धा, अशास्त्रविरुद्धा च।

एवं सति यथा विक्रमोर्वशीयस्य द्वितीयाङ्कार्थोपक्षेपके वैतालिकविदूषकोक्त्योरपि समाहारस्तथैव मालविकाग्निमित्रस्य पञ्चमाङ्कारम्भकेऽर्थोपक्षेपकेऽपि व्यवस्थाप्यम्। तत्रापि नायकप्रवेशात् पूर्वं यावदर्थोपक्षेपकत्वमेवाऽऽस्थेयम्।

(ख) सति वस्तुविभागनिर्णयविनिगमके वस्तूनां नामान्यपि निर्धार्येरन्। तत्र भरतनाट्यशास्त्रे प्रवेशकस्यैव भूम्ना प्रपञ्चात् सूच्येषु वस्तु–खण्डेषु 'प्रवेशक' इत्येवैका संज्ञा प्रयोक्तव्येति प्रथमः कल्पो भासवत् कालिदासरूपकेभ्योऽपि।

अत्रेदमवधेयम्। प्रवेशकस्य नीचमात्रपात्रप्रयोक्तृत्वं परवर्त्तिषु दशरूपकादिषु प्रतीतमिति प्रथमाङ्कारम्भकार्थोपक्षेपकभिन्नतायै प्रवेश–कान्तरेभ्यस्तस्मिन् भेदकं किञ्चिदाधेयमिति स्यादेव भासकालिदासयोः मनसि विकल्पः। ऊरुभङ्गे बालचरिते च भासः, मालविकाग्निमित्रे च कालिदासः प्रथमाङ्कारम्भकमर्थोपक्षेपकमुपनिबध्नन्तौ प्रतीतावेव। तत्र कालिदासस्य प्रथमाङ्कारम्भकार्थोपक्षेपके प्राकृतमपीति विशेषः। प्रवेशकान्तरेभ्यः प्रथमाङ्कारम्भके प्रवेशके भेदमुपनिबिभन्त्सू इमौ तत्र प्रकरणोचितां विष्कम्भकसंज्ञामादधतुरिति कथञ्चिदुत्प्रेक्षितुं न न शक्यम्। अन्यत्र पुनर्वक्ष्यमाणरीत्या प्रवेशकत्वमेव तर्कशुद्धम्।

(ग) भासकालिदासयोः प्रवेशका अङ्कात् पूर्वमेव स्थिता इति प्रवेशकेभ्यः पूर्वम् 'अमुकः अङ्क' इति शीर्षकमशास्त्रनुमोदितमेव। इदं

चापरं 'प्रवेशक'—संज्ञासमर्थकं तत्त्वम्।

शीर्षकोल्लेखेऽप्यत्र द्विविधः क्रमः

१. अन्तमात्रे नामसमुद्देशः २. आरम्भेऽपि च स इति।

तत्र प्रथमस्यैव भूयसा प्रचारः। शास्त्रं पुनस्तत्र तूष्णीं स्थितम्। अयमत्र विशेषो यत् पण्डितमहाशयो विक्रमोर्वशीये अङ्कमप्यन्त एव समुद्दिशति नारम्भे। तत्र शीर्षकस्थापने नास्ति शास्त्रविरोध इति तत्परित्यागं हस्तलेखकालोचितं स्थानहानिपरिरक्षणनिमित्तकमेवोत्पश्यामः। अत्र गतानुगतिकता तातकूपजलन्यायानुवृत्तिरेव।

( ४ )

अयमत्र निष्कर्षः—

कालिदासरूपकेषु—

१. मालविकाग्निमित्रस्य पञ्चमाङ्कारम्भकोऽर्थोपक्षेपको नायकप्रवेशात् पूर्वं यावत् प्रसारणीयः, मिश्रविष्कम्भकनाम्ना चाभिलप्यः।
२. विक्रमोर्वशीयस्य द्वितीयेऽङ्के, शाकुन्तलस्य चतुर्थषष्ठयोरङ्कयोश्च सूच्यत्वं नायकप्रवेशावधि प्रसार्य प्रवेशकत्वेन चानभिमत्य मिश्रविष्कम्भकत्वेन यदि समुद्देश्यम्।
३. सूच्यवस्तूनां पृथक् प्रत्यभिज्ञायै आरम्भेऽपि शीर्षकाणि देयानि समाप्ताविव, कामं तत्र शीर्षकं कोष्ठकपतितं स्यात्।
४. अङ्कारम्भे पुनरङ्कसंख्यासहितं शीर्षकमवश्यमेव देयमङ्कान्त इव।
५. प्रवेशकानामङ्कारम्भात् प्रागेकाधिकत्वमप्यानन्तर्येण शक्ययोजनम्।[१]

◈

---

१. निबन्ध एषोऽखिलभारतीयप्राच्यविद्यापरिषदः २८. शेऽधिवेशने पठितः।

## अवस्थार्थप्रकृतिसन्धिभेदः

द्विविधं खलु काव्यम्, मुक्तकं प्रबन्धश्चेति। तत्राऽऽद्यं भावकाव्यरूपं अपरं च चरितकाव्यात्मकम्। द्वितीयस्य च कथाख्यायिका—सर्गबन्ध—चम्पू—रूपकादयो भेदाः। कथानकं पुनरेषां समानो गुणः। कथानके पुनः पञ्च सन्धयो भवन्ति। सन्धीनामेषां द्वयं घटकम् अवस्था अर्थप्रकृतिश्चेति। तत्र किमनयोः स्वरूपमिति विषये बहुधा प्रतिष्ठन्ते नाट्यलक्षणकृतः। तत्र—

**(क) अवस्था—**

'कारकस्य व्यापारोऽवस्थे'ति भरतः, धनञ्जयः, भोजः सागरनन्दी, विश्वनाथः, रामचन्द्रः, शारदातनयः, विद्यानाथश्च। तथाहि—

**१. संसाध्ये फलयोगे तु व्यापारः कारकस्य[१] यः ।**
**तस्यानुपूर्व्या विज्ञेयाः पञ्चावस्थाः प्रयोक्तृभिः ॥**
**प्रारम्भश्च प्रयत्नश्च तथा प्राप्तेश्च संभवः ।**
**नियता च फलप्राप्तिः फलयोगश्च पञ्चमः ॥**

इति नाट्यशास्त्रे (१९.७—८) भरतः, नाटकलक्षणरत्नकोषे सागरनन्दी च।

**अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः ।**
**आरम्भयत्नप्राप्त्याशानियताप्तिफलागमा** ॥ इति

दशरूपे धनञ्जयः (१.१९) साहित्यदर्पणे विश्वनाथः (६.७०—७१) भावप्रकाशे शारदातनयः (६.१७८ पृ० २०६ बड़ौदा सं०), प्रतापरुद्रीये विद्यानाथश्च (नाटकप्रकरणे)। अत्र कार्यं व्यापाररूपमेव न तु फलरूपम्, प्रारम्भक्रियायास्तत्रैव स्वारस्येनान्वयात्। क्रियारूपो व्यापार एव हि प्रारभ्यते,

---

१. कारणस्य, साधनस्य।

न तु फलरूपं प्रयोजनम्। स्पष्टमिदं महाराजस्य भोजस्य—

'कार्यार्थं दैवपौरुषप्राधान्यमध्यासते। तस्य चास्य दैवपुरुषो-भयप्राधान्यादवस्थाः, संस्थाः समवस्थाश्चेति त्रयो व्यपदेशा भवन्ति। अवस्थादीनां तिसृणामपि आरम्भप्रसवादीनि पञ्च—पञ्च पर्वाणि भवन्ति। तत्र पौरुषप्राधान्ये संस्थाः। तासां प्रारम्भादयः पञ्च पर्वाणि—

**प्रारम्भश्च प्रयत्नश्च तथा वै प्राप्तिसंभवः ।**
**नियता तु फलप्राप्तिः फलयोगश्च पञ्चमः ।।** इति

(शृङ्गारप्रकाशस्य १२ प्रकाशे)

इत्यनेन संदर्भेण।

२. फलरूपस्य कार्यस्यावस्थाऽवस्थेति तु शिङ्गभूपालः। यदुक्तमेतेन रसार्ण-वसुधाकरे (३.२२—२३)—

**कार्यस्य पञ्चधावस्था पातकादिक्रियावशात् ।**
**आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ।।** इति।

अत्र फलं कार्यमेवेत्यपि प्रोच्यते तेनैव विदुषा—'फलं कार्यमि'ति (३.१८) कारिकया तत्रैव। वस्तुतस्त्वत्रापि व्यापार एव कार्यपदेन ग्राह्यः, संप्रदायसंवादाय, प्रारम्भादीनां लक्षणसमन्वयाय च।

तत्र १. औत्सुक्यमात्रमारम्भः फललाभाय भूयसे।
२. प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः।
३. उपायापायशङ्काभ्यां प्राप्त्याशाप्राप्तिसंभवः।
४. अपायाभावतः प्राप्तिर्नियताप्तिः सुनिश्चिता।
५. समग्रफलनिष्पत्तिः फलागम इतीरितः। इति चावस्थाभेदानां लक्षणानि।

(ख) अर्थप्रकृतिः

अर्थप्रकृतिपदस्य को न्वर्थ इति विषयेऽपि विविधानि प्रस्थानानि नाट्यलक्षणकृताम्। तथा च—भरतः—

इतिवृत्ते यथावस्थाः पञ्चारम्भादिकाः स्मृताः ।
अर्थप्रकृतयः[१] पञ्च तथा बीजादिका अपि ।।

बीजं बिन्दुः पताका च प्रकरी कार्यमेव च ।
स्वल्पमात्रं समुद्दिष्टं[२] बहुधा यद् विसर्पति ।।
फलावसानं यच्चैव बीजं तत् परिकीर्त्तितम् ।।

प्रयोजनानां विच्छेदे यदविच्छेदकारणम्[३] ।
यावत् समाप्तिर्बन्धस्य[४] स बिन्दुः परिकीर्त्तितः ।।

यद् वृत्तं तु परार्थं स्यात् प्रधानस्योपकारकम् ।
[५]प्रधानवच्च कल्प्येत सा पताकेति कीर्त्तिता ।।

फलं प्रकल्प्यते यस्याः परार्थायैव केवलम् ।
अनुबन्धविहीनां तां प्रकरीति विनिर्दिशेत् ।।

यदाधिकारिकं [६]वस्तु सम्यक् प्राज्ञैः प्रयुज्यते ।
तदर्थो यः समारम्भस्तत् कार्यं परिकीर्त्तितम् ।।

(ना०शा० १९.२०—२६)

---

१. यश्चासां पञ्च बीजा०।

२. सृष्टम् उपक्षिप्तं।

३. कारकम्।

४. कार्यस्य, समाप्तिं यावद्बन्धः।

५. प्रधानवच्चात्मनोऽपि, तत्संबन्धाच्च फलवत्, प्रधानबन्धफलवत्।

६. कार्य पूर्वमेव प्रकल्पितम्, तदर्थो यः। यदर्थश्च समा०।

गन्थमिमं बहुधा व्याकुर्वते ताँस्तान् पाठभेदानुपकल्प्य। तथा च—

१. अवस्थारूप—व्यापाराश्रयः कारक एवार्थप्रकृतिः। स च द्विविधः अचेतनश्चेतनश्चेति। तत्र बीज—कार्ययोरचेतनत्वम्, शेषाणां च चेतन—त्वमित्यभिनवगुप्तरामचन्द्रौ। तथा च—अभिनवभारत्यामभिनवगुप्तपादः—

**'अर्थः फलम्, तस्य प्रकृतय उपायाः फलहेतव इत्यर्थः। तत्र जडचेतनतया द्विधाकरणम्। जडश्च मुख्यकारणभूतः [१]गूढतरो वा। आद्यं बीजम्, द्वितीयं कार्यं, करणीयं प्रयोक्तव्यमित्यस्मिन्नर्थे चेतनोऽपि द्विविधः मुख्य उपकरणभूतश्च। अन्त्योऽपि द्विधा स्वार्थसिद्धिसहिततया[२] परार्थसिद्ध्या युक्तः, शुद्ध्याऽपि वा। तत्राद्यो बिन्दुः, द्वितीयः पताका तृतीय प्रकरी। तदेतैः पञ्चभिरुपायैः पूर्णं फलं निष्पाद्यते।। (ना०शा० १९—२०)**

अनुवर्तते चामुमेव नाट्यदर्पणविवरणे रामचन्द्रः

**बीजं पताका प्रकरी बिन्दुः कार्यं यथारुचि ।**
**फलस्य हेतवः पञ्च चेतनाऽचेनात्मकाः ।। २८।।**

फलस्य मुख्यसाध्यस्य हेतवः उपायाः। इह हेतुर्द्विविधः। अचेतनश्चेतनश्च। अचेतनोऽपि मुख्यामुख्यभेदाद् द्विधा। मुख्यो बीजम्, तन्मूलत्वादितरेषाम्। अमुख्यस्तु कार्यम्[३]। चेतनोऽपि द्विधा, मुख्य उपकरण भूतश्च। मुख्यो बिन्दुः कार्यानुसन्धानरूपत्वात्। उपकरणभूतो द्विधा, स्वार्थसिद्धियुतः, परार्थसिद्धिपरश्च। पूर्वः पताका, अन्यः प्रकरीति। अत्र चाचेतन—चेतनानां मध्ये बीज—बिन्द्वोर्मुख्यत्वं सर्वव्यपित्वात्।। [४]इति।

बीजादिलक्षणेष्वप्यस्येयमेव प्रतिपत्। तथाहि—

---

१. नास्त्यत्र पाठान्तरम्।


२. एकस्तकारोऽत्राधिकः। सहितयेति तु युज्यते वक्तुम्।

३. अत्र पाठान्तरं नास्ति।

४. नाट्यदर्पणस्य १९५९ वत्सरे प्रकाशिते बड़ौदा संस्करणे १.२८ वृत्तिः।

स्तोकोद्दिष्टः फलप्रान्तो हेतुर्बीजं प्ररोहणात् ।
आविमर्शं पताका स्याच्चेतनः स परार्थकृत् ।।
प्रकरी चेत् क्वचिद् भावी चेतनोऽन्यप्रयोजनः ।
हेतोश्छेदेऽनुसन्धानं बहूनां बिन्दुराफलात् ।।
साध्ये बीजसहकारी कार्यम् ।।[१]

असौ चोभयाभिमतो भेदवृक्षः—




२. 'संसाध्ये फलयोगे तु व्यापारः कारकस्य य इति भरतसूत्रस्य व्यापारपदं प्रवृत्तिपरं मत्वाऽर्थप्रकृतिपदेऽर्थपदं कथाशरीरपरं प्रकृतिपदं च व्यापाररूपारम्भपरं निनीषुर्भोजः पुनः शृङ्गारप्रकाशस्य द्वादशे प्रकाशे[२]—ऽन्यथैव प्रतिष्ठते। तथाहि—

'कथाशरीरोपादानभूता अर्थप्रकृतयो भवन्ति। चतसृसु हि विधासु

१. नाट्यदर्पणस्य १.२९—३३ कारिकाः।

२. ज्योशेरसंस्करणस्य द्वितीये भागे पृष्ठ ४८२।

तत्त्वं परिसमाप्यते कर्त्ता, कर्म, करणं क्रिया चेति। ताश्च प्रकृतिपञ्च–कोपलक्षणेन व्याख्यायन्ते। तद्‌यथा–

**बीजं बिन्दुः पताका च प्रकरी कार्यमेव च ।**
**अर्थप्रकृतयः पञ्च कथादेहस्य हेतवः ।।** इति

तत्र कर्त्तरि कर्मणि वाऽवतिष्ठमान आरम्भो **बीजम्**। यथा (कर्त्तरि) रामचरितम् (कर्मणि) शिशुपालवधम्। बीजमेव विष्कम्भकादिभिरसंबद्धः संबद्धो वा कथाशरीराविच्छेदहेतुतयाऽवतिष्ठमानो **बिन्दुः**। कथाशरीरव्यापिनि पुनः साहाय्यविशेषे साधकतमत्वं (त्वेन) कारणभूते वर्तमान आरम्भः **पताका**। कथाशरीरव्यापिनि पुनः सहायविशेष एवासाधकत्वात् करणाऽऽभासभूते वर्त्तमान आरम्भः **प्रकरी**। पताकैव हि अफलाऽनु–बन्धविहीना च प्रकरी। कथाशरीरव्यापिन्यां नायकतत्सहायादिक्रियाया–मुपलभ्यमानं प्रधानसंबन्धि प्रारम्भफलविशेषः **कार्य**मित्युच्यते।[1] अन्ववर्त्ततामुं भावप्रकाशकारः शारदातनयः–

**बीजं बिन्दुः पताका च प्रकरी कार्यमेव च ।**
**अर्थप्रकृतयः पञ्च कथादेहस्य हेतवः ।।**
**एते कथाशरीरस्य हेतवः परिकीर्त्तिताः ।।**[2] इति।

शरीरोपादानहेतुत्वं व्यापाररूपारम्भत्वं च न विसङ्गतम्, व्यापारवत एव कारणस्य कार्यजनकत्वदर्शनात्। तत्र चेतनगता आरम्भा बुद्धिपूर्वका अचेतनगताः पुनः सांसिद्धिका वत्साय क्षीरगता अवश्च्योता इव। क्रियायामुपलभ्यमानं कार्यमिति च फलवती क्रियेति व्याख्येयम्। ततश्चाविसंवाद एवोपक्रमोपसंहारयोः, क्रियाया अप्यारम्भरूपत्वात्।

---

१. शृङ्गारप्रकाशस्य ज्योशेरसंस्करणे द्वितीयभागस्य पृष्ठानि–४८२–४८३ उद्‌धृताश्च भरतकारिकाः।

२. भावप्रकाशस्य ३.१६८–१६९ कारिके।

३. इतिवृत्तरूपत्वमेवार्थप्रकृतीनामिति तु रसार्णवसुधाकरे सिंह (शिंग) भूपाल:। तथा हि—

**तच्चेतिवृत्तं विद्वद्भि: पञ्चधा परिकीर्त्तितम् ।**
**बीजं बिन्दु: पताका च प्रकरी कार्यमित्यपि ।।**[१]

संवदति चानेन नाटकलक्षणरत्नकोषे सागरनन्दी—

**नाटकीयवस्तुन: पञ्च प्रकृतय: स्वभावा भवन्ति,**
**नैतान् परित्यज्य नाटकार्था: संभवन्ति ।** इति

ब्रुवाण:, प्रस्तुवानश्च 'अर्थप्रकृतय: पञ्च ज्ञात्वा योज्ये'—ति भरतवचनम्[२]। तत्र पञ्चधेत्युच्यतां पञ्चस्वभावेति वा, नास्ति भेद: प्रकारत्वस्वभाव—त्वयोरभिन्नप्रायत्वात्।

४. 'अर्थस्य रूपकस्य प्रकृतय: प्रकरणान्यवयवार्थखण्डा' इति च केचनाज्ञातलक्षणा व्याख्यातार:।[३]

५. तमिमं पक्षजातम्—

'अन्ये त्वाहु: अर्थस्य समस्तरूपकवाच्यस्य प्रकृतय: प्रकरणा—न्यवयवखण्डा इत्यर्थप्रकृतय इति। एतच्च व्याख्यानं नातीव प्रकृतं पोषयति। सन्ध्यादीनां चार्थप्रकृतित्वमत्र व्याख्याने स्यात्, इतिवृत्तमेव समुदायरूपम्। अर्थ इतिवृत्ते प्रकृतय इति वक्तव्येऽर्थग्रहणमतिरिक्तं स्यादिति, अवस्थाभिश्च तुल्यतावर्णनं वर्णनमात्रं वानेन स्यादिति किमनेने।'—ति[४] प्रत्याचक्षाणो—ऽभिनवभारत्यामर्थप्रकृतित्वं फलोपायत्वमिति प्रतिपादितवानभिनवगुप्त: 'संसाध्ये फलयोगे तु व्यापार' इतीमामेव भरतकारिकामुद्धरन्नर्थप्रकृतिविषय

१. रसार्णवसुधाकरस्य ३.७, ८ कारिके।
२. नाट्यशास्त्रस्य १९.२१ कारिकाया: पूर्वोत्तरार्धे विपर्यस्य।
३. नाट्यशास्त्रस्य १९.२० कारिकाया अभिनवभारती।
४. बड़ौदासंस्करणस्य द्वितीये भागे १२ पृष्ठे।

एवंमिव लोचनमातेने—

**'पञ्चावस्थाः कारणगता मुनिनोक्ताः।...। या एताः कारणस्यावस्था—स्तत्संपादकं यत्कर्त्तुरितिवृत्तं पञ्चधा विभक्तं त एव मुखप्रतिमुख—गर्भावमर्शनिर्वहणाख्या अन्वर्थनामानः पञ्च सन्धय इतिवृत्तखण्डाः सन्धीयन्त इति कृत्वाः।...। अर्थप्रकृतयोऽप्यत्रैवान्तर्भूताः। तथाहि स्वायत्तसिद्धेर्बीजं बिन्दुः कार्यमिति तिस्रः संदर्शन—प्रार्थना—व्यवसाय—रूपा अर्थे संपाद्ये कर्त्तुः प्रकृतयः स्वभावविशेषाः। सचिवायत्तसिद्धित्वे तु सचिवस्य तदर्थमेव वा, स्वार्थमेव वा, स्वार्थमपि वा प्रवृत्तत्वेन प्रकीर्णत्वप्रसिद्धत्वाभ्यां प्रकरीपताका—व्यपदेश्यतयोभयप्रकारसंबन्धी प्रकरी—पताका—शब्दाभ्यामुक्त** इति।।'

अयमर्थः। कर्त्तारो द्विविधाः मुख्याः सहायकाश्च। तयोर्मुख्यस्य स्वभावः सहायकस्य च व्यापारोऽत्रार्थप्रकृतिपदेन विवक्ष्यते। स्वभावोऽप्यत्र व्यापाराभिव्यङ्ग्य एव। न हि कस्यापि ललाटे पट्टिका लम्बते 'क्रूरोऽयं मृदुरयं कामुकोऽयं विवेकी वायमि'ति। एवं च स्वभावेऽपि व्यापार एव तात्पर्यविषयः ततश्च मुख्यामुख्यान्यतरकर्त्तृ—व्यापार एवार्थप्रकृतिरित्यायातम्। अभिनवभारत्यां कारणपदेन भोजस्येव चेतनाचेतनासाधारणं हेतुत्वं लोचने पुनश्चेतनस्यैव व्यापारमात्रत्वमर्थप्रकृतिपदेन गृहणतोऽभिनवगुप्तस्य प्रत्युपस्थिते स्वोक्तिविरोधे समाधानमपि तेनैव प्रस्तुतम्—'अर्थप्रकृतयोऽप्यत्रैवान्तर्भूता' इति। अवस्था—सन्धिभ्यामर्थप्रकृतीनामभेदमामन्वानस्य युक्तैवेयं भाष्यसृतिः। अभेद एष उचितः, युक्तिसहः, तर्कसङ्गतो वा न वेति तु भिन्नो विमर्शः। इदं तु केवलमत्र न प्रभवामो वेदितुं यदर्थप्रकृतीनां कर्तृव्यापाररूपत्वे फलरूपायाः कार्यनाम्न्या अर्थप्रकृतेः कथं नु संग्रह इति। भोजस्येवास्यापि फलयुक्तो व्यापार एव कार्यमिति व्याख्यनादृते नास्ति समाधिः। स चापि निष्फललशुनाशनप्रतिरूप एव, जन्यजनकयोः फलव्यापारयोरायुर्घृ—

तायितत्वमेव न तु सांसिद्धिकत्वम्। व्यवहारविरोधश्चात्रापरो दोषः। बीजादयो हि शब्दा लोके सामग्रीपरत्वेनैव प्रतीताः, न तु पुरुषपरत्वेन।

६. इतिवृत्तं, तत्फलं फलसाधनं चेत्येतत्त्रितयान्यतमत्वमर्थप्रकृतित्वमिति तु धनञ्जयः। तत्र पताकाप्रकर्योः प्रासङ्गिकेतिवृत्तत्वम्, त्रिवर्गरूपस्य कार्यस्य फलत्वम्, बीजबिन्द्वोश्च फलसाधनत्वम्। उक्तं चैतेन–

**(क) प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः ।**
**सानुबन्धं पताकाख्यं प्रकरी च प्रदेशभाक् ॥**

**(ख) कार्यं त्रिवर्गः।**

**(ग) स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा ।**
**अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ॥**

**बीजबिन्दुपताकाख्यप्रकरी–कार्यलक्षणाः ।**
**अर्थप्रकृतयः पञ्च ता एताः परिकीर्त्तिताः ॥**[१] इति।

अर्थपदमत्र प्रयोजनरूपं फलमितिवृत्तरूपं वस्तु चेत्युभयस्यापि कृते शक्यग्रहम्। अर्थस्य प्रयोजनस्य (फलस्य) प्रकृतिः स्वभाव इति धर्मार्थकामानाम्, अर्थस्य प्रयोजनस्य प्रकृतिः प्रसूतिः कारणमिति बीजबिन्द्वोः, अर्थस्येतिवृत्तरूपस्य वस्तुनः प्रकृतिः स्वभाव इति च पताकाप्रकर्योरर्थ–प्रकृतिपदेन शक्यत एव ततः संग्रहः। सेयं किरिपुरुषसिंहमयी मूर्त्तिः।[१] प्रणमाम एताम्।

७. धनिक[२]–विश्वनाथ[३]–विद्यानाथाः[४] पुनः 'प्रयोजनसिद्धिहेतुत्वमर्थ–प्रकृतित्वमि'–ति समानाक्षरसिद्धान्तगिरः।

एवं चार्थप्रकृतिपदं–

---

१. खर्जूरवाहे कश्मीरेभ्य आनीय धङ्गदेवेन प्रतिष्ठापिता विष्णुमूर्त्तिः।

२-४. 'प्रयोजनसिद्धिहेतव' इति सर्वेषामेषां वचनम्।

१-३. प्रयोजनोपायः, प्रयोजनोपायस्वभावः, प्रयोजनोपायव्यापार इत्येतेषु त्रिष्वप्यर्थेषु शक्तमित्यभिनवगुप्ताचार्यः प्रयोजनोपायमात्रे शक्तमिति तु धनिकविश्वनाथ–विद्यानाथाः,

४. कथाशरीरे शक्तमिति सिंहभूपालः,

५. कथाशरीरोपादानहेतौ शक्तमिति भोजशारदातनयौ,

६. नाटकशरीरे शक्तमित्यन्ये।

७. प्रयोजनं, तत्साधकं, कथाशरीरं चेत्येतत्त्रितयेऽपि प्रवृत्तिनिमित्तमिति च धनञ्जयः। सप्तार्थकत्वमेवमर्थप्रकृतिपदस्य।

एतेष्वाद्यत्रये अवस्थार्थप्रकृतिश्चेति द्वयोरभेदः, 'घटः कलश' इति–वद् व्यवहारात्। 'संसाध्ये फलयोगे तु व्यापारः कारकस्ये'ति वा प्रोच्येत 'अर्थे संपाद्ये कर्तुः स्वभावाः संदर्शनप्रार्थनाव्यवसाया' इति वा, को न्वत्र भेदः? चतुर्थे पञ्चमे षष्ठे पुनरनयोः साध्यसाधनभावः संबन्धः। तत्राप्यवस्थानां साध्यत्वं, साधनत्वं त्वर्थप्रकृतीनामिति स्थितिः। अन्तिमे तु यथायोग–मनयोर्द्वयोरेव प्रसक्तिः।

सिंहभूपाल–सागरनन्दिनोर्मते पुनरङ्गाङ्गिभावरूपः संबन्धोऽवस्थार्थ–प्रकृत्योः। तथाहि एतयोर्मतेऽर्थप्रकृतीनां कथाशरीरत्वेन फलरूपपञ्चमार्थ–प्रकृति–स्वरूपास्ववस्थासु तदवयवत्वमेव। तच्चाभेदरूपमेव प्रायेण, अवयविभूतसंपूर्णशरीराङ्गभूतहस्ताग्रावयवानामङ्गुलीनां शरीरत्वेनैव व्यवहारात्। यदि चात्र कार्यपदेनारम्भरूपो व्यापारो जिघृक्ष्यते, तर्हि 'फलं कार्यमि'–ति या स्वीया प्रतिज्ञा तस्या विरोधः।

अत्र प्रश्नः यद्यभेदस्तर्हि कथं नु व्यपदेशे भेदः। अभेदेऽपि व्यपदेशभेदो विग्लापनमात्रमेव वाचः। अथ चेतनानामपि बिन्दुपताकाप्रकरीत्वं तर्हि वासन्तिकानां सहकार–केसराशोकादीनामपि नाचेतनत्वम्, न्यायसाम्यात्। किं च कोऽयं नयो यदेक एवाभिनव एकामेव भरत–कारिकां टीकाद्वये द्विधा व्याचष्टे। न हि मथुरायां दृष्टो देवदत्तः काश्यां यज्ञदत्तायते, यज्ञदत्तो

वा पाटलिपुत्रे देवदत्तायते। व्याख्याया बुद्धिबलापेक्षत्वं नामाऽतत्त्वदर्शित्वमेव तत्त्ववादे। आस्वेवंविधासु चान्यासूपतिष्ठमानास्वापत्तिषु किन्नु प्रतिपत्तव्यम्?

अत्र ब्रूमः। प्रबन्धकाव्यमत्र विविच्यते न लोकः। प्रबन्धकाव्यं च दृष्टित्रयेण परीक्ष्यते (१) संहितादृष्ट्या (२) तदुपनिबद्धनायकव्यापारदृष्ट्या (३) नायकव्यापारजन्यफलदृष्ट्या चेति। तथाचोच्यते 'रामायणे काण्डेऽस्मिन् रामेणैवमाचरितम् उत्खातञ्च पौलस्त्यस्य कुलम्' इति। तदत्र त्रितयस्यापि यौगपद्येनैव विसर्पः काव्यसंहितायाः, चरितस्य, फलस्य च। एषु यत् फलं तस्यावस्थाऽर्थप्रकृतिपदेन, यः खलु नायकादिव्यापारस्तस्यावस्था अवस्थापदेन, या च किल काव्यसंहिताया अवस्था सा सन्धिपदेनाभिधीयते। स्पष्टमिदं बीजादिभिः प्रारम्भादिभिश्च तत्संज्ञानैः। तत्र बीजबिन्दु–पताकाप्रकरी–कार्याणि हि बीज–शाखा–पत्र–पुष्पफलात्मना ग्रहीतुमुचितानि। गृह्यन्ते च तथा सहृदयशिरोमणिना भोजराजेन। तथाहि–

**बीजमिव बीजम्। यथा बीजमुप्तमङ्कुर–मूल–प्रकाण्ड–पत्र–स्कन्ध–शाखा–प्ररोह–पल्लव–पुष्पादिना प्रकारेण बहुधा विसर्पदन्ते फलाय कल्पते तथा यो महावाक्यार्थो नायको–पनायक–प्रतिनायक–सुहृत्सहायादिव्यापारभेदाद् बहुधा विसर्पन्नन्ते फलाय जायते स बीजमित्युच्यते।।'** इति।[१]

संगृह्यते चेदमेव महामतिना शारदातनयेनैवम्–

**बीजमुप्तं यथा स्कन्धशाखापुष्पादिरूपतः ।**
**बहुधा विस्तृतिं गच्छत् फलायान्तेऽवकल्पते ।।**
**तथा नायकमित्रादिरूपोऽन्ते फलवान् भवेत् ।।** इति।[२]

अत्र दार्ष्टान्तिकेन कथाशरीरावयवाः, दृष्टान्तेन च तेषां हेतव

---

१. शृङ्गारप्रकाशस्य १२ प्रकाशे ज्योशेरसंस्करणे ४८२ पृष्ठे।

२. भावप्रकाशनस्य ७.१६२–६३ कारिका।

उपक्षिप्यन्ते। कृतपदश्चोभयत्रापि विसर्पणाख्यो विकासः। स्पष्टं चैतेन यद् बीजमेव बिन्दुरूपेण, बिन्दुरेव च फलरूपेण परिणमति। अत एव स्वायत्तसिद्धौ राजनि तिस्र एवार्थप्रकृतयः, न पञ्च। प्रसिद्धं च बिन्दुपदं तन्त्रादिष्वङ्कुरा-दिरूपेण। अस्ति च न्यायः।

**गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते ।**
**प्रधानस्योपकारे च तथा भूयसि वर्त्तते ।।** इति।

ततश्च उपनायकादीनामपि व्यापारा नायकव्यापारस्यैवोपोद्बलनेन फलं प्रति कारणत्वं भजन्ते कारकन्यायेन। एवं चोपनायकादीनामपि यत्नो नायकस्यैव यत्नतां प्रतिपद्यते।

पताकाप्रकर्योरप्यनिवार्यत्वमेव। न हि प्रासङ्गिकं विना आधिकारिक-स्यापि वस्तुनः सिद्धिः। प्रासङ्गिकत्वं हि प्रधाननायकेतरगतत्वम्। ततश्च प्रतिनायकस्य, पताकानायकस्य, देशकालसूर्यचन्द्रोदयादिरूपस्य वस्तुवर्णन-स्यापि च प्रासङ्गिकत्वमेव। न खलु न परित्याज्यानीमानि, एतानि विना प्रधानस्य वस्तुनोऽप्रसिद्धेः। रामायणे रावण—सुग्रीवादिवृत्तान्तं विना नास्ति संभवो रामवृत्तान्तसंसिद्धेः। शाकुन्तलादिषु हि दुष्यन्तशकुन्तलयोरेव वृत्तान्त आधिकारिकः। किन्तु कण्व—वैखानस—शार्ङ्गरव—धीवर—मारीचेन्द्रमेनकादीनां वृत्तान्तं विना नास्ति तस्य संसिद्धिः। उक्तं हि भोजेन **'लघुर्हि प्रकारः प्रकरीति, स च पुष्यमाल्याद्यलंकरणयोगप्राय'** इति। सन्ति च सर्वेषामेषामन्योन्याश्रितत्वम्। न हि नायकव्यापारं विना बीजादीनां विसर्पः, न वा बीजादीन् विना नायकव्यापारस्य—'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तत' इति न्यायात्। अस्ति चानयोरेव परिसमाप्तिः कथाशरीरस्य, काव्यनाट्यादिप्रबन्धात्मना प्रस्तुतस्य। एवं च त्रितयमेतद् अवस्थेत्युच्य-तामर्थप्रकृतिरिति वा। नास्ति भेदः। काव्यप्रबन्धे न लभ्यन्त एते पार्थक्येन। न ह्यवस्था अर्थप्रकृतिभ्यः पृथक्कृत्योपलब्धुं शक्येरन् न वार्थप्रकृत-योऽवस्थाः, नापि च सन्धय एतद्द्वयम्। ततश्च सत्त्वरजस्तमसामिवान्यो-न्यमेषामपृथक्स्थितिकत्वमेवानुभूतिसिद्धम्।

## (ग) सन्धि:[१]

सन्धिश्च सन्धीयमानत्वेन कथांशा इति भरतभोजाभिनवगुप्त–सागरनन्दिविश्वनाथा:[२], अवस्थार्थप्रकृतियोगो ऽपीति धनञ्जय:,[३] अवस्थार्थप्रकृतियोग एवेति तु धनिकसिंहभूपालविद्यानाथा:।[४] अस्ति च लोकेऽपि सम्बन्धस्यैव सन्धिरूपत्वेन प्रसिद्धि:, पर्वसन्धिरिति, लग्नसन्धिरिति, राजसन्धिरिति च। एवं सर्वमपि विविक्तविषयतामाढौकते। अत्रेत्थं संग्रह:–

**यत्नावस्था फलावस्था काव्यावस्था यथाक्रमम् ।**
**अवस्थेत्युच्यतामर्थप्रकृति: सन्धिरेव च ॥ १॥**

**अर्थ: प्रयोजनं तस्य स्वभाव: प्रकृति: स्मृत: ।**
**प्रयोजन–स्वभावस्य ततोऽर्थप्रकृति–श्रुति: ॥ २॥**

**अर्थ: प्रयोजनं कार्यं फलञ्चेत्यादयोऽभिधा: ।**
**वृक्षो द्रुमस्तरु: शाखीत्येवमैकार्थ्य–गर्भिता: ॥ ३॥**

---

१. द्र० अस्माकं 'नाट्यसन्धिलक्षणम्' इति लेख:। सागरिका २१.२ अङ्के।

२. भरत:–'इतिवृत्तं तु नाट्यस्य शरीरं परिकल्पितम् ।
पञ्चभि: सन्धिभिस्तस्य विभागा: परिकल्पिता ।।–(ना०शा० १९.१)
भोज: कथाशरीरभागानां मुखादय: पञ्चव्यपदेशा: (शृ० प्र० १२)
अभिनवगुप्त:–'सन्धय इतिवृत्तिखण्डा:' (ध्वन्यालोकलोचने ३.१४)
सागरनन्दी–यथाभरतम्।
विश्वनाथ:–इतिवृत्तस्य भागा: स्यु: पञ्च सन्धय: (सा० द० ६.७४)

३. (क) सन्धिसंज्ञांश्च विभागानपि खण्डयेत् (दशरूपके ३.३६)
(ख) अन्तरैकार्थसम्बन्ध: सन्धिरेकान्वये सति (दशरूपके १.२३)

४. (क) (२) कारिकाऽवलोके धनिक:
(ख) एकैकस्यास्त्ववस्थाया: प्रकृत्या चैकयैकया ।
योग: सन्धिरिति ज्ञेयो नाट्यविद्याविशारदै: ॥
सिंहभूपालो–रसार्णवसुधाकरे ३.२६।
(ग) श्री विद्यानाथो यथादशरूपकम्।

अवस्थां च स्वभावं च दशां च प्रकृतेः स्थले ।
अप्रयुज्य कृतः पन्थाः प्रशस्तोऽर्थान्तरं प्रति ॥ ४॥

[1]पारिशेष्यौचिती[2] वस्तु–[3]स्थिति-भिस्तु विचक्षणैः ।
कल्पनीयस्त्वनेकार्थ–पदैदम्पर्य–निर्णयः ॥ ५॥

ईप्सितार्थस्य यो लाभो नासौ यत्नादृते भवेत् ।
यत्नोऽपि मानसत्वेन शारीरत्वेन च द्विधा ॥ ६॥

संकल्पात्मा तयोराद्यस्तस्यारम्भ इति श्रुतिः ।
परं फलागमं यावच्चातुर्विध्येव भाव्यते ॥ ७॥

त्रिधा स शुद्धः पाकाभिमुखः पक्व इति क्रमात् ।
उपाययोजनारूपः शुद्धोऽपायेन मिश्रणात् ।
पाकाभिमुख्ये द्वैविध्यं नैराश्याऽऽशाभिबृंहणात् ॥ ८॥

तत्र नैराश्य–मुख्यत्वे प्राप्त्याशात्वमिहेष्यते ।
आशायाः प्रमुखत्वे तु नियताप्तित्वमुच्यते ॥ ९॥

नियताप्तिं निरुद्धाप्तिरिति केचन मन्वते ।
तच्च तर्कविरुद्धं च पारम्पर्येण चामतम् ॥ १०॥

अपायाभावतः प्राप्तिर्नियताऽऽप्तिरिति क्रमात् ।
नाट्य–लक्षण–वेधोभिः सर्वैरेवाश्रिता सृतिः ॥ ११॥

निरोधेऽपि फलं नेता लभते यदि कीदृशः ।
फलागमः पुनस्तस्य भ्रंशसंदेह–दूषणात् ॥ १२॥

---

१. अवस्थादि–शब्दान्तरार्थपारिशेष्येण।

२. बीजादिशब्दानां लौकिकार्थानुसरणम् औचिती।

३. वस्तुनि कथाशरीरे या स्थितिः तया।

किञ्च निर्वहणे सर्वैः शान्त एवेष्यते रसः ।
निरोधे सति लाभस्तु फलस्याश्चर्यकृद् भवेत् ॥ १३॥

प्रतिबन्धक–सद्भावे हेतोः कार्यं क्व जायते ।
अन्यथाऽऽर्द्रोऽपि कक्षः स्यादग्नेरुत्पादने क्षमः ॥ १४॥

निरुद्धाप्तिरिति व्याख्या प्राप्त्याशामेव चुम्बति ।
नियताप्तिरिति व्यर्था तस्मात् संजायते दशा ॥ १५॥

यत्नस्य पञ्चधाऽऽयामः फलपर्यन्तमीक्ष्यते ।
आरम्भ-यत्न-प्राप्त्याशा-निश्चिताप्ति-फलाप्तिभिः ॥ १६॥

फलार्थं यतमानानां यत्नस्यैता उदीरिताः ।
अवस्थाः पञ्च ता एता नाटकेष्वपि लक्षिताः ॥ १७॥

फलस्वभाव इत्येवमर्थप्रकृतिरिष्यते ।
यत्नस्वभावश्चावस्था परस्परमिमे श्रिते ॥ १८॥

अवस्था नेतृ–यत्नोऽसौ क्रियेति प्रविभाव्यताम् ।
अर्थस्य प्रकृतिः किञ्च कर्मेति न्याय–पण्डितैः ॥ १९॥

पचिक्रियायां कर्मत्वं तण्डुलादेर्यथा, यथा ।–
व्यापारस्य क्रियात्वं च तथाऽत्रापि व्यवस्थितिः ॥ २०॥

अमुख्ययोजनां मन्ये न्यायद्वयसमाश्रिताम् ।
बीजाङ्कुर–नदीनद्यन्तर–न्यायौ च ताविमौ ॥ २१॥

नदी–नद्यन्तरन्यायान्मुख्यामुख्यभिदा तु या ।
कथा–कथान्तर–द्वन्द्वस्तया कामं निरूप्यताम् ॥ २२॥

नद्यां नद्यन्तराणीव कथायां संपतन्तकि ।
कथान्तराणि तानि स्युर्भिन्नस्रोतांसि मुख्यतः ॥ २३॥

यथा रामायणे बालिसुग्रीवशबरीकथाः ।
कथा वा मकरन्दस्य मालतीमाधवे यथा ।। २४।।

यस्मिन् कथान्तरं नास्ति काव्ये तस्मिँस्तु केवलः ।
बीजाङ्कुरफलन्याय एष मान्यो मनीषिभिः ।। २५।।

अर्थप्रकृतिरप्यत्र पञ्चधा परिकीर्त्यते ।
वृक्षौपम्येन तामेतां प्रमिण्वन्ति सुमेधसः ।। २६।।

बीजं, काण्डं च, शाखा च, प्रसूनं, फलमेव च ।
वृक्षस्य प्रकृतिस्तद्वत् कथार्थस्यापि भाव्यते ।। २७।।

तत्र बीजं यदाश्रित्य कथार्थः संप्रवर्त्तते ।
आम्रादि-बीज-सादृश्यात् तस्य बीजमिति श्रुतिः ।। २८।।

बीजं बिन्दुपताकादिक्रमाद् याति फलात्मताम् ।
अतो बीजाङ्कुरन्याय एव मुख्यो विचारणे ।। २९।।

अङ्कुरस्तस्य बिन्दुः स्यात् तन्त्रदर्शनयोरिव ।
नाट्यशास्त्रेऽपि संज्ञेयं समप्रज्ञरूपाश्रिता ।। ३०।।

तस्मिन्नवान्तरानेक—प्रसङ्ग—परिपोषिते ।
फलमुन्मील्यते यस्माच्चातुर्विध्यं भजत्यसौ ।। ३१।।

बिन्दुः पताका प्रकरी—फलागम इति क्रमात् ।
काण्ड—शाखा—प्रसूनैश्च फलैश्च सदृशा अमी ।। ३२।।

फल—व्यापारयोरेवं नेतुर्भरतदर्शने ।
अर्थप्रकृत्यवस्थात्वं व्यवच्छिन्द्युः पुराविदः ।। ३३।।

बीजारम्भौ बिन्दुयत्नौ पताकाप्राप्तिसंभवौ ।
प्रकरीनियताप्ती च कार्य—कार्यागमौ तथा ।। ३४।।

निर्मिमाते कथांशं यं स सन्धिरिति कथ्यते ।
यथाक्रमं मुखाद्याश्च तस्य भेदाः प्रकीर्त्तिताः ।। ३५।।

तिस्र एव त्ववस्थाः स्युः प्रमुखास्तद्वदेव च ।
अर्थप्रकृतयस्तिस्त्रस्त्रय एव च सन्धयः ।। ३६।।

बीजारम्भमुखं बिन्दुयत्नप्रतिमुखं तथा ।
सोपसंहृतिकौ सन्धित्रयं कार्य—फलागमौ ।। ३७।।

परस्मिंल्लीयते पूर्वपूर्वमत्रेति चान्तिमे ।
समेषामेव संहारः प्रकृतौ विकृतेर्यथा ।। ३८।।

बीजं बिन्दौ फले बिन्दुर्बीजं चापि फले ततः ।
यत्ने प्रारम्भ एवं स्याद् यत्नश्चापि फलागमे ।। ३९।।

फलागमेऽपि प्रारम्भस्तस्मान्नित्यं कृतास्पदः ।
मुखं गर्भे स निर्वहे, निर्वहेऽपि मुखं ततः ।। ४०।।

पताका प्रकरी चैव बिन्दोरेव विसर्पणम् ।
प्राप्त्याशा निश्चिताप्तिश्च यत्नस्यैव विवर्त्तनम् ।। ४१।।

मुखे प्रतिमुखं गर्भे विमर्शश्च विलीयते ।
सन्धीनामपि पञ्चानां त्रैविध्यं गुणवत् ततः ।। ४२।।

एवं सन्धाववस्था स्यादवस्थायामथो भवेत् ।
अर्थप्रकृतिरेतच्च त्रितयं काव्यविग्रहे ।। ४३।।

अव्यक्तयति यद् व्यक्तं स्वस्मिन्नव्यक्तमस्ति तत् ।
व्यक्ताव्यक्तक्रमादेवं नाट्यसर्गो विभाव्यते ।। ४४।।

पताका प्रकरी स्यातां न वेति यदुदीर्यते ।
तत्तु तत्त्वमनालोच्य स्थाणोः प्रेप्सा फलस्य सा ।। ४५।।

प्रासङ्गिकं विना कुत्र मुख्यं वस्तु प्रसिद्ध्यति ।
विना सूदं विना हस्तौ यद्वा पाकः क्व दृश्यते ।। ४६।।

इति।।

## नाट्यप्रयोगे कुतपविन्यासा:[१]

शास्त्रान्तरेषु 'कुश:, मुहूर्त्तभेद:, अपराहण:, मध्याह्न:, एकोद्दिष्टश्राद्धकाल:, खड्गपात्रम्, नेपालकम्बल:, छागरोमकम्बल:, रौप्यम्, तिल:, वृषभ:, दौहित्र:, भागिनेय: सूर्य:, द्विजाति:, ब्राह्मण:, अग्नि:, अतिथि:, धान्यविशेषश्चे[२]—त्येतेष्वर्थेषु प्रसिद्धोऽपि कुतपशब्दो नाट्यशास्त्रे वाद्यवृन्दपर:।[३] व्युत्पादयन्त्यमु विज्ञा: कुं भूमिं तपती'—ति खचो योगेन, नुमोऽभावे आगमविधेरनित्यत्वं प्रमाणीकृत्य। कुत्सितं तपतीत्यस्यापरा व्युत्पत्ति:[४], कुतं शब्दं पातीति चान्या। नाट्यप्रयोगसन्दर्भे पुन: को: रङ्गापरपर्यायाया नाट्यभुव औज्ज्वल्यरूपात् तापनात्, कुतस्य भारतीवृत्तिसतत्त्वस्य शब्दस्य पानाद् वा कुतपत्वमित्यभिनवगुप्तनाथ:।[५] भरत: पुनरत्र बद्धमौन:।

द्विविधानि हि वाद्ययन्त्राणि वादकेन समवेतानि, संयुक्तानीति च।

---

१. संदर्भार्थमधिकृता अत्र नाट्यशास्त्रस्य बड़ौदाप्रकाशिताश्चत्वारो भागा:।

२. अमरे भानुजि:, मेदिनी, अनेकार्थसंग्रह:, हलायुध:, शब्दकल्पद्रुम:, आप्टे, कुतुप: कुतप इत्यभिन्नार्थकौ शब्दाविति मॉनियर:।

३. 'चतुर्विधातोद्यभाण्डानि कुतप:' ना.शा. ३.१२ अभिनवभारती आतोद्यसंबन्धिनो गायनवादकसमूहस्य कुतपत्वम्। तथा चाभिनवगुप्त:—'कुतप: संफेटक (:) गायनवादकसमूह:' इति ना.शा. २.८२ अ.भा.। वाद्यवृन्दमेव कुतप इति तु तृतीयाध्याये संगीतरत्नाकर:।

४. 'पापं कुत्सितमित्याहुस्तस्य संतापकारिण: कुतपा'—मिताक्षरा, 'दिवस स्याष्टमे भागे मन्दीभवति भास्कर:। स काल: कुतपो ज्ञेय:।' शातातप:, अमरे च भानुजि:।

५. कुतं शब्दं पाति, कुं रङ्गं तपत्युज्ज्वलयतीति कुतप: (ना.शा. २८.२ अ.भा.), कुर्नाट्यभूमि:, तां तपत्युज्ज्वलयतीति कुतप:, कुतं शब्दं पातीत्यन्ये (ना.शा. २८.२ अ.भा.)

तत्राद्यानि गातु: शरीरादपृथग्भूतानि, यथा कण्ठो ग्रामरागादौ करतलाङ्गुल्यादिकं च चञ्चत्पुटादौ। अपराणि पुन: प्रतीतान्येव ततावनद्ध–घन–सुषिरत्व–लक्षण–महाजातिपरिगतत्वेन, विपञ्चीत्वादि–तद्व्याप्य–जातिपरिगतत्वेन च। अत्रापि कण्ठादीनां 'विपच्य घटो भवती' त्यादौ विपाकादिपौर्वकाल्य–निरूपकाणां घटनादीनामिवाव्यक्तत्वम्, अपरेषां पुनर्व्यक्तरूपत्वमेव 'स्नात्वा पीत्वा गच्छती'–त्यादौ स्नानादि पूर्वकालत्वनिरूपकाणां गमनादीनामिव। एवं च गायनस्यापि वादकत्वमेव। कुतपे वादका अपि न न संगृह्यन्ते तथापि वादनक्रियाया एवात्र तात्पर्यविषयत्वाद् वाद्यानामेव प्राथमिकत्वम्, गुणीभूतत्वं च वादकानामित्येव घण्टापथ:। अत एव व्याहार: 'कुतपविन्यास' इति। विन्यासो नाम स्थानविशेषसंनिवेश:, स च वस्तूनामेव भवति, न पुरुषाणाम्। द्विविधो हि कुतप: आतोद्याश्रित:, नाट्यप्रयोगाश्रितश्चेति। आतोद्यमपि द्विविधं मधुरत्वेनाविद्धत्वेन च। तत्राद्यं ततमित्युच्यते। तन्त्रीवाद्यानां तत्र संग्रह:। अपरं चावनद्धमिति। स च संग्रह: पणवादीनाम्। घनसुषिरयोश्च क्रमेणावनद्ध–तत–योरेव संग्रह:, अवहननतननक्रिययोरविशेषात्।[१] अवहननमेव हि कांस्यतालादिरूपस्य घनस्यापि विपाक: पणवादीनामिव। एवमेव तननमेव वंशादीनामपि वीणादीनामिव। एवं चातोद्याश्रित: कुतपोऽपि द्विविध: १. ततकुतप: २. अवनद्धकुतपश्चेति। नाट्यप्रयोगाश्रित: पुनरेक एव 'नाट्यकुतप' इति।

तत्र तते कुतपे 'गायन:, तस्य पत्नी, विपञ्चीवादक:, वीणावादक:, वेणुवादक'श्चेति पञ्चाङ्गानि। यदुक्तं मुनिना–

**तत: कुतपविन्यासो गायन: सपरिग्रह: ।[२]**
**वैपञ्चिको वैणिकश्च वंशवादस्तथैव चे ।। ति।**

–ना०शा० २८.४

---

१. ना.शा. २८०३ अभिनवभारती–

२. परिग्रहो गायनस्य पत्नी–ना.शा. २८.४ अ.भा.

अवनद्धकुतपस्याङ्गानि—'मादर्ङ्गिकः, पाणविकः, दार्दरिक'श्चेति त्रीणि। मुनिनैव—

**मादर्ङ्गिकः पाणविकस्तथा दार्दरिकोऽपरः ।**
**अवनद्धविधावेष कुतपः समुदाहृतः ।।** इति।

ना.शा. २८.५

सातोद्याभिरुत्तमाधममध्याभिस्तिसृभिः प्रकृतिभिरन्वितस्तु नाट्यकुतपः। तथा च मुनिः—

**उत्तमाधममध्याभिस्तथा प्रकृतिभिर्युतः ।**
**कुतपो नाट्ययोगे तु ।।** इति।

ना.शा. २८.६

त्रिविधोऽप्येष कुतपो भूयोऽपि द्विविधः समग्राङ्गत्वेन, असमग्राङ्गत्वेन, नियतदेशस्थत्वेनानियतदेशस्थत्वेन च। तत्रानियतदेशो नाट्यकुतपः, तत्र नाट्यप्रयोगपात्रैः साकमातोद्यसहितानामुत्तमप्रकृतिकादित्रिविध—वादकानामपि रङ्गपीठे पार्श्वकक्ष्यासु वा चारीविधानात्। अत एव नानादेशसमुद्भव—त्वमाम्नायतेऽस्य भरतेन—'कुतपो नाट्ययोगे तु नानादेशसमुद्भव' (ना.शा. २८.६) इति वाक्यशेषेण।[1]

नियतदेशगतः पुनर्नेपथ्यगृहद्वारयोर्मध्ये स्थितः। उक्तं हि भरतेन—

**(क) ये नेपथ्यगृहद्वारे मया पूर्वं[2] प्रकीर्त्तिते ।**
**तयोर्भाण्डस्य विन्यासो मध्ये कार्यः प्रयोक्तृभिः ।।** इति

ना.शा. १३.२

**(ख) उपविष्टे प्राङ्मुखे रङ्गे कुतप एव विन्यासः कर्त्तव्यः। तत्र[3]**

---

१. देश शब्दोऽत्र रङ्गपीठस्थानपर इति अभिनवगुप्तः कर्णाटादि—जनपद—विशेषपर इति तु तृतीयाध्याये संगीतरत्नाकरकारः।

२-३. द्वितीयेऽध्याये 'कार्यं द्वारद्वयं तत्र नेपथ्यगृहकस्य चे'—ति ६९ कारिकया। 'एकं दक्षिणतः' अपरमुत्तरत' इति च तत्राभिनवः।

पूर्वोक्तयोर्नेपथ्यगृहद्वारयोर्मध्ये कुतपविन्यासः कार्यः। तत्र पूर्वाभिमुखो मौरजिकः, तस्य पाणविकदार्दरिकौ वामतः। एष प्रथममवनद्धकेन। तस्य (ततस्) ततः कुतपविन्यास उक्तः। तत्रोत्तराभिमुखो गायकः (नः) तस्य वामपार्श्वे वैणिकः, वैणिकस्य दक्षिणेन वंशवादकौ, गातुरभिमुखं गायिकाः। इति कुतपविन्यास।। इति

ना.शा. ३४.२१४–वृत्तिः

**समग्राङ्गत्वं** नाम सर्वेषां भरतोक्तानामङ्गानां परिग्रहः, एकस्य द्वयोर्वाङ्गयोः परिग्रहश्चा**समग्राङ्गत्वम्**।

नाट्यप्रयोगविधिरपि द्विविधः चित्रत्वशुद्धत्वाभ्याम्। तत्रोद्रिक्तगीत–वाद्यनृत्यमिश्रत्वं चित्रत्वं[1], तद्भिन्नत्वं च शुद्धत्वम्। प्रयोगोऽपि द्विविधः पूर्वरङ्गरूपो रङ्गरूपश्चेति। एवं च द्वे द्वे विधे प्रयोगद्वयस्येति चातुर्विध्यमुपपन्नं नाट्यप्रयोगस्य। स्पष्टमिदं मुनिवचनैरेव–

मयापीदं स्मृतं नृत्यं सन्ध्याकालेषु नृत्यता ।
नानाकरणसंयुक्तै रङ्गहारैर्विभूषितम् ।
पूर्वरङ्गविधावस्मिन् त्वया सम्यक् प्रयोज्यताम् ।। ४.१३.१४।।

यश्चायं पूर्वरङ्गस्तु त्वया शुद्धः प्रयोजितः ।
एभिर्विमिश्रितश्चायं चित्रो नाम भविष्यति ।। ४, १५.१६

एवं गानं च वाद्यं च नाट्यं च विविधाश्रयम् ।
अलातचक्रप्रतिमं कर्त्तव्यं नाट्ययोक्तृभिः ।।[2]

पूर्वं गानं ततो वाद्यं ततो नृत्यं प्रयोजयेत् ।
गीतवाद्याङ्गसंयोगः प्रयोग इति संज्ञितः ।।[3]

---

१. ना.शा. ५.१४९–१५७ प्रभृतिषु।

२. ना.शा. २८.७।

३. ना.शा. ३२.३७८।

एवमेष प्रयोक्तव्यः पूर्वरङ्गो द्विजोत्तमाः ।
त्र्यस्रश्च चतुरस्रश्च शुद्धो भारत्युपाश्रितः ॥[१]

एवं तावदयं शुद्धः पूर्वरङ्गो मयोदितः ।
चित्रत्वमस्य वक्ष्यामि यथा कार्यं प्रयोक्तृभिः ॥[२] इति।

मिश्रत्वमनयोरेव चित्रशुद्धयोः परिसमाप्तकृत्यमिति न तत् पृथगुपपाद्यते।[३] अत्र अलातचक्रं नाम एकस्मिँश्चक्रे प्रदीप्तानमनेकासां दीपशिखानां भ्रमिजनितमेकत्वेनावभासनम्। तत्र वस्तुगत्या भिन्नानामपि यथा प्रतीतावभिन्नत्वं तथैव वाद्यादीनामपि। तत्र हि संवाद एव जीवातुः। गीतवाद्याङ्गपदेऽङ्गपदमङ्गहारस्यैकदेशः। ततश्च प्रयोगो नाम चित्रप्रयोगः। भारती वाग्व्याहारः। एवं च वाङ्मात्रप्रयोजितः शुद्धः, गीतवाद्याङ्गहारमिश्रितश्च चित्रः प्रयोग इत्यायातम्। उद्रिक्तत्वनिवेशे पुनरयमभिप्रायः—सर्वं एव ध्वनिः स्वरत्वापरपर्यायनादत्वव्याप्यजात्यवच्छिन्नः, सर्वश्च काकु—रूपारोहावरोह—संभिन्नः। आरोहावरोहौ पुनस्ताललयाद्यनुगतौ। एवं च सर्वोऽपि नादः स्वरात्मा, स्वरश्च संगीतात्मेति नान्तरीयकमेव संगीतत्वं नादमात्रस्य तदभिन्नाभिन्नस्य तदभिन्नत्वनियमात्। एष शब्दः एतत् संगीतमिति व्यवहारः पुनस्ताललयाद्युद्रेकमात्रकृत इति।[४]

तत्र चित्रे पूर्वरङ्गप्रयोगे समग्राङ्गस्य त्रिविधस्यापि कुतपस्य विन्यासः, नाट्यकुतपस्यापि चित्रनान्द्यां संगृहीतत्वात्। एवं च नेपथ्यगृहद्वारयोर्मध्ये

१. ना.शा. ५.१४८।

२. ना.शा. ५.१४९।

३. नाट्यशास्त्र—पञ्चमाध्याय परिशेषे।

४. अस्माकमलङ्कारकारिका।

गद्यबन्धेऽपि संगीतकलास्पर्शो न हीयते ।
शब्दो नादात् पृथङ्नास्ति नादश्चापि स्वराद्यतः ॥

—९८ कारिका

गायन–सहितयोर्घनसुषिरसहयुज्वनोश्च ततावनद्धयोः, पीठे च सातोद्याङ्गहाराणाम् 'एवमार्ये' त्यनुव्याहारिणां पारिपाश्र्वक–सूत्र–धारान्यतर–कृते नान्दी–पाठे समायोजनाच्च नाट्यकुतपस्य संग्रहः।[1] शुद्धे पुनः पूर्वरङ्गप्रयोगे द्वावेव कुतपौ ततोऽवनद्धश्चेति, नाट्यकुतपस्या–ऽत्रानुपयोगात्। शुद्धत्वेऽपि पूर्वरङ्गे कुतपस्य समग्राङ्गतायामपि नास्ति क्षतिः। असमग्राङ्गता पुनर्गुण एव। प्रस्तावनान्ते पूर्वरङ्गे दृश्य एवैष सम्पूर्णोऽपि कुतपः कात्स्न्र्येन, रङ्गपीठ–रङ्गशीर्षविभाजिकाया यवनिकाया विघटनात्।[2]

मुख्ये तु रङ्गे चित्र–शुद्धत्वे प्रयोज्यवस्तु–प्रकारनिर्धार्ये। तत्र यानि रसप्रधानानि दशरूपकाणि तेषु प्रारम्भात् परिसमाप्तिं यावन्न भवति सर्वेषामपि चित्रविधि–पात्रत्वम्, शाकुन्तलादिषु तदसंभवात्। शाकुन्तलस्य चतुर्थेऽङ्के न खलु शक्यप्रयोगोऽङ्गहारललितो नृत्यहेवाकः, न वा संभवी तननावहननयोरेव समभ्यर्धिको व्यायोगः। अतएव मुनेरनुशासनम्–

**कार्यो नातिप्रसङ्गोऽत्र नृत्यगीतविधिं प्रति ।**
**गीते वाद्ये च नृत्ये च प्रवृत्तेऽतिप्रसङ्गतः ।।**

**खेदो भवेत् प्रयोक्तृणां प्रेक्षकाणां तथैव च ।**
**ततः शेषप्रयोगस्तु न रागजनको भवेत् ।।** इति

ना.शा. ५.१५७–१६०

पूर्वरङ्ग एव यदा एतावदनुशासनं, का वार्त्ता तदा मुख्यस्य रङ्गस्य। मालविकायाश्छलिके[3] प्रयोगस्य चित्रत्वमेव पुनरधिकं हारि, पुरूरवसश्च

---

१. ना.शा. ५.१०४–१०९।

२. ना.शा. ५.१२।

ततः सर्वैस्तु कुतपैः संयुक्तानीह कारयेत् ।
विघट्य वै यवनिकां नृत्तपाठ्यकृतानि तु ।।

३. मालविकाग्निमित्रस्य द्वितीयेऽङ्के।

विप्रयोगे।[१] अत्रापि नाट्यकुतपस्य नोपयुज्येत प्रसरः। 'भाणः, वीथी, प्रहसनं, नाटिका, ईहामृग' इत्येतेषु ततकुतपस्य, डिमव्यायोग–समवकारेषु चारभटीप्रधानेषु अवनद्धकुतपस्य प्राधान्यमुत्प्रेक्ष्येत, तदङ्गत्वं चान्यस्य। प्रकरणेषु पुनर्नाटकवदेव स्थितिः।

रूपकेष्वेषु समेषामेव कुतपानामानिर्वहणं समग्रेऽपि प्रयोगे प्रयोग इति न शक्यते निर्बन्धुम्, जीवातुभूताया रसधाराया विच्छेदस्य प्रसङ्गात्।

एवमेव शुद्धत्वमेव कुतपानां युक्तं मुख्ये रङ्गे, चित्रत्वमिव पूर्वरङ्गे। चित्रत्वमिव समग्राङ्गत्वमपि कुतपानां नातिप्रयोजनकं मुख्ये रङ्गे, ध्रुवाप्रयोगार्थं ततावनद्धयोरन्यतरस्याप्यन्यतमेनाप्यङ्गेन दीपनक्रियाया निष्पत्तेः।

नास्ति चैतेषां चित्रे शुद्धे वापि प्रयोगविधौ नेपथ्यगृहद्वार–द्वय–मध्यस्थितिकत्वमेव कुतपानां, मत्तवारण्योरपि तेषां व्यवस्थाया जागरूकत्वात्। अतएव 'रङ्गपीठस्य तिसृषु दिक्षु कुतपसन्निवेश'[२] इति, तत्रभवानभिनवगुप्तः। रङ्गशीर्षमध्यगतत्वे वाचोयुक्तेरस्या अनुत्थानपराहत्वमेव। न चात्रान्यथाकारेण स्थितोऽभिनवभारतीपाठः, कक्ष्याविभागप्रकरणारम्भकारिकाया वृत्तावपि 'वामदक्षिणभागयोः कुतपस्य विन्यासः, शिष्टे कक्ष्याविभाग'[३] इति मतस्यास्यैवमेवोपलम्भात्। नेपथ्यगृहद्वारद्वयमध्यगतत्वमत्र द्वितीयभूमिगत–त्वमेव। अस्ति हि रङ्गवेदिकाया द्विभूमित्वम्।[४] तत्रैका भूमिः पीठरूपा, अपरा च मत्तवारणीरङ्गशीर्षरूपेणावशिष्टा परिक्रमाभूमिः।[५] पीठभूमौ दर्शनीयस्येव परिक्रमाभूमावदर्शनीयस्य वस्तुजातस्य व्यक्तिजातस्य वा कक्ष्याविभागेनावस्थानमिति चात्र दृश्यश्रव्य–प्रविभागः। अतश्च मत्तवारणीगर्भयोः प्रच्छन्नत्वमेव, न प्रकाशत्वम्, अतश्च न तत्र

१. विक्रमोर्वशीयस्य चतुर्थेऽङ्के।

२. ना.शा. ५.२ अ.भा.।

३. ना.शा. १३.१ अ.भा.।

४-५. 'द्विभूमिर्नाट्यमण्डप' इति ना.शा. २.८०, अ.भा.।

प्रयोगविधानम्, तत्र प्रेक्षकाणां दृष्टेरप्रसरात्। दृश्यत्वे च मत्तवारण्यामपि पीठत्वप्रसक्तिः, अनुपपन्नश्च सर्वसंमतः प्रविभागः पीठवारण्योः।[१]

अस्ति च रङ्गशीर्षस्य वैकल्पिकत्वम्, कुतपविन्यासस्येव तत्र प्रयोगविधानस्याप्यनुमतेः। अतएव मालविकाछलिके पीठं नेपथ्यं चेति द्वे एव भूमी।[२] अतएव च प्रतिमानाटकादौ दशरथशवादिप्रवेशस्य संभवः। 'रङ्गशीर्षमात्रे कुतपविन्यास इति पक्षे त्वेवंविधानां प्रकरणानाम–शक्यसंभवमेवोपस्थापनम्। मत्तवारणीगतत्वेन व्यवस्थायां तु प्रसरतितरां चातुरस्त्री सर्वेषामप्येषाम्। नोचितश्च निर्बन्धः श्रव्यस्य कुतपस्य दृश्यतायै, ततश्च तस्य रङ्गशीर्षमात्रगतत्वेन व्यवस्थायै। श्रव्यता च न नाम व्याहन्येत मत्तवारणीगतत्वेनापि कुतपानाम्।

एवं प्रयोगविधेश्चित्रत्वमिव कुतपस्यापि समग्राङ्गत्वं, नियतदेशगतत्वं, दृश्यत्वं च रसप्रधानेषु रूपकेषु न ह्येव भजन्ति सर्वाङ्गव्यापित्वम्, एकदेशगतत्वं पुनर्न नानुमन्येत। श्रीगदितादिषु तु नास्ति क्षतिः सर्वाङ्गव्यापित्वेऽप्येषाम्।

अयमत्र निष्कर्षः–

'कुतुपापरपर्यायस्य त्रिविधस्यापि कुतपस्य आसमाप्ति स्थायित्वं, नियतस्थानस्थितत्वं, समग्राङ्गत्वं, दृश्यत्वं च पूर्वरङ्गस्यैव चित्रेष्वेव प्रयोगेषूपपद्यते, अन्यत्र पुनरागमापायित्वं प्रच्छन्नत्वं रङ्गशीर्षमत्तवारणी–साधारण्येन स्थितत्वं चेति।।

◈

---

१. ना.शा. २.६४, ९९।

२. मालविकाग्निमित्रस्य द्वितीयेऽङ्के 'नेपथ्यगृहगतायामि'ति श्लोकः।

## संस्कृतकाव्यशास्त्रं ब्रह्मविद्या[1]

जयत्यमरभारतीसुरलतालवालो महा—
मतिद्विजसमेधितो जयपुराभिधस्तीर्थराट् ।
समुच्चरति सर्वशः सकलशास्त्रमन्थोत्थितो
यतः समुदयो महान् मधुरमाधुरीविप्रुषाम् ।।

सनातन इति श्रुतः श्रुतिपथो महानुच्चकैर्
यतः प्रसरति क्षितौ तदिदमादिकेन्द्रं महत् ।
कवित्वकलनामयी भगवती सरीसर्त्ति न—
र्नृतीति च पराम्बिकाभ्रुकुटिभङ्गिमा यत्र नः ।।

भवन्ति नगरेऽत्र वै विविधवैवुधीमण्डिताः
प्रचण्ड—घन—गर्जित—प्रतिरुतानुकारि—स्वराः ।
महामहिममण्डिताः गिरिधरादयः पण्डिताः
भवन्ति खलु वाग्मिनां वरतया प्रसिद्धाश्च ये ।।

विकल्प इदमेव वै नगरमस्ति काश्याः श्रुतौ
पतञ्जलिगिराञ्चयेऽप्यथ च साहितीमण्डने ।
अतो हि नगरान्तरं नहि जगाम पेरोः सुतो
विहाय ननु काशिकां प्रचलितो यदा दिल्लिकाम् ।।

पेरोः सुतः पण्डितराजो जगन्नाथः ।

स्मरामि कवितल्लजा इह हि मञ्जुनाथाः स्फुर—
त्पदार्थविविधच्छटा अकवयन्त काव्योत्तमान् ।

---

१. जयपुरस्थे राजस्थानसंस्कृतविश्वविद्यालये विशिष्टव्याख्यानमालायां ४.३.२००५ दिने कृतं व्याख्यानम्

इहैव खलु साम्प्रतं निखिलमार्गलेखोत्तमान्
प्रकाश्य विलसन्ति वै कविवराः कलानाथिनः ।।

महर्षिमधुसूदनोऽप्यभवदत्र यस्यान्तरे
प्रकाशमगमन् समे निगमराशयः प्राञ्जलाः ।
ऋषिः कविरुदारधीर्व्यरचदेष पद्योत्तमैः
शतं सुरसरस्वतीधृतकलेवरान् ग्रन्थकान् ।।

अभूदिह हि मेधया विरलया समुल्लासितः
स कोऽपि विबुधोत्तमः सपदि मुक्तरक्ताह्वयः ।
बभूव वशवर्त्तिनि निखिलवाणिजीनिर्गता
चलापि च समुद्रजा भगवती स्थिरा यत्र वै ।।

मुक्तरक्तः मोतीलालशास्त्री मानवाश्रमनिर्माता ।

इदंक्षण उपस्थितः स खलु सत्यदेवः सुधी–
र्बभार वशवर्तितां निगमराशिरप्यस्य सः ।
मृषेति कलिते जगत्यतिशयाञ्चिते येन वै
सिषाधयिषितं किमप्युचितवर्त्म मायाविनाम् ।।

अहं खलु साहित्यशास्त्रस्याध्येता। एतदेव शास्त्रमधिकृत्य विरचितो मया नूत्ननूत्नो ग्रन्थः ''संस्कृतकाव्यशास्त्र का आलोचनात्मक इतिहास'' इति। अपूर्व एष ग्रन्थः, पूर्व्वसूरिभिर्यदननुष्ठितं तस्यानुष्ठानात्। पूर्व्वसूरयश्चास्माकं काणे इति विदिताः वामनसूनवो महामहोपाध्यायाः पाण्डुरङ्गाः। अपरे च डॉ० सुशीलकुमारडेमहोदयाः, श्रेष्ठिप्रवराः श्रीमन्तः कन्हैयालालपोद्दाराश्च। एतैः संस्कृतकाव्यशास्त्रे–तिहासे ये ग्रन्थाः प्रकाशितास्तेषु काव्यशास्त्रस्यास्यान्तिमा सीमा पण्डितराज एव। एतेन प्रचारो भवति नास्ति ततः परं काव्यशास्त्रग्रन्थकर्त्तृपरम्परेति। वस्तुतस्तु परम्परेयमद्य यावदपि श्वसिति।

अत एव मम व्याख्यानस्य विषयः संस्कृतकाव्यशास्त्रे नैरन्तरीति। संस्कृतकाव्यशास्त्रमधिकृत्य भूयानेव प्रवादः खण्डितप्रसरमेतदिति। तस्तुतस्तु प्रवादमात्रमिदम्। नासौ भूतार्थः। नैरन्तरीमेव तु पश्यामः प्रारम्भत एवात्र। तथाहि—

१. नाट्यशास्त्रकृतो महामुनेर्भरतात् पूर्वं प्राप्तप्रतिष्ठं यद् वाङ्मयं तत्र प्राधान्यमश्नुते तत्रभगवान् वेदोऽपौरुषेयशब्दराशिरूपः। सन्ति चास्य चरमा भागा उपनिषदिति वेदान्त इति च प्रतीताः। वेदान्ताश्च नैके। किन्तु सर्वेष्वप्येषु एकवाक्यार्थत्वमस्ति कृतपदमित्येषां समेषामप्येकत्वमेव प्रसिद्धम्।

को वा वेदान्तानां वाक्यार्थो यत्रैकत्वमाजिगमिष्यत इति चेद् ब्रह्मवाद इति गृह्येत।

अथ को वा सम्बन्धो वादेनानेन काव्यशास्त्रस्य?

स एव य उपनिषदाम्।

कथमिति चेदेवम्

अस्ति समुद्घोष उपनिषदाम् "**आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्ति।** तस्मादानन्दं **ब्रह्मे**"—ति विजानीहि। अत्र पृच्छा "सोऽयमानन्दब्रह्मवादो भरतात् पूर्वमिव पश्चादपि भारतीयेषु कृतपदमतिष्ठन्नवेति"।

कृतपदमेवातिष्ठदित्युत्तरे भग्नो वः पक्षः "काव्यशास्त्रस्यावधि।विशेषे व्युच्छिन्नतामुत्प्रेक्षमाणानाम्", आनन्दब्रह्मसिद्धान्तस्य भारतीयायां मनीषायां स्थायित्वेनैव सर्वेष्वपि विचारक्षेत्रेषु जागरूकत्वात्। लोक इव वेदे, वेद इव च साहित्ये आनन्दवादस्याविशेषेणैव प्रतिष्ठितत्वात्। संस्कृतभाषयोपनिबद्धस्य काव्यशास्त्रस्यापि तात्पर्यभूतं तत्त्वं तदेव यदर्थं प्रसिद्धाः सन्त्यस्माकमुपनिषदः। भारतीयायां भुवि प्रादुर्भूतं यत्

काव्यशास्त्रं तद्धि ब्रह्मविद्यैव सामग्न्येण, ततश्च काव्यजातमपि विशुद्धिमुग्धा वेदान्तविद्यैव भगवती। नायमर्थवादः। उपपत्तिरप्यत्र जागर्त्ति। तथाहि–

किमागमकं काव्यशास्त्रमिति प्रश्ने केवलमेकमेवोत्तरं सर्वसहसामर्थ्यमुपलभामहे अग्निपुराणागमकमिति। अस्ति चाग्निपुराणे वचनम्–(३३९.१)

**अक्षरं परमं ब्रह्म सनातनमलं विभुम् ।**
**वेदान्तेषु वदन्त्येकमव्ययं ज्योतिरीश्वरम् ।।** इति

अत्र हि वेदान्ता नामोपनिषदः। ततश्च औपनिषदिकत्वमेव सिद्धान्त्यते वचनेनानेन, अभिधामात्रं तु भेद्यतेऽत्रं 'ब्रह्मैवेदम् अलम्' इति। एवं च ब्रह्म वोच्यताम् अलम् वा, न भवत्यर्थान्तम्। यदेवालमिति प्रोच्यते तदेव ब्रह्मेति।

ननु सर्वेष्वपि संस्करणेषु वचनेऽत्र एक एव पाठः 'अजम्' इति। न तु लभामहे कुत्रापि अलमिति पाठम्। कुतोऽयमत्रभवतामीदृशो ग्रह इति चेत्,

साधु। इदमत्रास्माकमुत्तरम् 'पश्यतु भवान् साहित्यदर्पणमि'ति। अहो अग्निपुराणे प्रश्नः, उत्तरार्थं चोपन्यासः साहित्यदर्पणस्य। कोऽर्थः। साधो यो हि साहित्यदर्पणः षट्त्रिंशत्तमे खीष्टसम्वत्सरे मुम्बयीस्थान्निर्णयसागरात् मुद्रितप्रकाशितः, तत्र ये परिशेषास्सन्ति तेषु दत्तमस्ति अग्निपुराणमपि। तत्र च नावलोक्यते गन्धोऽपि 'अजमि'त्यस्य। तत्र लभ्यते केवलः 'अलम्' इत्येव एकः पाठः। एवं च महावाक्यमिदं काव्यशास्त्रस्य यदुत ''अलं ब्रह्म'' इति।
अस्ति च स एष पाठः सङ्गतार्थोऽपि सामग्र्येण। इयमत्रोपपत्तिः। अस्ति हि महामाहेश्वराणामभिनवगुप्तादीनां प्रत्याहारः 'अहम्' इति। अत्र हि तैरेतैर्महात्मभिराकृष्यतेतरां समग्रो वर्णसमाम्नायः 'अइउण्' इत्यत

आरभ्य 'हल्' इति यावत् परिव्याप्तिमश्नुवानो दाक्षीपुत्रस्य तत्रभगवतः पाणिनिमहर्षेः शब्दतन्त्रे। सिषाधयिष्यते चानेन समग्रः शब्दराशिः। प्रभव एष समग्रस्य वाङ्मयस्य। अस्यैवास्त्यपरा संज्ञा 'अल' इति। य एवार्थः अहमिति प्रोच्य प्रतिपाद्यते स एव अल इत्यपि। सेयं लोकस्य कथा। अकारहकारयोरेवान्तरालं यल् लोक इत्युच्यते। 'अ' इति अच्युतो देवो महाविष्णुः। 'ह' इति च बंहिष्ठो लोकोऽवनिरिति। एवं य एव अकारमारभ्य हकारान्तां सम्पूर्णामपि वर्णमातृकां प्रत्याहरन् प्रविराजते 'अहं' प्रत्याहारस्तान्त्रिकाणां, स एव शाम्भवे वर्णसमाम्नाये सम्पूर्णमपि वाङ्मयं प्रत्याहरन् 'अलम्' प्रत्याहारः काव्यशास्त्रिणाम्। स्मरन्तु भगवतः पाणिनेरष्टाध्यायीम्। तत्र हि स भगवान् 'अल्' प्रत्याहारमेव निदानयति सम्पूर्णायामपि व्याक्रियाप्रक्रियायाम् अन्वीक्षामय्याम्। नास्त्यत्र कश्चनापि शब्दो नास्ति यः खल्वोतश्च प्रोतश्च अल्प्रत्यहारेण। सेयं वर्णविग्रहा भगवती वाक्। एषैव भगवती चतुर्दशमुण्डमालिनी महाकाली। स्मरन्त्वार्या अस्या महाव्याप्तिम्। प्रवृत्ते प्रचण्डे चण्डमुण्डसङ्ग्रामे इयमेव भगवती वर्ण्यते–

**पार्ष्णिग्राहाऽङ्कुशग्राह–योध–घण्टा–समन्वितान् ।**
**समादायैकहस्तेन मुखे चिक्षेप वारणान् ।।** इति।

एवं य एव हि वर्णसमाम्नाये अल्प्रत्याहारः स एवासौ चतुर्दशभुवनकोषात्मा विश्वसर्गे 'अल'–प्रत्याहारः अहप्रत्ययाहारो वा। अत्रैव लभते जनुः वैदिकानां शब्दसृष्टिवादः 'स भूरिति व्याहरद् भुवमसृजदि'ति। अत्रैव संकेतो हरेरपि–

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।** वाक्यपदीये १.१ इति।

सोऽयं काव्यविश्वसर्गः शब्दार्थद्वन्द्वात्मा।

नेदमत्र विस्मार्यं यदुत अर्थपदेन शब्दोऽपि शक्यग्रहः, अर्यते

ज्ञायतेऽर्थोऽस्मादि'ति व्युत्पत्त्या। अस्ति च शब्दोऽपि नैयायिकेषु गुणपदार्थः। ततश्च पदार्थत्वेन द्रव्यादीनामिव गुणस्यापि संग्रहः, गुणेषु च शब्दस्यापि। सोऽयं शब्दार्थाऽभेदवादः। यच्चेदं शब्दार्थयोः पौर्वापर्यम्, उत्पन्नप्रध्वस्तत्वञ्च तयोः साहित्यस्य बाधकं लब्धं तस्याप्युपशममहौषधम्। किं खलु तदिति चेद् शब्दार्थयोर्विज्ञानैकरूपत्वं तदिति गृहाण। साहित्ये हि नार्थो देहेन शब्दस्य, नापि चार्थो देहेनार्थस्य। येन त्वर्थः स खलु विद्यतेऽनयोः परीरम्भः। साम्वित्तिकः खलु सः। एवं च साहित्ये शब्दपदेन यदुच्यते संवित्तत्त्वमेव तत्। विज्ञानविग्रहा भगवती शब्दसंविदेव सा। अर्थसंविदेव च भगवानर्थः। एकः शिवा, एकश्च शिवः। ताविमौ शिवौ। को वा विप्रतिपद्यतान्तमामनयोरेकशेषित्वे। तदिदमुक्तं **'शब्दार्थौ सहितौ काव्यमि'**ति। एष एवार्थो वैशद्येन प्रोक्तः काव्यालङ्कारकारिकायाम्

**आनन्दकोषस्योल्लासे लोकोत्तरविभावना ।**
**अलङ्कृतार्थसंवित्तिः शाब्दी चेत् काव्यमुच्यताम् ॥**

या चेयं भगवती सविद्भट्टारिका न प्रभवत्यत्र नियतिः तृतीयक्षणनिष्ठध्वंसात्मा। स्थिरयतीवात्र शब्दार्थसर्गः। क्रमोऽप्यक्रम एव जायतेतरामत्र। इच्छासमकालमेवोपनिषीदन्त्यत्रार्थास्ते ते, यावद्, ब्रह्मोपेन्द्रादयोऽपि भगवन्तः। युक्तमुच्यते भैरवानन्देन

*भुक्ता मया हि गिरयः,*
*स्नातोऽहं वह्निना,*
*पिबामि वियत्।*
*हरिहरहिरण्यगर्भा मत्पुत्राः,*
*तेन नृत्यामि।।* इति।

अत एवोच्यते सनातनेनापि 'सर्वोऽपि काव्यार्थः संवित्स्वर्णपञ्जरजः शुक' इति। तथा चास्य कारिका—

**काव्ये धर्माश्च धर्मी च समवायश्च तद्गतः ।**
**सर्वमेतत् सदा संवित्स्वर्णपञ्जरजः शुक ।।** १७७।। इति

**अथ शब्दार्थसम्बन्धः**

अला अहोः यः सम्बन्धः स परिभाष्यते 'अभिहितान्वय' इति। अन्वर्थेयं परिभाषा। अथ यः 'अहा अलः सः' साऽन्विताभिधा' इति। एषापि परिभाषाऽन्वर्थैव। वस्तुस्थितिरेवैषा। अत्र प्रथमः पक्षः सहृदयस्य, चरमश्च कवितुः। साहित्यविचारे पुनः प्रथम एव प्रथमः। तत्र योऽयम् 'अल्' इति प्रत्याहारः स एव भजति परिणतिं काव्यकायगतेन प्रत्येकं श्रूयमाणध्वनिव्यूहात्मना। तत्र काव्यभावमाप्तुं भवन्त्यत्यन्तमभ्यर्हितानि त्रीणि सोपानानि। एष्वाद्यं पूर्णत्वरूपम्। द्वितीयं माधुर्यादिगुणरूपम्, तृतीयञ्च काव्यत्वाधायकोपमादिविच्छित्तिविग्रहम्। आसु त्रिविधास्वपि सोपानिकासु काव्यत्वाधायिका सा गुणैकसमनियताऽनुभूयते। ततश्च रूपकोपमादयो विच्छित्तयः काव्यकायेऽतिशयमात्रमाधत्ते। उदाहृतमिदं काव्यालङ्कारसारे लघुविवृतिमातन्वानेन तत्रभवता प्रतीहारेन्दुराजेनैवम्—

**कथमपि कृतप्रत्यासत्तौ प्रिये स्खलितोत्तरे**
**विरहकृशया कृत्वा व्याजप्रकल्पितमश्रुतम् ।**
**असहनसखीश्रोत्रप्राप्तिप्रमादससंभ्रमं**
**विवलितदृशा शून्ये गेहे समुच्छ्वसितं ततः ।।**

वर्ग ६.७ कारि.

अत्रावोचि लघुविवृतिकृता—**'न खल्वत्रार्थालङ्कारः कश्चित् परिदृश्यते, अथ माधुर्यौजोभ्यां परिबृंहितस्य प्रसादस्य विद्यमानत्वात् काव्यत्वम्'** इति।

काव्यालङ्कारसूत्रवृत्तिगतं साभिप्रायपदकं—

**युवतेरिवरूपमङ्ग! काव्यं स्वदते शुद्धगुणं तदप्यतीव ।**
**विहितप्रणयं निरन्तराभिः सदलङ्कारविकल्पकल्पनाभिः ।।**

**यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनवन्ध्यमङ्गनायाः ।**
**अपि जनदयितानि दुर्भगत्वं नियतमलङ्करणानि संश्रयन्ते ।।**

इदमुक्तिद्वयमुपस्थाप्य—'गुणरहितं हि काव्यममकाव्यमेव भवति।
न त्वलङ्कार—रहितम्। अलङ्काराणां गुणोपजनितशोभे काव्ये शोभातिशयविधायित्वादि'ति च। (तत्रैव)

एवं च 'कथमपी'—त्युक्तौ गुणैकौपयिकः काव्यव्याहारः, अनुभूयते चाऽत्राभावोऽलङ्कारस्ये इति। इत्थं काव्यत्वमत्र यदन्वयव्यतिरेकसहं तद्धि गुणमात्रम्, न स्पृशति ततिदमलङ्कारगन्धमपि।

अथ प्रतीहारेन्दुराज एव पर्युपस्थापयति विकल्पं 'सम्भोगविप्रलम्भावत्र विशेषणार्थसाध्यौ वर्त्तेते एव, अस्ति च रसस्य काव्यालङ्कारत्वमिति कथमुच्यते नास्त्यत्र पद्येऽलङ्कार इति प्रशमयति चामुमसावेवैवम्—

(उच्यते) गुणसंस्कृतशब्दार्थशरीत्वात् काव्यस्य सरसत्वम्। न खलु काव्यस्य रसानां वालङ्कार्यालङ्कारभावः, किन्तु, आत्मशरीरभावः। रसा हि काव्यस्यात्मत्वेन अवस्थिताः। शब्दार्थौ च शरीररूपतया। यथा ह्यात्माधिष्ठितं शरीरं जीवतीति व्यपदिश्यते तथा रसाधिष्ठितस्य काव्यस्य जीवद्रूपतया व्यपदेशः क्रियते। तस्माद् रसानां काव्यशरीरभूतशब्दार्थविषय—तयाऽऽत्मत्वेनावस्थानम्, न त्वलङ्कारतया। रसाभिव्यक्तिश्च यथायोगं माधुर्यौजोभ्यामुपबृंहितेन प्रसादगुणेन क्रियते। अतोऽत्र शृङ्गारस्या सरसकाव्यात्मत्वेनावस्थानम्, न तु काव्यं प्रत्यलङ्कारतयेति युक्तमिदमुक्तं 'निरलङ्कारमपि काव्यं सगुणं दृश्यत' इति। तदाहुः

**रसाद्यधिष्ठितं काव्यं जीवद्रूपतया यतः ।**
**कथ्यते तद्रसादीनां काव्यात्मत्वं व्यवस्थितम् ।।** इति।

तदेवं—'गुणसंस्कृतशब्दार्थशरीरत्वात् सरसमेव काव्यम्।
(पृ. ९०—९१ नि.सा.सं. १९२८).

अमुमेव सन्दर्भमभ्यन्तरीकृत्य काव्यप्रकाशकृताऽपि 'निश्शेषच्युत—चन्दनमि'—ति पद्यमुदाहरतोदीरितं 'नाऽत्र स्फुटः कश्चिदलङ्कारः, रसस्य च प्राधान्यान्नालङ्कारते'—ति (प्रथम एवोल्लासे)। मम्मटोक्त्याऽपि तथ्यमिदं स्पष्टं यत् 'काव्यत्वाय गुणतत्त्वमभ्यर्हितमि'—ति। यद्यपि मम्मटोऽलङ्कारमपि काव्यत्वायाभ्यर्हितमेव मन्यते तथापि नास्यालङ्कारे तादृशमभ्यर्हितत्वमभिमतं यादृशं गुणे। गुणस्य स्फुटत्वमेव केवलमाम्नायते तेन, अलङ्कारस्य पुनरस्फुटत्वमप्यनुज्ञायते। तथा चास्य वचनानि—

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति सर्वत्र सालङ्कारौ क्वचित् पुनः स्फुटालङ्कारविरहेऽपि न काव्यत्वहानि'—रिति।

काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोरदोषयोः शब्दार्थयोर्वर्तत इति काव्यालङ्कार— सूत्रवृत्तिकृतस्तत्रभवतो वामनस्याप्यभिमतपूर्वम्। सेयं गुणानामभ्यर्हितताया: कथा काव्यलक्षणे।

## गुणसंख्या

एतेन निरस्तो गुणाभाववादः।[१]

---

१. गुणाभाववादो वामनेऽपि 'नासन्तः, सद्वेद्यत्वादि'ति परामृष्टः। रसगङ्गाधरे पण्डित—राजेनापि दर्शितोऽत्र तर्कविभवः—'द्रुत्यादिकारणतावच्छेदकताया अवच्छेदकत्वे शृङ्गारत्वादीनामेवाऽभिषेकान्नावश्यकं माधुर्यादिगुण— तत्त्वमिति। आत्मनो निर्गुणतया आत्मरूपरसगुणत्वमपि माधुर्यादीनामनुपपन्नम्। यदि वा द्रुत्यादिजनकत्वमेव रसस्य गुण इति मान्यम्। अथ प्रतिवन्दी—'द्रुत्यादिप्रयोजकत्वं च शब्दार्थयोरपीति तयोरपि गुणानां नानुचितोऽभ्युपगमः। भामहः प्रसादमाधुर्ये एव गुणत्वेन लक्षयति कीर्त्तयति च नाम्ना ओजः। स एवानुसृतो ध्वनिसंप्रदाये। मम्मटःपुनर्दशसु गुणेषु सप्तानामविशिष्टानां खण्डने तर्कमप्युपस्थापयति—केचिदन्तर्भवत्त्येषु इत्यादिकम्।

महामुनिना भरतेन नाट्यशास्त्रे दोषा निरूपिताः तद्विपर्ययत्वेन च गुणाः। वामनेन पुनर्विपरीतं प्रास्थीयत 'गुणविपर्ययात्मानो दोषा' इति। संख्या तु उभयोरपि दशैव। दोषा दशेति तद्विपर्ययरूपा गुणा अपि दशैव। उद्दिष्टाश्चैते भरतेनैवम्–

**श्लेषः प्रसादः समता माधुर्यं सुकुमारता।**
**अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥** इति।

एत एव दण्डिनापि काव्यलक्षणनामनि काव्यादर्शे प्रतिपादिताः। वामनेन पुनः शब्दार्थगतत्वेन द्वैविध्यमुद्वीक्ष्य गुणा विंशतित्वं प्रापिताः। उद्भटो वामनस्य समकालः। रुद्रटश्चोद्भटानन्तरीयः। आचार्याविमौ गुणं न स्पृशतः। वृत्तिनाम्नानुप्रासधर्मेणैवोन्नया भवन्त्येतयोर्गुणाः। एवमिमावपि न श्रद्धत्तो गुणानां पृथगस्तित्वे। एतन्मते प्रश्नः काव्यत्वं यदि गुणाव्यभिचारि तर्हि कथमिवेदं सेद्धुमर्हति गुणानामभाव' इति। उत्तरमुत्प्रेक्षणीयमेवेह–'काव्यत्वं न गुणैकप्रयोज्यमि'–ति। एतेषां मते प्रश्न उदेति 'यदि नाङ्गीक्रियते गुणसत्ता, तर्हि काव्यधर्मत्वेन, काव्यनिष्ठजन्यतानिरूपितजनकताऽवच्छेदकत्वेन वा किमाश्रीयेत धर्मान्तरमिति। अत्रानयोरुत्तरम् 'अलङ्कार' इति। एतच्च तदेव वर्त्म येन प्रस्थिता 'आतानवितानात्मा प्राव्रियमाणः प्रावारकः, अच्छेदकः सुच्छेद्य इति खड्गलक्षणं कुर्वाणाः, प्रत्युक्ते च प्रतिवादिना 'पटलक्षणमिदं, न खड्गस्ये'–ति 'ईदृशमेव खड्गलक्षणं नः संप्रदाय' इति। प्रकृतेऽलङ्काराणामपि गुणत्वमापद्यते। स्वीकृतं परवर्त्तिषु साहित्यसारादिकृद्भिर्गुणानामप्यलङ्कारत्वमेव, अलङ्कारपरिभाषायाः काव्यधर्ममात्रपरत्वस्योद्घोषणां कृतवद्भिः। एवञ्चोपस्थित उपप्लवः 'गुणोऽलङ्काररूपः, अलङ्कारोऽपि च गुणरूपः, गुणाः काव्यत्वजनकाः, अलङ्कारास्तु नेति।

अथ गुणसंख्यायामपि स्वैरत्वयोगः। तथाहि कुन्तकस्य दर्शने

भिन्न एव पन्था गुणेभ्यः, भिन्न एव च भोजादीनाम्। कुन्तको द्वैविध्यं पश्यति गुणेषु सामान्यं वैशेषिकञ्चेति। तत्र वैशेषिकाः माधुर्यम्, प्रसादः, लावण्यम्, आभिजात्यञ्चेति। अत्र लावण्यमाभिजात्यञ्च नवीनौ। सामान्यभूतौ तु द्वौ—'औचित्यम्, सौभाग्यञ्चेति। एवञ्च कुन्तकमतेन सर्वविधं काव्यं न्यूना न्यूनं त्रिभिर्गुणैर्युक्तं भवति—द्वौ सामान्यौ, एकं वैशेशिकं चेत्यादाय। अत्र गुणनाम्न्यपि स्वैरित्वम्, 'लावण्यमाभिजात्यमौचित्यं सौभाग्यञ्चे'ति नवीनानि गुणनामानि। उदात्तत्वादयोऽन्येऽपि कतिपये धर्मा आचार्यान्तरैर्गुणत्वेन कल्पिताः। एषु हेमचन्द्रः प्रमुखः।

वैशेषिकेषु गुणेषु गणिता दृश्यन्ते ते खलु गुणा ये दोषाऽभावरूपाः स्वीक्रियन्ते भोजादिभिः। दोषत्वं गुणाभावत्वम्। ततश्च दोषाऽभावस्याभावाभावत्वमापन्नम्। तच्चाधाररूपमपि मन्यतेऽभियुक्तैः। आधारश्चाऽत्र काव्यशरीरमेव शब्दार्थसाहित्यरूपम्। काणत्वं दोषः। अक्षिद्वितयसम्पन्नत्वं पुनः स्वभावः, न गुणः। एवं च दोषाभावस्यापि स्वरूपधर्मत्वमेव काव्ये। तस्याऽस्य समुचिता संज्ञा 'पूर्णते'ति। जातमात्र एव हि मनुष्यो दृश्यते युक्तः पादयोरिव हस्तयोरपि युग्मेन, युग्मेन च नेत्रभ्रुश्रवसाम्। नायं जातकस्य गुणः। अयं हि तस्य स्वो भावः। भगवती नियतिरेवाऽत्र भवति कारणम्। तयैव क्रियते प्रकृतिसुरभि सहकारफलम्, प्रकृतिकटुकं च लशुनम्। सैव भगवती कारणायते निम्बगतायास्तिक्ततायाः, कटुतायाश्च मरिचादिगतायाः। अथ गोः क्षीरं प्रकृतिमधुरमेव लभामहे। अप्रष्टव्या भवन्त्येषु प्रतिनियमेषु नियन्तारो जनकाः। एवं च ये वैशेषिका गुणास्तेषां गुणोत्थानप्रागभाव प्रथमक्षणिकावस्थात्वमुत्प्रेक्ष्यते, निर्विकल्पस्येव सविकल्पं विज्ञानं प्रति, पश्यन्त्या वा वैखरीं प्रति।

**कलिलं प्रतिपद्यते यथा क्रमशो जातकदेहपूर्त्तये ।**
**प्रतिभा प्रतिपद्यतेतरां गुणतां काव्यशरीरके तथा ।।**

इति तु निष्कृष्येत, निष्कृष्टं चास्माभिः साहित्यशारीरके काव्यालङ्कारकारिकायां चाऽसकृदेव।

अथ गुणानामप्यलङ्कारत्वमिति यदुक्तं तत्र वाचोयुक्तिः अलङ्कारपदस्य निरुक्तिः। निरुक्त एष शब्दो वामनेन–'सौन्दर्यमलङ्कार (१.१.२) इति सूत्रस्य स्वोपज्ञायां वृत्तौ–'अलङ्कृतिरलङ्कार' इति। सेयमलङ्कारशब्दस्य भावव्युत्पत्तिः। व्युत्पत्त्यन्तरमप्यत्रैत्रासौ दर्शयति 'करणव्युत्पत्त्या पुनरलङ्कारशब्दोऽयमुपमादिषु वर्त्तत' इति। सेयं व्युत्पत्तिर्गुणानप्यधिकरोति, भवत्येव माधुर्यादीनां स्पृहणीयत्वाधाने कारणत्वं मार्दवादीनामिव देहादिषु। यदेव च स्पृहणीयत्वं तदेव ग्राह्यत्वम्, तदेव सौन्दर्यम्, स एवालङ्कारः, सैव च शोभा। एवं हि सूत्रोपन्यासो वामनस्य–

१. काव्यं ग्राह्यमलङ्कारात् १.१.१
२. सौन्दर्यमलङ्कारः १.१.२
३. स दोषगुणालङ्कारहानादानाभ्याम् १.१.३
४. रीतिरात्मा काव्यस्य १.२.६
५. विशिष्ट पदरचना रीतिः १.२.७
६. विशेषो गुणात्मा १.२.८

परिणम्यते सन्दर्भादस्माद् गुणस्याप्यलङ्कारत्वम्, अलङ्कारस्य च काव्यात्मत्वम्।

अथेमे खड्गहस्ताःकथमुपशाम्येरन्?

क एते।

येऽत्रालङ्कारात्मवादे खड्गहस्ता?

विस्मृता यैर्वेदा, न्यक्कृता यैस्तत्त्वदर्शिनो वीतरागा महर्षयः, आदृतश्च स्वैरः प्रमाणे पन्थाः।

किन्नामधेया एते?

एत एव य आनन्दं वर्धयन्ति, गुप्ततया निभृतं चाभिनवन्ति।

कथं स्पष्टं नोच्यते ध्वनिवादिन इति?

कोयं वादः कश्च ध्वनिरिति पृच्छायां विपरीतं प्रस्थास्यते विनाशयिष्यते च काव्यसुमेरुः। या हि मूलविहाना नभोवल्लरी यमपि शाखिनमियं छादयति स शुष्यति। ध्वनिरप्येतद्धर्मैव। दरिद्रतमेनाऽपि सूक्तिबन्धेन परितुष्यन्त एते ध्वनिवादिनः सन्नद्धं सुसमृद्धञ्च संस्कृतं त्यक्त्वा संस्कृतविकृतिष्वेव बद्धादरा दृश्यन्ते। ततश्च कैषां भगवती श्रुतिः, के च महर्षयस्तत्त्वदर्शिनः। इदमेतेषा दौर्बल्यम्—

अर्थ एतेषां प्रथमं सोपानम्। ततः प्रतिष्ठमाना इमे पश्यन्ति अर्थान्तराण्यपि। सेयमेतेषां यात्रा अर्थतोऽर्थं प्रति। यदुच्यत एतैः—

**अर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः ।**
**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ।।** इति।

ध्वन्यालोके १.२

अत्र प्रश्नः—'यस्मादस्मादर्थात् अर्थान्तरस्याऽवगमस्तस्य लाभः कुतः इति।

प्रमाणान्तराभावे शब्दादेवेति प्रोच्येताऽत्र। तत्रापि प्रश्नः—

सोऽयं शब्दस्तृतीयक्षणनिष्ठध्वंसप्रतियोगी मन्यते न वा? यदि मन्यते तर्हि 'अर्थान्तरप्रत्ययक्षणे कथं तस्योपस्थिति? ततश्चार्थान्तरावगमं प्रति कथं विनाशभक्षितस्य शब्दस्य जनकत्वम्? शब्दस्य संस्कारस्तत्र गृह्यत इति चेत् प्रसक्तोऽत्र विषयविषयिणोरभेदः। शब्दो भिन्नो गुणः, भिन्नश्च गुणः संस्कारः। विषयविषयिभावे पुनः

कारणतावच्छेदके प्रश्नः। अर्थान्तरबोधे कारणं प्रथमोऽर्थः, कारणता तस्मिन्नेवार्थे, तस्या अवच्छेदकञ्चार्थत्वमेव। कुतोऽत्र शब्दस्य प्राप्तिः। कारणाश्रय एव हि कारणं कार्यमुत्पादयति, नान्यत्र, अन्यथा भज्यते वराकी कार्यकारणभावप्रतिपत्। ध्वनिवादिनामत्र नास्त्येव किमपि तात्त्विकमुत्तरम्।

अत्रैव निभृतं तिष्ठति ध्वनिवादिनामागमविरोधः। महर्षिभिः प्रमाणतया यद् यत् स्वीकृतं तत्र प्रथमं प्रत्यक्षम्, द्वितीयं च अनुमानम्। शब्दस्तृतीयः, चतुर्थश्चार्थापत्त्यादिरूपम्। धूमादिभिरर्थैर्यदिदं वह्न्यादिकस्य ज्ञानं तत्राऽनुमानत्वमाम्नायते महर्षिभिः। ध्वनिवादिनः पुनस्तत्रानुमानं नाभिषिञ्चन्ति, व्यञ्जनं भवति तेषामत्र कारणम्, भेदयन्ति तदिदं व्यञ्जनमिमेऽनुमानतः। नातिरिच्यते चैषामियं भेदविडम्बना धूलीप्रक्षेपात्। इमे व्यञ्जकनामनि हेतौ व्यङ्ग्यनाम्ना साध्येन सह यः सम्बन्धस्तत्र व्यभिचारं पश्यन्ति, पश्यन्ति च ततो ऽर्थान्तरप्रत्यायनेऽसामर्थ्यं प्रथमार्थस्य। व्यभिचारो हि घातयते प्रामाण्यमात्रम्, न त्वनुमानत्वम्। तत एवैतेषां मतेऽपि पर्वतो धूमवान् वह्नेरिति वाक्येऽनुमानत्वबुद्धिः। अनुमानात् पराजयमाना इमे शब्दान्तरं निक्षिपन्त्येवंविधेभ्यः स्थलेभ्यो व्यञ्जनमिति। भोजराजादयश्चानयोरभेदं प्रतितिष्ठापयिषन्तो ब्रुवते—'अयं साम्प्रदायिको भेदः, न तात्त्विक' इति।

**तात्पर्यमेव वचसि ध्वनिरेव काव्ये**
**सौभाग्यमेव गुणसंपदि वल्लभस्य ।**

इति। अयमस्याभिप्रायः 'यदेव वल्लभगुणेषु सौभाग्यमित्युच्यते, यदेव च वाग्योगे तात्पर्यमिति तदेव काव्ये ध्वनिरिति। तथा च यमेवैकं परात्परं सर्वसमर्थं च तत्त्वं ब्रह्मविद 'ईश्वर इति व्यपदिशन्ति, तमेवैकं यीशुभक्ताः गॉड इति, मुहम्मदिनः खुदा इति बौद्धा बुद्ध इति। अत्र व्याहारमात्रे भेदः, न तत्त्वे, तथैव प्रकृतेऽपि।

अपरे पुनरन्यथा प्रतिष्ठन्ते—'शब्दो जडः। तत्राऽर्थबोधनसामर्थ्यं गगनकुसुमे परिमलः। तथापि यदि शब्दे कल्पनीयैव शक्तिस्तर्हि कल्प्यतान्नाम काचिदेका सा, व्यपदिश्यतां चाभिधेति, तात्पर्यमिति, व्यञ्जनमिति केनाप्येकेन शब्देन। एतेषु प्रमुखः प्रतापरुद्रयशोभूषणालङ्कारे रत्नापणाख्यं व्याख्यारत्नं रचितवान् तत्रभवान् मल्लिनाथसूरिसूनुः कुमारस्वामी। उक्त एव एकशब्दवादो महामतिना महिमाचार्येणापि—

शब्दस्यैकाभिधा शक्तिरर्थस्यैकाऽनुमा मता ।
न व्यञ्जकत्वमनयोः समस्ती'—ति ।

अस्माभिरपि प्रोक्तमेव—

यदि शब्दस्य देहे स्याच्छक्तिः सूर्ये प्रकाशवत् ।
तदा विश्वस्य भाषापि भवेदेकैव केवला ।।' १६८

इतः पूर्वमपि—

अस्मादेतस्य बोधः स्यादि'—ति शक्तिरपि स्वत ।
शब्दार्थबोधयोः संविद्ग्रन्थिर् बोधात्मकः स च ।।

शक्तिर्ज्ञाने चितौ ज्ञानं, सा न शब्दस्ततश्च का ।
शब्दे शक्तिः, कुलालस्य जनके घटशक्तिवत् ।। १६६–१६७।।

इत्येवमस्यैवार्थस्य विहितमस्माभिः समर्थनम्, पश्चादपि च—

एवं काव्यस्य या भाषा यश्चार्थो या च तद्धियोः ।
शक्तिः,
सर्वमिदं संवित्स्वरूपं, न ततः पृथक् ।। १६९।।

इति। एवमेवाग्रेऽपि शब्दशक्तिविचारमाम्नतवन्तः स्मः पुण्यसलिलायाः श्रीनर्म्मदाम्बायास्तटे स्थितानां मत्स्यवेध—'इति—

शब्दशक्तिविचारो यः कवितादर्शने विदाम् ।
सोऽयं रेवातटे मत्स्यवेधो धीवरताजुषाम् ।। १७१।। इति।

शब्दव्यापारविचार—'हिन्द्यनुवादस्य प्रस्ताविकेष्वपि शब्दशक्तावस्माक—मयमेव प्रहारः। तथाहि—

**नमामः शब्दशक्त्याख्यां शाबरीं विषकन्यकाम् ।**
**लग्नया श्रुतिमात्रेऽपि यया मूढा विपश्चितः ।।**

**आनन्दवर्धनोऽपश्यत् तस्यास्त्रिविधरूपताम् ।**
**भट्टश्रीमुकुलश्चैव दशवृत्तविवर्त्तताम् ।।**

**अपरे त्वनयोर्मोहं सत्यापयितुमिच्छवः ।**
**कलहं कर्त्तुमारब्धाः पक्षमन्यतरं श्रिताः ।।**

**तत्र श्रीमम्मटो हन्त गतस्तामेव दुर्गतिम् ।**
**उच्चैस्त्रैविध्यपक्षेण स्वं शृणीते परश्वधम् ।।**

**ऐन्द्रजालिकलीलायां सत्यतां पश्यतामिमाम् ।**
**मोहलीलां बुधाः पश्यन्त्वत्र मद्भाष्यभूषिताम् ।।**

इहेति मम्मटस्य **शब्दव्यापारविचारा**नुवादे १९७४ ख्रीष्टाब्दे चौखम्बातः प्रकाशिते। शबरस्वामिनो मीमांसाभाष्यतः प्रवृत्तेयं शब्दशक्तिसमज्ञा। प्रथमे श्लोके तत्र यः श्लेषस्तत्रानुध्यायन्तु विज्ञाः। याऽत्र गुणानामप्यलङ्कारत्वगाथा तत्र यानि प्रमाणानि तान्यस्माभिरुपस्थापितानि स्वोपज्ञे 'संस्कृतकाव्यशास्त्र का आलोचनात्मक इतिहास' इत्याख्येऽचिरनिर्मिते ग्रन्थे। तदर्थं स एवानुशीलनीयः।

'अलङ्कार' इति या परिभाषा तस्यामपि निहितं पश्यामः क्रान्तिपूर्णमितिहासम्। तस्यास्यां क्रान्तावेव शीलयामः काव्यशास्त्रस्य नैरन्तरीम्।

'अलङ्कार' इति या परिभाषा भगवन्तो वेदा एवास्याः प्रवृत्तेर्मूलम्। तत्र यद् 'अरम्' इति रेफमध्य मव्ययपदं तस्यैव लकारमध्यत्वपरिणतिरियं यद् अलमिति श्रुतिः। रेफस्य लत्वेऽपि नाऽभूद् भेदोऽ नयोरर्थे। य

एवार्थो ऽरशब्दस्य स एव अलशब्दस्यापि। अलमित्यव्ययत: परं प्रयुक्तो य: कार–शब्द–स्तस्य १. करणमिति भावपरत्वमिव २. क्रियतेऽनेनेति करणपरत्वमपि दर्शितपूर्वमेव, यावदत्र व्युत्पत्त्यन्त–राण्यपि संपतन्ति। 'कर्मण्यण्' इति कुम्भकारे यथा चरितार्थं तथैव शक्यचारितार्थीकमिदमलङ्कारपदेऽपि। तत्र अलमित्यस्य कर्मत्वमुत्प्रेक्षितुं न न क्षमम्। अथान्यदपि वर्त्म व्युत्पादनस्याऽत्र। तच्च स्वार्थकत्वाश्रितम्। दृश्यत एव कारपदस्य स्वार्थकत्वम् 'ओङ्कार'–पदे, अहङ्कारपदे च। तत्र ओङ्कारपदे व्युत्पत्ति: 'ओमित्येव ओङ्कार इति, अहङ्कारपदे च 'अहमि'–त्येवाहङ्कार इति। एवमेवालङ्कारपदेऽपि कारपदस्य स्वार्थकत्वमुन्नेतुं नास्ति कष्टम्। एवङ्गते 'अलङ्कार'–पदस्यापि कृते स्वीक्रियेत 'अलमि'–त्येवालङ्कार इति। रीत्याऽनया प्रत्युपस्थितो ब्रह्मरूपोऽर्थ: 'अलङ्कार'–पदस्य। ब्रह्मण आनन्दकला वेदान्तेष्वपि नितान्तं प्रसिद्धेति अलंकारपदेन काव्येऽपि सहृदयस्य प्रत्यक्चैतन्यं शक्यसंग्रहम्। सर्वमपि हि काव्यं चमत्काराऽपरपर्यायेणानन्देनैव लभते काव्यत्वम्, अयं तु विशेषो यद् योऽयं काव्यलभ्य आनन्द: स क्षणिक:, यश्चासौ वेदान्तविद्याभ्यास–साध्य:, सोऽक्षरोऽव्ययश्च। तदिदं मात्रागतमेवान्तरमानन्दे, न तु स्वरूपस्पर्शि। यदि च रस एव काव्यस्यात्मा तर्हि आनन्दस्यैव परिणतं काव्यात्मत्वं, रसस्यानन्दमात्ररूपत्वात्। एवं च तदभिन्नाभिन्नस्य तदभिन्नत्वेन ब्रह्मण एव परिणतं काव्यात्मत्वम्। एवं च भूमिरेव संवृत्ता स्वर्भू:। लब्धा अस्माभिरपि कल्पवृक्षा:, संकल्पमात्रेण सर्वार्थप्रसिद्धे:। समर्थित एष कल्पो महामतिना भर्तृहरिणापि–

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यत: ।।** वाप. १.१

विवर्त्त एषोऽनुभूयतेतरां काव्यनाट्ययो: प्रातिपद्येनैव। अन्यथा कथमिमे

वयमचूर्णिताङ्गा एव विद्यामहे शृण्वाना अपि 'अत्युत्तरस्यान्दिशि देवतात्मा हिमालयो नाम नगाधिराज' इति कुमारसम्भवम्। एष एव हि नागेशस्य बौद्धार्थवादः। अत एव वयमप्युपस्थिता दमयन्त्याः स्वयम्वरे, वयमेव चानुभवामो वैदर्भ्यर्पितायाः स्वयम्वरस्रजः परिमल–गन्धान्। अत एव स्पृहणीयभावजाते समुत्पन्नः शान्त उद्रेका तिशय एव काव्यरसः, न तु ततोऽधिकं किञ्चित्। अवोचाम चेदमेव काव्यालङ्कारकारिकायां सोपष्टम्भम्। तथाहि–

**काव्यनाट्यरसोऽप्येष लोकानन्दैकसोदरः ।**
**प्रसिद्धस्योपमानत्वे ब्रह्मानन्दोऽत्र न क्षमः ।।** २४५।।

इत्यारभ्य–

**वस्तुतस्तु मनोराज्यं सोमशर्ममहामतेः ।**
**काव्यनाट्यरसज्येष्ठभ्रातृतामश्नुतेतमाम् ।।** २४९।।

अमुमेवार्थं भूयोऽपि पल्लवयाञ्चक्रिमहे तत्रैव–

**स्वप्नावस्थागतानन्दमात्र–सादृश्यगोचरः ।**
**काव्य–नाट्य–कलामात्ररसस्पन्दः सचेतसाम् ।।** २५०।।

किञ्च ये तावद् वीतरागवासनाः समदर्शिनो यतयस्तेषामेक एष काव्यरस एव रसः। इत एव ते शान्ततृषः। शृङ्गारस्य काव्यरसतया परिभोगेऽपि नास्ति कापि व्रतक्षतिरीदृशां सहृदयानाम्। उच्यते स्वयमेभिरेवाभिनववाग्भूतैः–

**न हि वीतरागोऽपि विपर्यस्तान् भावान् पश्यति,**
**न ह्यस्य वीणाक्वणितं काकरटितकल्पं प्रतिभाति ।** इति।

(ध्वन्या. लोचनम् पृष्ठं ४८८)

**योऽयं मनोज्ञवपुषोरभिषङ्गभङ्ग–**
**लीलारसोऽङ्गपरिघर्षणजोऽभिमानः ।**

तस्य स्मरन्ति च भवन्ति च काव्यजन्यौ–
त्सुक्यामृताब्धिपरिमज्जितमानसाश्च ॥

इति त्वत्र कलाजन्यतया प्रपञ्च्यमानं रसं प्रति नः प्रतिपत्तिः। उक्तमिदमप्यस्माभिः काव्यालङ्कारकारिकायामेव–'अत एव प्रवर्त्तन्ते काव्यात् सत्याय भावका' (२४७) इति। अत एव च शृङ्गार एव रसः कुमारसम्भवादौ रासपञ्चाध्याय्यादिसन्दर्भणासु च। ननु भक्तिस्तत्र रस इति महात्मनामुपदेशः, तत्कथमिदमुच्यते सांसारिकेण भवता? नमस्तेभ्यः।

ये वै केवलतौम्बिका[1] अ–करणोद्भेदा इमे स्वामिन–
स्तेभ्यः साञ्जलयो वयं नम इति ब्रूमः स्खलन्त्या गिरा।
एषां मूर्च्छितचेतसां च कलयेत् को वा भिदं, न स्मरो
यानारोहति न स्मयश्च मनसा रोमन्थिनो जीवतः ॥

( २ )

सेयं विषयाद् ब्रह्मणः प्राप्तिः। अक्क एव वित्तं मधु। ईषत्कर एष आरम्भः। जातास्तावत् समेऽपि रसिका ब्रह्मविदः। प्राप्तं सार्वभौमत्वं हास्येन। 'हास्य एवैको रसः' इति प्राप्तो हन्त नूतनतम एकरसवादः। क्रान्तिमिम उपासन्नाः सामाजिकीम्।

पठन्तु कवितां बुधा अथ धयन्तु ब्राह्मं मधु
क्षरन्ति तदिदं समा अपि महाकवीनां गिरः।
अलं शमदमादिभिः करणनिग्रहैस्तत्कृते
तपश्चरणसाधितैः, पिबत काव्यमेवैकलम् ॥

---

१. तौम्बिकास्तुम्बाकारशरीराः। तुम्बायां हि न भवन्ति करणानि। सर्वेषामपि शरीर–पिण्डानि तुम्बाकाराण्येवाभविष्यँश्चेन्नाऽघटिष्यन्ताभिलाषादयः प्रपञ्चाः। व्यक्तमिद–मस्माभिस्तत्र तत्र।

मैवं वादीः। लाभे खलु महान् भेदः। काव्यनाट्याभ्यां समुपसन्नो यो ब्रह्मलाभः स न स्ववशः। तादात्विकतां तु तत्र पश्यामः। विभावादिजीवितावधित्वमुद्घोषितमेव तत्र सर्वैरपि भावकसत्तमैः।

धेनुर्या जरती ददाति च पयः सा टीकते सेव्यतां,
वैषम्यं किल मात्रया कृतमिह प्रक्षिप्यते कच्चरे ।
चार्वाका अपि शोभना वयममी, त्यक्त्वा करस्थं न ये
प्रेप्सामो गगनारविन्दमुडुपः पोताय किंभज्यते ।।

क्षुद्राक्षुद्रकथा रसे बत बत क्षारा, समे तामिमां
दूरादेव विसृज्य हन्त नयने संमील्य मोदामहे ।
नित्यं शाश्वतमक्षराव्ययतया भाव्यं च तत्त्वं मृषा–
वादान्तर्गमितां, गिरां प्रलपनां बुद्ध्वा ह्युदाशास्महे ।।

चिताग्निपरिरम्भणां गतमिमं प्रभोगायनं
वपुः प्रतिदिनं दृशोर्विदधदेष, आमुष्मिकम् ।
प्रणामविधयाऽर्चयन्नयमहं मयूरेप्सया
त्यजामि किमु पाणिगं ननु कपोतपोतं स्वतः ।।

चतुष्पदमनुष्ययोर्भवति भेदकं केवलं
मनः स्पृहयते पशुर्नखलु, भुङ्क्त एवेप्सितम् ।
नरस्तु धृतकामनः स्पृहयतेतरां चेष्टते
स्पृहाविषयमात्मनः समधिगन्तुमुद्योजनैः ।।

अहं खलु मरुस्थले करभलम्बकायो हिमा–
निकासु हिममानुषाकृतिरहं हि जन्तूत्तमः ।
अहं तरुरहं लता युगलके परीरम्भणाऽ
प्यहं, बत निसर्गगः क्रम इमं हि रूढं जगत् ।। रूढा सृतिः।

असौ रसनया यथा समभिकृष्यमाणः स्मयं
स्मरं च समभिद्रवन् स्वत इहेक्ष्यते मानुषः ।
विभावनकलामयं कविवृषाकपिप्रोत्थिता–
महं न कलये परं किमपि भिन्नमस्मात् स्वतः ।।

यदिदं पौरोभाग्यम् अत्र किन्नाम स्यादुत्तरम्? अथापि ब्रूमः–

सारस्वतं तु सवनं कविकर्म नास्मिन्
प्रामाण्यमञ्चति मितामितभावगीतिः ।
का नाम शाश्वतिकताकलनाऽत्र यस्मिन्
प्रस्पन्दते क्षणमयः क्षण एव भूम्ना ।।

आस्ये यदागतमथोदतरत् कृकाटि–
काग्रन्थिमाविशदथोदरकालदुर्गम् ।
तन्मात्रजीवितकला वयमत्र तत्र
दृष्टिं क्षिपाम इह नैव, रसस्य तृप्ताः ।।

आनायिका न हि वयं हरिणस्य देहो
नास्त्येव नो बत समीहित आत्मयागे ।
आलेख्यमात्रगतकायमिमे रसामो
वातप्रमीं प्रतिभयैव धृतावतारम् ।।

यद् ब्रह्म यश्च रस एतदवेक्ष्य युग्मं
सन्तर्पणां च लघु संघटितां स्वकीयाम् ।
कालं स्मराम किमु, किं घटिका स्वयं स्वं
कालं स्मरन्त्युपगताऽनुभवं क्वचिन्नुः ।।

कालो न कश्चन परो मदिमं स्मरन्वै
नान्यं स्मरामि खलु मां चरमं विहाय ।

या च स्मृतिर्भवति तीरयुगान्तराल–
प्रावाहिणी स्रुतिरियं रसिके रसानाम् ।।

द्वन्द्वात् परं यदिदमस्ति तु ताण्डवं नो
रिक्तं च पूर्णकरणं च चकास्ति काव्ये ।
अन्यल्लिलेखिषितमालिखितं तथान्य–
न्नान्यश्च कश्चिदिह मत्, कविरस्मि यस्मात् ।।

( ३ )

## साहित्यशास्त्रस्योपेक्षा

'अहमस्मि साहित्यशास्त्रेऽधीती, सम्प्रति यापितसप्ततिशरत्को–ऽहमात्मानमेवालोचयामि। इदं हि शास्त्रं समुपेक्षितमेवासीत् पूर्वमपि, साम्प्रतमपि चास्ति तथैव। यैरप्यत्रादरो दर्शितस्तेऽपि पण्डितराजाः पूर्वं शास्त्रान्तराबद्धहृदया एव। मम्मटभट्टो, न महिमभट्टः, महिमभट्टश्च नाभिनवगुप्तः। सर्वेऽपीमे न रुद्रटा न वा भरताः। एकदेशिका एवैते सर्वे।

अभिनवगुप्तेन टीकामात्रेणानुगृहीतं साहित्यशास्त्रम्, अशक्ष्यत निर्मातुं तैर्मौलिकमपि काव्यशास्त्रम्, किन्तु नोदसहिषत तत्र ते। मन्ये तेष्वप्यानुषङ्गिकत्वमेव साहित्यशास्त्रस्य। अत एव इतः षड्विंशेभ्यः संवत्सरशतकेभ्यः पूर्वं जाताद् भरतमुनेः प्राचीनान् न लभामहे काव्यशास्त्रिणः, न लभामहे च भरतात् परमपि सहस्रं वर्षाणि यावत् कञ्चनापि साहित्यशास्त्रविधातारम्।

सर्वप्रथमः साहित्यशास्त्रस्याचार्यो भवति प्रबन्धत्रयविधाता तत्रभवान् दण्डी। काञ्चीधामवासिनस्तस्य ग्रन्थः सुरक्षितोऽस्ति, किन्तु क्षतविक्षतरूपेण। तत्र भवितव्यं चतुर्भिः परिच्छेदैः, किन्तु, चतुर्थः

परिच्छेदस्तृतीय एव परिच्छेदे गणितः। अथ नामापि तस्य व्यस्मारि परम्परया। अस्ति तदिदानीं 'काव्यादर्श' इति विदितम्। अस्ति तु तस्य वास्तविकं नाम 'काव्यलक्षणमि'ति। सोऽयमुपेक्षापूरिताया दृश एव परिमाणः।

भामहस्य ग्रन्थः परिच्छेदपुष्पिकासु 'भामहालङ्कार' इत्येव व्यपदिश्यते, आलप्यते तु 'काव्यालङ्कार' इति। सेयमध्येतृणा–मुपेक्षाबुद्धिरेव।

अन्येषां का वार्त्ता मृषामूर्धन्यानां ध्वनिकृतामानन्दवर्धनानामपि सिद्धान्तस्येव ग्रन्थस्यापीयमेव गतिः। ग्रन्थस्य मुख्यं नामास्ति 'काव्यालोक' इति, किन्तु, व्यपदिश्यतेतमामसौ ध्वन्यालोक इति। ध्वन्यालोके लोचनटीकामाहितवान् महामाहेश्वरस्तत्रभवानभिनवगुप्तोऽपि ग्रन्थममुं काव्यालोक इत्येव व्याहरति, व्याहरति च काव्यालोक इत्येव तत्रभमवान् महेश्वरो महार्थमञ्जर्याम्।

अस्ति विश्वनाथमहापात्रस्य ग्रन्थः 'साहित्यदर्पण' इति, किन्तु नास्ति तत्र 'साहित्य'—तत्त्वमधिकृत्य विचारस्य लेशोऽपि। ग्रन्थान्तमात्रे 'साहित्य'—पदं तत्र कथञ्चिदुपादीयमानमवालोक्यते।

आलोक इति वोच्यतां प्रकाश इति वा, नास्त्यर्थे भेदः। ततश्च य एव काव्यालोक, इति व्यपदिश्यते स एव हि काव्यप्रकाश इत्यपि व्यपदेष्टुं सुशकः। काव्यप्रकाशकर्त्तुर्मम्मटस्यापि छलमिदं नूनं नासीदनभीष्टम्, अत एव नोपात्तं तेन ध्वनिकारस्य नाम, वारमेकं विहाय।

'मृषामूर्धन्या' ध्वनिवादिन इति यत् पौरोभाग्यं जनेनानेनार्जितं तत्र तन्त्रं तत्रभवान् ध्वनिकार एव। प्राधान्येन व्यपदेशा भवन्तीति योऽभियुक्तानां प्राचां समुदाचार उल्लङ्घितस्तेन सः। कथमिति चेद् अत एव तस्य ग्रन्थे साधनभूतो ध्वनिः प्रधानम्, साध्यभूतेन स्फोटेन तु

भवितव्यं प्राधान्यं प्रापितेन। ये हि वैयाकरणाः प्रथमविद्वत्त्वेन तेन समादृता अस्ति तेषां मते श्रूयमाणानां वर्णानां ध्वनित्वेन ग्रहः, तैरभिव्यञ्जितस्य शब्दस्य स्फोटत्वेनेव। ध्वनिवादिनां ध्वनिरेव पार्यन्तिकः प्रधानभूतोऽर्थः, यस्य स्थाने भवितव्यमासीत् स्फोटस्य ग्रहेण। एवं वैयाकरणानां समयोऽपि ध्वनिवादिना विपर्यस्योपस्थापितः। मम्मटोऽपि वैयाकरणः सन्नपि स्फोटस्य व्यङ्ग्यत्वं स्वीकुर्वाणोऽपि तत्र ध्वनिं प्रति साधनत्वमेव प्रतिपद्यते। सोऽयं विपर्य्यासः प्राचामाचार्याणाम्। अनावश्यकश्चासौ दृष्टान्तः। तं विनापि पूर्ववर्त्तिनामाचार्याणां निर्वाहस्यानुभूयमानत्वात्।

किञ्चैभिः साहित्यसम्प्रदायोऽपि राहुत्वं प्रापितः। सम्प्रदाये हि पूर्वं रचनासामर्थ्यमर्ज्यते स्म, क्रियतेस्म च सृष्टिः सानुप्रासस्य सयमकवक्रोक्तिकस्य च साहित्यस्य। ध्वनिवादिभिः पुनरादृत उक्तिमात्रस्य मार्गः, प्राकृतगाथा उदाहृत्य संतुष्यद्भिः। सोऽयमपहस्तनव्यापारः संस्कृतस्य, संस्कृतगौरवस्य च। वपुश्छेद एवासौ साहित्यस्य। रचनाविरेचितस्य ध्वनेस्तर्हि केतुत्वमात्रमवशिष्यते, सोऽयं देवयात्रोत्सवसंपादनाय देवस्यैव विक्रयः। लक्ष्याच्च्याविता अपीमे। शब्दार्थशासनाभ्यां व्याकरणमीमांसाभ्यां भीषिता इमे, तेषां दुर्मोकाच्छब्दशक्तिमुष्टेर्निलीना यामेव व्यञ्जनाकक्षां प्राविक्षँस्तत्रापि शब्दशक्तित्वमेव साधयन्तः। सोऽयं मृषाव्यापारः।

इदं राहुत्वं साम्प्रतिके संस्कृतभाषाशिक्षाक्रमेऽपि कृतपदम्। अत्र हि यस्याः प्रथमायाः परीक्षाया आसीन्मूलत्वं तस्या एव प्रविहितो न्यक्कारः। तस्यैवायं विपाको यदद्य संस्कृताध्ययनाय विकीर्यमाणोऽपि द्रव्यराशिर्न कल्पते पोषाय, प्रत्युत प्रगल्भते दौर्बल्याय। ये हि वाक्यप्रयोगाः शोभनशोभना, यत्र च संरक्षितास्ति वाग्विच्छितिः तेषु न दीयते दृष्टिः, व्याकरणशुद्धिमात्रेण च संतुष्यन्तो दृश्यामहे। वस्तुतस्तु वाक्यप्रयोगा अमी सुलभाः सन्ति महाभाष्ये तदनुसारिणि

काशिकादिप्रबन्धे वा। तत्र न भवामो व्यापृता:। अत एव यादृशी भाषा छन्द:शास्त्रभूमिकायामाचार्यैरोझापादैर्व्यवह्रियते न तादृशी दृश्यतेऽसौ विद्वदन्तरेषु। बाल्य एव भवन्ति सर्वे संस्कारा आहिता:। आनुषङ्गिकमेतत्। साहित्यशाष्त्रं तु प्रकृतम्।

तत्र साहित्यशास्त्रे दर्शितच्छिद्रा इदानीमाचार्याणामन्यानपि धूलीप्रक्षेपान् प्रस्तुवीमहि।

१. अपूर्वैव प्रतिष्ठा वाग्देवतावतारत्वेन पूजितस्य काव्यप्रकाश– कर्त्तुर्मम्मटस्य। स एष तात्पर्यवृत्तिपूर्वपक्षमादत्ते धनिकाद् 'यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतमि'–ति वदत:। किन्तु विखण्डयत्यमुं पक्षं मीमांसकतर्कै:। 'विषं भुङ्क्ष्व' इति मित्रं प्रति मित्रस्योक्तौ यस्मिन्निषेधे तात्पर्यं सोऽपि समनन्तरमुक्ते वाक्ये स्वशब्दत: कथित एव 'मा चास्य गृहे भुक्था' इति। 'भम धम्मिअ' इत्यादिषु तु नास्ति निषेधरूपोऽर्थो वाच्यो 'मा भ्रमे'–ति नास्य 'तात्पर्यविषयते'–ति। सोऽयं धूलीप्रक्षेप एवाध्येतॄणामक्षिषु। एवञ्चापतितोऽत्रान्यस्मिन्नपराद्धेऽन्यत्र दण्डपात:।

काव्यलक्षणमप्यस्य विसदृशमेव शास्त्रत्वस्य। व्याख्यावाक्यं खलु तत्, आहृतं च तद् वामनात्, अवाच्यवचनदूषितं तद् वाच्यस्यालङ्कारस्याभावाप्रतियोगित्वेनाप्रस्तुते: संदेहप्रधानं च। आनन्दवर्धनावहेलित: कुन्तकेनोपादानकारणत्वेन समादृत: अलङ्कार इति पूर्वेषां मतिकलहे किं वा क्रियतामिति निगडितमति– र्मध्यमां प्रतिपदं प्रपद्यतेऽभावप्रतियोगितां स्फुटत्वे निवेश्य **'सर्वत्र सालङ्कारौ क्वचित्पुन: स्फुटालङ्कारविरहेऽपि न काव्यत्वहानि:'** इति ब्रुवाण:। अत एव कवलितमिदं लक्षणमव्याप्तिनाम्ना दूषणेन, वस्तुमूल– वस्तुध्वनावसङ्गते:।

२. हेत्वाभासाश्रितेनानुमानेन व्यञ्जनावृत्तेर्गतार्थत्वे प्रसक्ते ध्वनिवादिन इमे

धूलीप्रक्षेपेणैव कृतकृत्यम्मन्या लक्ष्यन्ते। न ह्यनुमानवादिना प्रतिज्ञायते अनुमानप्रमाणेऽन्तर्भावयामि ध्वनिमि'–ति। केवलमनुमानपदमेभिः प्रयुज्यते। तच्च प्रमाणाप्रमाणोभयसाधारणम्, 'पर्वतो धूमवान् वह्ने'रित्यादेरपि अनुमितिस्थलत्वेन सर्वैरपि दार्शनिकैरभ्युगमात्। एवं च हेतुगतेन दूषणेन प्रामाण्यमात्रं दूष्यते, न पुरनुमितित्वसामान्यम्। अथाऽपि वाग्देवताऽवतरेणापि मम्मटेन तदिदमन्यस्योष्णीषमन्यशिरसा योज्यते। इदं चाश्चर्यपदं परवर्त्तिनः काव्यशास्त्रिणस्तस्यैव पन्थानमनुसरन्तोऽवलोक्यन्ते। केयं प्रवृत्तिः साहित्यशास्त्राचार्याणामिति न शक्यमवगन्तुम्।

३. ध्वनिवादिनां परममस्त्रं शक्तिविरामवादः। अभिधाशक्तिर्मुख्यमर्थं प्रतिपाद्य विरमति। ततो वृत्त्यन्तरमुपादीयते भक्तिरिति गुणवृत्तिरिति लक्षणेति च तद् व्यपदिश्यते। अथ प्रयोजनप्रतिपत्तये तृतीया वृत्तिर्व्यञ्जनेति। उच्यते चैभिरिमास्तिस्त्रोऽपि वृत्तयः शब्दगता इति। अथ विचार्येत तृतीये क्षणे यदा अभिधा नश्यति तदा शब्दोऽपि कथं न नश्यति, शब्द इव ज्ञाने, ज्ञान इव च कर्म्मरूपायां वृत्तौ तृतीयक्षणनिष्ठध्वंसप्रतियोगित्वस्य समं प्रतिज्ञायमानत्वात् **'शब्दबुद्धिकर्म्मणां विरम्य व्यापाराभाव'** इति। प्रथमे क्षण एषामुत्पत्तिः, द्वितीये क्षणे बोधः, तृतीये च क्षणे ध्वंसः। अथ समनन्तरीयाणां शब्दादीनां प्रथमः क्षणः पूर्ववर्त्तिनामेषां तृतीयक्षणाभिन्नः। सोऽयं शृङ्खलाबन्ध एषाम्। एवं हि येन क्षणेन भगवती अभिधा विराममाश्रिता तेनैव क्षणेन भगवान् शब्दोऽपीति तदनन्तरमुपस्थापितानां ज्ञानानां कीदृशी नु शब्दनिष्ठता। अनुभवमिमं मम्मटोऽपि स्वीकुरुते वक्ति च **'लक्षणाऽऽरोपिता क्रिये'**–ति। वस्तुतस्तु लक्ष्यो व्यङ्ग्यश्चेति यौ द्वावर्थौ तयोर्न भवति पदार्थत्वम्, यच्च भवति तत् केवलं **पदार्थार्थत्वमेव**। अत्रैव

व्यक्तिविवेककारो व्यावल्गते–‘**अर्थस्यैकैव लिङ्गते**’–ति। न हि धूमादिभिः प्रत्यक्षं दृश्यमानैरर्थैरवगम्यमाना वह्न्यादयोऽर्थाः शाब्दा मन्यन्ते, अनुमीयमानानामर्थानां निरवकाशत्वप्रसक्तेः। ‘सर्वेऽपीमेऽर्थाः शब्दमूलका इति नापोहितुं शक्य एषां कारणत्वाच्छब्द’ इति तर्के तु स्वीक्रियेतैव पितामहपौत्रयोर्जन्यजनकभावः। सोऽयमुपप्लवः स्थितेः। विषहन्तेतमां च ध्वनिवादिन इमम्।

४. ध्वनिवादिनां प्राग्रहरस्य मम्मटभट्टस्य काव्यप्रकाशमङ्गलमपि परीक्षानिकषे म्लायमानच्छवि दृश्यते। तथाहि यथा वृत्त्या स्वयं मम्मटेनैव व्याकृतं पद्यस्यास्यार्थे ध्वन्यमानोऽस्ति व्यतिरेकः। अतिरेकरूपे व्यतिरेकेऽस्मिन् ययोरर्थयोरतिरेकसहं साम्यं तौ शब्दार्थरूपौ। कविसृष्टेः शब्दरूपत्वमस्त्येव प्रतीतम्, ब्रह्मसृष्टेः पुनरर्थरूपत्वमेवैकम्। सोऽयं प्रतिपिपादयिषितः साम्ययोगः शब्देनार्थस्यार्थेन च शब्दस्य। तत्रार्थस्य द्रव्यत्वमपि ब्रह्मसृष्टौ। तेन सह शब्दस्य केवलः समवाय एव तर्कसहः, न पुनस्तद्भिन्नः सादृश्यादिरूपः सम्बन्धः। यदि व्यतिरेक एवाऽत्र प्रतिपिपादयिषितस्तर्हि शब्दस्य शब्देनैव प्रतिपादनीयः, वक्तव्यं च ये ग्रन्था विज्ञानादिविषयकास्तेभ्यः काव्यरूपा ये ग्रन्थास्तेषामतिरेकोस्तीति तत्र प्रवर्त्तितव्यमिति। ब्रह्मसृष्टिसमाश्रितेषु विज्ञानादिग्रन्थेषु षड्रसत्वमेव, रसेष्वपि पर्युषितप्रायत्वमेव, कविसृष्टौ पुना रसा नव, नवापि च प्रतिनवाः अमेलयित्वा पूर्वोक्तान् षड् रसान्, इति। मन्ये विमर्शक्रम एष पद्यरत्नेऽत्र हृद्यतरायेत। अथात्र संवदति मन्मटार्थोऽभिनवगुप्तार्थेन ‘अपूर्वं यद् वस्तु’ इत्यादिना पद्यरत्नेन प्रतिपादितचरेण। एवं च नास्ति मोक्षो वैषम्यदौर्भाग्यात्।

५. मम्मटो हि काव्यस्वरूपनिरूपिकायां कारिकायां वामनमतमाद्रियते— 'अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्' इति। मतेऽत्र साधनानां प्रतिपादनं, न तु साध्यस्य। साध्यं हि सौन्दर्यमेव काव्ये, गुणालङ्कारौ पुनः साधनभूतौ। अवहेलित एष क्रम परवर्त्तिभिराचार्यैः साध्यमात्रे दर्शितादरैः। साध्यमिदं दण्डिना शोभेति, वामनेन सौन्दर्यमिति, साहित्यदर्पणकृता रस इति, पण्डितराजेन च रमणीयतेति व्यपदिश्यते। चमत्कार इति च सर्वेषामेषां साध्यानामेका संज्ञा। अत एव **'रमणीयार्थप्रतिपादकस्य वाक्यात्मनः शब्दस्य काव्यत्वं'** सिद्धान्तयति रसगङ्गाधरकारः, परिष्करोति चामुं पङ्क्तिं—**'चमत्कारजनकार्थप्रतिपादक—शब्दत्वमि'**—ति। सोऽयं सर्वोऽप्यर्थ आहृतः साहित्यदर्पणस्य **'वाक्यं रसात्मकं काव्यमि'**—ति प्रसिद्धतमात् काव्यलक्षणवाक्यात्। यच्चास्य रसगङ्गाधरे खण्डनं तत्राऽसहनत्वमुत्प्रेक्षामहे पण्डितराजस्य, अप्ययदीक्षितादिखण्डने दर्शितप्रकाशस्य। महान् हि आचार्यस्तत्र— भवानप्ययः। साहित्यशास्त्रे या परिष्कारस्य प्रौढा भाषा तस्याः साधक एष एव महान् मीमांसाचार्यः। चित्रमीमांसायामिव कुवलयानन्देऽपि वाक्यार्थपरिष्कृतौ महान् हि परिश्रमोऽप्यय— दीक्षितस्य। परिष्कारस्याऽभावादेवानन्दवर्धनमम्मटभट्टयोः प्रम्लिष्टाक्षरा वाक्। अन्यद्धि विवक्ष्यते अन्यच्च प्रोच्यत एभिः। अत एव मम्मटस्य काव्यप्रकाशे प्रायेण पञ्चाशट् टीकाः। अल्पीयानेवैष उपप्लवोऽप्ययभाषायाम्। अस्ति च पण्डितरायपदं पण्डितराजेति परिवर्त्त्य व्यावल्गमानस्य पण्डितराजस्याप्यस्य परिष्कारे स एष दोषः। स्पष्टमिदं काव्यलक्षणपरिष्कारस्य चरमाद् वाक्यात्—

**'स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतया चमत्कारत्ववत्त्व'**—मिति। अत्रातिव्याप्तिः स्पष्टा। तादृशप्रतिपादकताया मूर्त्तौ चित्रेऽपि

च सुलभत्वात् तत्र लक्षणमिदं सङ्गच्छत इति। येन चातिव्याप्तिरसौ परिह्रियते तस्य शब्दपदस्याऽत्र विस्मृतो निवेशोऽभिनिविष्टेन महता पण्डितेनानेन।

६. अनुयोगिप्रतियोगिभावो वा विशेष्यविशेषणभावस्य नियामकः, विशेष्यविशेषणभावो वा पूर्वस्येति प्रश्ने पण्डितराजमतिरेव विपर्यासमभिसरति रूपकालङ्कारप्रकरणे 'अभेदस्तावद् विशेषणस्य संसर्गो भवती'–ति प्रघट्टके।

उत्प्रेक्षालक्षणेऽपि पण्डितराजस्येयमेव स्थितिः। तत्रासावुत्प्रेक्षाया धर्मोत्प्रेक्षाप्रकारे नाशक्नोत् साधर्म्यं साधयितुम्। ततश्च धर्मोत्प्रेक्षायां सादृश्यवर्गीयत्वं न शक्यते साधयितुम्।

प्रतिवस्तूपमायामुपमात्वमाम्नातवन्तः प्राचीनाः कतिपये साहित्यविधातारः। तमिमं संप्रदायमपि स्मरति पण्डितराजः, किन्तु प्रतिवस्तूपमाम् उपमातः पृथक्कृत्वापि लक्षयत्येष सुमतिः। प्रतिवस्तूपमाया उपमातः पार्थक्ये निदानं चमत्कारकारकतत्त्वभेदः। उपमाया उपमालङ्कारत्वमुपजन्यते चमत्कारस्य सादृश्यनिष्ठत्वेन, प्रतिवस्तूपमायाश्चालङ्कारत्वे भवति कारणं चमत्कारस्य वस्तुप्रतिवस्तुभावजन्यत्वम्। अत एव प्रविभिद्यते रूपकादुपमा, अनन्वयाच्चोपमेयोपमा। एवं सत्यपि प्रतिवस्तूपमायामुपमात्वं पश्यता जगन्नाथेन पण्डितराजेन कथं नामानुस्त्रियन्ते प्राञ्चः, कथं च नाद्रियते तत्तुल्यकुल्यस्तत्रभवान् मीमांसात्रिकेऽप्यसदृशशक्ति–कोऽप्ययदीक्षितः।

का वा पूर्वोत्तरमीमांसाभ्यां भिन्ना तृतीया मीमांसेति पृच्छायां पुनरुत्तर्तुं शक्यते साहित्यमीमांसेति।

७. इदं च सुमहत् साहसं पण्डितराजस्य यदसौ सर्वमान्यत्वेन पूजितं व्याकरणप्रक्रियाशास्त्रमप्यन्यथयति। 'स्तोकं पचती'–त्यादौ

स्तोकादीनां क्रियाविशेषणत्वेऽपि विभक्त्यन्तरप्रयोगेऽपि दर्शित–साधुत्वबुद्धिः। यथा चेदं तदाकलयितुं शक्यत उपमालङ्कारप्रकरणान्तर्गते शाब्दबोधप्रसङ्गे। तत्र हि 'अरविन्दतुल्यो भातीति' स्थले भानमात्रस्य विधेयतायां विवक्षितस्यार्थस्याप्रतीतेः, उद्देश्यतावच्छेदकत्वे तुल्यत्वस्याभिषेके तु 'क्रियाव्ययविशेषणानां क्लीबत्वमि'ति नियमादरविन्दतुल्यं भातीति वचनस्य प्रसक्तौ पण्डितराजस्योक्तिः 'व्याकरणस्य सिद्धानुवादकत्वेन स्तोकं पचतीत्यादिमात्र– विषयत्वेनोपपत्ति'–रिति (पृ. २५०–५१)।

८. उत्प्रेक्षायामपि 'भावप्रधानमाख्यातमि'–ति वचने स्थितं प्रधान–पदमर्थपरं मत्वा 'भावार्थं भावार्थकमि'–ति ग्रहे व्याकरणसंप्रदायविरोधं नाविषह्यं मनुते पण्डितराजः–'न च वैयाकरणमतविरोधोऽत्र दूषणमिति वाच्यं स्वतन्त्रत्वेनाऽऽलङ्कारिक–तन्त्रस्य तद्विरोधस्यादूषणत्वात् (३९६ पृ.) इति। एवमेव 'लिम्पतीव तमोऽङ्गानी'ति मृच्छकटिकप्रयोगे भेदेनाप्युत्प्रेक्षणसिद्धि–मभिमन्यमानोऽसौ–वक्ति 'लेपनादिकर्त्तृत्वं तमआदिषु विषयेषूत्प्रेक्ष्यत इत्येव युक्तम्' इति। व्याचिख्यासति चायं 'कर्तृत्वम् अनुकूलव्यापारात्मकत्वेन 'अनुकूलव्यापारात्मकस्य कर्त्तृत्वस्यैव तिङर्थरूपाख्यातार्थत्वात्। तस्य च प्रथमान्ते विशेष्ये आश्रयतासम्बन्धेना(स्वरूपसम्बन्धात्मकेना)न्वयान्न दोष' इति (३९३–९४ पृ.)।

९. सहोक्तिप्रकरणेऽपि पण्डितराजस्य स्वैरतामिमां पश्यामो यत्रासौ विपरीतं धावति। तथाहि सहार्थतृतीयायाः प्रयोगादप्राधान्यस्योत्प्रेक्षणं व्यवहारविरुद्धमेव। न हि गुरुणा सहागतः शिष्य इत्युक्तौ गुरावप्राधान्यं किञ्चिदागच्छति, प्राधान्यं च शिष्ये, किन्तु यत्र

क्रियायां साक्षादन्वयस्तत्र कारकविभक्तेरभावः, यत्र च स तत्र कारकविभक्तिरिति व्यवस्थामात्रे व्यवस्थाया अस्याश्चारितार्थ्यम्, न तु ततोऽधिकेऽर्थे। इयञ्च विच्छित्तिः क्रियापदस्य वारद्वयं प्रयोगस्य वारणेन लाघवसाधनाय समाद्रियते, मा भूत् 'पुत्र आगतः, पिता आगतः' इति वारद्वयमागमनक्रिया प्रयुक्तेति (यत्र अप्रधान्यं विवक्षितं स्यात् तद्वाचकेन पदेन तृतीयया युक्तेन भाव्यमिति) कर्त्तृद्वयादेकत्र तृतीया अपरत्र पुनः प्रथमादिः प्रयोज्येति वचनव्यापार एव लाघवमुक्त्यानया सिषाधयिष्यते, न तु ततोऽधिकः कश्चनार्थः। कर्त्तृत्वद्वयादन्यतरस्मिन्नित्युक्तौ कतरस्मिन्निति प्रश्ने निर्धारकं किमिति पृच्छायां स्वैरत्वमात्रमुत्तरम् 'यथेच्छमि'ति। अप्रधानत्वञ्चात्र न तृतीयाया अर्थः, साहित्यमात्रप्रतिपादनेन तस्याः कृतकृत्यत्वात्। ततश्च न 'सहयुक्तेऽप्रधाने इति सूत्रेऽपि प्राधान्याऽप्राधान्यव्यवस्थायां शक्यमुत्प्रेक्षितुमविवक्षितत्वम्। एवं च पण्डितराजस्य वैयाकरणसिद्धान्तानां परिवर्त्तने यः संरम्भस्तत्र नानुभवाम औचित्यम्। इयं खलु समालोचना प्राचाम्। अथाऽऽधुनिकाः समालोच्येरन्।

आधुनिके युगे संस्कृतभाषया विरच्यमाने वैविध्यसमृद्धे वाङ्मये पद्यगद्यात्मना विरच्यमानानि काव्यान्यादीयन्तां नाम। गद्यसाहित्यमपि संप्रति ततस्ततः प्रकाश्यत एव, किन्तु प्राचुर्यं प्रामुख्यं च पद्यसाहित्यस्यैव। पद्यसाहित्येऽपि महान्तोऽपि प्रबन्धा विरच्यमानाः सन्ति महाकाव्यात्मना। पद्यत्वं न गेयच्छन्दस्त्वंमेव, गद्यस्य अपादपदसन्तानत्वेन लक्षितत्वात्। यदिदं गेयत्वं तच्च नान्यद् ऋते गीतेः। गातुं शक्यन्ते ये बन्धास्तेषां पद्यमिति संज्ञानम्। अथ पश्यन्तु भवन्तो वर्त्तमानं संस्कृतं जगत्। का न्वत्र स्थितिः कवित्वस्य। अत्यन्तं

प्रसादेन ब्रवीमि यद् अद्यत्वे समाद्रियतेतरामियं गीतिरेव भगवती समधिकम्। यस्मिन् काव्यबन्धे गीतियोगस्तस्येदानीं मूर्धन्यता स्वत एव सिद्धा। अस्माकमनेके सुकण्ठाः, रक्तकण्ठा वा संस्कृतकवय इदानीं कवित्वव्योम्नि नक्षत्रनाथायमाना दृश्यन्ते। अथ तुलादण्डो गीतपक्ष एव नम्रायमाणोऽस्ति। वराकं काव्यं व्याहन्यमानमनुभूयते। अस्ति चायं समयस्तेषां महात्मनां काव्यदर्शनज्योतिर्भिः परिव्याप्तसर्वस्वो येषु कनिष्ठिकामधितिष्ठन्ति महर्षिभूता श्रीअरविन्दघोषसदृशा महात्मानः। तेषामस्ति 'भवानी भारती'—नाम्नी संस्कृतकाव्यकृतिः। नास्ति तत्रानुप्रासलालित्यम्, न वोपमादिसमृद्धिः, तथापि तस्याः प्रभावस्तादृशो यो हि चिरं चित्ते प्ररूढ एव तिष्ठति। तत्र हेतुः कः? विभावयोजना ननु तत्र हेतुः। भारतमाता परतन्त्रासीत् तदानीम्। परतन्त्रायां व्यक्तौ ये वा घाता भवन्ति, विशेषेण स्त्रीविग्रहायां तस्याँस्तान् जानीम एव वयम्। अरविन्दमहर्षिर्भवानीभारत्यां भारतमातुः क्षतविक्षतं कायमेव चित्रयति। भाव इदानीं स्पृश्यते पठितुः। कवित्वमत्र स्पष्टम्। रचना तु न तथा प्रौढा। एवमेव महर्षिरेष सावित्रीनाम्न्याङ्ग्लभाषया निबद्धे महाकाव्ये भावगतामसदृशीमुदात्ततामुपस्थापयति। सैवैषा भूमिका काशीस्थितैः कामायनीकारैस्तत्पूर्ववर्त्तिभिस्तुलसीदासप्रभृतिभिरप्याश्रीयते स्म। अत एव तेषां महीयानेव समादरः समाजे। भूषणनामा भाषाकविः पाठायात्यन्तं प्रसिद्धः। एवं गीतिमयः काव्यपाठः कलायुग्ममास्वादयति 'काव्यकला सङ्गीतकला' चेति, भिन्ने चेमे कले। उक्तमप्यस्माभिः—

**काव्यात् सङ्गीतकं भिन्नमर्थहीनस्वरात्मना ।**
**सङ्गीतं प्रथते, काव्यं पुनरर्थात्मना स्थितम् ॥** १८५॥

इमां सङ्गीतिमेवाश्रित्य गद्यात् पद्यं महीयते। काव्यत्वं पुनर्गद्यबन्धेऽपि भवति प्रकामं प्रविसृत्वरम्। पश्यन्तु भवन्तः साम्प्रतं

संस्कृतक्षेत्रे कविरूपेण के वा पूज्यन्ते इति।

अथ काव्यानामाकारेऽपि दृष्टिर्दीयेत। सम्प्रति हि तेष्वपि पद्यबन्धेषु स्तुत्यमेव काव्यत्वमाधीयमानं दृश्यते नूतनतां प्रति बद्धभावैः समीक्षकैर्येषामायामविस्तरौ नितान्तमल्पीयांसौ भवतः। तद्यथा हायकूछन्दसोपनिबध्यमानं काव्यजातम्। अहमदाबादनगरीया नागरप्रभृतयः पुरस्कृताः कवयस्तथाविधमेवच्छन्द आदाय रचितविपुलसाहित्या विराजन्ते। अन्येऽपि बङ्गीयास्तद्देशीयां भङ्गीमाश्रित्य तथाविध काव्यजातमुपप्रस्तुवानाः दृश्यन्ते। सर्वथा स्वतन्त्रा एव भवन्ति कवयः 'कविवाचोऽनन्यपरतन्त्रत्वेन प्रसिद्धेः। इदन्तु केवलं परितापयति सचेतसः कृतविद्याँश्च सहृदयान् यत् क्षणेऽत्र ये महान्तः संस्कृतसन्दर्भास्तेषु न दीयते दृष्टिः। सर्गबन्धोहि विपुलाकार एव भवति प्रायेण। सम्प्रति प्रश्नस्तथाविधं बन्धं रचयितुं को वा विषय आदीयेतेति। पौराणिकाः कथार्थाः पर्युषितप्राया एव भवन्ति। ततश्च नास्ति तैरर्थो वर्त्तमानस्य। किञ्च तावान् काव्यार्थः क्व वोपस्थाप्येत, कथं वा मुद्रणं प्राप्नुयादिति, मुद्रणस्य महार्घत्वात्। अत्रास्माकं प्रतिपत्तिः—

काव्यार्थस्य चयनं वर्त्तमानं घटनाचक्रमादाय करणीयमिति। एतेनेतिहासोऽपि विरच्यते लभते च चारितार्थ्यं कविकर्मापि। वर्त्तमानेन कालेन वर्त्तयन्ति विचक्षणा इत्यभियुक्तानामस्ति समुद्गारोऽपि। भारतवर्षे प्रायेण दशमाद् वर्षशतकादासीत् प्रवृत्तं वैदेशिकं शासनं केन्द्रे। तदुच्छिद्य यैर्महात्मभिर्वीरैः संपूर्णं स्वातन्त्र्यं प्रापि तेषामपि जीवनमासीदत्यन्तमेव तपोमयम्। गुणेष्वपि तेऽभूवन्नसमोक्तेरेव विषयः। तेषामपि वृत्तान्यादाय समासव्यासाभ्यां सुशकमेव निर्माणं गद्यपद्यात्मकानां काव्येतिहासानां संस्कृतेऽपि रचना। मन्ये वीरं

सुभाषचन्द्रबोसमादाय आदाय वा महर्षिमरविन्दं नास्ति कापि महत्त्वपूर्णा कृतिः संस्कृते। काशीहिन्दूविश्वविद्यालयनिर्मातॄन् महामनसो मालवीय–चरणानाश्रित्यापि निर्मातुं शक्यते महाकाव्यमेकम्। अस्यान्दिशि विहितचापलैरस्माभिर्निर्मितमेव 'स्वातन्त्र्यसंभवं' नाम त्रयस्त्रिंशत्सर्गात्मकं महाकाव्यमेकम्। तस्य यो विचारस्य स्तरः स विमर्शकैरादृतोऽपि कठिन इति जुगुप्सितोऽपि। स चास्माकं दौर्भाग्यातिशयः। यद्यपि संस्कृतस्य कृते उत्कृष्टतमेन श्रीवाणीनाम्नाऽलङ्करणेन पुरस्कृतमिदं पुरस्कृतं च तैस्तैस्त्रिभिर्महद्भि पुरस्कारैः स्वैरमेव किञ्चिदालिख्यते प्रोच्यते च। मन्ये विचारस्य भूमिकैव तेषां भिन्ना। एतादृशैरेव सहृदयैरभिनन्दितः कुमारसम्भवस्य नवमं सर्गमादाय सप्तदशं सर्गं यावत् सन्दानितो भागः कालिदासकृतित्वेन, न च समालोचितस्तस्याऽसंस्कृतो वाग्व्याहारः। कालिदाससाहित्ये नास्ति काशी ऋते काशिराजदुहितेति पुरूरवोदाराणां नाम्नः पूर्वार्धघटनाम्। अस्ति च स्वातन्त्र्यसंभवे काश्या आध्यात्मिकं पाण्डित्यमण्डितं च स्वरूपमुपस्थापितम्। कालिदासे न लभ्यते प्रयागस्य कुम्भपर्वमेलायाः कथा। स्वातन्त्र्यसंभवे च मा किं त्रिसप्तत्या पद्यैरतीव सूक्ष्मतया निबध्यते सा। स्वतन्त्रतायां लब्धायां पञ्चापक्षेत्रे नोवाखालीक्षेत्रे च यज्जनहिंसायास्ताण्डवं तद्धि क्व वा लभ्यते स्वातन्त्र्यसम्भवं विहाय। एवमेव स्वातन्त्र्यसम्भवमेवैकं काव्यं यत्र वाँग्लादेशादुद्वासितानां लक्षशो जनानामुत्पीडना चित्रिता, चित्रितं च मानवस्य बीभत्सतममास्रपत्वम्। मानुषस्य या निभृता पीडा, तस्यां निगूहिता च या बर्बरताकथा को वान्यः समुदीरयेत् तां विहाय भगवतीं कविताम्। समुदीर्यते च सैषा केवलेन स्वातन्त्र्यसम्भवेन। अन्येऽपि काव्यस्यास्य विशेषा यत्र महर्षेररविन्दस्य प्रसीदति चेतस्तटी, प्रहृष्यति रवीन्द्रनाथजयशङ्करप्रसादयोश्चितिः। यच्चास्य भाषायाः क्वचित्

क्लिष्टत्वं तत्रापि नासीत् दोषत्वम्, संस्कृतभाषायाः सामर्थ्यं खलु तत्। न तादृशो बन्धो बन्धुं सुशको भाषान्तरेषु। विचाराणां यद् दार्शनिकं गाम्भीर्यं तदर्थं दृश्यमस्माकं कुमारविजयनामकं नूतनं महाकाव्यम्। यच्च प्राचीनतममस्माकं सीताचरितं तत्रापि नायं विशेषो नाभिनन्दितः। किन्तु, संस्कृतसमालोचकास्तथा नासिकामेषु विशेषेषु संकोचयन्ति यथा न दृश्यते तैरत्र गुणलेशोऽपि। इयं हि दशाऽद्यतनानां संस्कृतसमीक्षकाणां ततो भीताश्च ये काव्यकर्मिणस्तेषाम्। अस्त्यस्माकमेव दशाङ्कमेकं नाटकम् 'सप्तर्षिकाङ्ग्रेसमि'ति। तस्य प्रथमा या पङ्क्तिस्तयैवोपस्थापिताऽस्ति प्रयागस्योच्चन्यायालयेनन्दिरा–गान्धिविरुद्धस्य निर्णयस्य घटना। किन्तु, समालोचकेनैकेन लिखितं यन्नास्त्येव तस्या घटनाया अत्रोल्लेख इति। यो हि प्रथमामपि पङ्क्तिं न पठति सोऽप्यद्य प्रगल्भते सत्साहित्यस्य परीक्षणे, प्रगल्भते च कतिपये पत्रिकासम्पादकास्तथाविधाँल्लेखान् प्रकाशयितुम्। इत्यहो संस्कृतस्य वर्त्तमानम्॥

**रेवाप्रसादस्य सनातनस्य**<br>
**द्विवेदिनो यः खलु काश्यपस्य।**<br>
**ममैष लेखस्तमिमं जुषेत**<br>
**ब्राह्मयेव काचित् प्रतिभाऽऽत्मनो नः॥**

महामहोपाध्याय

# प्रो. रेवाप्रसाद द्विवेदी

आचार्य, एम.ए., पीएच्.डी., डी.लिट्.

| | | |
|---|---|---|
| जन्म | : | १९३५ |
| जन्मस्थान | : | ग्राम-नादनेर, सीहौर (म.प्र.)<br>कवि, नाटककार, आलोचक, संस्कृत काव्यशास्त्र तथा नाट्यशास्त्र के क्षेत्र में नवीन सिद्धान्तों के प्रवर्तक आचार्य।<br>कालिदाससाहित्य के पाठनिर्धारक। |
| सेवाएँ | : | प्राध्यापक (१९५९-७०), म.प्र. शासन,<br>रीडर तथा प्रोफेसर (१९७०-९५)<br>अध्यक्ष, साहित्यविभाग (१९७०-९०)<br>संकायप्रमुख, संस्कृतविद्याधर्मविज्ञानसंकाय, काशीहिन्दूविश्वविद्यालय, सम्प्रति वहीं १९९३ से इमेरिटस प्रोफेसर। |
| सम्मान तथा पुरस्कार | : | संस्कृत क्षेत्र में उत्कृष्ट सेवा के लिए राष्ट्रपतिपुरस्कार, (The Certificate of Hounour) १९७८ से,<br>साहित्यअकादमी पुरस्कार, १९९१,<br>कल्पवल्ली पुरस्कार, १९९३,<br>वाचस्पति पुरस्कार, १९९७,<br>श्रीवाणी - अलङ्करण, १९९९,<br>पी.वी.काणे स्वर्णपदक १९८३,<br>विशिष्ट पुरस्कार, उ.प्र. संस्कृत संस्थान २००२<br>वाल्मीकि पुरस्कार, उ.प्र. संस्कृत संस्थान २००३<br>आनरेरी फैलो एशियाटिक सोसायटी, मुम्बई-१९९५<br>इमरीटस फैलो, यू.जी.सी., १९९१-९३<br>महामहोपाध्याय, तिरुपति सं.वि.वि., १९९९<br>म.प्र. शासन से २-मित्र, १-भोज तथा १-व्यास पुरस्कार, उ.प्र. शासन से पाँच विभिन्न पुरस्कार। |
| संस्थापक | : | कालिदाससंस्थान, वाराणसी-५ |
| सम्पर्क | : | २८ महामनापुरी, वाराणसी-५ |
| दूरभाष | : | ०५४२-२५७०६८२ |

महामहोपाध्याय

# प्रो. रेवाप्रसाद द्विवेदी

आचार्य, एम.ए., पीएच्.डी., डी.लिट्.

| | |
|---|---|
| जन्म : | १९३५ |
| जन्मस्थान : | ग्राम-नादनेर, सीहौर (म.प्र.)<br>कवि, नाटककार, आलोचक, संस्कृत काव्यशास्त्र तथा नाट्यशास्त्र के क्षेत्र में नवीन सिद्धान्तों के प्रवर्तक आचार्य।<br>कालिदाससाहित्य के पाठनिर्धारक। |
| सेवाएँ : | प्राध्यापक (१९५९-७०), म.प्र. शासन,<br>रीडर तथा प्रोफेसर (१९७०-९५)<br>अध्यक्ष, साहित्यविभाग (१९७०-९०)<br>संकायप्रमुख, संस्कृतविद्याधर्मविज्ञानसंकाय, काशीहिन्दूविश्वविद्यालय, सम्प्रति वहीं १९९३ से इमेरिटस प्रोफेसर। |
| सम्मान तथा पुरस्कार : | संस्कृत क्षेत्र में उत्कृष्ट सेवा के लिए राष्ट्रपतिपुरस्कार, (The Certificate of Hounour) १९७८ से,<br>साहित्यअकादमी पुरस्कार, १९९१,<br>कल्पवल्ली पुरस्कार, १९९३,<br>वाचस्पति पुरस्कार, १९९७,<br>श्रीवाणी - अलङ्करण, १९९९,<br>पी.वी.काणे स्वर्णपदक १९८३,<br>विशिष्ट पुरस्कार, उ.प्र. संस्कृत संस्थान २००२<br>वाल्मीकि पुरस्कार, उ.प्र. संस्कृत संस्थान २००३<br>आनरेरी फैलो एशियाटिक सोसायटी, मुम्बई-१९९५<br>इमरीटस फैलो, यू.जी.सी., १९९१-९३<br>महामहोपाध्याय, तिरुपति सं.वि.वि., १९९९<br>म.प्र. शासन से २-मित्र, १-भोज तथा १-व्यास पुरस्कार, उ.प्र. शासन से पाँच विभिन्न पुरस्कार। |
| संस्थापक : | कालिदाससंस्थान, वाराणसी-५ |
| सम्पर्क : | २८ महामनापुरी, वाराणसी-५ |
| दूरभाष : | ०५४२-२५७०६८२ |